अदिति स्त्री न दीयते खण्ड्यते दृढत्वात् दो–क्तिच् न०त० । दाप् छेदे नयोग्यायां पृथिव्याम् "चक्षुरदितावसनमिति" ता०ब्रा० "अदितौ पृथिव्यामिति" भाष्यम् । वाचि निरुक्त० । दितिर्दैत्यजमाता विरोधार्थे न०त० । तद्विरोधिन्यां देवमातरि 'प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश । अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा । क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः । कद्रुश्च मनुजव्याघ्र ! दक्षकन्यैव भारतेति" भारतम् आदिप० । एता एव कश्यपाय दक्षेण दत्ता यथोक्तं तत्रैव "दक्षस्त्वजायताङ्गुष्ठाद्दक्षिणाद्भगवानृषिः । ब्रह्मणः पृथिवीपाल ! शान्तात्मा सुमहातपाः । वामादजायताङ्गुष्ठाद्भार्य्या तस्य महात्मनः । तस्यां पञ्चाशतं कन्याः स एवाजनयत् प्रभुः । ददौ स दश धर्माय सप्तविंशतिमिन्दवे । दिव्येन विधिना देव ! कश्यपाय त्रयोदशेति" अदितिरदीना देवमातेति निरु० । तद्देवताके पुनर्वसुनक्षत्रे । अत्ति सर्वाणि जातम् अद–इतिच् । सर्वनाशके मृत्यौ, परमेश्वरे च पु० । "स यद्यदेवासृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति तददितेरदितित्वम्, सर्वस्यैतस्यात्ता भवति सर्वमस्यान्नं भवति य एवमेतददितेरदितित्वं वेदे"ति बृ०उ० दिति खण्डनम् । तच्छून्ये अखण्डे । "क्षत्रियासि यज्ञियास्यदितिरसीति" यजु० "अदितिरखण्डितेति" वेददीप ।

अदितिज पु० अदितेर्जायते जन–ड । देवे । "द्वादशैवादितेः पुत्राः शक्रमुख्या नराधिप । । तेषामवरजो विष्णुर्यत्र लोकाः प्रतिष्ठिता इति" भारतम् द्वादश आदित्याः, शक्रादयः शक्रमुख्याश्च देवा अर्थ्यर्थः ।

अदितिनन्दन पु० ६त० । देवे अदितिसुतादयोऽप्यत्र ।

अदीन त्रि० दी–क्त न०त० । अकातरे कातर्य्यरहिते ।

अदुष्ट त्रि० न०त० । स्मृत्युक्तदुरदृष्टसाधनतारूपदोषरहिते । 'अदुष्टा सन्तता धारा" इति स्मृतिः "दुष्टानि च दुष्टशब्दे वक्ष्यन्ते ।

अदूर न० न०त० । दूरत्वविरोधिसामीप्ये "अदूरे जगदम्बायाः शारदीयो महोत्सवः" इति पुरा० । तद्वति त्रि० । "परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु इति" रघु ।

अदूषित त्रि० न०त० । दूषितभिन्ने स्मृत्युक्ते दोषानर्हे द्रव्यभेदे च । दूषितञ्च अस्पृश्यस्पर्शवत्त्वेन, पर्युषितत्वेन, विरसत्वेन, दोषजनकादृष्टविशेषहेतुत्वेन च स्मृत्यादौ दुष्टत्वेन कीर्त्तितम् तत्रैव क्वचिद्विषये प्रतिप्रसवः स्मृतावुक्तस्तादृशपदार्थस्तस्मादूषितम् । दूषितविवरणं दुष्टशब्दे वक्ष्यते ।

अदृश् त्रि० नास्ति दृक् दृष्टिरस्य । अन्धे चक्षुरिन्द्रियशून्ये । न पश्यति दृश–कर्त्तरि क्विप् न०त० । अदर्शके त्रि० ।

अदृश्य त्रि० न०त० । दृश्यभिन्ने । न द्रष्टुमर्हति । दर्शनानर्हे, परमेश्वरे च । "यत्तदद्रेश्यमविज्ञेयमग्राह्यमिति" श्रुतिः ।

अदृष्ट न० दृश–क्त न०त० । पुण्यापुण्यरूपे भाग्ये

अदृष्टपूर्व्व त्रि॰ न पूर्व्वं दृष्टः सुप्सुपेति स॰ पदनि॰। पूर्व्वमदृष्टे। "अदृष्टपूर्व्वं हृषितोऽस्मि दृष्ट्वेति" गीता।

अदृष्टि स्त्री विरुद्धा दृष्टिः विरोधार्थे अभावार्थे वा न॰त॰। क्रुद्धदृष्टौ, सरोषपक्रदृष्टौ, दर्शनाभावे च। ब॰। दृष्टिशून्ये त्रि॰।

अदेय त्रि॰न॰त॰। देयभिन्ने दानायोग्ये च। दानायोग्यश्च पुत्रादि—"स कुटुम्बाविरोधेन देयं दारसुतादृते नान्वये सति सर्व्वस्वं यच्चान्यस्मै प्रतिश्रुतमिति" याज्ञ॰ "अन्वाहितं याचितकमाधिः साधारणञ्च यत्। निक्षेपः पुत्रदाराश्च सर्व्वस्वञ्चान्वये सति। आपत्स्वपि च कष्टासु वर्त्तमानेन देहिना। अदेयान्याहुराचार्य्या यच्चान्यस्मै प्रतिश्रुतम्" इत्येवं स्मृतिनिषिद्धदाने वस्तुनि "योऽदत्तं प्रतिगृह्णाति यश्चादेयं प्रयच्छतीति" तदादानमपि स्मृतौ निषिद्धम्।"मद्यमदेयमपेयमग्राह्यमिति" स्मृतिः।

अदैवत त्रि॰ न देवान् त्रायते प्रीणाति अनेन त्रै—करणे क। देवप्रीणनासाधने यज्ञादौ "अदैवत्वादराधसः" इति श्रुतिः।

अदेवमातृक पु॰ न॰त॰। देवमातृकदेशभिन्ने नदीवृष्ट्यम्बुसम्पन्नब्रीह्यादिपालितदेशे। "वितन्वति क्षेममदेवमातृका" इति भार॰। ["अवज्ञानमदेवयुमिति" ऋ॰ ५,८,११।

अदेवयु त्रि॰ न देवं याति प्राप्नोति या—कु। देवाप्रापके।

अदेश पु॰ न॰त॰। गर्हितदेशे अयोग्यदेशे च। "नादेशे तर्पणं कुर्य्यात् न सन्ध्या नापि पूजनमिति" स्मृतिः। "स्त्रियः स्पृशेददेशे य" इति स्मृतिः। गर्हितदेशाश्च स्मृतौ दर्शिताः केचित् सम्प्रदर्श्यन्ते। "चातुर्वर्ण्यव्यवस्था तु यस्मिन् देशे न वर्त्तते। तं म्लेच्छदेशं जानीयादार्य्यावर्त्तं ततः परम्" इति विष्णु॰।"आनर्त्तकाङ्गमगधाः सुराष्ट्रा दक्षिणापथः। तथा च सिन्धुसौवीरा एते सङ्कीर्णयोनयः इति"।"पद्भ्यां स कुरुते पापं यः कलिङ्गान् प्रपद्यते। ऋषयो निष्कृतिं तस्य प्राहुर्वैश्वानरं हविरिति" बौधा॰।"अङ्गवङ्गकलिङ्गांश्च तीर्थयात्रां विना व्रजन्। प्रायश्चित्तं प्रकुर्वीतेति" स्मृतिः। दृष्टदेशेऽपि केचित् श्राद्धतर्पणादौ विशेषतोवर्ज्यां यथा "कृष्णं ऊषमयुतं क्लिन्नं सङ्कीर्णानिष्टगन्धिकम्। देशं त्वनिष्टशब्दञ्च वर्ज्जयेत् श्राद्धकर्म्मणीति"। "न म्लेच्छविषये श्राद्धं कुर्य्यान्नग्च्छेत्तु तथा नेष्टकाचरिते पितॄन् तर्पयेदिति" गङ्गलिखितौ। "परकीयगृहे यस्तु पितॄन् सन्तर्पयेद्यदि। तद्भूमिस्वामिनस्तस्य हरन्ति पितरो बलादिति" एवमन्येऽपि गर्हितत्वयोजकाः स्मृत्यादयुक्ता वेदितव्याः। "अदेशकाले यद्दान—तद्दानं तामसं विदुरिति" गीता।

अदेव न॰देव वैश्वदेविकश्राद्धं तन्नास्ति यत्र। वैश्वदेविकश्राद्धशून्ये नित्यश्राद्धे। तस्य पार्वणेतिकर्त्तव्यतया वैश्वदेवश्राद्धप्राप्तौ "अदैविकन्तु तत् कार्य्यमिति" स्मृतौ पर्य्युदासाच्चात वैश्वदेविकम् धिक नित्यश्राद्धशब्दे वक्ष्यते। अदैविकमप्यत्र। दैवं भाग्यम्। तच्छून्ये, दुर्भाग्यवति च त्रि॰।

अदोष पु॰ दोषः स्मृत्युक्तदुरदृष्टसाधनत्वम् अभावार्थे न॰त॰। स्मृत्युक्तदुरदृष्टसाधनत्वदोषाभावे। न॰ब॰। दोषशून्ये त्रि॰। अलङ्कारोक्तदोषशून्ययोः शब्दार्थयोः "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापीति" काव्यप्र॰। "अदोषं गुणवत् काव्यमिति" सरस्वतीक॰।

अद्द न॰अदति देवं अद—कर्म्मणि सन्। पुरोडाशे उज्ज्वलद॰।

अद्धा अव्य॰ अदति अत्ति तं सनत गमनं ध्यानं वा दधाति क्विप्। याथार्थ्ये साक्षात्कारे, स्फुटे, अवधारणे, अतिशये च। "अद्धा श्रियं पालितमङ्गरायेति" रघु। "यस्य स्वादद्धा न विचिकित्सास्तीति" श्रुतिः। अयं स्वरादिः पाठेन तेनोभयमरता। साक्षादादिषु पाठात् अद्धाकृत्येत्यादौ समासे ल्यप्।

अद्भुत न॰ अततीत्यत् अव्ययमाकस्मिकार्थे तथा भाति भा—डुतच्। आकस्मिके उल्कापातादौ, आलङ्कारिकप्रसिद्धे नवरसान्तर्गतविस्मयस्थायिभावके रसभेदे यथोक्तम् "अद्भुतो विस्मयस्थायिभावो गन्धर्व्वदैवतः॥ पीतवर्णो वस्तु लोकातिगमालम्बनं मतम्। गुणानां तस्य महिमा भवेदुद्दीपनं पुनः॥ स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसम्भ्रमाः। तथा नेत्रविकासाद्या अनुभावाः प्रकीर्त्तिताः॥ वितर्कावेगसम्भ्रान्तिहर्षाद्या व्यभिचारिणः इति"। यथा "दोर्द्दण्डाञ्चितचन्द्रशेखरधनुर्द्दण्डावभङ्गोद्यतष्टङ्कारध्वनिरार्य्यबालचरितप्रस्तावनाडिण्डिमः। द्राक्पर्य्यस्तकपालसम्पुटमिलद्ब्रह्माण्डभाण्डोदरभ्राम्यत्पिण्डितचण्डिमा कथमहो? नाद्यापि विश्राम्यतीति" इति॥ तद्वति त्रि॰। "कस्मादिदं तदद्भुतं इति" ज्योति॰। अद्भुतस्वरूपविभागादि "प्रकृतिविरुद्धमद्भुतमथनन् प्रकृतिविरुद्धमद्भुतमापद प्राक् प्रबोधाय देवाः सृजन्तीति" ज्योतिषतत्त्वे आथर्वणवाक्यं। "आपज्ज्ञानाय भूपादीनां पूर्व्वं स्वभावमन्यथा देवकर्त्तृकोऽद्भुतं इति रघु॰। तेषां लक्ष्यविध्यादि चान्यत्रात शब्दे उक्तम्। "उदयति स तदद्भुतमालिभिरिति" नैष॰। "तमद्भुतं बालकमम्बुजेक्षणमिति" भाग॰।

अद्भुतस्वन पु॰ अद्भुतः स्वनो यस्य ब॰। महादेवे। कर्म्म॰। आश्चर्य्यशब्दे। व॰। तथाभूतशब्दवति त्रि॰।

अद्रीश पु० अद्रीणाम् अद्रेर्वा ईश ६त०। हिमाचले, शिवे च।

अद्रुहन् त्रि० द्रुह–क्वनिप् न०त०। द्रोहाकर्त्तरि–"ता वां सम्यगद्रुह्वाणेषमिति" ऋ० ५,७०,२, "हे अद्रुह्वाणा अद्रोग्धाराविति" भाष्यम्।

अद्रोघ त्रि० द्रुह–घञ् वेदे घत्वम् न०ब०। द्रोहरहिते "त्व देहि सहस्रिणं रयि नोऽद्रोघेणेति" ऋ०३,२२,६, "अद्रोघेण द्रोहरहितेनेति" भा०। न०त०। द्रोहाभावे पु०।

अद्रोघावित त्रि० अद्रोघ अवितो येन। अद्रोहरक्षके। "क्रणुत धूमं वृषण सखायोऽद्रोघाविता" इति वेद।

अद्रोह पु० अभावार्थे न०त०। द्रोहाभावे "अद्रोहेणाभिमानितेति" "अद्रोह सर्वभूतानामिति" च पुरा०।

अद्वय न० न द्वयम्। द्वित्वाभावे। नास्ति द्वय द्वित्वं तज्ज्ञान वा यत्र। सर्वात्मत्वात् आत्मनो ब्रह्मात्मैक्यत्वे, अभेदे च। "अर्थतोऽप्यद्वयानन्दमतीतद्वैतभानत" इति वे०सा०। ब्रह्मा द्वय पश्यत इति अद्वय विज्ञानभेद पदार्थानामस्यत्र वादकत्वेन अस्त्यर्थे अच्। बौद्धभेदे ते हि "सहोपालम्भनियमादभेदो नीलतद्धियोरित्यनेन" पदार्थानां सविद्भिन्नत्वं वदन्ति विवरण बौद्धशब्दे द्रष्टव्यम्।

अद्वयवादिन् पु० अद्वय वदति सर्वमेव वस्तु चित्स्वरूप नान्यदतो द्वितीयमस्तीति वदतीति वद–णिनि। अद्वैतवादिनि वैदान्तिके, बाह्यार्थाभावेन ज्ञानात्मक सर्वं वस्तु स्वीकुर्वति बौद्धे च।

अद्वयस् त्रि० नास्ति द्वयं द्वित्वमस्य ब० योगविभागात् असिच् समा०। द्वित्वरहिते। "सखा सुशेवो अद्वया इति" ऋ० १,१८७,३, "अद्वया द्वयरहित" इति भाष्यम्।

अद्वयानन्द पु० नास्ति द्वय द्वित्व भेद तज्ज्ञान वा यस्य यत्र वा तादृश आनन्द। ब्रह्मरूपानन्दे अद्वैतानन्दे। "अर्थतोऽप्यद्वयानन्दमतीतद्वैतभानत इति" वे०सा०।

अद्वयाविन् त्रि०अद्वयमस्त्यर्थे विनि छन्दसि दीर्घः देवपितृयानरूपमार्गद्वयरहिते। "पुत्रस्य पाथ पदमद्वयाविन" इति ऋ० १,४ १५९, २, अद्वयाविन मार्गद्वयरहितस्येति भाष्यम्।

अद्वयु त्रि० द्वय द्विप्रकारोऽस्त्यस्य वा० उ न०त०। द्विप्रकाररूपकापट्यशून्ये अन्तर्बाह्यैकरूपे "उप द्वयुस्तावद्वयुश्च वसव इति" ऋ०८, १८, १५।

अद्वार न० निन्दित द्वारम्। प्रवेशानर्हे गुप्तद्वारे "अद्वारेण प्रवेशनमिति" "अद्वारेण न चातीयाद्ग्राम वा वेश्म वा पुरमिति" च पुरा०। नास्ति द्वारमस्य ब०। प्रवेशायोग्ये दुष्प्रवेशे, अगम्ये अनुपाये च त्रि०।

अद्वितीय त्रि० द्विधा इतं भेदं गतम् द्वीतम् तस्य भाव द्वैत तन्नास्ति यस्य ब०। सजातीयादिभेदशून्ये केवले परमात्मनि। वस्त्वद्वितीयमिति भा० "एकमेवाद्वितीय ब्रह्मेति" श्रुति। "अत्र एकम्, एव, अद्वितीयमिति" पदत्रयेण ब्रह्मणि भेदत्रयराहित्यमुक्तम्। तथाहि भेदस्तावत् त्रिधा स्वगतभेद सजातीयभेद विजातीयभेदश्चेति। वृक्षादीनां स्वावयवशाखादिभ्यो भेद स्वगतभेद, घटात् घटान्तरस्य भेद सजातीयभेद, घटस्य पटादितो भेद विजातीयभेद। ब्रह्मणस्तु "तदनन्यत्वमारम्भणशब्दादिभ्य" इति सूत्रेण स्वकार्यात् घटादितोऽनन्यत्वात् न स्वगतभेद। घटादेर्व्यवहारिकसत्त्ववत्त्वेन पारमार्थिकसत्त्ववतो ब्रह्मण विजातीयत्वे ऽपि ततोऽभेदएव तद्भिन्नत्वस्याभावात् "सर्वं खल्विद ब्रह्मेति" श्रुत्यन्तरात् तत्सजातीयवस्त्वन्तराभावादेव तद्भेद सिद्धएवेत्यादिकमाकरे दृश्यम्। द्वितीयशून्ये, असहचरे त्रि०।

अद्विषेण्य त्रि० द्वेष्टु शीलमस्य, द्विष–एण्यन्–किच्च न०त०। प्रियरूपे, "मयोभुरद्विषेण्य सखेति" ऋ० १,१८७,३, अद्वेषिण्य अद्वेष्यस्य प्रियस्य इति भाष्यम्।

अद्वेष पु० न द्वेष अभावार्थे न०त०। द्वेषाभावे। ब०। द्वेषरहिते त्रि०। "अद्वेषो हस्तयोर्दधे" इति ऋ० १ २४,४, "अद्वेष द्वेषरहित नास्ति द्वेषोऽस्येति" भाष्यम्। एतेन अद्वेष शब्दे एतन्मन्त्रस्योदाहरणत्वेनोपन्यास केषाञ्चित् भाष्यादर्शनमूलकः।

अद्वेषस् त्रि० द्विष–असुन् न०त०। द्वेषानाश्रये द्वेषाकर्त्तरि "अद्वेषो मरुतो गातुमेतनेति" ऋ० ५,८७,८, "अद्वेष अद्वेषस" इति भाष्यम्।

अद्वैत न० द्विधा इतम् द्वीत तस्य भाव द्वैतं भेदः अभावार्थे न०त०। अभेदे, "अद्वैत सुखदु खयोरनुगुण सर्वास्ववस्थासु यदिति" उत्तरचरितम्। नास्ति द्वैत भेदो यत्र। भेदरहिते त्रि० ब्रह्मणि न०। "अद्वैततत्त्व इव सत्यतरेऽपि लोक" इति नैषधम्।

अद्वैतसिद्धि पु० अद्वैतस्य जगतो ब्रह्माभेदस्य सिद्धिरत्र। स्वनामख्याते वेदान्तप्रकरणभेदे ६त०। तत्सिद्धौ स्त्री।

अध अव्य० अथ वेदे "सुपांसुलुगित्यादिना" वर्णव्यत्यय। अथशब्दार्थे "अधा नियत उत्तर" इति ऋ०४,१८,९ अधा "अथानन्तरमिति" भा०। अधायोपस्य पोषेणेति य० १२,८, अधेति अव्ययम् अथार्थे "निपातस्य चेति पा० दीर्घ इति वेददीप।

अधःक्षज पु० अधः [illegible] एकदेशिस । [illegible] प्रोक्ते [illegible] "[illegible]" [illegible] । "[illegible]" [illegible] ।

अधःकार पु० [illegible] । [illegible] [illegible] ।

अधश्चित्र त्रि० [illegible] [illegible] च । [illegible] ।

अधःपुष्पी स्त्री [illegible] (गवाक्ष्याम्) [illegible] (भावप्र०) इति ख्याते [illegible] ।

अधः(अधस्)तात् स्त्री [illegible] । [illegible] "[illegible]" [illegible] ।

अधम त्रि० [illegible] । [illegible] च । "[illegible]" [illegible] । "[illegible]" [illegible] । "[illegible]" [illegible] ।

अधम त्रि० [illegible] । [illegible] च । "[illegible]" इति । "[illegible]" [illegible] ।

अधमभृतक पु० [illegible] । "[illegible]" [illegible] । [illegible] इति [illegible] ।

अधमर्ण त्रि० अधमम् ऋणम् [illegible] च । [illegible] (भाषा) इति [illegible] ।

अधमर्णिक त्रि० [illegible] । [illegible] "[illegible]" इति [illegible] "[illegible]" [illegible] । [illegible] इति । [illegible] ।

अधमाङ्ग न० [illegible] । चरणे । [illegible] ।

अधमार्द्ध न० [illegible] । [illegible] ।

अधर पु० न ध्रियते धृ—अच् न त० । (ओष्ठ) इति ख्याते नीचे वा ओष्ठे । "[illegible]" [illegible] । "[illegible]" इति वा [illegible] । "[illegible]" इति [illegible] । "[illegible]" [illegible] । [illegible] । [illegible] । [illegible] त्रि० । [illegible] । [illegible] । [illegible] । [illegible] ।

स्त्री० दक्षिणदिग्वा भूगोले यथाधरत्वं तथा उदक्शब्दे वक्ष्यते । सर्वनाम्ना वृत्तौ पुंवद्भावात् अधरस्या भव० अधरतन इत्यादि अधरस्या वर्त्तते अधरस्यस्मि' अधरा अधरस्या अधरस्यामित्यर्थे अधरत इत्यादि । [अधोभागे इत्यर्थे ।

अधरतस् अव्य० अधर–तसिल् । प्रथमापञ्चमीसप्तम्यर्थवृत्तौ

अधरस्तात् अव्य०अधर+अस्ताति पृ० । अधरत इत्यर्थे । "पुरस्तात् सवितोत्तरत्तादधरत्तादिति"ऋ० १०,३६,१४,

अधरमधु न० अधरस्य मध्विव आस्वादातिशयात् । अधररसे । [एतदर्थे

अधरस्तात् अव्य० अधर+सप्तम्याद्यर्थे अस्ताति । अध-

अधराच् त्रि० अधरां दक्षिणां दिशमञ्चति क्विप् । दक्षिण दिग्भवादि । "प्राङ् वा उदङ् वाऽधराङ् वा प्रचायीताभिनन्वात इति छा० उ० । स्त्रियामधराचीति । सा च दक्षिणस्यां दिशि च ।

अधराचीन त्रि० अधराचि भव अधराच्+ख । अधःप्रदेशभवे । "अधराचीनमकृणोदपामप" इति ऋ० २,१७,५,

अधराच्य त्रि० अधरस्यां भव यत् । दक्षिणदिग्भवे अधोदिग्भवे च । "अरसं प्राच्यं विषमरसं यदुदीच्यम् अथेदमधराच्यमिति" वेद ।

अधरात् अव्य० अधर+अस्त्यर्थे आति । अधरतइत्यस्यार्थे । "पश्चादोत्तरादधरादापुरस्तादिति"ऋ० ६,१९,९, अधरात् दक्षिणत इत्यर्थ ।

अधरीण त्रि० अधरे भव अधर+ख । अधरभवे ।

अधरेण अव्य० अधरस्मिन् देशे, दिशि वा अधर+एनप् । प्रथमासप्तमीवृत्तौ आसन्ने नीचे देशादौ, सन्निकृष्टदक्षिणदिशि च । [लक्षणचारात् । अधरदिवसे ।

अधरेद्युस् अव्य० अधरे दिने अधर+एद्युस् । कालवृत्ति-

अधरोत्तर न० अधरश्च उत्तरश्च समा०द्व० । न्यूनाधिकवर्त्तिनि निम्नोन्नते । "स्यात् काकः पुरोडाशश्वावलिह्याद्विलस्था खाद्यं च न स्यात् कस्य चित् प्रवर्त्तेताधरोत्तरमिति" मनु ।

अधर्म पु० ध्रियतेऽनेन धृ–मनिन् विरोधे न०त० । धर्मविरोधिनि वेदादिनिषिद्धकर्म्मजन्ये पापे, तद्धेतुभूतप्राणिहिंसादौ च । "नोदनालक्षणोऽर्थो धर्म" इति सूत्रकारेण निषेधलक्षणोऽनर्थोऽधर्म इति तल्लक्षणं सूचितम् तत्र वेदप्रतिपाद्योऽर्थो धर्म, तन्निषेधप्रतिपाद्योऽनर्थ अधर्मः । स च निषिद्धकर्माधीन पापनामा अदृष्टभेदः । अनर्थश्च अनिष्टसाधनम् । तद्व्यवस्थायुक्तिस्तु "विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् अनिग्रहाच्चेन्द्रियाणाम् नरः पतनमृच्छतीति" । "शरीरजैः कर्मदोषैर्याति स्थावरतां नर" इत्यादिना शास्त्रेण कर्मणामाशुविनाशिनां कालान्तरभाविनरकादिजन्मविशेषान् प्रति हेतुत्वोक्तावपि तथात्व मध्यस्थद्वारीभूतमदृष्टं विना न सम्भवतीति तत् कल्प्यते अत 'चिरध्वस्तं फलायालमित्यादिना" अदृष्टशब्दे दर्शितयुक्त्या पापमत्वसाधनम् । "अधर्मेणैधते तावत् ततो भद्राणि पश्यति । ततः सपत्नान् जयति समूलस्तु विनश्यतीति" मनु । "अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहमिति" गीता । अधर्मभेदात् गतिविशेषोक्त्या-धर्मसत्त्वम् यथा

"कर्मभिर्नियतैर्देही जन्तुर्दुःखान्युपाश्नुते । येन येन तु भावेन कर्मणा पुरुषो गतिम् । प्रयाति परमां घोरां तत्ते वक्ष्याम्यतः परम् । अधीत्य चतुरो वेदान् द्विजो मोहसमन्वित । पतितात् प्रतिगृह्याथ खरयोनौ प्रजायते । खरो जीवति वर्षाणि दश पञ्च च भारत ! । खरो मृतो बलीवर्द्दः सप्त वर्षाणि जीवति । बलीवर्द्दो मृतश्चापि जायते ब्रह्मराक्षस । ब्रह्मरक्षश्च मासांस्त्रींस्ततो जायेत ब्राह्मण । पतितं याजयित्वा तु कृमियोनौ प्रजायते । तत्र जीवति वर्षाणि दश पञ्च च भारत ! । कृमिभावाद्विमुक्तस्तु ततो जायेत गर्द्दभ । गर्द्दभः पञ्च वर्षाणि पञ्च वर्षाणि शूकर । कुक्कुट पञ्च वर्षाणि पञ्च वर्षाणि जम्बुक । श्वा वर्षमेकं भवति ततो जायेत मानव । उपाध्यायस्य य पापं शिष्य कुर्यादबुद्धिमान् । स जीव इह संसारांस्त्रीनाप्नोति न संशय । प्राक् श्वा भवति राजेन्द्र ! ततः क्रव्यात्ततः खर । ततः प्रेतः परिक्लिष्टः पश्चाज्जायेत ब्राह्मण । मनसाऽपि गुरोर्भार्य्यां यः शिष्यो याति पापकृत् । स उग्रान् प्रैति संसारानधर्मेणेह चेतसा । श्वयोनौ तु स सम्भूतस्त्रीणि वर्षाणि जीवति । तत्रापि निधनं प्राप्य कृमियोनौ प्रजायते । कृमिभावमनुप्राप्तो वर्षमेकन्तु जीवति । ततस्तु निधनं प्राप्तो ब्रह्मयोनौ प्रजायते । यदि पुत्त्रसमं शिष्यं गुरुर्हन्यादकारणे । आत्मनः कामकारेण सोऽपि हिंस्रः प्रजायते । पितरं मातरञ्चैव यस्तु पुत्त्रोऽवमन्यते । सोऽपि राजन् ! मृतो जन्तुः पूर्वं जायेत गर्द्दभ । गर्द्दभत्वन्तु सम्प्राप्य दश वर्षाणि जीवति । संवत्सरन्तु कुम्भीरस्ततो जायेत मानव' । पुत्त्रस्य मातापितरौ यस्य रुष्टावुभावपि । गुर्वपध्यानतः सोऽपि मृतो जायेत गर्द्दभ । खरो जीवति मासांस्तु दश श्वा

[illegible] । [illegible] वर्षाणि [illegible] । [illegible] वर्षाणि [illegible] । [illegible] वर्षाणि [illegible] ।

[illegible] युधिष्ठिर ॥ [illegible] वर्षाणि [illegible] । [illegible] वर्षाणि [illegible] ।

वर्णान् हृत्वा तु पुरुषो मृतो जायेत वर्हिण । हृत्वा रक्तानि वस्त्राणि जायते जीवजीवक । वर्णकादींस्तथा गन्धांश्चोरयित्वेह मानव । छुच्छुन्दरित्वमाप्नोति राजन् ! लोभपरायण । तत्र जीवति वर्षाणि ततो दश च पञ्च च । अधर्म्मस्य क्षय कृत्वा ततो जायेत मानव । चोरयित्वा पयश्चापि बलाका सम्प्रजायते । यस्तु चोरयते तैल नरो मोहसमन्वित । सोऽपि राजन् ! मृतो जन्तुस्तैलपायी प्रजायते । अशस्त्र पुरुष हत्वा सशस्त्र पुरुषाधम । अर्थार्थी यदि वा वैरी स मृतो जायते खरः । खरो जीवति वर्षे द्वे तत शस्त्रेण वध्यते । स मृतो मृगयोनौ तु नित्योद्विग्नोऽभिजायते । मृगो वध्यति शस्त्रेण गते संवत्सरे तु स । हतो मृगस्ततो मीन सोऽपि जालेन वध्यते । मासे चतुर्थे सम्प्राप्ते श्वापद सम्प्रजायते । श्वापदो दश वर्षाणि द्वीपी वर्षाणि पञ्च च । ततस्तु निधन प्राप्य कालपर्यायचोदितः । अधर्म्मस्य क्षय कृत्वा ततो जायेत मानुष । स्त्रिय हत्वा तु दुर्बुद्धिर्यमस्य विषय गत । बहून्क्लेशान् समासाद्य संसारांश्चैव विंशतिम् । तत पश्चान्महाराज ! क्रिमियोनौ प्रजायते । क्रिमिर्विंशतिवर्षाणि भूत्वा जायेत मानुष । भोजन चोरयित्वा तु मक्षिका जायते नर । मक्षिकासङ्घवशगो बहून् मासान् भवत्युत । तत पापक्षय कृत्वा मानुषत्वमवाप्नुते । धान्य हृत्वा तु पुरुषो लोमश सम्प्रजायते । तथा पिण्याकसम्मिश्रमशन चोरयन्नरः । स जायते बभ्रुसमो दारुणो मूषिको महान् । दशन् वै मानुष नित्य पापात्मा स प्रजायते । घृत हृत्वा तु दुर्बुद्धि काकमद्गु प्रजायते । मत्स्यमांसमथो हृत्वा काको जायेत दुर्म्मति । लवण चोरयित्वा तु चीरिकाक प्रजायते । विश्वासेन तु निक्षिप्तं यो वै निह्नोति मानव । स गतायुर्नरस्तादृङ् मत्स्ययोनौ प्रजायते । मत्स्ययोनिमनुप्राप्य मृतो जायेत मानवः । मानुषत्वमनुप्राप्य क्षीणायुरुपपद्यते । पापानि तु नर कृत्वा तिर्य्यग् जायेत भारत ! । न चात्मन प्रमाणन्ते धर्म्मं जानन्ति किञ्चन । ये पापानि नरा कृत्वा निरस्यन्ति व्रतै सदा । सुखदु खसमायुक्ता व्याधितास्ते भवन्त्युत । असंवासा प्रजायन्ते म्लेच्छा अपि न संशय । नरा पापसमाचारा लोभमोहसमन्विता । वर्ज्जयन्ति च पापानि जन्मप्रभृति ये नरा । अरोगा रूपवन्तश्च धनिनश्च भवन्त्युत । स्त्रियोऽप्येतेन कल्पेन कृत्वा पापमवाप्नुयु । एतेषामेव जन्तूनां भार्य्यात्वमुपयान्ति ता । परस्वहरणे दोषाः सर्व्वे एव प्रकीर्त्तिता । एतद्वै लेशमात्रेण कथित ते मयाऽनघ ! । अपरान् सत्कथायोगे भूय श्रोष्यसि भारत ! । एतन्मया महाराज ! ब्रह्मणो वदत पुरा । सुरर्षीणा श्रुत मध्ये पृष्टश्चापि यथातथम् । मयाऽपि तच्च कात्स्न्येन यथावदनुवर्णितम् । एतच्छ्रुत्वा महाराज ! धर्म्मे कुरु मन सदा इ० व०।

"महापातकजान् घोरान्नरकान् प्राप्य दारुणान् । कर्म्मक्षयात् प्रजायन्ते महापातकिनस्त्विह । मृगश्वसूकरोष्ट्राणा ब्रह्महा योनिमृच्छति । खरपुक्कसवेणानां सुरापो नात्र संशय । कृमिकीटपतङ्गत्व स्वर्णहारी समाप्नुयात् । तृणगुल्मलतात्वञ्च क्रमशो गुरुतल्पग" इति । "श्वसूकरखरोष्ट्राणा गोऽजाविमृगपक्षिणाम् । चण्डालपुक्कसानाञ्च ब्रह्महा योनिमृच्छति । कृमिकीटपतङ्गाना विड्भुजाञ्चैव पक्षिणाम् । हिंस्राणाञ्चैव सत्त्वाना सुरापो ब्राह्मणो व्रजेत् । लूताहिसरटानाञ्च तिरश्चां चाम्बुचारिणाम् । हिंस्राणाञ्च पिशाचाना स्तेनो विप्र सहस्रश । तृणगुल्मलतानाञ्च क्रव्यादां दंष्ट्रिणामपि । क्रूरकर्म्मकृताञ्चैव शतशो गुरुतल्पग" इति । "ब्रह्महा क्षयरोगी स्यात् सुराप श्यावदन्तक । हेमहारी च कुनखी दुश्चर्म्मा गुरुतल्पग । यो येन संवसत्येषां स तल्लिङ्गोऽभिजायते । अन्नहर्त्ताऽमयावी स्यान्मूको वागपहारक । धान्यमिश्रोऽतिरिक्ताङ्ग पिशुन पूतिनासिक । तैलहृत्तैलपायी स्यात् पूतिवक्त्रस्तु सूचक । यद्वा तद्वा परद्रव्यमपहृत्य बलान्नर । अवश्यं याति तिर्य्यक्त्वं जग्ध्वा चैवाहुत हविरिति" । "परस्य योषित हृत्वा ब्रह्मस्वमपहृत्य च । अरण्ये निर्ज्जले देशे भवति ब्रह्मराक्षस । हीनजातौ प्रजायेत पररत्नापहारक । पत्रशाक शिखी हृत्वा, गन्धान् छुच्छुन्दरि शुभान् । मणिमुक्ताप्रवालानि हृत्वा लोभेन मानव । विविधानि च रत्नानि जायते हेमकर्त्तृष्विति" । "मूषिको धान्यहारी, स्याद्यानमुष्ट्र, कपि फलम् । जल प्लव, पय काको, गृहकारी ह्युपस्करम् । मधु दंश, पल गृध्रो, गा गोधा,ऽग्नि बकस्तथा । श्वित्री वस्त्र, श्वा रसन्तु, चीरी लवणहारक । प्रदर्शनार्थमेतत्तु मयोक्त स्तेयकर्म्मणि । द्रव्यप्रकारा हि यथा तथैव प्राणिजातय" इति । "द्रव्यस्यापह्रियमाणस्य यादृशा प्रकारास्तादृशा एव प्राणिजातय स्तेयकर्म्मण्यपहर्त्तारो भवन्ति यथा धान्यहारी मूष इति । अथवा यत्फलसाधनन्द्रव्यमपहरति तत्साधनविकलो यथा यज्ञतामस्वहारक इति" मिता०। "ब्रह्महा

[illegible]

अधःप्रस्तारिन् त्रि [illegible]

अधर्म्ममय त्रि [illegible]

अधर्म्मास्तम् त्रि [illegible]

अधर्म्मास्तिकाय पु [illegible]

अधर्मिन् त्रि [illegible]

अधर्मिष्ठ त्रि [illegible]

अधर्म्य त्रि [illegible]

अधमा स्त्री [illegible]

अधश्चर पु [illegible]

अधश्चौर पु [illegible]

अधश्शिरस् न [illegible]

अधस् अव्य [illegible]

अधस्तन त्रि [illegible]

अधस्ता(मा)म् अव्य [illegible]

अधस्तात् अव्य [illegible]

अधस्सरम् न [illegible]

अधामार्ग पु [illegible]

अधार्मिक त्रि [illegible]

अधर्म्मे–स्वारसिकप्रवृत्तिमति “अधर्म्मोच्चेति वक्तव्यमिति” उक्ति तु आधर्म्मिक इत्यप्यत्र त्रि० ।

अधि अव्य० न+धा–कि । अधिकारे, ऐश्वर्य्ये, स्वत्वे, अधिश्रयेत्यर्थे, उपरि, आधिक्ये, अतिशये च । अस्य ऐश्वर्य्ये, स्वत्वे च कर्म्मप्रवचनीयत्वेन तद्योगे सप्तमी, अधि रामे भूः, अधि भुवि राम इति । “अधि अध्ययने अर्थ्यैवधिस्मरणाधिकेषु” इति गणरत्ने उक्तम् तत्रो-पाध्यायादधीते इत्यादावध्ययने, इङोऽध्ययनार्थकत्वस्य अधिद्योतक । ऐश्वर्य्ये अधिपति, वशित्वे अधीनः, अधि-गतमिमम् व्याख्या०स० । स्मरणे मातुरध्येति इक स्मरणार्थत्व-मधिद्योतयति । अधिके, अधिकमिति अधि+कन् । “अधि-परी अनर्थकाविति” पा० उक्ते आनर्थक्ये गतित्वाभावात् नोपसर्गत्व तेन अध्यागच्छति इत्यादौ गतिसंज्ञाभावात् “गतिर्गताविति” पा० निघातो न । अतएव अस्य धात्व-र्थत्वमात्रद्योतकत्वेऽपि विशिष्टक्रियाद्योतकत्वाभावात् अन-र्थकत्वव्यवहार विशिष्टक्रियायोगाभावाच्च नोपसर्गत्वम् तेन “तस्मिन्नात्मचतुर्भागे प्राङ्नाकमधितस्थुषीति” रघौ न षत्वम् सति च क्रियाविशेषद्योतकत्वे अधितष्ठामित्यादाविव उपसर्गत्वेन षत्वमिति भेद । मुग्धबोधे तु “नात्राश्राया स्ततो नातिक्रमेऽति पर्य्यधी गताविति” गत्यर्थद्योतकत्वे नोपसर्गत्वमित्युक्तम् तेन नाकमधितस्थुषीत्यस्य गतवती-त्यर्थकतयोपसर्गत्वाभावाच्च षत्वमिति विवेक । तथा अधिके, “इतो वा सातिमीमहे दिवो वा पार्थि-वादधि” इति ऋ० १,६,१० “अधीमहे आधिक्येन याचामहे” इति भाष्यम् । उपरि “ये नाकस्याधि रोचने दिवीति” ऋ० १,१९,६, “नाकस्य दु स्वर्गस्थितस्य सूर्यस्य उपरीति” भाष्यम्, अधिकारे “यदत्र मामधि-करिष्यतीति” सि० कौ० । विभाषा कृञीति पा० । वा गतित्वमत्र विनियोक्तुरीश्वरत्वं गमयति अधिकारो विनियोग । आधिक्ये “अधिगत्य जगत्यधीश्वरादिति” नैष० अधिगत्येत्यादौ गमेर्विशिष्टज्ञानार्थत्वद्योतकत्वात् उप-सर्गत्वम् “धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते, तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधे”त्युक्ते विशिष्टज्ञानार्थता, तेन गतिसमासे ल्यप् । “अधिगत विधिवद् यद-पालयदित्यादौ” दायत्वेन लब्धमित्यर्थं । एवमन्य-त्रापि विशेषार्थद्योतकता विज्ञेया । आधीयते दु मनने-नेति आ+धा–कि वा इ०स्त्रस्व । मन पीडायाम् पु० ।

अधिक त्रि० अध्यारूढ एव स्वार्थे कन् उत्तरपदलोपश्च । प्रधाने अतिरिक्ते, “जन न सत्वेष्वधिको बबाधे” इति रघु । आधिक्य च योग्यपरिमाणातिक्रम अतिशयश्चेति । तत्रानुरूपातिक्रमे “अकालप्रसवा नार्य्य इत्युपक्रम्य “हीना-ङ्गीमधिकाङ्गीश्च जायन्ते यदि वा स्त्रय” इत्यरिष्टप्रकरणे वराहः । “हीनाङ्गमधिकाङ्गञ्च श्राद्धभोज्ये विवर्ज्जयेदिति” स्मृति । “इयमधिकमनोज्ञा वल्कलेनापि तन्वीति” शकु० । “अधिकं फलमश्नुते” इति पुरा० । असा-धारणे च । “ब्राह्मणस्याधिकं लब्ध, क्षत्रियस्य विजित, निर्विष्टं वैश्यशूद्रयोरिति” गौतम “ब्राह्मणस्याधिकं लब्धमिति ब्राह्मणस्य प्रतिग्रहादिना यल्लब्ध तदधिक-मसाधारणम् । क्षत्रियस्य विजितमित्यत्राधिकमित्यनुवर्त्तते क्षत्रियस्य विजयदण्डादिलब्धमसाधारणम् । “निर्विष्ट वैश्यशूद्रयोरिति”, अत्राप्यधिकमित्यनुवर्त्तते वैश्यस्य कृषि-गोरक्षादिलब्धं निर्विष्टमसाधारणं, शूद्रस्य द्विजशुश्रूषा-दिना भृतिरूपेण यल्लब्धमसाधारणम् । एवमनुलोमजाना-प्रतिलोमजानाञ्च लोकप्रसिद्धेषु स्वस्ववृत्तिषु यल्लब्धमसाधारण-मुक्त सूतानामश्वसारथ्यमित्यादि तत्तत् सर्वं निर्विष्टशब्दे-नोच्यते सर्वस्यापि भृतिरूपत्वात् “निर्वेशो भृतिभोगयो-रिति” त्रिकाण्डीस्मरणात् । तत्तदसाधारणं वेदितव्यम्” इति मिताक्षरा । दर्पणोक्ते अर्थालङ्कारभेदे यथा दर्पणे “आश्रयाश्रयिणोरेकस्याधिक्येऽधिकमुच्यते” । “किमधिकमस्य ब्रूमो महिमानं वारिधेर्हरिर्यत्र । अज्ञात एव शेते कुक्षौ निक्षिप्य भुवनानि” इत्यत्राश्रयस्य । “युगान्तकालप्रतिसं-हृतात्मनो जगन्ति यस्यां सविकाशमासत । तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुद ” इति माघे तु आश्रितस्याधिक्यम् । भावार्थे ष्यञ्–आधिक्यम् । उचित प्रमाणातिरेके न० । [अत्यन्तोत्कृष्टे च ।

अधिकतर त्रि० अधिक+तरप् । द्वयोर्मध्ये उत्कृष्टे एकस्मिन्,

अधिकतम त्रि० अधिक+तमप् । बहूनां मध्ये एकस्मिन् उत्कृष्टे, अत्यन्तोत्कृष्टे च ।

अधिकमास पु० कर्म्म० । मलमासे तद्विवरणमधिमासशब्दे ।

अधिकरण न० अधि+कृ–ल्युट् । आधारे, व्याकरणशास्त्रे “कर्तृकर्म्मव्यवहितामसाक्षाद्धारयत् क्रियाम् । उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतमिति” हरिपरिभाषिते अधिकरणसंज्ञके कर्तृकर्म्मद्वारा क्रियाश्रये कारके, यथा गेहे स्थाल्यामन्नं पचतीत्यादौ गृहस्य कर्तृद्वारा, स्थाल्याश्च कर्म्मद्वारा, परम्परया पाकक्रियाश्रयत्वात्, गृहादे । “आधारोऽधिकरणमिति” “सप्तम्यधिकरणे इति” पा० ।

अधिकरणं च तत्र सुखादेरा धर्मो न तत्र। यथा सुखत्वं आत्मनो गुणम्, गुणत्वं च संयोगादिष्वप्यस्ति इत्यात्मत्वं [illegible] यथा सुखादेरेतदात्मसम्बन्धि- त्वम् [illegible] न तु वैपरीत्य । इत्यादिषु सुखादेरेव [illegible] वा [illegible] अधिकर- णत्व [illegible] इत्यादिकरणत्वमित्येव बधम् । क्रियते [illegible] विचारोऽस्मिन्। पूर्वोत्तरपक्षयोः प्र- वृत्ते [illegible] [illegible] [illegible] यथा हि "सिद्धोऽसिद्धस्य पूर्वपक्षत्वेऽपरं सिद्धमपि सिद्धान्त- वाक्येऽधिकरणं पूर्वमिति" मीमांसा । तत्र विषय- एवं वाक्यं विषयः [illegible] विषय इत्यपि न वेति विषयः । तत्र [illegible] [illegible] [illegible] [illegible] विषय [illegible] । [illegible] [illegible] "[illegible]" इत्यादिवाक्यं विचारप्रसङ्गेन विषय । [illegible] ? [illegible] [illegible] ? इति संशय । [illegible] पूर्वपक्षः । [illegible] सिद्धान्त । तेन [illegible] इति [illegible] । [illegible] । [illegible] [illegible] [illegible] [illegible] । "[illegible] विषय [illegible] पूर्वपक्ष सिद्धान्तेति [illegible] इति [illegible] "[illegible]" [illegible] । [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] इति [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] इति । [illegible] [illegible] [illegible] [illegible]" इति [illegible] । [illegible] [illegible] यथा "[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible]

[illegible] विषयः । न चात्र [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] भेति [illegible] । पूर्वपक्षयुक्तिश्च [illegible] [illegible] । [illegible] [illegible] [illegible] । संदिग्ध हि [illegible] [illegible] [illegible] यथा हि [illegible] ? [illegible] [illegible] "[illegible] [illegible] [illegible] विषयात् । न द्वितीयः [illegible] [illegible] । [illegible] [illegible] [illegible] इति चेत् न [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] प्रयोजनं [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible] [illegible] प्रयोजनं [illegible] [illegible] न विद्यु । [illegible] [illegible] [illegible] [illegible] इति । [illegible] [illegible] । "[illegible] इति वा । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] अधिकरणम् ।

अधिकरणसिद्धान्त पु [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] सिध्यति इति । [illegible] [illegible] सिध्यति [illegible] [illegible] [illegible] [illegible] [illegible] सिद्धान्त [illegible] इति" वा ।

अधिकरणिक पु० अधिकरणम् धर्म्माधिकरणम् व्याश्रयतया- ऽस्यस्य ठन्। विचारकरणाय धर्म्माधिकरणमण्डपे नियुक्ते प्राड्विवाकादौ। तत्र नियुक्त ठञ्। व्याधिकार- णिकोऽप्यत्र पु०।

अधिकर्म्म(न्) अव्य० कर्म्मणि विभक्त्यर्थेऽव्ययी० वा अच्समा०। कर्म्माधिकृत्येत्यर्थे। अधिकं कर्म्म प्रा०स०। अधिक- कर्म्मणि। न०त०। अधिककर्म्मयुक्ते त्रि०।

अधिकर्म्मकर त्रि० अधिकं कर्म्म तत्करोति कृ—आनुलो- म्यादौ ट। गुश्रूषकभेदे दासभेदे। क्विप् अधिकर्म- कृदप्यत्र त्रि०।

अधिकर्म्मकृत त्रि० अधिकं कर्म अधिकर्म तत् कृतं येन निष्ठा- न्तस्य परनि०। "सर्वेष्वधिकृतो यः स्यात् कुटुम्बस्य तथो- परि। सोऽधिकर्मकृतो ज्ञेय" इति नारदोक्ते गुश्रूषकभेदे।

अधिकर्म्मिक पु० अधिकृत्य हट्टं कर्म्मण्यऽलम् अधिकर्म–ठन्। हट्टाध्यक्षे, हट्टस्थवणिग्भ्यः शुल्कादानकर्म्मणि नियुक्ते।

अधिकाङ्ग न० अधिकोऽङ्गात्। वर्मधरैर्योधैर्हृदयमध्ये वर्म- दार्ढ्यार्थं बद्धपट्टिकादौ। ब०। अधिकाङ्गवति त्रि०। "अजाविघातने चैव अधिकाङ्गः प्रजायते" इति शाता०।

अधिकार पु० अधि+कृ–घञ्। आरम्भे, यथेष्ट क्रयविक्रया- दिकर्त्तृत्वसम्पादके स्वामित्वे, "अधिकारः फले स्वाम्यमधि- कारी प्रभुर्भवेदिति" मीमांसोक्ते विहितकर्म्मफलस्वामित्वे, विनियोज्यपुरुषस्य सम्बन्धे, यथा याजनादिकर्मणि ब्राह्म- णादेः, राज्ञः प्रजापालनादौ, वैश्यस्य कृष्यादौ, शूद्रस्य द्विजसेवायाम्, "नैमित्तिकोऽयं प्रायश्चित्ताधिकारः" इति मिताक्षरा। स्वामित्वे–"सर्वे स्युरधिकारिण"इति स्मृतिः। तत्र च वैदिकादिकर्मसु कर्त्तव्यताज्ञानाधीनप्रवृत्तिहेतुरधि- कारः। यथा याजनादौ ब्राह्मणस्येत्यादि। शूद्रस्य नाध्य- यनादिष्वधिकारः यथोक्तं "निषेकादिश्मशानान्तो यस्य वेदो- दितो विधिः। तस्य शास्त्रेऽधिकारोऽस्मिन्नान्यस्यैव कदाचनेति" मनुना। न केवलम् अध्ययने शूद्राणामधिकारः यागा- दावप्यनधिकारः यथोक्तं जैमिनीयसूत्रभाष्यादौ। "चातु- र्वर्ण्यमविशेषात्" इत्याशङ्क्य "निर्देशाद्वा त्रयाणां स्यादग्न्याधेये ह्यसम्बन्धः क्रतुषु ब्राह्मणश्रुतिरित्यात्रेयः" इति। 'वा'शब्दः पक्षं व्यावर्त्तयति, "त्रयाणाम्" अधिकारः स्यात् कुतः ? अग्न्याधेये निर्देशात् अग्न्याधेये त्रयाणां निर्देशो भवति, "वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्यः, शरदि वैश्य"इति शूद्रस्य आधाने श्रुतिर्नास्ति इत्यनग्निः शूद्रः असमर्थोऽग्निहोत्रादि निर्वर्त्तयितुम्। तस्मात् "अग्निहोत्रं जुहुयात् स्वर्गकाम" इत्येवमादिः शूद्रस्य प्रापिका श्रुतिर्नास्ति। ब्राह्मणादीन् एवाधिकृत्य सा प्रवर्त्तते, ते हि समर्था अग्निमत्त्वात्, आहवनीयादयो न शूद्रस्य, अविधानात्, संस्कारशब्दत्वाच्च आहवनीया- दीनाम्। तस्मात् अनधिकृतोऽग्निहोत्रादिषु शूद्र इत्या- त्रेय मन्यते स्म" इति भा०। तथा कर्मप्रतिपादके सर्वशास्त्रे विहितकर्मसु मनुष्याणामेवाधिकारः न तिरश्चां न वा देवादीनां यथोक्तं तत्रैव "फलार्थत्वात् कर्मणः शास्त्रं सर्वा- धिकारं स्यात्"इत्याशङ्क्य "कर्त्तुर्वा श्रुतिसंयोगाद्विधि- कात्स्न्र्येन गम्यते" इति सू०। 'वा'शब्दः पक्षं व्यावर्त्तयति। न चैतदस्ति तिर्यगादीनामपि अधिकारः इति। कस्य तर्हि ? । यः समर्थः कृत्स्नं कर्म अभिनिर्वर्त्तयितुम्। न चैते, शक्नुवन्ति तिर्यगादयः कृत्स्नं कर्माभिनिर्वर्त्तयितुम्, तस्मात् एषां न सुखस्याभ्युपायः कर्म, कथं यो न शक्यते कर्त्तुम्, सोऽभ्युपायः स्यात् ? इति। न देवानां, देवता- न्तराभावात्, न हि आत्मानम् उद्दिश्य त्यागः सम्भवति, त्याग एवासौ न स्यात्, न ऋषीणाम्, आर्षेयाभावात् न भृग्वादयो भृग्वादिभिः सगोत्रा भवन्ति, न चैषां सामर्थ्यं प्रत्यक्षम्। "अपि च तिर्यञ्चो न कालान्तर- फलेन अर्थिनः, आसन्नं हि कामयन्ते। "ननु च उक्तं, कालान्तरफलार्थिनः तिरश्चः पश्यामः, शुनः श्येनाश्चतुर्दश्याम् अष्टम्यां च उपवसत" इति उच्यते न जन्मान्तरफलार्थिन उपवसन्ति। 'कथं अवगम्यते ? वेदाध्ययनाभावात्, ये वेदमधीयते ते एतद्विदुः, "इदं कर्म कृत्वा, इदं फलममुत्र प्राप्नोति इति" न चैते वेद- मधीयते, नापि स्मृतिशास्त्राणि, नाप्यन्येभ्य अवगच्छन्ति, तस्मात् न विदन्ति धर्मम्। अविद्वांसः कथम् अनुति- ष्ठेयुः, तस्मात् न धर्माय उपवसन्ति इति। किमर्थस्य तर्ह्येषाम् उपवासः ? । उच्यते, रोगात् अरुचिरे- षाम्। कथं पुनर्नियते काले रोगो भवति ? । उच्यते नियतकाला अपि रोगा भवन्ति यथा तृतीयकचातुर्थका- दीति। तस्मात् मनुष्याणाम् अधिकारः इति। न च तिरश्चां द्रव्यपरिग्रहः, न हि एते द्रव्यं स्वेच्छया उप- युञ्जाना दृश्यन्ते, तस्मात् अनीशाना धनस्य। यत्तु, देव- ग्रामो हस्तिग्राम इति, उपचारमात्रं तत्। तस्मात् अपि न तिरश्चाम् अधिकार इति। यानि पुन- र्लिङ्गानि, "देवा वै सत्रमासत"इत्येवमादीनि, अर्थवादा ते विधिप्ररोचनार्थाः। विद्यते हि विधिरन्यः तेषु सर्वेषु,

[illegible] ... सर्वेषामधिकारः ... [illegible] ... "मनुष्याधिकारत्वाच्छास्त्रस्य" ... [illegible] ... "शास्त्रफलं प्रयोक्तरि" ... [illegible]

[illegible] ... "कर्मण्येवाधिकारस्ते" ... [illegible]

अधिकारविधि पु॰ अधिकारे फलस्वाम्ये विधिर्विधायकम्। ... [illegible] ... यथा "राजा राजसूयेन यजेत" ... [illegible]

अधिकारिता स्त्री अधिकारिणो भावः तल्। ... [illegible] ... अधिकारित्वम् अत्रार्थे न।

अधिकारिन् त्रि॰ अधिकरोति अधि+कृ–णिनि। ... [illegible] ... "अधिकारी च त्रिविधः" ... [illegible] ... "अधिकारिविशेषस्य नियमः" ... [illegible]

सने "ये मन्दास्ते तु सज्जन्ते ब्रह्मणोऽरूपकल्पने" इत्युक्तं । अतएवोक्तम् "प्रशान्तचित्ताय जितेन्द्रियाय प्रक्षीणदोषाय यथोक्तकारिणे—प्रदेयमेतत् सततं मुमुक्षवे इति । अत्र यथोक्तकारिणे इत्यनेन प्राक् ज्ञानोत्पत्तेः वर्णाश्रमविहित कर्मानुष्ठेयमेवेत्युक्तं शा० सूत्रकृताऽपि "विहितत्वादाश्रम कर्मापि" इत्युक्तम् गीतायामपि "आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते" इत्यनेन आरुरुक्षो यथोक्तकर्माधिकार उक्तः "कषाये कर्मभिः पक्वे ततो ज्ञानं प्रजायते" इत्यनेन कषायशब्द वाच्यचित्तदोषक्षयार्थं कर्मानिष्ठकतेत्युक्तम् । "द्वे ब्रह्मणी वेदितव्ये परञ्चापरमेव चेति" श्रुतावप्यधिकारिभेदात् निराकारसोपाधिकयो द्वयोर्ब्रह्मणोर्वेद्यतोक्ता । गीतायामपि "लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मया नघ ! ज्ञानयोगेन साङ्ख्यानां, कर्मयोगेन योगिनामिति" अधिकारिभेदात् ज्ञानकर्मणोरधिकार इत्युक्तम् । "सम्यक् ससाधनं कर्म कर्त्तव्यमधिकारिणा । निष्कामेण सदा पार्थ ! काम्यञ्च कामान्वितेन चेति" भवि०पु० । "अधिकारिणाऽर्थिना विदुषा समर्थेनेति" रघु० तेन विदुषस्तत्तत्कर्मजन्यफलार्थित्वम् तत्तत्कर्मकरणयोग्यत्वम् अपर्युदस्तत्वञ्च अधिकारिताप्रयोजकम् । तत्र फलार्थित्वञ्च सति कामे एव, मुमुक्षुत्वे तु न फलार्थित्वापेक्षकतेति भेदः । मार्कण्डेयपुराणे रुचिवाक्येन "पितृन्नमस्ये दिवि ये च मूर्त्ताः स्वधाभुजः काम्यफलाभिसन्धौ । प्रदानशक्ताः सकलेप्सितानां विमुक्तिदा येऽनभिसंहितेष्विति" अनेन फलार्थिनं प्रति तत्तत्फलदातृत्वं, तदनर्थिनं मुमुक्षुं प्रति मुक्तिदातृत्वमिति स्पष्टमुक्तम् एवं देवतानामप्यधिकारिभेदेन फलदातृत्वम् । अनभिसंहितेषु अनुद्दिष्टेषु फलेष्वित्यर्थः । अधिकारोऽस्यास्ति इनि । स्वामित्ववति "सर्वे स्युरधिकारिणः" इति स्मृति स्त्रियां ङीप् । "कृतान्त देवी वचनाधिकारिणीति" नैष० ।

अधिकार्थवचन न० अधिकार्थस्य स्तुतिनिन्दाभ्यामारोपितस्य वस्तुधर्मादतिरिक्तस्य गुणस्य वचनम् । स्तुत्यर्थवादे, निन्दार्थवादे च । यथा वातच्छेद्यं तृणमित्यत्र दुर्बलत्वेन निन्दा, काकपेया नदीत्यत्र च पूर्णजलत्वेन स्तुतिः गम्यते "कृत्यैरधिकार्थवचने" इति पा० ।

अधिकाम पु० अधिकः कामः । अत्यन्ताभिलाषे । व० । तद्वति त्रि० । कामे विभक्त्यर्थे अव्य० । काममधिकृत्येत्यर्थे अव्य० ।

अधिकृच्छ्र पु० अधिकं कृच्छ्रं कष्टं साधनतयाऽस्त्यस्य अच् । "बिल्वैरामलकैर्वापि कपित्थैरथवा शुभे । मासेन लोकेऽधिकृच्छ्रः कथ्यते द्विजसत्तमैः" इति (गरुड़पु०) उक्ते माससाध्ये व्रतभेदे । प्रा०त० । अधिककष्टे न० । तद्वति त्रि० ।

अधिकृत पु० अधि+कृ—क्त । आयव्ययाद्यवेक्षके, अध्यक्षे कर्मजन्यफलसम्बन्धिनि नियुक्ते, स्वामित्ववति च त्रि० । "महीपतीनां पृथगर्हणार्थं समादिदेशाधिकृतानधिश्रीरिति" रघु ।

अधिकृति स्त्री अधि+कृ—क्तिन् । अधिकारे । [आरोहणे ।

अधिक्रम पु० अधि+क्रम—भावे घञ् अमन्तत्वान्न वृद्धिः ।

अधिचित् त्रि० अधि+भावे कर्त्तरि वा क्विप्-तुक् च । परिचये, तत्कारिणि च । "विद्यामासामभयानामधिचितम" ऋ० १०.६२.२४ ।

अधिक्षिप्त त्रि० अधि+क्षिप—क्त । स्थापिते, निन्दिते कृताधिक्षेपे, प्रेरिते, तिरस्कृते च ।

अधिक्षेप पु० अधि+क्षिप—भावे घञ् । तिरस्कारे, स्थापने प्रेरणे च ।

अधिगत त्रि० अधि—गम कर्मणि-क्त । प्राप्ते, ज्ञाते च । "अधिगतं विधिवत् यदपालयदिति" रघु "अधिगतसकलकलाकलापकमिति" का०। अधिगताखिलवेदार्थः", इति वे०भा० ।

अधिगम पु० अधि+गम—घञ् । ज्ञाने, प्राप्तौ, स्वीकारे च । "अध्यात्मयोगाधिगमेनेति" गीता । निध्याद्रे प्राप्तौ च । "स्वामी स्वक्रयसंविभागपरिग्रहाधिगमेष्विति" गौत० । "अधिगमो निध्यादेः प्राप्तिरिति" मिता० ।

अधिगव अव्य० गवि विभक्त्यर्थे अव्ययी० वेदे अच् समा० । गवीत्यर्थे "न्यादीयो यदधिगव चौरस्मिति" वेद० ।

अधिगुण पु० अधिको गुणः प्रा०स० । अतिशयितविनयादिगुणे । ब० । तद्वति त्रि० । "याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा" इति मेघदू० । गुणे—विभक्त्यर्थे अव्ययी० । गुणमधिकृत्येत्यर्थे अव्य० । अधिगतो गुणो येन । ज्याधिरूढे धनुषि न० ।

अधिजिह्व पु० अधिका जिह्वा यस्य । द्विजिह्वे सर्पे तस्य द्विजिह्वत्वञ्च अमृतास्वादाशया कुशविलेहनात् । यथोक्तं भा०आ०प० । "यत्रैतदमृतञ्चापि स्थापितं कुशसंस्तरे । तद्विज्ञाय स्म ते सर्पाः प्रतिमायास्ततश्च तत् । सोमस्थानमिदञ्चेति दर्भांस्ते लिलिहुस्तदा । ततो द्विधा कृता जिह्वा सर्पाणां तेन कर्मणा । अभवंश्चामृतस्पर्शाद्दर्भास्तेऽथ पवित्रिणः । एवं तदमृतं तेन हृतमाहृतमेव च । द्विजिह्वाश्च कृताः सर्पा गरुडेन महात्मना' इति ।

अधिविन्निका स्त्री विवाहे दत्तौ धन् अधिविन्ना विविक्ता वा । (साधुविन्न) उपरिविवाहितायाम् ।

अधिश्रय पुं अधाश्रयणं श्रयः अधिश्रयं वा अत्र वा अधिकं च । पाकोपयोगाधारे अग्नि "अधि श्राद्धवर्षे" इति च ।

अधिज्योतिष नाम ज्योतींषि तिरस्कृत्य वर्तते अव् वेदा । सर्वशास्त्रादिज्योतिर्वेदाधिष्ठान अर्थे ।

अधिकाम्या स्त्री अधि+काम्य । कर्मकोशाद्दिवृत्ती । "आकर्ष काम्यमधिकृत्य" इति ध्वे । "साधु मनस्कामाधिकाम्या काम्याधि" इत्या । "अधिकाम्याधिक आह्वानाधिकि" एवा ।

अधिदृष्ट ह अधाध्यक्षो दृष्टम् अत्र ह । दृष्टोपरि आतृष्णे (मजराय) । ता ह । इति कि । दृष्टे निकायें अवधौ । दृष्टाधिकारार्थे अव ।

अधिदैव ह अधिकृतोऽस्य देव इत्यादिवत्सात् प्रा॰१५ । सर्वेशादिरूपे परमेश्वरे । दैवे निकायें अवधौ । देवाधि कारार्थे अव । अधिदैवं यथा मनु । अनुरधिका दिग्देवता । आधिदैविक दैवमा जाती हुताशनो सि ।

अधिदेवता स्त्री अधिकाधी देवता या ह । अधिगताऽस्त्री देवतायाम् । देवतायां अधिकारजन्य अधिष्ठान पालेय स्वस्वव्यापारेषु प्रवर्तयितृ नियमनकाम् । तत्र शाक्षात् परमेश्वरस्य सर्वावस्थ ह स अन्तर्याम्य शाश्वत्य । "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो, यं पृथिवी न वेद, यस्य पृथिवी शरीरं, यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । योऽप्सु तिष्ठन्नद्भ्योऽन्तरो यमापो न विदुर्यस्यापः शरीरं, योऽपोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । योऽग्नौ तिष्ठन्नग्नेरन्तरो यमग्निर्न वेद, यस्याग्निः शरीरं, योऽग्निमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । योऽन्तरिक्षे तिष्ठन्नन्तरिक्षादन्तरो यमन्तरिक्षं न वेद यस्यान्तरिक्षं शरीरं योऽन्तरिक्षमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो वायौ तिष्ठन् वायोरन्तरो यं वायुर्न वेद, यस्य वायुः शरीरं, यो वायुमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो दिवि तिष्ठन् दिवोऽन्तरो यं द्यौर्न वेद, यस्य द्यौः शरीरं यो दिवमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । य आदित्ये तिष्ठन्नादित्यादन्तरो, यमादित्यो न वेद, यस्यादित्यः शरीरं, य आदित्यमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो दिक्षु तिष्ठन् दिग्भ्योऽन्तरो यं दिशो न विदुर्यस्य दिशः शरीरं, यो दिशोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यश्चन्द्रतारके तिष्ठंश्चन्द्रतारकादन्तरो यं चन्द्रतारकं न वेद, यस्य चन्द्रतारकं शरीरं यश्चन्द्रतारकमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । य आकाशे तिष्ठन्नाकाशादन्तरो यमाकाशो न वेद यस्याकाशः शरीरं, य आकाशमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यस्तमसि तिष्ठंस्तमसोऽन्तरो यं तमो न वेद, यस्य तमः शरीरं यस्तमोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यस्तेजसि तिष्ठंस्तेजसोऽन्तरो यं तेजो न वेद, यस्य तेजः शरीरं, यस्तेजोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यधिदैवतम् । अथाधिभूतम् । यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरो यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं, यः सर्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यधिभूतम् । अथाध्यात्मम् । यः प्राणे तिष्ठन् प्राणादन्तरो यं प्राणो न वेद, यस्य प्राणः शरीरं यः प्राणमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो वाचि तिष्ठन् वाचोऽन्तरो यं वाङ् न वेद, यस्य वाक् शरीरं यो वाचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यश्चक्षुषि तिष्ठंश्चक्षुषोऽन्तरो यं चक्षुर्न वेद, यस्य चक्षुः शरीरं, यश्चक्षुरन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यः श्रोत्रे तिष्ठञ्छ्रोत्रादन्तरो यं श्रोत्रं न वेद, यस्य श्रोत्रं शरीरं यः श्रोत्रमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो मनसि तिष्ठन्मनसोऽन्तरो यं मनो न वेद, यस्य मनः शरीरं यो मनोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यस्त्वचि तिष्ठंस्त्वचोऽन्तरो यं त्वङ् न वेद, यस्य त्वक् शरीरं यस्त्वचमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो विज्ञाने तिष्ठन् विज्ञानादन्तरो, यं विज्ञानं न वेद, यस्य विज्ञानं शरीरं यो विज्ञानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । यो रेतसि तिष्ठन् रेतसोऽन्तरो, यं रेतो न वेद, यस्य रेतः शरीरं यो रेतोऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतोऽदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ताऽविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता, नान्योऽतोऽस्ति मन्ता, नान्योऽतोऽस्ति विज्ञातैष त आत्मान्तर्याम्यमृतोऽतोऽन्यदार्तम्" इति । सर्वेषां निकेतनाधिभूतानां दिग्वस्त्रादिवस्त्रादिप्रसिद्धाधिष्ठातृ- वर्गं यथा "सर्वात्मप्रपञ्चातीताद्य वैराजस्य पुंसः । दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः" इति सार ।

अधिष्ठातृदेवताविशिष्टवरप्रसादाच्चक्षुरादिवाक्पाण्यादिकारक इत्

तृपत्वदेवानाञ्च वैकारिकत्वमिति' राघवभट्टेन व्याख्यातम्। "वैकारिका दिगाद्याश्च चन्द्रेयैकादश स्मृता। इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिता" इति तद्धृताभियुक्तोक्तिः। तथा च श्रोत्रस्य दिक्, त्वचो वात, नेत्रस्य अर्क, रसनाया वरुण, घ्राणस्य अश्विनौ, वागिन्द्रियस्य वह्नि, हस्तस्य इन्द्र, पादस्य उपेन्द्र, पायो मित्र, उपस्थस्य (क) प्रजापति, मनस चन्द्र, इत्येते एकादशेन्द्रियाणामधिष्ठातृदेवाः। "ईश्वरं भास्करे विद्यादुमा विद्यान्निशाकरे। स्कन्दमङ्गारके विद्याद्बुधे नारायणं विदुः। गुरौ वेदनिधिं विद्यात् शुक्रे शक्रो विधीयते। शनैश्चरे यम विद्याद्राहोः कालं तथैव च। चित्रगुप्तोऽधिप केतोरित्येते ग्रहदेवता" इति (मत्स्यपुरा०) उक्ता ग्रहाणामधिदेवा। एतेषां पुनरधिष्ठातृदेवाश्च प्रत्यधिदेवतात्वेन व्यवह्रियन्ते ते च प्रत्यधिदेवताशब्दे दर्शयिष्यन्ते। अधिदेवताप्यत्रैव। "आदित्याभिमुखा सर्वे साधिप्रत्यधिदेवता" इति मत्स्यपु०। "ग्रयाद्धमूर्त्तैरधिदेवताक्रतिरिति" भट्टिः। चन्द्राधिदेवता उमा।

अधिदैवत न० अधिष्ठातृ दैवतम् प्रा०स०। अधिदेवताशब्दार्थे "शिवाधिदैवतं ध्यायेत् वह्निप्रत्यधिदैवतमिति" "विचिन्त्यो साधिदैवत"मिति च विष्णुध०पु०। दैवते विभक्त्यर्थे अव्ययीभाव। दैवतमधिकृत्येत्यर्थे अव्य०। "अथाधिदैवतम् आदित्यो वा" इति छन्दो० उ० "इत्यधिदैवतमिति बृ०उ०"। अधिदैवमप्यत्र अव्य०। "अधिदैवं किमुच्यते इति" गीता।

अधिनाथ पु० अधिको नाथ प्रा०स०। अधीश्वरे। "तत्राधिनाथमधिकृत्य दिवस्तथासाविति" नैष०।

अधिनाय पु० अधिनीयते वायुना गन्धाधारसूक्ष्मांशनयनद्वारा तत्तत्स्थान स्थितेऽसौ अधि+नी—घञ्। गन्धे।

अधिप पु० अधिपाति अधि+पा—क। प्रभौ ईश्वरे। "अथ प्रजानामधिप प्रभाते" इति रघु। "श्रिय कुरूणामधिपस्येति" भार०।

अधिपति पु० अधिक पति, अधि+पा—डति वा। ईश्वरे स्वामिनि "स वा एष सर्वेषां भूतानामधिपतिरिति" श्रुति। "सर्व्वस्याधिपतिर्हि स" इति मनु। "ततो भुजङ्गाधिपतेः फणाग्रैरिति" कुमा०। पत्यन्तत्वात् भावादौ यक् आधिपत्यम्। अत्यन्तैश्वर्य्ये म०। "शैलाधिपत्यं स्वयमन्वतिष्ठदिति" कुमा०। अपूर्व्वपदकत्वात् स्त्रियां ङीप् नकारान्तादेश। "विष्टम्भिनीं दिशामधिपत्नीमिति यजु० १४,५, अधिपत्नीं स्वामिनीमिति" दीप।

अधिपा त्रि० अधिपाति अधि+पा क्विप् अधिपतौ, अधिपालके च "स्वर्यद्दश्मन्नधिपा उ अन्धोऽभि" ऋ०७,८८,२।

अधिपु(पू)रुष पु० अधिक उत्तम पु(पू)रुष प्रा०स०। परमेश्वरे। पु(पू)रुषे विभ० अव्ययी०। पु(पू)रुषमधिकृत्येत्यर्थे अव्य०। [बहुप्रजायां स्त्री।

अधिप्रज त्रि० अधिका प्रजा यस्य। बहुप्रजायुक्ते। प्रा०स०।

अधिभू पु० अभिभवति स्वामीभवति स्वामर्थेऽत्राधि अधि+भू—क्विप्। प्रभौ।

अधिभूत अव्य० भूतेषु विभ० अव्ययी०। भूतान्यधिकृत्येत्यर्थे "अधिभूतं किमुच्यते" इत्यर्जुनप्रश्ने "अधिभूतं क्षरो भाव" इति भगवदुत्तरम् इति गीता। "भूत प्राणिमात्रमधिकृत्य भवतीत्यधिभूतमुच्यते" इति श्रीधर। अधिभूत भव अनुशतिका० ठिपदष्टृद्धि आधिभौतिकम्। भूतान्यधिकृत्य जाते तु खादौ त्रि०।

अधिभोजन न० अधिकमत्यन्त भोजनम् प्रा०स०। अत्यन्तभोजने। भोजन निरुक्ते धननामसु पठितम् अधिक धनं मूल्य यत्र। अतिमूल्यलभ्ये वस्तुनि त्रि०। "दश वस्त्राधिभोजना इति ऋ०६,४७,२३ अधिभोजना अधिक धनं मूल्य येषां तादृशानि दश वस्त्राणीति भाष्यम्।

अधिमन्थ पु० अधिक मथ्यतेऽनेन अधि+मन्थ—करणे घञ्। "उत्पाद्यत इवात्यर्थं नेत्र निर्मथ्यते तथा। शिरसोऽर्द्धं तु तं विद्यादधिमन्थ स्वलक्षणै" इत्युक्ते अरणिकाष्ठमन्थनाशयनभेदे।

अधिमांस न० अधिक मांसमत्र। "विशीर्णं मृदु मञ्जुल यकलमकार स्राव वा तदधिमांसनाम विद्यादिति" वैद्यकोक्ते रोगभेदे।

अधिमांसक पु० अधिको मांसो यत्र ब० कप्। "हनुस्थे पश्चिमे दन्ते महाशोथो महारुज। लालास्रावी कफकृतो विज्ञेय सोऽधिमांसक" इति वैद्यकोक्ते दन्तरोगविशेषे।

अधिमात्र त्रि० अधिका मात्रा यस्य अधिक प्रमाणमस्य मात्रच् वा। अधिकप्रमाणे।

अधिमास पु० अधिको रविमासादतिरिक्त शुक्लप्रतिपदादिदर्शान्तश्चान्द्रो मास प्रा०स०। मलमासे 'असक्रान्तमासोऽधिमासो निरुक्त'इतिकृत्युक्तो रविसक्रान्तिवर्जितो मासोऽधिमास। तथा हि "मीनादिस्थो रविर्येषामारम्भ प्रथमे क्षणे। ते चैत्राद्या" इत्युक्तदिशा मीनस्थे रवौ यस्य चान्द्रमासस्यारम्भ स चैत्र एव मेषस्थरवारब्धो वैशाख

तत्त्वचैतन्यकर्तृत्वे भिन्नाधिकरणे युक्तिसिद्धे तथा-प्युभ्रान्तिरियमित्यर्थः । किन्तु महदादिसूक्ष्मपर्यन्तं पश्यति भ्रान्तिबीजं तत्संयोगस्तद्विदानम् अतिरोहितार्थमन्यत्" कौ० । तदेतन्मतस्य शाख्य मुक्तावल्यां निराकृतं यथा "एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः किन्तु चेतनः कार्यकारणयोरभेदात् कार्यनाशे कार्यरूपतया नाशः स्यादित्यकारणस्य तस्य बुद्धिगतचैतन्याभिमानार्थानुपपत्त्या तत्कल्पनम् । बुद्धिश्च प्रकृतेः प्रथमः परिणामः । सैव महत्तत्त्वमन्तःकरणमप्युच्यते । तत्सत्त्वाच्छ्याभ्यां पुरुषस्य स-रामर्शौ । तस्या एवेन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना सम्बन्धः । पुरुषे कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाग्रहात् । ममेदं कर्त्तव्यमिति मदथ पुरुषोपरागो बुद्धेः स्वच्छतया चेतनप्रतिबिम्बादतात्त्विको दर्पणस्येव मुखोपरागः । इदमिति विषयोपराग इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विको निश्वासाभिहतदर्पणस्येव मलिनिमा । कर्त्तव्यमिति व्यापारावेशः । तेनायतत्वयवसो बुद्धिस्तत्परिणामेन ज्ञानेन पुरुषस्यातात्त्विकः सम्बन्धो दर्पणप्रतिबिम्बेन मुखस्योपलब्धिरुच्यते । ज्ञानादिवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मा अपि बुद्धेरेव कृतिसामानाधिकरण्येन प्रतीतेः । न च बुद्धिश्चेतना परिणामित्वादिति सांख्यमतमपास्तम् कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेस्तद्भिन्ने मानाभावाच्चेतनोऽहं करोमीति प्रतीतेः । बुद्धेः परिणामित्वाच्चैतन्यागे भ्रम इति चेत् तस्य ये कि नेष्यते । अन्यथा बुद्धेर्नित्यत्वे तत्पूर्वमसंसारापत्तिः । अचेतनायाः प्रकृतेः कार्यत्वात् बुद्धेरचैतन्यं कार्यकारणयोस्तादात्म्यादिति चेन्न अचिदः कर्त्तुर्जन्यत्वे मानाभावात् वीतरागजन्मादर्शनादनादित्वम् । अनादेर्नाशासम्भवान्नित्यत्वम्" मुक्ता० । वेदान्तिमते आविद्यिकजीवस्यैवौपाधिकं कर्तृत्वं शा०सू० भा० व्यवस्थापितम् यथा ।

"कर्त्ता शास्त्रार्थवत्त्वात्" । तद्गुणसारत्वाधिकारेणैवापरोऽपि जीवधर्मः प्रपञ्च्यते । कर्त्ता चायं जीवः स्यात् कस्मात् शास्त्रार्थवत्त्वात् एवञ्च यजेत जुहुयात् दद्यादित्येवंविधं विधिशास्त्रमर्थवद्भवति अन्यथा तदनर्थकं स्यात् । तद्धि कर्त्तुः सतः कर्त्तव्यविशेषमुपदिशति न चासति कर्तृत्वे तदुपपद्यते । तथेदमपि शास्त्रमेवमर्थवद्भवति "एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुषः" इति भा० । 'विहारोपदेशात्' सू० । "इतश्च जीवस्य कर्तृत्वं यज्जीवप्रक्रियायां सन्ध्ये स्थाने विहारमुपदिशति "स ईयतेऽमृतो यत्रकाममिति" "स्वे शरीरे यथाकामं परिवर्त्तते" इति च भा० । "उपादानात्" सू० । "इतश्चास्य कर्तृत्वं यज्जीवप्रक्रियायामेव करणानामुपादानं संकीर्त्तयति । "तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति' । "प्राणान् गृहीत्वेति च" भा० । "व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः" सू० । "इतश्च जीवस्य कर्तृत्वं यदस्य लौकिकीषु वैदिकीषु च क्रियासु कर्तृत्वं व्यपदिश्यते 'विज्ञानं यज्ञं तनुते कर्म्माणि तनुतेऽपि चेति" । ननु विज्ञानशब्दो बुद्धौ समधिगतः कथमनेन जीवस्य कर्तृत्वं सूच्यते इति नेत्युच्यते जीवस्यैष निर्देशो न बुद्धेः न चेज्जीवस्य स्यात् निर्देशविपर्ययः स्यात् विज्ञानेनेत्येवं निरदेक्ष्यत् । तथा ह्यन्यत्र बुद्धिविवक्षायां विज्ञानशब्दस्य करणविभक्तिनिर्देशो दृश्यते "तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति" । इह तु "विज्ञानं यज्ञं तनुत" इति कर्तृसमानाधिकरणनिर्देशात् बुद्धिव्यतिरिक्तस्यैवात्मनः कर्तृत्वं सूच्यत इत्यदोषः । अत्राह यदि बुद्धिव्यतिरिक्तो जीवः कर्त्ता स्यात् स स्वतन्त्रः सन् प्रियं हितं चैवात्मनो नियमेन सम्पादयेत् न विपरीतं, विपरीतमपि तु सम्पादयन्नुपलभ्यते । न च स्वतन्त्रस्यात्मन ईदृशी प्रवृत्तिरनियमेनोपपद्यते इति अत उत्तरं पठति" भा० । "उपलब्धिवदनियमः" सू० । यथायमात्मोपलब्धिं प्रति स्वतन्त्रोऽप्यनियमेनेष्टमनिष्टञ्च उपलभते एवमनियमेनैवेष्टमनिष्टञ्च सम्पादयिष्यति । उपलब्धावप्यस्वातन्त्र्यमुपलब्धिहेतूपादानोपलम्भादिति चेन्न विषयप्रकल्पनमात्रप्रयोजनत्वादुपलब्धिहेतूनाम् उपलब्धौ त्वनन्यापेक्षत्वमात्मनश्चैतन्ययोगात् । अपि चार्थक्रियायामपि नात्यन्तमात्मनः स्वातन्त्र्यमस्ति देशकालनिमित्तविशेषापेक्षत्वात् । न च सहायापेक्षस्य कर्त्तुः कर्तृत्वं निवर्त्तते । भवति ह्येधोदकाद्यपेक्षस्यापि पक्तुः पक्तृत्वम् । सहकारिवैचित्र्याच्चेष्टानिष्टार्थक्रियायामनियमेन प्रवृत्तिरात्मनो न विरुध्यते" भा० । "शक्तिविपर्य्ययात्" सू० । "इतश्च विज्ञानव्यतिरिक्तो जीवः कर्त्ता भवितुमर्हति । यदि पुनर्विज्ञानशब्दवाच्या बुद्धिरेव कर्त्री स्यात्तत शक्तिविपर्य्ययः स्यात् करणशक्तिर्बुद्धेर्हीयेत कर्तृशक्तिश्चापद्येत । सत्याञ्च बुद्धेः कर्तृशक्तौ तस्या एवाहंप्रत्ययविषयत्वमभ्युपगन्तव्यम् अहङ्कारपूर्विकायाः प्रवृत्तेः सर्वत्र दर्शनात् अहं गच्छाम्यहं भुञ्जेऽह

इन्द्रियात्मक मनश्चिदाभासमस्ति "ध्यायतीव लेलायतीव" इति श्रुतेः मनोवृत्तिरेवात्मनीति तथापि चैतन्यप्रधानत्वात् । तथा च स्मरन्ति 'इन्द्रियाणामुपरमे मनोऽनुपरतं यदि । सेवते विषयानेव तद्विद्यात् स्वप्नदर्शनमिति" । आत्मादयो मनसोऽवयवा इति श्रुतिः ताथ स्वप्ने इमा ते सन्मात्र-समताः एव स्वप्ने विहरन्ति । निद्रादोऽपि मनसोऽनागामत्व एव न तारमार्थिकोऽस्ति । तथा च श्रुतिस्तिरस्कारानुसारेण स्वप्न्यात्मा वर्णयति 'उतेव स्त्रीभिः सह मोदमानो जक्षदुतवापि भयानि पश्यन्निति' । वौद्धिकान्यपि तथैव मनस्त्र कल्पयन्ति(यान्त्वेतिः गिरिदन्दुम्)मध्याधर्मान् कर-रात्मनिति । तथोपादाने यद्यपि कारणेषु कर्तृत्वमर्श निर्देशनादपि तत्र मुख्यकर्त्तृत्वाभावः कर्तुः न इत्यत्र चैतन्ये-नर्तृत्वाभ्यासस्य दर्शितत्वात् । भवति च सोऽनेकप्रका-रो विषया (सोधानुध्यन्ते) (सोपैः रागानुध्यन्ते) इति च । यदि चानिद्रपादाने करणव्यापारोपरमात् नि-ध्यते न मातनम्, कस्यचित्, चाक्षुषिदृशिकस्यापि तामि दर्शनव्यापारोपरमस्य दर्शनात् । अन्वयं व्यतिरेको दर्शित "निशान्त यथा तदुते" इति च बुद्धेरेव कर्तृत्व मापयति निखिलमन्तरत्व नः सविद्धत्वात् धनोऽनन्तर पाठाञ्च "तस्य श्रद्धैव शिरः" इति विज्ञानमयस्य तस्य महाद्यवयवस्य कीर्तनात् श्रद्धादीनाञ्च बुद्धिधर्मत्वप्रसिद्धेः "विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते" इति च वाक्य-शेषात् ज्येष्ठत्वस्य बुद्धौ प्रसिद्धत्वात् "स एष वाचचित्त-स्योत्तरोत्तरक्रमो यद्यज्ञ"इति च श्रुत्यन्तरे यज्ञस्य वाग्बुद्धि साध्यत्वावधारणात् । न च बुद्धेः शक्तिविपर्ययः करणानां कर्तृत्वाभ्युपगमे भवति सर्वकारकाणामेव स्वव्यापारेषु कर्तृत्वस्यावश्यंभावित्वात् । उपलब्ध्यपेक्ष त्वेषां करणत्वं स चात्मनः । न च तस्यामप्यस्य कर्तृ-त्वमस्ति नित्योपलब्धिस्वरूपत्वात् । अहङ्कारपूर्वकमपि कर्तृत्वं नोपलब्धुर्भवितुमर्हति अहङ्कारस्याप्युपलभ्य-त्वात् । न चैवं सति करणान्तरकल्पनाप्रसङ्गः बुद्धेः करणत्वाभ्युपगमात् । समाध्यभावस्तु शास्त्रार्थवत्त्वेनैव परिहृतः । यथाप्राप्तमेव कर्तृत्वमुपादाय समाधिविधा-नात् । तस्मात् कर्तृत्वमप्यात्मन उपाधिनिबन्धनमेवे-स्थितम्"भा० । "अहङ्कारविमूढात्मा कर्ताहमिति मन्यते" इति गीतया कर्तृत्वस्याहङ्काराधीनतयौपाधिकत्व सूचितमिति द्रष्टव्यम्"।

तथा चान्तःकरणोपहितचैतन्यमेव जीवः स एव वेदान्ति-मते कर्त्तेति तत्त्वम् । तस्य च ईश्वराधीनत्वेन कर्तृत्वं तदपि "परात्तु तच्छ्रुतेः "इत्यादिशा० सूत्रभाष्ययोर्व्यक्तं चित तच्च ईश्वरशब्दे दर्शितमिति । स्त्रियां ङीप् कर्त्री । 'कर्त्तरि कृत्" कर्तृप्रत्ययोदाहृतौ वा" "अकर्त्तरि च कारके" 'कर्त्तृ-स्थितायां क्रम" "कर्त्तृकरणयोस्तृतीया" "कर्तृकर्मणोः कृति" इत्यादौ कर्त्तरि परस्मैपदम्" पा० "कर्तृकर्मव्यतिहारे च" इति तात्पर्यतः "तत्प्रयोजको हेतुश्च" पा० "स्वतन्त्रः कर्त्ता" पा० । कर्तृत्वं स्व-तन्त्रत्व० तत्र कर्तृत्वं ज्ञानचिकीर्षाकृत्याश्रयत्वे क्रियाश्रयत्वे च । तत्र नैयायिकमते व्याख्यातम् कर्ता इति वैयाक-रणमते कर्त्तरि यत् "कर्त्तरि कृत्" "ल्युट् च" भावे चार्थे चोक्त" पा० सूत्राभ्यां तदेव प्र-तिपादनात् "कर्त्तरि कृत् इत्यत्र कर्त्तृपदस्यैव परस्मै प्रत्ययः प्रकारत्वापि तद्वक्तव्येत्याकारे स्थितम् । अपि-कमात्त्वात्मशब्दे उक्तम् । "न कर्तृत्वं न कर्माणि लोक-स्य सृजति प्रभुः" गीता । ईश्वरभेदे पु० तस्य सर्वकर्तृत्वात् " "एतेषां पुरुषाणां च कर्ता यस्य चैतत् कर्म स वै वेदितव्य "इति श्रुतेस्तस्य तथात्वम् तथा च तस्य सर्वकर्तृत्व तथा ईश्वरशब्दे दर्शितम् । "सर्वस्य का-रणं कर्ता विधाता गहनो गुहः"विष्णुस० । रात—टच् । ब्रह्मेदके त्रि० स्त्रियां ङीप् "लोकधृक् लोकधृत्कर्ता"विष्णुस०। लोकधृता देवानां कर्त्ता भेदकः इत्येक नामेति 'भा०(कात) विधुद्रणले न० । तत्र कर्तृप्रत्ययात् तथात्वम्"चक्रभुजा कर्त्री च दधाना कर्तृकर्परो'तारध्यानम् । ईश्वरि-कायां स्त्री ङीप् । "कर्त्रीञ्च खर्परञ्चैव क्रमादवामेन बिभ्रतीम्" ताराध्यानम् । उभयमपि उग्रताराशब्दे दर्शितम् । (कातारी) ७कर्त्ययोग्य यन्त्रादा० । कल्प्यर्थे च । कर्तृकापि क्षुद्रखङ्गे स्त्री "हास्ययुक्तां त्रिने-त्राञ्च कपालकर्तृकाकराम्" तन्त्रसा० श्यामाध्यानम् । कृन्तति विश्लिष्यति कायम् रा—विच्छेदे तृच् । ज्वरादिरे-तत्त्वे पदाद्यादौ । ततोऽत्यर्थे मतुप् कर्तृमत् कर्तृयुक्ते त्रि० स्त्रियां ङीप् । "तुपायुद्भ्यां मतुप्"पा० चास्य उदा-त्तत्वम् । कर्तृशब्दे उपपदे दिवाविभेत्यादिना लभ्य टः । कर्तृकर कर्तृकारके तत्प्रयोजके । स्त्रियां ङीप् । इष्टे ईयसि च ठणेलोप कर्तिष्ठ कर्तीयान् । टचस्तु न लुक् । स्त्रीत्वभावे कर्तिष्ठ कर्तीयामिति भेदः ।

कर्त्त शैथिल्यकरणे अद० चुरा० उभय० सक० शैथिल्ये पक० सेट् कर्त्तयति ते कर्त्तापयतीत्येके अचकर्त्त त । कर्त्तयाम्-

[illegible]

[illegible]

तस्य पङ्के यत्र हि प्ररोह इति तस्य तथात्वम्। "र स्नपाणिपरिष्कृत कार्दमकवाराह कपोतकाप्रमोदकसाल-कारमकपुद्गलकर्दमकगतुलाक्षु वर्गगन्धककलमनीवारकोद्र-वोद्दालकश्यामाकगोधूमवेणुयवादय" सुश्रु०।

कर्दमाटक पु० कर्दमे इव पाटोगतिरस्य कप्। विशा-दिनिक्षेपस्थाने शब्दरत्ना०। [प्रचुरकर्दमयुक्तदेशे।

कर्दमिनी स्त्री कर्दमाः सन्त्यस्यां देशे पुष्करा० इनि।

कर्पट पु० न० कृ-पाणिनि निच्-कृत्-पट पृषो०। १ जीर्णवस्त्रखण्डे (ताना पाति), २ अर्थिमध्यर्दो। कारस्य पट पृषो०। पृषोदिमार्थिनार्थ गुणाग्रहो। ३ लाक्षाखण्डे। ४ कषायरक्ते वस्त्रे च। 'भीमसेनस्य पूर्वस्मिन् पश्चाप प्रतिपादितम्। नाभिमण्डलपूर्वस्यां भरतवृद्धस्य दिशि च। पूर्वस्यां कर्पटो नाम पर्वतोयसम्भवक्" काशिका ८।४० उक्त। ५ पर्वतभेदे पु०। [कादौ शब्दरत्ना०।

कर्पटिक त्रि० कर्पट-अस्त्यर्थे ठन्। कर्पटवस्त्रयुक्ते भिक्षु-

कर्पण पु० कृप-ल्युट् पृषो० वृद्ध्यभावः। शस्त्रभेदे। "चापवज्रकृपाणकर्पणप्रासपट्टिशशूलतोमरादि-महरणजातसमुपयुक्ता" दशकु०।

कर्पर पु० कृप्-अरन् वृद्ध्यभाव। १ कपाले घटावयवे २ गो-मयोद्भवाग्नि, अमर (माथार खुली), ३ वृक्षभेदे (खात) ४ कटाहे च मेदिनी ५ उडुम्बरे वृषे शब्दच०।

कर्पराश पु० ६त०। कपालांशे (खापरा) शब्दचि०।

कर्पराल पु० कर्पर इवाचरति अल-अच्। पर्वतपीलुभेदे। (आखरोट) शब्दार्थ रमानाथ।

कर्पराशिन् पु० कर्परेऽश्नाति अश-भोजने णिनि। वटुक-भैरवे। "श्मशानवासी मांसाशी कर्पराशी मखान्तकृत्" वटुकस्तवः। [त्यम्। कर्परोरूपे वस्त्रे हेम०।

कर्परिकातुत्थ कर्पर्येव स्वार्थे कन् कर्परिका सैव तु-

कर्परी स्त्री कृप-अरन्-वृद्ध्यभाव गौ० ङीष्। १ दारुहरिद्रा-कारभवे तुत्थे (तुँते) अम०। २ रसके भावप्र० खर्परीति पाठान्तर पाठ। रसकस्योपरसभेद उपरसभेदाश्च उपरसशब्दे उक्ता भावप्र० तद्गुणाद्युक्तं यथा "क(ख)र्परी रसक तथाद्य तद्रसक स्मृतम्। ये गुणास्तुत्थके प्रोक्तास्ते गुणा रसके स्मृताः'। तुत्थसामान्य तु शोधन इति भेदः।

कर्पास पु० न० कृपास। वस्त्रयोनौ (कापास) वृक्षभेदे अमरः। गौरा० ङीष्। तत्रैव स्त्री भावप्र०। "कार्पासी तुण्डकेरी च समुद्रान्ता च कथ्यते। कार्पासिका लघु कोष्णा मधुरा वातनाशिनी। तत्पलाश समीरघ्नं रक्तकृन्मूत्र-वर्द्धनम्। तत्कर्ण पिडकानाद पूयस्रावविनाशनम्। तद्वीज स्तन्यद वृष्य स्निग्ध कफकर गुरु" इति तत्रोक्ते।

कर्पासफल न० ६त०। (फाकाटी) कर्पासबीजे।

कर्पूर पु० न० कृप्-ऊरच् बा० ऊरच् वृद्ध्यभावः। स्वनामख्याते गन्धद्रव्ये, तद्गुणा भावप्र० उक्ता, यथा "कर्पूरं शीतलं वृष्य-चक्षुष्यो लेखनो लघु। सुरभिर्मधुरस्तिक्तः कफपित्तविषापहः। दाहतृष्णास्यवैरस्यमेदोदौर्गन्ध्यनाशनः। कर्पूरो द्विविध प्रोक्तः पक्वापक्वप्रभेदतः। पक्वात् कर्पूरतः प्राहुरपक्व गुणवत्तरम्। (अथ चीनका कर्पूर)"चीनाकस तु कर्पूर कफक्षयकर स्मृत। कुष्ठकण्डूवमिहरस्तथा तिक्तरसश्च स। कर्पूरो भूतनाशनः स्निग्धशोष्णास्रगादहृत्। पित्तस्यो-दाहशोषघ्न च शीत शुभदत् पर"। तस्य च "पोताश भीमसेन शितकर शङ्करावासकश्च पांशुपिञ्ज' अब्द-सार हिमवालुक जूतिका तुषार हिमशीतलः पत्रिका-स्वभेदात् द्वादश भेदा राजनि०। तत्र काशा० चतुरर्थ्यां छ। कर्पूरीय तत्सन्निकृष्टदेशादौ त्रि०। शु-भ्रादिपाठात् तस्यापत्ये। २ नरभेदे तस्यापत्य शुभ्रा० ढक्। कार्पूरेय तदपत्ये पु स्त्री। [कर्पूरे शब्दच०।

कर्पूरक पु० कर्पूर इव कायति कै-क। (कपूर) नामद्रव्ये

कर्पूरतिलका स्त्री उमासखीभेदे विजयायाम् शब्दमाला।

कर्पूरतैल न० कर्पूरस्य तैलमिव स्नेहः। कर्पूरस्नेहरूपे हिमतैले तैलभेदे राजनि०। "कटूष्ण हिमतैल स्यात् कफवातामयापहम्। दन्तदार्ढ्यकर पित्तकारक परि-कीर्त्तितम्" राजनि०।

कर्पूरनालिका स्त्री "एतादृश्या समितया सम्यक् कृत्वा पुट तत। लवङ्गोल्वणकर्पूरयुतया सितयाऽन्वितम्। पचेदाज्येन सिद्धेषा ज्ञेया कर्पूरनालिका। स याममद्यां ज्ञेया गुणैः कर्पूरनालिका" भावप्र० उक्ते पाकभेदसिद्धे भक्ष्यभेदे।

कर्पूरमणि पु० कर्पूरवर्णो मणि। रत्नभेदे, "कर्पूरम-णिनामाय युक्त्या वातादिदोषनुत्" राजनि०। कर्पूरा-श्मादयोऽप्यत्र पु०।

कर्पूररस पु० कर्पूर इव शुभ्रो रसः पारदः। पाकविशेषेण कर्पूररसकृते पारदे रसकर्पूरे तत्पाकप्रकार भावप्र० उक्तो यथा—

"अथ कर्पूररसस्य विधि' तत्र पारदस्य च विधिं शोधन कर्त्तव्यम्। शुद्धसूतसम कुर्यात् प्रत्येक गैरिक सुधी। इष्टि-का खटिका तद्वत् स्फटिका सिन्धुजन्म च। वल्मीक क्षार-लवण भाण्डरञ्जकमृत्तिकाम्। सर्वाण्येतानि सञ्चूर्ण्य वास-

कर्मकरणोर्वा टापाश्चिमघृषा । गिष्यानो वापिवस्तवा यत-वेदविधकर्मत्वम् । एत कर्मफलं यो यां दापास्तु स्वच्छादय । पासान्यलसत्वात् पमेदाचाडुर्मणोपिच । जातिकर्मकरणं-क्षोपिचेषोरक्षितैव च । कर्मापि हिविध प्रोयमशुभ शुभमेव च । अशुभ दासकर्मोक्तं शुभ कर्मकर्ता स्मृतम् । स्वच्छ-द्वाराशुचिस्थानरथ्यावस्करशोधनम् । गुह्याङ्गस्पर्शनोच्छि-ष्टविण्मूत्रग्रहणोज्झनम् । अशुभकर्म विज्ञेय शुभमन्यदत परम्”मिति—“तत्र शिष्योपेदविद्यार्थी । अन्तेवासी शिष्या-दिषु । गुरोरेव च कर्म करोति च स्वतम । कर्मस्यार्थता-मधिकाता अधिकर्मकृत् । अशुचिस्थानसु सर्वप्रद-मध्येपथादि गर्तादिकम् । अवस्कर स्वच्छमार्जितपां-श्वादिनिचयस्थानम् । उज्झनं त्याग । भृतकश्चात त्रिविधः । तदुक्तम्“उत्तमस्त्वायुधीयोऽत्र मध्यमस्तु कृषी-बलः । अधमोभारवाही स्यादित्येवन्त्रिविधोभृत”इति ।

कर्मकर्तृ पु० कर्मैव कर्त्ता । व्याकरणोक्ते कर्मच कर्तृत्व-विवक्षया प्राप्तकर्तृत्वभावे कर्मणि । “क्रियमाणन्तु यत् कर्म स्वयमेव प्रसिध्यति । सुकरैः स्वैर्गुणैः कर्त्तुः कर्मकर्त्तेति तद्विदुः” व्या० का० । कर्मकर्त्तरि च कार्यभेदातिदे-शमाह “कर्मवत् कर्मणा तुल्यक्रियः” पा० । सि०कौ० विवृतमेतत् यथा

“कर्त्तरि तु कर्मस्थया क्रियया तुल्यक्रिय कर्त्ता कर्मव-त्स्यात् । कार्यातिदेशोऽयम् । तेन यगात्मनेपदचिण्चि-ण्वदिट स्युः कर्त्तुरभिहितत्वात्प्रथमा । पच्यते ओदनः । भिद्यते काष्ठम् । अपाचि । अभेदि । भूत भावे सकारे कर्त्तुर्द्वितीया स्यादत्रातिदेशादिति चेन्न लकार वाच्य एव कर्त्ता कर्मवत् । लिङ्ग्याशिष्यङिति द्विलकारका-त्र इत्युक्ते भावे प्रत्यये च कर्तृत्वारोपात्तदुपस्थिते । अतएव तयक्तखलर्था कर्मकर्त्तरि न भवन्ति किन्तु भावे एव । भेत्तव्य कुसूलेन । भत्र पचिभिद्यो कर्मस्था क्रिया विक्लित्तिद्विधाभवनञ्च । कैवेदानीहस्त्या न तु गत्यर्था ? उच्यते । कर्मत्वकर्तृत्वायत्ताभेदोपाधिक तत्र नानाविधक्रियाया भेदमाश्रित्य व्यवहार । कर्मणेति किम् ? करणाधिकरणाभ्यां तुल्यक्रिये पूर्वोक्ते साध्व-सिरित्यादौ मा भूत् । किञ्च—कर्त्तृस्थक्रियेभ्यो मा भूत्, गच्छति ग्रामः, आरोहति हस्ती, अधिगच्छति शास्त्रार्थः, स्मरति जिघ्रति वा । यत्र कर्मणि क्रियाकृतो विशेषो दृश्यते, यथा पक्वेषु तण्डुलेषु, यथा वा छिन्नेषु काष्ठेषु तत्र कर्मस्था क्रिया, नेतरत्र । न हि चक्षुषा ग्रामस्य पदयोर्गमनादि किञ्चिदुपल-भ्यते । करोतिरुत्पादनार्थः । उत्पत्तिश्च कर्मस्था, तेन कारिष्यते घट इत्यादि । यत्रार्थेऽपि तु नैतत्सिद्धेरव । ग्लानेरस्यादिपदयुगलस्य कर्त्तृत्वात् एतेन भनुष्यश्रमानेऽर्थे इति व्याख्यानम् इदमत्रापि पत्रायां व्याख्यातम् यथा—“उत्पत्तिमात्रे कर्त्तृत्व एवं तैर्वाग्निवादते । व्यापार-भेदापेक्षायां करणत्वादिसम्भवः” इति वाक्यमनुस्मृत्य कर्तृत्वकर्मत्वादिव्यवस्थाप्य कार्यविशेषाय कर्मातिदेश-सूत्रमवतारयति कर्त्तरि त्विति । कर्मस्थया कर्मगत-स्थया क्रियया फलेन“फलव्यापारयोर्धातु ”रित्युक्तेः“धातो-रर्थः क्रियोच्यते 'इत्युक्तेश्चेत्यर्थ । तुल्य'क्रिय' समानाधि-करणक्रिय इत्यर्थ । किञ्च कर्मस्वभावकएव कार्यातिदे-शार्थ कर्मणेति पदम् “कर्मण्येऽपि च धात्वर्थे कर्मकर्ता च कर्मवत् । कर्तृत्वेऽपि च धात्वर्थे कर्मकर्त्ता च कर्तृवत्” इत्युक्तेः “कर्मस्थ पचतेर्भावः कर्मस्थाच भिदादयः” इत्युक्ते भिदादय कर्ममात्रस्था । गमनादयस्तु कर्तृस्था “कर्तृ-स्थो बुध्यतेर्भावः कर्तृस्थाच गमादय ”इत्युक्तेः । “व्यययो-र्वड्वाश्चिरैरचिव्यदिति” इमयोः चञ्चिजातिद्विकारणध्ये एकमकारस्तात्स्वरूपेत्यर्थ । तयक्तखलर्थेष्वत्र कापवत्त मायिक भिनोपास इत्यादौ कर्मकर्त्तरि कार्य दर्शनादिति बोध्यम् । यावद्विलभेदाभावेऽप्यौपाधिकभेदोऽस्तीत्याह कर्मत्वकर्तृत्वावस्थेति तथा चावस्थाभेदेन क्रियाभेदात् कर्त्तृ कर्मस्थक्रियया तुल्यक्रियत्वमिति भावः । नेतर स्येति । “निर्वर्त्त्ये च विकार्ये च कर्मवद्भाव इष्यते । न तु प्राप्ये कर्मणीति सिद्धान्तोऽयं व्यवस्थितः” इतीत्युक्ते क्रियाकृतविशेषवतोरेव निर्वर्त्त्यविकार्ययोः कर्मवद्भावो न तु तद्रहिते प्राप्य इति सिद्धान्तो बोधित इति भाव ”

भान च यथा बोधाधिक्य तथा मन्द०म० उक्त यथा

“अथ भिद्यते कर्मेदि कुसूल स्वयमित्यादौ भि-दावत्तुकूलव्यापारवाचकस्य तत्कार्ये तस्य कथ कु-सूलादावन्वय भिदादे परस्मैपदित्वेन तदर्थ धर्मितया कार्यधर्मोधने पदान्तरस्यासामर्थ्यात् यगिणो-विशुद्धस्यात्मनेपद चाह । एकक्रियाधर्मितया कर्तृता क-र्मतोभयो । बोधने कर्मताकाङ्क्षापेक्षोत्सर्गतोभ-वेत् । कर्मताकाङ्क्षा कर्तृतान्वयस्यैवानुकूला आत्म-नेपदयगादिसमभिव्याहाररूपाकाङ्क्षा व्युत्पत्तिवैचित्र्यादपे-क्षणीया न तु कार्यत्वान्वयस्य परस्मैपदविकरणादिसन्द-र्भरूपा यद्येवं तत्कुतः पर्याप्नो पच्यते इत्यपि प्रयोग

वा यादि न वदेत् । पटिया(पटी)(कर्पैटिका)(करविटी) विमुञ्चत वैश्याम् । कवचोदम् (करपाठो) कारकरणम् (कर्तरीय)कारकृतपक्षविका(कारिका)। कविपूर्वं कम कारयाय विमर्दयेत् । कर्पूरपथिक कम कारी वर्णो परिविपेत् । यथा कार्पासाक्षे कार्ये कर्पटो वा रचितमयात् । कारकाटिकपदा दटरिकमोर्यम् । यथो च दटेत् मोषुप च योम दत्तोत् । कफरविरोम दशो वां कारीय या विचारयेत् । कर्णि पैटमटे हयादाय हिमचूरयत् । कराटीयदि नाम रचेदाकारं यत् । वर्णेरहमरेदमकुरक्षयोर्मं रसम् । कर्पूररस पतित मक्षे वायुरूपवासम् । कटे कुडवमकपकर्पूरीयुग च दुचम् । कारमु चरति किरणाति पोपस वर्धते । लिम्पति तदरेति इति पीमेव विरुचम् । रसवति रमणीवर्णं रसकर्पूरसु वैद्य वक्ष्यम् ।

कर्पटस्वाम पु० कर्पटरचकर्पटिम का । 'कर्पूर कक्षकाक्ष करपटिलिवनम् रकारिके कर्णोमे कावाकामेरे ।

कर्पूरा स्त्री कर-कर्पूर कर-वास्कपाद । शारदामेरे । "दायेमेरादकमा च हरमी दायराद च । कर्पूरा नगरमा कात हरीनाम् हरमावका वासक वनुप कोप । करपद के द कटिराया गढ़वा शिवामहजा का शाकमा वथा "दार्गी दायकटिरा कान मोरदाद च मडूक्षा । कर्पूरी शीहक कारणो कहयो । दार्गी कटिकेयाम भूषकवीकटीयदव" ।

कर्पूरिन् त्रि० कर्पूरोऽस्त्यस्य इनि । कर्पूरवर्मा वस्य कपालम् युक्त । कर्पूर कवाकुतमनेवारी त्रि ।

कर्पूरीकर चौमार्ते त्रि० पिकृतो वचा प्रतिविम्ब का कोर्पवाय यत प्रतिविम्ब यम कथर । इसे करपरा वम नि प्रतिविम्ब कर्णात् वध वयानम् ।

कर्म गती वा पर वध वैद । कर्मति अकर्मीत् । चकर्म ।

कर्क पु० कर्क—क । ।वितस्य कर्कारि त्रि० न्याय कर्कटकर्का पौराक्षम किम्रो दूरि । किरविराः कर्मीका कवि-का योमयोपिता वाम । कार्मे कर्पू कर्मो

कर्पूरदार पुं० कर्पू कर्पूरदारमति वर्णं ड—विन् भर वथ । ।पीतिरदरस्ये रसेयकाफले च रजका रसेकर्पिरूढा मदन । "कौटिदारमारारचिकारि दप । कर्पू वैनय कपूरम् । विमानकलादर्व मसिरसवरिय कर्पूरलादमानीनां देवानि कपरोषि धवं । "कर्पूर पृथिवेकाय सके करदारकोविदारचम्पीनि "कारकारदौताकानि दत्रिविकशानि । करत च निर्दे कूर्चो मंवाक्षीति दवति च दति दुड़ेन भोरि दारादक मेदम निर्दे यत शकाम मेद दति मौवम् ।

कर्पूरारक पु० कर्पू दानु दारयति वर्ण ड—विच चत । मे दाककाये राजनि ।

कर्पूर पु० कर्प गतौ कु रा करच् ।।निजवर्णे माये चापकर्षे कव वंवकोरक्ष ववानम् । रवादि त्रि० "कामदेवयोग-कर्पूरम् कुचा । लोककतोऽपर्व कारीपरेदाय हलकाको हीपिरि ब्रह्मदि । रमाये करपादिविविवेदनादाय कार-लम् । वचादिविवेदनायको राजनि कर्पू दर्णम-मदवालाम । रूमचे च वैद्य मौवमविनाम्ब-वयालम् । कर्प—दर्मे कर्पूरा करच् रजमवा । वैद्य च वैद्य करवाकुमलकोहवयनैव रमेवेनावयालम् । हचायमाले कर्पूर है च वध । दयदाराप कवरीया हरारचे च कवते रावावम् रवैतुममालय ववानम् । । कवदकानां (सारस) कर्पू हाय वैद्य । कर्परो (भक्त दमनी) कर्पू कहा मीरा कीव कर्पी । कर्परीको कर्पू विका ।

कर्पूरामक पु० कर्पर चवचह । रावरकामें राजनि

कर्पू(वैर)ा पु० कर—मती वव—ऊर्वि वा कर्पूरा करच् । रा कर्पू कथा । रवमां च कपर रवपूर (वारा) च-रिकावाक् यक्षर । कारम कर्प र यक्ष माला । रम दें रकुटिराये च वह्नुवि रवयकाम् रयवीति र ठ कर्पूरबाके वदा । हंकिपकरों ड व्यापि त्रि चपरठीवा भावें च । कर्पूरवसमानेवेन ।

कर्पूर(?) त्रि० कर्पू करोति वध ड—ड । वैदेव कर्परादे शिवो वीट् रबीकुटा माडयम लिव कम कवरी-कुमारि यान १२१११ । कवा कारे यव वाये । कार्पीरक पु० । हावे कर्पूरवायीके 'विलिमयी कर्पूरी कावहयवकविवी । कोषे चारवी वकीनां वर्त वेवविराचता त कर च ११७ च । "कायार्थाक माजाती कर्पूविम च कथ दि । च द्विचार्यो मा कारि वहा कर्पूरवानि मर च २११ । चिवरी वीट् । च जिवाको कर्पू कर्पू विवो वटीवि वैदारो च ।रवी च वैदि । कर्पूरामिरिदिवालो मकरविकालसा च कवि ववानम् । वपूर्वकायाम् कर्पू वैदि । कर्पूरदल पंचकारिव विवा-भारविरीत कथा । कपूरूच वकतिव। कार्यं अनीकरीतिदि। । वहतीना

कर्मकरास्तेषां दासास्त्रिपञ्चकाः। शिष्यान्तेवासिभृतकाधिकर्मकृत् । एते कर्मकरा ज्ञेया दासास्तु गृहजादयः । सामान्यमस्वतन्त्रत्वमेषामाहुर्मनीषिणः । जातिकर्मकरस्तूक्तो विशेषोवृत्तिरेव च । कर्मापि द्विविधं ज्ञेयमशुभं शुभमेव च । अशुभं दासकर्मोक्तं शुभं कर्मकृतां स्मृतम् । गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम् । गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् । अशुभं कर्म विज्ञेयं शुभमन्यदतः परम्” इति—“तत्र शिष्योवेदविद्यार्थी । अन्तेवासी शिल्पादिषु । मूल्येन यः कर्म करोति स भृतकः । कर्मकुर्वतामधिष्ठाता अधिकर्मकृत् । अशुचिस्थानम् उच्छिष्टप्रक्षेपणार्थं गर्तादिकम् । अवस्करः उच्छिष्टमार्जितपांश्वादिनिचयस्थानम् । उज्झनं त्यागः । भृतकश्च त्रिविधः । तदुक्तम् “उत्तमस्त्वायुधीयोऽत्र मध्यमस्तु कृषीवलः । अधमोभारवाही स्यादित्येवन्त्रिविधोभृतः” इति ।

कर्मकर्तृ पु० कर्मैव कर्त्ता । व्याकरणोक्ते कर्मणि कर्तृत्वविवक्षया प्राप्तकर्तृत्वभावे कर्मणि । “क्रियमाणन्तु यत् कर्म स्वयमेव प्रसिध्यति । सुकरैः स्वैर्गुणैः कर्त्तुः कर्मकर्त्तेति तद्विदुः” व्या०का० । कर्मकर्त्तरि च कार्य्यभेदातिदेशमाह “कर्मवत् कर्मणा तुल्यक्रियः” पा० । सि०कौ० विवृतमेतत् यथा

“कर्त्तरि तु कर्मस्थया क्रियया तुल्यक्रियः कर्त्ता कर्मवत् स्यात् । कार्य्यातिदेशोऽयम् । तेन यगात्मनेपदचिण्चिण्वदिटः स्युः । कर्त्तुरभिहितत्वात्प्रथमा । पच्यते ओदनः । भिद्यते काष्ठम् । अपाचि । अभेदि । ननु भावे लकारे कर्त्तुर्द्वितीया स्यादस्मादतिदेशादिति चेन्न लकारवाच्य एव कर्त्ता कर्मवत् । लिङ्याशिष्यङिति द्विलकारका-द्वत्युक्ते भावे प्रत्यये च कर्त्तुरकारकत्वानुपस्थितेः । अतएव कृत्यक्तखलर्थाः कर्मकर्त्तरि न भवन्ति किन्तु भाव एव । भेत्तव्यं कुसूलेन । ननु पचिभिद्योः कर्मस्था क्रिया विक्लित्तिर्द्विधाभवनञ्च । सैवेदानीं कर्तृस्था न तु तत्तुल्या ? सत्यम् । कर्मत्वकर्तृत्वावस्थाभेदोपाधिकं तत्सामानाधिकरण्यक्रियाया भेदमाश्रित्य व्यवहारः । कर्मणेति किम् ? करणाधिकरणाभ्यां तुल्यक्रिये पूर्वोक्ते साध्वसिश्छिनत्तीत्यादौ मा भूत् । किञ्च—कर्तृस्थक्रियेभ्यो मा भूत्, गच्छति ग्रामः, आरोहति हस्ती, अधिगच्छति शास्त्रार्थः, स्मरति अद्रिभाति वा । यत्र कर्मणि क्रियाकृतो विशेषो दृश्यते, यथा पक्वेषु तण्डुलेषु, यथा वा छिन्नेषु काष्ठेषु, तत्र कर्मस्था क्रिया, नेतरत्र । न हि ग्रामादिष्वागतेष्विव गमनागमनादिषु वैलक्षण्यमुपलभ्यते । करोतिरुत्पादनार्थः । उत्पत्तिश्च कर्मस्था, तेन कारिष्यते घट इत्यादि । यत्नार्थत्वे तु नैतत्सिध्येत् । ज्ञानेच्छादिवद्यत्नस्य कर्तृस्थत्वात् एतेन अनुव्यवसानेऽर्थ इति व्याख्यातम् इदमपामि वरणाया व्याख्यातम् यथा—“तत्प्रवृत्तिमात्रे कर्तृत्व सर्वत्रैवास्ति कारके । व्यापारभेदापेक्षायां करणत्वादिसम्भवः” इति वाक्यमनुसन्धाय कर्तृत्वकर्मत्वादिव्यवस्थाप्य कार्य्यविशेषाय कर्मातिदेशफलमवतारयति कर्त्तरि त्विति । कर्मस्थया कर्मगतस्थया क्रियया फलेन“फलव्यापारयोर्धातुः”इत्युक्तेः“धात्वर्थः क्रियोच्यते”इत्युक्तेश्चेत्यर्थः । तुल्यक्रियः समानाधिकरणक्रिय इत्यर्थः । किञ्च कर्मस्थभावकएव कार्य्यातिदेशार्थं कर्मणेति पदम् “कर्मस्थेऽपि च धात्वर्थे कर्मकर्त्ता च कर्मवत् । कर्तृस्थेऽपि च धात्वर्थे कर्मकर्त्ता च कर्तृवत्” इत्युक्तेः “कर्मस्थः पचतेर्भावः कर्मस्थाश्च भिदादयः”इत्युक्तेः भिदादयः कर्मभावस्थाः । गमनादयस्तु कर्तृस्थाः “कर्तृस्थो भुज्यतेर्भावः कर्तृस्थाश्च गमादयः”इत्युक्तेः । “व्यत्ययो बहुलम् लिङ्याशिष्यङिति” सूत्रयोः सन्निपातद्विलकारमध्ये एकलकारस्यानुवृत्तेरित्यर्थः । कृत्यक्तखलर्थास्तथा न भवन्ति मायिकः विनोपास इत्यादौ कर्मकर्त्तरि क्तस्य दर्शनादिति बोध्यम् । वास्तविकभेदाभावेऽप्यौपाधिकभेदोऽस्तीत्याह कर्मत्वकर्तृत्वावस्थेति तथा चावस्थाभेदेन क्रियाभेदात् कर्तृकर्मस्थक्रियया तुल्यक्रियत्वमिति भावः । नेतरत्रेति । “निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते । न तु प्राप्ये कर्मणीति सिद्धान्तोऽयं व्यवस्थितः” इतिहर्य्युक्ते क्रियाकृतविशेषवतोरेव निर्वर्त्यविकार्ययोः कर्मवद्भावो न तु तद्रहिते प्राप्ये इति सिद्धान्तो द्योतित इति भावः” अत्र च यथा बोधाधिनि तथा शब्द०प्र० उक्तं यथा

“अथ भिद्यते स्वयमेव कुसूलः स्वयमिन्द्रादौ भिदावत्तत्कूलव्यापारवत्त्वरूपस्य तत्कर्तृत्वस्य कथं कुसूलादावन्वयं भिदादेः परस्मैपदित्वेन तदर्थधर्मितया कर्तृत्वबोधने पदान्तरस्यासामर्थ्यात् यगिणोर्निगृणत्वात्तेनेत्यत आह । एकक्रियाधर्मितया कर्तृता कर्मतोभयो । बोधने कर्मताकाङ्क्षापेक्ष्योत्सर्गतोभवेत् । कर्मताकाङ्क्षा कर्मतान्वयस्यैवानुकूला आत्मनेपदयगादिसमभिव्याहाररूपाकाङ्क्षा कुसूलस्य भिद्यादपेक्षणीया न तु कर्तृत्वान्वयस्य परस्मैपदविकरणादिघटितरूपा यद्येव तथापि कुसूलादौ भिद्यते इत्यपि प्रयोग

[illegible]

[illegible]

तपसा नाशकेन” इति श्रुत्यैव कर्मणां विविदिषाहेतु-त्वोक्ते विविदिषायामेव कर्मकाण्डप्रतिपाद्यकर्मणा-मुपयोग इत्याकरे स्थितम्।

कर्म्मकार त्रि० कर्म्म करोति कृ-ट (?) अण् उप० स०। विना वेतनेन १कर्म्मकारके (बेगार) (कामार) इति प्रसिद्ध सङ्कीर्णजातिभेदे जातिशब्दे विवृतिः। “हरिणाक्षि! कटाक्षेण आत्मानमवलोकय। नहि खड्गो विजानाति कर्म्मकारं स्वकारणम्” उद्भट।

कर्म्मकारिन् त्रि० कर्म्म करोति कृ-णिनि स्त्रियां ङीप्। कर्म्मकारके “तान् विदित्वा सुचरितैर्गूढैस्तत्कर्म्मकारिभिः” मनु

कर्म्मकीलक पु० कर्म्मणा कीलक इव। रजके जातिभेदे। त्रिका०। [कर्म्मक्षम देह आत्मोपभर्म्म इवाग्निम” रघु।

कर्म्मक्षम त्रि० कर्म्मणि क्षम ७त०। कर्मकरणसमर्थे “आत्म-

कर्म्मक्षेत्र न० कर्म्मणां क्रियानुष्ठानानां क्षेत्रम्। जम्बु-द्वीपान्तर्गते नवसु वर्षेषु अनुष्ठानदेशे भारते वर्षे। नव-वर्षोक्तयुक्ता “अत्रापि भारतमेव वर्षं कर्मक्षेत्रम्। अन्या-न्यष्टवर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौम-स्वर्गपदानि व्यपदिशन्ति” भाग०५,१७,१२,१२, कर्म्म भूमि-रपत्र स्त्री। “उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्। वर्षं तद्भारतं नाम भारती यत्र सन्ततिः” इत्युपक्रम्य “कर्मभूमिरियं स्वर्गमपवर्गञ्च गच्छति”। “अत्र सम्प्राप्यते स्वर्गोमुक्तिमस्मात् प्रयान्ति च। तिर्य्यक्त्वं नारकित्वञ्च नरा यान्ति च। न खल्वन्यत्र मर्त्यानां कर्म्मभूमौ विधीयते” विष्णु पु० पराशरवाक्यम्।

कर्म्मघ्न पु० कर्म्मणा हन्यते हन्-अप् (?)। ज्ञानजन्य वासनारूपे दोषे तस्यैव सकलकर्मक्षयहेतुत्वात्तस्य कर्म-बन्धनहेतुत्वात्तथात्वम्।

कर्म्मचण्डाल पु० कर्म्मणा चण्डाल इव। “असूयकः पिशुनश्च कृतघ्नो दीर्घरोषकः। चत्वारः कर्मचण्डाला जन्म-तश्चापि पञ्चमः” वशिष्ठोक्तेषु असूयकादिषु चतुर्षु। २राहौ च। “उत्तिष्ठ गम्यतां राहो! त्यज्यतां चन्द्र-मण्डलम्। कर्मचण्डाल! योगोऽयं मम मा पश्चय कुरु” वहृपतविज्ञानमन्त्र। राहोश्च असूयकत्वाद्दीर्घदोष-वत्त्वाच्च तथात्वम्।

कर्म्मचित् त्रि० चितवान् चि-भूते क्विप् ६त०। १कृतकर्म्मचि। कर्म्मचि क्विप् ६त०। २कर्म्मणा चीयमाने च “कर्म्मचयान् कर्म्मचितस्ते कर्म्मणैवाधीयन्ते कर्म्मणा चीयन्ते” शत०ब्रा०। १०,५,२,८।

कर्म्मचित त्रि० कर्म्मणा चितः चि-क्त। कर्म्मसम्पाद्ये “तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितः” वेदपरि० श्रुति

कर्म्मचेष्टा स्त्री कर्म्मणि क्रियायै चेष्टा। क्रियानुष्ठानार्थं चेष्टायाम् “आत्मजन्या भवेदिच्छा, इच्छाजन्या भवेत् कृतिः। कृतिजन्या भवेच्चेष्टा, चेष्टाजन्या क्रिया भवेत्” इत्युक्ते चेष्टायाः क्रियाहेतुत्वेन तथात्वम् “कर्मचेष्टास्वहः कृष्णः शुक्लः स्वप्नाय शर्वरी” मनु।

कर्म्मचोदना स्त्री कर्म्मणि कर्म्मावबोधने चोदना विधिः। कर्म्मविषये १प्रेरणारूपे विधौ “कर्मावबोधनं चोदना क्रियायाः प्रवर्त्तकं वचनमिति” मीमा० भा०। चोद्यते प्रवर्त्त्यतेऽनया चा०करणे घ ७त०। २कर्म्मप्रवृत्तिहेतौ ज्ञानज्ञेयज्ञातृरूपेऽर्थे च। “ज्ञानं ज्ञेयं परि-ज्ञाता त्रिविधा कर्मचोदना” गीता। “ज्ञानमिष्टसाधन-मितिबोधः, ज्ञेयमिष्टसाधनं कर्म, परिज्ञाता तज्ज्ञाना-श्रय त्रिविधा कर्मचोदना चोद्यते प्रवर्त्त्यतेऽनयेति चोदना ज्ञानादित्रितय कर्मप्रवृत्तिहेतुरित्यर्थः। यद्वा चोदनेति विधिरुच्यते तदुक्तं भट्टैः—“चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः” इति ततश्चायमर्थः:-उक्तलक्षणं त्रिगुणात्मक ज्ञानादित्रयमपेक्ष्य कर्मविधिः प्रवर्त्तते इति” श्रीधर।

कर्म्मज त्रि० कर्म्मणो कर्मजन्यादृष्टात् जायते जन-ड। कर्म्महेतुके रोगादौ। रोगादिव्याधयो हि नानाविधा यथोक्तं भावप्र०—

“ते च स्वाभाविकाः केचित्केचिदागन्तवः स्मृताः। मानसाः केचिदाख्याताः कथिताः केऽपि कायिकाः। तत्र स्वाभाविकाः शरीरस्वभावादेव जाताः। क्षुत्पिपासा सुषुप्ता च जरामृत्युप्रभृतयः। अथवा स्वभावादुत्पत्ते र्जाता स्वाभाविकाः सहजा इति यावत्। ते च जन्मा-न्धत्वादयः। आगन्तवोऽभिघातादिजनिताः। अथवा जन्मोत्तरभाविनः। मानसाः कामक्रोधलोभमोहभयाभिमान-दैन्यपैशुन्यशोकविषादेर्ष्यासूयामात्सर्य्यप्रभृतय। अथ वोन्मादापस्मारमूर्च्छाभ्रममोहतम, सन्न्यासप्रभृतय। कायिकाः पाण्डुरोगप्रभृतय। कर्मजाः कथिताः केचिद्दोषजाः सन्ति चापरे। कर्मदोषोद्भवाश्चान्ये व्याधयस्त्रिविधाः स्मृताः। तत्र कर्मजा व्याधयः यथाशास्त्रमनुष्ठितं कर्म्म प्रवृत्तभोगनाश्यम् प्रायश्चित्तनाश्य वा त्तो जाता न तु दुष्टवातादिदोषेण जनिताश्चान्या। यथायथास्तु निपीतो यथाव्याधिचिकित्सित। न शर्म

वाति यो व्याधिश्च दोषाः कथ्यो वुधैः। दोषमाः क्रियाद्यतिरिक्तदुःखितवार्तिविषयकाः। नतु क्रियाकार्यवर्णादिवापति प्राबल्यतयैव भेदस्य इत्यत इव। क्रो दोषेष्वपि साम्ये दुष्कर्मैव कारणम् नतु कथ दोषस्य दानमे ?। दोषेष्वपि दत्तत्वा कार्यकारणं दुष्कर्म सर्वं न दत्त विष्टु वद क्रियादारीतिवरदृष्टिना दोषा येवभी इत्यत इति दोषस्य दत्तत्वम इति च वाचि। सर्वदोषेष्वपि। कदाचित्कदा मरोचोसको च यदि कर्मदोषकार्या। अत्र कारण दुष्कर्म तथा यको यो माहात्म्य इति कार्ये वैरीवलक्षणदुष्कर्मतादि योग भवति। दोषा खला यदि विद्यायमनोवा इत्यत इति यो भाषा कारणत्वा अक्षय इति। वर्षवत्सर्वकर्मणा दोषता कथ्यते। कर्मदोषेऽपि वाधि वन दोषवत्वात् कथम्। दोषता कथनत्वादिति देवाद्वै-युद्धिकारणम् दुष्कर्म अदृष्टमात्रकारणवादिविधि इ चयोश्चेव सर्वाधिकसमतायास्तद्वमकवादिभिरिष्टाच-योगेन च सर्व वाधि। येवा इत्यत येभी दोषाणां कथ येषां कर्मयोग्या। श्रावितरातिवाधकवध्ये चात्वात्तिकवदि सुराष्ट्रवत् सर्वे कर्मोत्पत्तेर्दृष्टकारणम्। कर्मवासनी च वातव्याधवत्वमा। स्वकर्मवशात्वाले वातादिदोषे च यस्य इत्यति वैद्या कथयं दोषमाथकाः वदत। क्रियाकर्मेव चैतये दुःखिताये च।"अवाचोक्ता वा प्राप्ति वैद्यवद्योम देहिनः। योगि कर्मविषाक च कायो स्वकृतकर्मणः। कर्मविवासितायको यस्य च योगकीर दत। वाधिच अनेकवादिच दोषा परिकीर्तिताः। वैद्यो वविदयो च च द्वितीय कदाचन। कलाया-च दोषाद् च दोषकारणद्वयी। तथैव कार् कर्मणो दीर्घ दिव्य परिकीर्तिताः। अविद्यादो योगदस्त कथ् वैद्यविवादिव। प्रदादेवादिदोषा: व्याधिताभो-इति क्रिया भवेत्। दत्तकर्मद्वारा यो दुष्कर्मोद्योऽपरः। तिवातकर्मयोगा व्याद् तथोक्तोऽपि क्रिया भवेत् काया। इदेवादकर्मकारे चन्द्रस्य वाये प्र देवः व्याद कर्मणो देवस्य वातिद्वारा व्याख्ये इ वरा। तथापि इ मदृर। विवाचकर्मवादोत्पत्तये। स्वकीय-यजो दुष्कर्मे वायो देवाविवर्णे कर्मणः दद्यात्तव्याच्ये। १ वंशादये ११कर्म ११सरते च चाददारा तथोः कर्ममवासवालम्।

कर्मजित् ह अपरकर्मणो वायवे अपरे "अथ वायव

रामायो वाविनो वे पाति ते वनिता दुर्योधन (अरा क्ष्मकमत) वाल्मीकिरचनम दया। ० देवाकृतादि निर्णयवादोक्त दद्दः। दमवना। दुष्कनाद् इदत वैयोज कम विष् नाय ८,११२।

कर्मठ त्रि कर्मणि घटते कथम्+अठच्। कर्मविचार कार्ये दद्यते। "च कम ठ। कर्मं कुशाद्य कर्मशिः।

कर्मणि कर्तु पद्म भवति कर्माणि यो वा इ वक्रम्। कर्मणवाही कर कार्यो भावेतिकरो। "कर्म भिर्तेव सन्धावरिवि।" मद ६६२८

कर्मण्य त्रि कर्मणा वस्मादि कम्। कर्म वा कर्मणे यो यें वि यो। कर्मणि साम कद्। सर्वकुशले वि यो। "कदो दोर्ट कर्मणा कदत।" म० २१८। "कर्मणे विविध विदात्वेकायसी दिन वि न। १वैवते यो वीरदायत। वैवेन वि कर्मकारणात् कदा कतालम्।

कर्ममासुन् त्रि कर्मणी येन अङ्ग ग्रन—दिन देव कर्मपीदि तथा। वैवेन कर्मकारवे कदकमविद कत्यालकरविति वीर।

कर्मदेव ह कमणा देवः प्रादेशाय। अवधि मद्ये वदे। "च दयः कर्मदेवानामकमाः वे कर्मणा देवानां वनि चोदिकय वायकवत्व ते वे वदं कर्मदेवासाम् अन्व। कर्मदेवा वै देविवेनादिवोशादिना वैव वैन देवादि वनि देव इति कर्मदिवाद्वतिम्॥ इन्द्र वेदो वायनी प्रकाशयो दकम्ति। प्रकाशति वितरमं कोष वदेरो अथा कर्मणकिदवरः वंशाचरवादचरवो यादृश वा। तथादि कत देवा वायविरिता दर्शिता।। "वदो एकत दकादय दक्षः इादवादिया रुद्रा प्रकापति वि १कम वा देवोक्ष ततो च। "च दयो कत देवानामकम् वे कर्मणा दशवविसमाये कम वे वह कर्मदेवानावाक्मा" मन ता ११०।१२। वे कविदेवादियोक्मणा देवेन प्राप्त वनि वे वायदेवा" वा।

कर्मदेवासिक यो। "क्षोदियोवादिया कर्म ग्राक्ता कर्मदेवा। तद्वि। वाचित् यद्य स्वदेवादि बद् अथा कदेवयम्। चावारकदेवी" दुष्याधा कर्मदेवा इति मदृप ३०।

कर्मदोष ह कर्मणः दोष कर्मणि दोषा कर्मदेहदोषो वा। तद्वे पापजनो दिवाको कर्मणि। अथवा कर्मवनीचि कर्मदोषवत्याहतम्। शरीरस्योऽव को दैवि

स्थावरता नर" मनु । २फलाजन्ये पापादौ "समोरा-गदेष्वनिलः कर्मदोषैर्न लिप्यते" मनु । "कर्मदोषै पापैः" कुल्लू० । विहिताकरणाविहिताचरणरूपे ३कर्मविपरदोषे च । "अनेन गतीर्मनुष्या कर्मदोषसमुद्भवाः" मनु । "विहिताकरणाविहिताचरणरूपकर्मदोषजन्या गतीः" कुल्लू० । ४सकलकर्महेतौ मिथ्याज्ञानजन्यवासनारूपे दोषे च । "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम्" इत्यादि० गौत० सू० मिथ्याज्ञानजन्यवासनारूपदोषस्य सकलप्रवृत्तिरूपकर्महेतुत्वोक्तेस्तस्य तथात्वम् ।

कर्मधारय पु० व्याकरणोक्ते समानाधिकरणपदघटिते समासाधीनलक्षणान्त्यन्ये समासभेदे "समानाधिकरणस्तत्पुरुषः कर्मधारयः" पा० । तत्लक्षणादिक शब्द०प०उक्तं यथा "क्रमिकं यथासङ्गमेकार्थेऽन्यार्थबोधकम् । तादात्म्येन, अभेदेन समासः कर्मधारयः । धर्मिकं यत्नामद्वयं तयोरेकस्य नाम्नोऽर्थे धर्मिणि० तादात्म्येनापरनाम्नोऽर्थ-स्यान्वयबोधं प्रति समर्थं तादृशं नामद्वयं कर्मधारयः नीलोत्पलमित्यादावुत्पलादिपदस्यार्थे नीलादिपदार्थस्य तादात्म्येनान्वयः, तथा पुरुषसिंह इत्यादावपि पुरुषादावुत्तरपदसंबन्धस्य सिंहादिशब्दस्य पुरुषः सिंह इवेत्यादिविग्रहे प्रायेणोपमेयस्योपमानैरिति कर्मधारयानुशासनात् । कुम्भस्य समीपमित्याद्यर्थकस्य उपकुम्भादिर्न तादात्म्येनान्वयबोधकः, प्रबलसपत्न्यमित्यादेः संपदाय नामपदस्य धातुभिन्नोपपदत्वात् स्वार्थकसामान्यपरत्वेऽपि धात्वभावाच्च । नीलमुत्पलमित्यादौ तु समानविभक्तिकं नामद्वयं स्वार्थयोरभेदान्वयं बोधयदपि न क्रमिकं विभक्त्याव्यवधानात् । यदि च तादात्म्येन नीलादिनामार्थस्यान्वयबुद्धौ नीलादिनामोत्तरनामोपस्थाप्यत्व सम्बन्धेन तत्ता भेदसम्बन्धेन नीलादेरन्वयः, परन्तु विशेषणविभक्त्युपस्थापिते तादात्म्यएवाभेयत्वेन, नीलघटपटावित्यादौ च नीलपदार्थस्य पदेन घटपटेत्येपदस्यात्मकनामैर्वोपस्थापिते घटे पटे च नीलस्य तादात्म्येनान्वयाच्च व्यभिचारः । स्तोकं पचति धान्येन, मन्दया पटुरित्यादावपि स्तोकादेर्न धात्वाद्यर्थे तादात्म्येनान्वयः किन्तु द्वितीयाद्यर्थे तादात्म्यएवाभेयत्वेनेत्यादिकं विभाव्यते तदा क्रमिकत्वमनुपादेयमेव । राजपुरुष इत्यादिकस्तु तत्पुरुषोन पूर्व्वपदलक्षितराजसम्बन्धिनस्तादात्म्येनान्वयबोधकसमासविग्रहयोस्तुल्यार्थकत्वप्राप्त्यापत्तेः, परन्तु राजसम्बन्धस्यैव । अतएव राजपुरुषइत्यादौ पूर्व्वपदे षष्ठ्यर्थसम्बन्धे लक्षणेति मणिकृद्भ्रान्तमपि सङ्गच्छते । यथा च नामार्थयोर्भेदेनान्वयेऽपि न घटितत्वोपरिष्टाद्दृश्यते । किञ्चिद्विशिष्टस्वर्थानवच्छिन्नस्यैव या तादात्म्येनान्वयबोधकत्वसमानिरुक्तौ निवेश्यम् । नचैवमपि पञ्चपुरुष्यादिद्विगौ द्विगान्ये गच्छत इत्यादिस्थलीये द्वितयाद्यभिन्नगान्धादिविशेषकाव्ययीभावे चातिव्याप्तिस्तदस्यत्वेनापि विशेषणीयत्वात् । अत्र च मानुषब्राह्मणो ब्राह्मणमानुषइत्याद्यप्रयोगाद्विशेषणविशेष्ययोर्यत्र नियतसादात्म्येन व्यभिचारस्तत्रैव कर्मधारयः साधु ममैवधूमइत्यादौ तु नरस्य शरीरं राज्ञो शिर इत्यादाविव तादात्म्यसम्बन्धार्थकषष्ठ्या तत्पुरुषएवेति ध्येयं । चन्द्रमतश्चित्रगिरिर्वसन्तसमयइत्यादिप्रयोगस्य प्रामाणिकत्वात् विशेष्यस्यैव विशेषणव्यभिचारित्व कर्मधारये तन्त्र न तु विशेषणस्यापि तद्व्यभिचारित्वम् । पुरुषोत्तमइत्यत्र चोत्तमत्व न नियतमात्रादिमत्त्व किन्तु स्वसविधुरत्वम् । अतएव तत्र पुरुषस्येव, पुरुषेऽपि तस्य व्यभिचारसत्त्वादुत्तमपुरुषइत्यपि कर्मधारयः साधुरिति तु नव्याः । तदाद्युत्तरपदकः कर्मधारयः प्रायशोनेष्यते नीलतदस्तीत्यादितोनात्यपि नीलोत्पलादेरविनयाद्यप्रतीतेः । "पक्षयक्षोजन" इत्यमामतङ्गजम यथा । नीलवद्रसभ्यास्वाद्य -कटुतदू पमीष्यते" इत्यादिप्रयोगात् कर्श्चिदिष्यतेऽपि । प्रयुक्तञ्च कुमरनन्दिना परम स इत्याद्यर्थे परमस परमतामित्यादि । तत्पुरुषोऽप्येतेन व्याख्यातः । ननु विशेष्यतया नामार्थप्रकारकान्वयप्रतिमात्रं प्रत्येव नामोत्तरविभक्त्युपस्थाप्यत्व तन्त्रं ननु तादात्म्यसम्बन्धानवच्छिन्नतत्प्रकारतान्वबुद्धिं प्रति गौरवादतोनामार्थयोर्नीलोत्पलयोरन्वयासम्भवात् कर्मधारयादिकं समासोन यौगिकं किन्तु नीलोत्पलत्वादिविशिष्टे रूढएव तदुक्तं भर्तृहरिणा "अयुधान् मयुपायाय विहिता प्रतिपत्तये । शब्दान्तरत्वादत्यन्तं भेदोवाक्यसमासयो" रिति वैयाकरणाः, तन्मन्दं नीलोत्पलमित्यादौ समुदाये रूढ्यर्थासम्बन्धानेऽपि नीलादिमत्वेकघटोपस्थित्या तयोस्तादात्म्येनान्वयबोधस्यानुभविकत्वेन गौरवस्य प्रामाणिकत्वादन्यथा नामार्थस्यान्वयबोधसामान्यं प्रतेत्य नामोत्तरनामोपस्थाप्यत्व तन्त्रतदैकत्य नीलमानयेत्यादौ नामार्थद्वयर्थयोर्नान्वयबोध, परन्तु समन्तमागस्य नीलविशिष्टकर्मत्वादौ रूढिरेवेत्यपि किन्न रोचये ? । अथ समासस्यायक्तत्वे नीलोद्रव्यं घट इत्यादाविव नीलघटोद्रव्यमित्यादावपि घटे धर्मिण्येकत्र द्वयमिति न्यायेन नीलद्रव्ययोस्तादात्म्येनान्वयापत्तिरिति वाच्यम्,

[illegible]

“कर्त्तुः क्रियया आप्तुमिष्टतमं कर्मसंज्ञं स्यात्। कर्त्तुः किम्? माषेष्वश्वं बध्नाति। कर्मण ईप्सिता माषा न तु कर्त्तुः। तमब्ग्रहणं किम्? पयसा ओदनं भुङ्क्ते। कर्मण्यनुवृत्तौ पुनःकर्मग्रहणमाधारनिवृत्त्यर्थम्, अन्यथा गेहं प्रविशतीत्यत्र न स्यात्”। विवृतञ्चैतद्वामि सरलायां यथा कर्त्तुरित्यादि। कर्त्राप्तुमिष्यमाणं कर्मेत्यर्थः।“धातूपात्तव्यापाराश्रयः कर्त्ता”इति वक्ष्यते। आप्तिश्च सम्बन्धः, स च कर्तृविशेषणीभूतक्रियारूपव्यापारद्वारकएवानुपस्थितफलत्वे भानाभावात्, एवञ्च कर्त्रा स्वनिष्ठक्रियारूपव्यापारप्रयोज्यफलेन सम्बद्धुमिष्यमाणं कर्मेत्यर्थः, तदेतदाह कर्त्तुः क्रियया आप्तुमिति। क्रियया धातूपात्तव्यापारेण, आप्तुं धातूपात्तफलद्वारा सम्बन्धुम्। फलव्यापारयोर्धातूपात्तत्वन्तु “फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः” इत्यनेन सिद्धम्। तच्च कर्म सप्तविधम्, यथोक्तं हरिणा “निर्वर्त्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधा मतम्। तच्चेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम्। औदासीन्येन यत् प्राप्यं यच्च कर्त्तुरनीप्सितम्। संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्” इति। तत्र निर्वर्त्यादीनां लक्षणादिकमपि तेनैवोक्तं यथा—“यदसज्जायते सद्वा जन्मना यत्प्रकाशते। प्रकृतेस्तु विवक्षाया विकार्यं कैश्चिदन्यथा। तन्निर्वर्त्यं विकार्यञ्च कर्म द्वेधा व्यवस्थितम्। प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत्। किञ्चित् गुणान्तराधानात् सुवर्णादिविकारवत्। क्रियाकृतविशेषाणां सिद्धिर्यत्र न विद्यते। दर्शनादनुमानाद्वा तत् प्राप्यमिह कथ्यते” इति,“सती वा विद्यमाना वा प्रकृतिः परिणामिनी। यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते” इति च। तदयं सङ्क्षेपनिष्कर्षः-प्रकृतिवाचकपदासमभिव्याहृतपदोपस्थाप्यत्वे सति क्रियाजन्योत्पत्तिरूपफलवत्त्वं निर्वर्त्यत्वम् यथा घटं करोतीत्यादौ घटादेः क्रियाजन्योत्पत्तिमत्त्वान्निर्वर्त्यत्वम्। प्रतीयमानप्रकृतिविकृतिभावत्वे सति क्रियानिर्वाह्यविशिष्टसत्त्वोत्पत्तिरूपान्यतरफलवत्त्वं विकार्यत्वम् यथा सुवर्णं कुण्डलं करोतीत्यादौ सुवर्णस्य पूर्वरूपविशिष्टसत्त्वफलवत्त्वात् कुण्डलस्य चोत्पत्तिमत्त्वादुभयोरपि विकार्यत्वम्। क्रियाकृतासाधारणधर्मप्रकारकप्रतीतिविषयतानाश्रयत्वे सति क्रियाजन्यफलवत्त्वेनोद्देश्यत्वम्, प्राप्यत्वं यथा ग्रामं गच्छतीत्यादौ ग्रामादेः कर्तृसाधारणसंयोगरूपफलवत्त्वेऽपि क्रियाकृतभ्रमादिरूपासाधारणविशेषफलस्यानाधारत्वेन तादृशफलप्रकारकबोधाविषयत्वात् प्राप्यत्वम्, निर्वर्त्यविकार्ययोस्तु क्रियाजन्योत्पत्त्यादिफलस्य कर्ममात्रनिष्ठतया असाधारण्येन तद्वत्त्वान्नातिप्रसङ्ग इति बोध्यम्। कर्त्तुरनुद्देश्यत्वे सति क्रियाजन्यफलवत्त्वम्, औदासीन्येन प्राप्यं यथा ग्रामं गच्छन् तृणं स्पृशतीत्यादौ तृणादेरनुद्देश्यत्वेऽपि क्रियाजन्यसंयोगरूपफलवत्त्वेनोदासीनकर्मता। द्विष्टसाधनत्वे सति क्रियाफलवत्त्वं, द्वेष्यं यथा अत्र बुभुक्षुर्विषं भुङ्क्ते इत्यादौ विषस्य तथात्वम्। कारकविशेषसंज्ञान्तरेणाविवक्षितत्वे सति कर्मोपकारकत्वम्, संज्ञान्तरैरनाख्यातत्वम् यथा गां पयो दोग्धीत्यादौ गवादेः कारकान्तरसंज्ञया अविवक्षया दुग्धोपयोगितया कर्मत्वम्। व्यक्तीभविष्यति चेदमुपरिष्टात्। कारकान्तरसंज्ञापूर्वकत्वं यथा ‘जलधिमधिशेते’ इत्यादौ जलधेराधारसंज्ञकतया प्राप्तत्वेऽपि “अधिशीङ्स्थासां कर्म” पा॰ इत्यादिना कर्मसंज्ञया कर्मत्वम्। पयसेति भुजिक्रियां प्रति पयसः प्रकृष्टोपकारकत्वविवक्षायां तस्यैवेप्सिततमत्वात् पयः पिबतीति स्यादेव। इह तु तथा विवक्षाविरहेणान्नभोजनं प्रति तस्याङ्गतया करणत्वमात्रं विवक्षितमिति न ओदनस्य कर्मत्वम्। सहार्थे तृतीयेति तु न न्याय्यम्, तस्याप्रधानत्वात्तमपा बोधयितुमशक्यत्वात्”।

कर्मताबोधनप्रकारलक्षणादिकं यन्त्र॰प्र॰ अन्यथोक्तं यथा “यगन्तधातोरर्थो यस्मिन् स्वार्थेऽनुभाव्यते। यत्रासौ कर्मता नाम कारकं कर्तृतेतरत्” “यगन्तस्य यद्धातोरुत्तरस्य तिङो यत्र स्वार्थे तदीयो यादृशोऽर्थोऽनुभावयितुं शक्यते, तज्जातीयस्याप्यतादृशक्रियायाः स तिङर्थः कर्तृताभिन्नं कर्मत्वं नाम कारकमित्यर्थः”। ग्रामो गम्यत इत्यत्र गमधातूपस्थाप्यायाः संयोगावच्छिन्नक्रियायाः स्वजन्यत्वसम्बन्धेन तिङ्पदोपस्थाप्ये संयोगे एवान्वयो न तु त्यज्यत इत्यादाविव विभागादौ धात्वर्थतावच्छेदकस्यैव फलस्य बोधने कर्मविहितप्रत्ययानां धातुसाकाङ्क्षत्वाद्व संयोगस्यैव तत्र गतिक्रियाकर्मत्वं न तु विभागादेः, तेन तरोस्त्यागिनि खगे तरुं गच्छतीत्यादिकोऽप्रयोगः। गम्यते रथः स्वयमेवेत्यादौ (गम्यत इति त्वनुशासनविरुद्धं कर्तृस्वभावकतया कर्मवत् क्रियाया अप्रवृत्तेः)। कर्मत्वमित्यानुकूल्यव्यापारवत्त्वलक्षणं कर्तृत्वं धात्वर्थस्य धर्मोऽपि न तत्कर्तृताभिन्नमिति तद्व्युदासः। ननु चैत्रकर्तृकगमनजन्यसंयोगस्य ग्राम इव चैत्रेऽपि सत्त्वात् चैत्रो गम्यते चैत्रेणेत्यपि प्रयोगः स्यात्, तिङर्थसंयोगस्य जन्यत्वस्वाश्रयप्रतियोगिकत्वोभयसम्बन्धेन धात्वर्थगतेसाकाङ्क्षत्वेन चैत्रकर्तृकगत्याश्रयप्रतियोगिकत्वविशिष्टस्य संयोगस्य चैत्रे बाधितत्वात्। अतएव चैत्रो ग्रामं गच्छति

[illegible]

[illegible]

[illegible]

[illegible]

"कर्त्तुः क्रियया आप्तुमिष्टतमङ्कर्मसंज्ञं स्यात्। कर्त्तुः किम्? माषेष्वश्वं बध्नाति। कर्मण ईप्सिता माषा न तु कर्त्तुः। तमब्ग्रहणं किम्? पयसा ओदनं भुङ्क्ते। कर्मेत्यनुवृत्तौ पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम्, अन्यथा गेहं प्रविशतीत्यत्र न स्यात्"। सि॰कौ॰तदर्थमाह मनोरमायां यथा कर्त्तुरित्यादि। कर्त्राप्तुमिष्यमाणं कर्मेत्यर्थः। "धातूपात्तव्यापाराश्रयः कर्त्ता" इति वक्ष्यते। आप्तिश्च सम्बन्धः, स च कर्तृविशेषणीभूतक्रियारूपव्यापारद्वारक एवानुपस्थितकल्पने मानाभावात्, एवञ्च कर्त्रा स्वनिष्ठक्रियारूपव्यापारप्रयोज्यफलेन सम्बद्धुमिष्यमाणं कर्मेत्यर्थः, तदेतदाह कर्त्तुः क्रियया आप्तुमिति। क्रियया धातूपात्तव्यापारेण, आप्तुं धातूपात्तफलद्वारा सम्बन्धुम्। फलव्यापारयोर्धातूपात्तत्वन्तु "फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः" इत्यनेन सिद्धम्। तच्च कर्म सप्तविधम्, यथोक्तं हरिणा "निर्वर्त्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधा मतम्। तच्चेप्सिततमं कर्म चतुर्द्धान्यत्तु कल्पितम्। औदासीन्येन यत् प्राप्यं यच्च कर्त्तुरनीप्सितम्। संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्" इति। तत्र निर्वर्त्यादीनां लक्षणादिकमपि तेनैवोक्तं यथा—"यदसज्जायते सद्वा जन्मना यत्प्रकाशते। प्रकृतेस्तु विवक्षायां विकार्य्यं कैश्चिदन्यथा। तन्निर्वर्त्त्यं विकार्य्यञ्च कर्म द्वेधा व्यवस्थितम्। प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत्। किञ्चित् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्। क्रियाकृतविशेषाणां सिद्धिर्यत्र न विद्यते। दर्शनादनुमानाद्वा तत् प्राप्यमिह कथ्यते" इति, "सती वा विद्यमाना वा प्रकृतिः परिणामिनी। यस्य नाश्रीयते तस्य निर्वर्त्त्यत्वं प्रचक्षते" इति च। तदयं लक्षणनिष्कर्षः प्रकृतिवाचकपदासमभिव्याहृतपदोपस्थाप्यत्वे सति क्रियाजन्योत्पत्तिरूपफलवत्त्वं निर्वर्त्त्यत्वम् यथा घटं करोतीत्यादौ घटादेः क्रियाजन्योत्पत्तिमत्त्वान्निर्वर्त्त्यत्वम्। प्रतीयमानप्रकृतिविकृतिभावत्वे सति क्रियानिर्वाह्यविशिष्टाभ्युत्पत्तिरूपान्यतरफलवत्त्वं विकार्य्यत्वम् यथा सुवर्णं कुण्डलं करोतीत्यादौ सुवर्णस्य पूर्वरूपविशिष्टाभावफलवत्त्वात् कुण्डलस्य चोत्पत्तिमत्त्वादुभयोरपि विकार्य्यत्वम्। क्रियाकृतासाधारणधर्मप्रकारकप्रतीतिविषयतानाश्रयत्वे सति क्रियाजन्यफलवत्त्वे नोद्देश्यत्वम्, प्राप्यत्वं यथा ग्रामं गच्छतीत्यादौ ग्रामादेः कर्त्तृसाधारणसंयोगरूपफलवत्त्वेऽपि क्रियाकृतक्रमादिरूपासाधारणविशेषफलस्यानाधारत्वेन तादृशफलप्रकारकबोधाविषयत्वात् प्राप्यत्वम्, निर्वर्त्त्यविकार्य्ययोस्तु क्रियाजन्योत्पत्त्यादिफलस्य कर्ममात्रनिष्ठतया असाधारण्येन तद्वत्त्वात्नातिप्रसङ्ग इति बोध्यम्। कर्त्तुरनुद्देश्यत्वे सति क्रियाजन्यफलवत्त्वम्, औदासीन्य प्राप्तं यथा ग्रामं गच्छन् तृणं स्पृशतीत्यादौ तृणादेरनुद्देश्यत्वेऽपि क्रियाजन्यसंयोगरूपफलवत्त्वेनोदासीनकर्मता। द्विष्टसाधनत्वे सति क्रियाफलवत्त्वं द्वेष्यं यथा अन्नं बुभुक्षुर्विषं भुङ्क्ते इत्यादौ विषस्य तथात्वम्। कारकविशेषसञ्ज्ञान्तरेणाविवक्षितत्वे सति कर्मोपकारकत्वम्, संज्ञान्तरैरनाख्यातत्वम् यथा गां पयो दोग्धीत्यादौ गवादेः कारकान्तरसंज्ञया अविवक्षया दुग्धोपयोगितया कर्मत्वम्। व्यक्तीभविष्यति चेदमुपरिष्टात्। कारकान्तरसंज्ञापूर्वकत्वं यथा 'जलधिमधिशेते' इत्यादौ जलधेराधारत्वेन प्राप्तत्वेऽपि "अधिशीङ्स्थासां कर्म" पा॰इत्यादिना कर्मसंज्ञया कर्मत्वम्। पयसेति भुजिक्रियां प्रति पयसः प्रकृष्टोपकारकत्वविवक्षायां तस्येप्सिततमत्वात् पयः पिबतीति स्यादेव। इह तु तथा विवक्षाविरहेणान्नभोजनं प्रति तस्याङ्गतया करणत्वमात्रं विवक्षितमिति न ओदनस्य कर्मत्वम्। सहार्थे तृतीयेति तु न्याय्यम्, तस्याप्रधानत्वात्तमपा बोधयितुमशक्यत्वात्"।

कर्मताबोधनप्रकारलक्षणादिकं शब्द॰प्र॰ अन्ययोक्तं यथा "यगन्तधातोरर्थो यन्निष्ठः स्वार्थेऽनुभाव्यते। यत्रासौ कर्मता नाम कारकं कर्तृतेतरत्" "यगन्तस्य यद्धातोरुत्तरस्थितिङा यत्र स्वार्थे तदीयोपात्तफलोऽर्थोऽनुभावयितुं शक्यते, तद्धातूपस्थाप्यतादृशक्रियायाः स तिङर्थं कर्तृताभिन्नं कर्मत्वं नाम कारकमित्यर्थः। ग्रामो गम्यते इत्यत्र गमधातूपस्थाप्यायाः संयोगावच्छिन्नक्रियायाः स्वजन्यत्वसम्बन्धेन तिङ्प्रतिपाद्ये संयोगे एवान्वयो न तु त्यज्यते इत्यादाविव विभागादौ धात्वर्थतावच्छेदकस्यैव फलस्य बोधने कर्मविहितप्रत्ययानां धातुसाकाङ्क्षत्वादतः संयोगस्यैव तत्र गतिक्रियाकर्मत्वं न तु विभागादेः, तेन तरोस्त्यागिनि खगे तरुं गच्छतीत्यादिकोन प्रयोगः। गम्यते रथः स्वयमेवेत्यादौ (गम्यत इति त्वनुशासनविरुद्धं कर्तृस्वभावकतया कर्मवत् क्रियाया अप्रसक्तेः)। कर्मत्वमिवानुकूलव्यापाराश्रयत्वलक्षणं कर्तृत्वं धात्वर्थस्य धर्मोऽपि न तत्कर्तृताभिन्नमिति तद्व्युदासः। ननु चैत्रकर्तृकगमनजन्यसंयोगस्य ग्रामादेरिव चैत्रेऽपि सत्त्वाच्चैत्रेण गम्यते चैत्र इत्यपि प्रयोगः स्यात्, तिङर्थसंयोगस्य जन्यत्वस्वाश्रयप्रतियोगिकत्वोभयसम्बन्धेन धात्वर्थगतेः साकाङ्क्षत्वेन चैत्रकर्तृकगत्याश्रयप्रतियोगिकत्वविशिष्टस्य संयोगस्य चैत्रे बाधितत्वात्। अतएव चैत्रो ग्रामं गच्छति

शेषात् इत्याहुः । (फलव्यापारयोर्धातुरित्युक्तमाश्रित्य)
तण्डुलं पचतीत्यत्र उपादिपदार्थविक्लित्तिफलकतेज-
स्संयोगावच्छिन्नक्रिया पचेरर्थः, तद्विशिष्टे च विक्लित्ते-
स्तत्संयोगे तण्डुलस्याधेयत्वेनान्वयः परन्तु पचती-
त्यपि मनुष्यतया ज्ञायते "शान्ता परमाणव पच्यन्ते"
इति हिरण्यव्याख्यानात् । ओदनं पचतीत्यादौ
तु तण्डुलादावोदनादिपदस्य लक्षणा तत्र क्रियायामन्वि-
तत्वानुकूलत्व द्वितीयार्थ इत्यपि कश्चित् । ग्रामं त्यजती-
त्यादावारम्भक संयोगविरोधिविभागानुकूलक्रिया त्यजे-
रर्थः तद्विशिष्टे च संयोगे विभागे वा ग्रामवृत्तित्व-
सम्बन्धेन ग्रामादेरन्वयः । एवमेव विष्णुं यजतेत्यत्र
प्रीत्युद्देश्यकमन्त्रकद्रव्यत्यागो यजेरर्थः प्रीतौ विष्णोराधे-
यत्वेन द्रव्ये च पुष्पादेरभेदेनान्वयात् विष्णुनिष्ठप्रीति
उद्देश्यमन्त्रकरणक पुष्पाभिन्नद्रव्यत्यागवान् इत्याकारकस्तत्र
बोधः, अतएव फलस्य कोऽप्याप्यत्वमस्य तत्यागैकदेशे स्व-
त्वस्य वा पुष्पादेराधेयत्वेन तत्यागांशेन द्रव्ये च विष्णुं
यजतेत्यादौ द्रव्यस्य द्रव्याभिन्नत्वेन गन्धादयोऽपि न
यान्ति । पितरमाराधयति उपास्ते पूजयतीत्यादौ गौर-
वप्रयुक्तप्रीत्यनुकूलक्रिया धात्वर्थः तद्विशिष्टयोगे स्व-
प्रीतौ क्रमेण विषयत्वाधेयत्वाभ्यां पित्रादेरन्वयेन
पितृगोचरगौरवप्रयुक्ता या पितृनिष्ठप्रीतिहेतुक्रिया तद्वा-
नित्येव तत्र बुद्धिः । गौरवं पुनराराध्यत्वावगाही ज्ञान-
प्रभेदो विशेषं भक्तिरित्युच्यते । पित्रादिरेवाराध्य मन्त्रक
रणकत्वाभावात् तत्र पितरं यजतेत्यादिक प्रयोगः ।
रमालामयपाणे इत्यादौ तु गौरवप्रयुक्तक्रियामात्रे
वाचकतया गात परमेश्वरः प्रीतिविरहादयोग्यत्वा-
पत्तिः । एवं जुहोतीत्यादौ वह्न्यादिकरणकपतनाव-
च्छिन्नमन्त्रकरणकक्रिया जुहोतेरर्थः, मोक्षे च पतने
एतदाधेयत्वेनान्वयस्तेनान्न्याधिकरणकस्य एतद्विषयतन-
न्मानुकूलमन्त्रकरणकक्रियावानित्येव तत्र बोधस्तादृशी
च क्रिया अध्वर्युकराद्ये प्रमाणान्नपुलोकरणादिरेव ।
अतएव एतादृश परित्यागितव्यविरहात् तिलादेर्न यत्र तु
किन्तु होमत्वमेव । वह्नौ जुहोतीत्यत्र सप्तम्यन्तस्यार्थेन
धात्वर्थविशिष्टे पतनेऽन्वय इति वह्निदृष्टिविशिष्टपतने
तद्विशिष्टवृत्त्यन्वये निराकाङ्क्षत्वापत्तेः परन्तु तदवच्छिन्न-
क्रियायामेव । प्रतिमादौ *स्नपन*इत्यर्पण मन्त्रकरणकमपि
नान्याधिकरणक वह्नौ एतस्य प्रक्षेपणात्मकमन्याधिकरण-
त्वमनानुकूलमपि न मन्त्रकरणकमतस्तदुभय न होमः ।
प्रागभावेऽपि होमे गाभयाव मन्त्र करणम् । यद्वा वह्नि-
संयोगावच्छिन्नपतनानुकूलमन्त्रकरणकक्रियैव जुहोत्यर्थ-
स्तेन एवं जुहोतीत्यत्र वह्निसंयोगजनकं यत् एतस्य पतनं
तदनुकूलमन्त्रकरणकक्रियाविशेषवानित्याकारको बोधः ।
न चैवं धात्वर्थतावच्छेदकीभूतसंयोगात्मकफलशालित्वेन
वह्न्यादेस्तदर्थकर्मतया वह्निं जुहोतीत्यादिकप्रयोगा-
पत्तिः साक्षाद्धात्वर्थतावच्छेदकीभूतस्यैव फलस्यान्वयिन
कर्मत्वादन्यथा गगने कोऽप्युत्पततीत्यादौ गगना-
देरुत्क्षेपणादिकर्मतायादुर्वारत्वापत्तेः कर्णसंयोगफलक-
क्रियावच्छिन्नव्यापारस्यैवोत्क्षेपणत्वात् । नपोत्क्षेपणत्वा-
दिकं जातिरेव तत्र धात्वर्थतावच्छेदकम्, प्रवेशनत्वा-
दिना सङ्करेण तत्र जातित्वायोगात् कोष्ठादेस्तत्कर्मत्वा-
पत्तेश्च । अतएव परम्परया इत्याद्यर्थतावच्छेदकीभूतवह्नि
उद्देश्यतालित्वेन पय प्रभृतेस्तत्कर्मत्वसम्पत्त्यर्थम् "अकथि-
तञ्च" इति सूत्रान्तरस्य प्रणयनमपि पाणिने सङ्गच्छते ।
धनं प्रतिगृह्णातीत्यत्र पुण्यार्थकदानजन्यस्वत्वस्य जनक
स्वीकारः प्रतिग्रहः इति फलीभूतस्वत्वस्य तया धनस्य कर्मत्वं,
विक्रयादेर्दानविशेषत्वेऽपि न तस्य पुण्यजनकत्वमतस्तद्धर्मस्य
स्वीकारो न प्रतिग्रहः । ग्रामं क्रीणातीत्यत्र मूल्यदान-
जन्यस्वत्वस्य जनकः स्वीकारः, स्वत्वजनकं मूल्यदानमेव
वा क्रयस्तत्फले च स्वत्वे ग्रामस्याधेयत्वेनान्वयेन
ग्रामनिष्ठस्य मूल्यदानजन्यस्वत्वस्यानुकूलस्वीकारवान्, ग्राम-
निष्ठ स्वत्वस्य तदनुकूलमूल्यदाता चेति तत्र बोधः । ग्रामं
विक्रीणातीत्यत्र मूल्यग्रहणजन्यस्य परस्वत्वस्य जनकमूल्य-
ग्रहणमेव वा विक्रयस्तेन ग्रामनिष्ठस्य मूल्यग्रहणजन्यपर-
स्वत्वस्यानुकूलो यो ग्रामस्य त्यागस्तद्वान्, ग्रामनिष्ठ यत्
परस्वत्वं तदनुकूलमूल्यग्रहणवानिति वा तत्र बोधः ।
मूल्यञ्च पणपुराणादिकमेव शास्त्रनिर्दिष्ट मतु द्रव्यमात्र
तेन तिलादीन् दत्त्वा माषादीनां विनिमये विधाया तिल-
विक्रयादिदोषस्यानवकाश इत्युक्तमेव । नरकं पततीत्यत्र
भोगावच्छिन्न पातित्यमेव पतेरर्थस्तेन नरकभोगानुकूलपा-
तित्ववानित्याकारकस्तत्र बोधः । नरकपतित इति द्वितीया-
तत्पुरुषोदाहरणमपि एतत्कारस्य, एतदभिप्रायकमेव
पतनक्रियायाश्रयात्वे तु गर्ते पततीत्यादिरेव युक्त
प्रयोगः । स्वर्गं गच्छतीत्यादौ स्वर्गादिपदस्येव प्रकृते नरकपद
स्यापि तद्देशपरत्वात् । धनं लभते प्राप्नोतीत्यादौ स्वत्वा-
वच्छिन्नो व्यापारो धात्वर्थः, तद्विशिष्टे च स्वत्वे धनादेराधेय
त्वेनान्वयः । ननु यजन्तधात्वर्थविशेष्यतावच्छेदकधर्मयदि

[illegible]

[illegible]

इत्यादौ भावप्रत्ययस्य भावे सार्वविहितप्रत्ययान्तस्य कर्तुः कर्मतानिरास इत्यत एवैर्निर्दिष्टत्वमनुपपन्नम्। "क्रियाया मेव भुक्यर्थे तथेरप्यपेऽपि । नयमान कर्तुः कर्मत्व क्रियया प्राप्तुं यदि" इति करणाद्रुत्पयति गृहिकान् माणो-रम् भक्षयति नरो लापयितव्यादेरेव भवे कर्तरि कर्मता न तु भक्षयत्योदनं बटुनेत्यादौ, भक्षयति मला परि-जने वत्स इत्यादौ तु न भोजन भक्षरार्थः । वाह-यति रथमश्वान् सारथिः वाहयति गोपाँ पशून् वा-हिक इत्यादौ वाहयति भारं बटुना वलिवर्दनित्यादौ नियन्त्रा वाहकेन वाहिकादि । "द्रुक्रोश कर्तुः क-र्मत्व नवन्नारे नानियन्त्रा । यन्त्रिवादिद्रुगोरेतमा-त्मनेपदस्यपते इन्द्रियैरारयति कारयति वा पट इन्द्रियैनालेप वन्दिनितरातोऽपि पविन्द्रस्य गौण कर्मत्वागम' । तथा चागमयत्यालोदन गमय सनयेन वा सनर्भो, शिकारयति निष्प विशेष वा गमक्तइतरपि समाप्तम् । परन्तु पर्व्वयोरमाप्तमितयोस्तु माप्तमेव कर्मत्वस्य वैकल्पिकोक्तिः । गुरुमभिवादयते सुत सुतेन वा इटस्य भुप दर्शयते भार्यां भार्यया वा पति रित्यादौ तु इमं माप्तार्थमिवादयतेऽस्त्रप्राप्तौ स । आत्मनेपदस्य तु पश्यन्ति पथिक दर्शयति, पुत्रेण मित्रमभिवादयतीत्यादौ यथाप्राप्तमेव कर्मत्वादियम । क्रामे चार्थं निर्णाययति,चैते चारुण खादयति खादयति वा दारे क्रन्दयति पुत्रेण मित्रमाह्वाययतीत्यादौ तु नीप्रभृतेर्व्यादार्थस्त्वेन तत्कर्तुः कर्मत्व प्रसङ्गमपि "न नीखाद्यादिशब्दायक्रन्दिह्वयतिषु कस्यचित् । नेतृण्यन्ते षु कर्तुस्तु कर्मता स्यात्तदादिष्विति" भर्तृहरिवचनान्नि-षिध्यते । अत च कश्चित्तदादिवृत्तिकथनाद्गैरत्वेनार्थं निर्णाययमानसिद्धानि, मैत्रेण पुप खाद्यमानीमूते इ-त्यादौ कर्म विदितसत्र नानुपादेर्मानुपपत्तिरिति वदन्ति । घप माशोतीत्यादौ प्राप्तिरुत्पत्तिः परस्परया तदा-श्रयत्वश्च तिङर्थ । घटं जानातीत्यत्र विषयत्व विष-यिता वा द्वितीयार्थ । दिवाकरस्तु संस्काराद्यव्यक्तमेव ज्ञानं जानात्यर्थस्तु ज्ञायते यस्यमेव कर्मत्वं घटादे-रित्याह तन्मन्द ग्राममित्यादित संस्कारामतीते लोपवेन ग्रामत्वस्यैव जानात्यर्थतावच्छेदकत्वात् घटस्योपे-क्षात्मकज्ञाने निर्विकल्पके वा घटं जानातीतिप्रयोगस्या प्रसङ्गाच्च । अतएव प्राकट्याद्यवच्छिन्नज्ञानमेव तत्र धा-त्वर्थ इति तदवच्छेदकीभूतज्ञातताश्रयत्वादेव घटादेर्जान-

कर्मतेति भट्टमतमप्यपास्तम् ज्ञानविषयतातिरिक्ताया ज्ञाततायां प्रमाणाभावादन्यथा ज्ञाततायाश्च ज्ञाततादे-र्व्यतिरिक्ताया कल्पनापत्ते । वह्निमनुमिमीते इत्यादावनुमित्यादिविषयत्वमात्रस्य विषयताविशेषस्य द्वितीयार्थं पक्षे वह्निमानित्याद्यनुमितावापत्तौ वा पर्व्वत-मनुमिमीतेत्याद्यप्रयोगात् विषयतावच्छेदकत्वविशेषप्रका-रत्वमेव तत्र द्वितीयार्थ इत्यपि वदन्ति । घटं पश्यति शब्दं शृणोतीत्यादौ दर्शनाद्यर्थकधातुयोगे सा-क्षात्कारत्वनिरूपितमेव विषयत्वं कर्मत्वं घटादेश्च मीतचाक्षुषादौ तादृशाप्रयोगात् । आकाशं न पश्यती-त्यादौ पुनरन्वयाबोधोऽस्ति । तण्डुलान् पाकं करोतीत्यत्र विक्लित्तिजनकत्वावच्छेदकक्रियायामुद्देश्यतानिरूपितविषयता-विशेष एव द्वितीयार्थ इति भावः, तेन तण्डुलपा-कानुकूलकारकचक्रतण्डुलविषयकत्वेऽपि पाकेच्छायां न तण्डुलं करोतीत्यादिकोन प्रयोग पाकेच्छायामोदनं करोतीत्यादौ च द्वितीयाया अनुकूलत्वे लक्षणा तण्डुला-दिष्वोदनत्वस्तु गौरवादिवारणाय तथाभावात् । यद्व साधनत्वं कल्प्यते धातुना उत्पत्त्यनुकूला लक्ष्यते इति तत्तौदनस्य तत्त्वमेव कर्मत्वमतएव यत्र क्षतिमात्रं धात्व-र्थ मात्र न द्वितीया यथा घटाय यतते इत्यादावित्याह तस्य लक्ष्यादिपदादुत्पत्तिमात्रप्रतीत्या यत्नत्वावच्छिन्नस्यैव करोत्यर्थत्वात् । मीमांसकास्तु पाककर्ता तण्डु-लादेरुपादानविधयैव फलविधयोदनादेरपि विषयत्व शक्तं यदाह यतो श्वर "सिद्धं साध्यं फलञ्चेति प्रत्ये-र्विषयत्रिधा । तत्र सिद्धमुपादानं क्रिया साध्यं फल-मुपमिति" तथा च तन्मते तण्डुलानपक्वदशायामोदनं करोतीत्यादिप्रयोगे फलत्वेन विषयतैव द्वितीयार्थ । मासं सीव्यति, क्रोशं स्वपिति, गोदोहं तिष्ठति, कुरून् स्वपितीत्यादावधिकरणत्व गौणमेव कर्मत्वं समासानु-भाव्यते "कालभावाध्वदेशानां क्रियाणां गौणतामपि । आधारता धौव्यधातोः कर्मता स्याद्विभाषयेति" स्मृते "। "कर्मणि द्वितीया" "कर्मवत्कर्म्मणा" पा०। सकर्मक अकर्मक इत्यादि । २ वैशेषिकमतसिद्धे मूर्त्तद्रव्याश्रिते क्रियारूपे पदार्थभेदे । तल्लक्षणादि कणादसूत्रवृत्त्योर्दर्शितं यथा— "एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मल-क्षणम्" सू० "गुणानन्तरमुद्दिष्टस्य कर्मणो लक्षणमाह एकमेव द्रव्यम् आश्रयो यस्य तदेकद्रव्यं न विद्यते गुणो-ऽस्मिन्नित्यगुणं, संयोगविभागेष्वनपेक्षकारणमिति स्त्रोन्

सकोपक्षार्थकत्वनिरासेन कर्मपर्य्यायक्रियाशब्दस्य व्यापारार्थकत्वस्योक्तेः । क्रिया च धात्वर्थव्यापारभेदः अनिष्टं क्रियाशब्दे वक्ष्यते ।४ शास्त्रविहिते अग्निष्टोमादियागादौ तच्च त्रिविधम् "नित्यं नैमित्तिकं काम्यं कर्म चैवं त्रिधा मतम्" इति व्यासोक्तेः। तत्र नित्यमकरणे प्रत्यवायजनकं सन्ध्यावन्दनादि। नैमित्तिकं निमित्तनियताधीनकर्त्तव्यताकं जातेष्ट्यादि। काम्यं कामनावत्कर्त्तव्यमश्वमेधादि। पुनः प्रकारान्तरेण तत्त्रिविधं सात्त्विकराजसतामसभेदात्। तल्लक्षणान्युक्तानि गीतायां यथा "नियतं सङ्गरहितमरागद्वेषतः कृतम्। अफलप्रेप्सुना कर्म यत्तत् सात्त्विकमुच्यते १। यत्तु कामेप्सुना कर्म साहङ्कारेण वा पुनः। क्रियते बहुलायासं तद्राजसमुदाहृतम् २। अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम्। मोहादारभ्यते कर्म तत्तामसमुदाहृतम्"३। "नियतं नित्यतया विहितं, सङ्गरहितमभिनिवेशशून्यम्। अरागद्वेषतः पुत्रादिप्रीत्या वा शत्रुद्वेषेण वा यत् कृतं न भवति फलं प्राप्तुमिच्छतीति फलप्रेप्सुस्तद्विलक्षणेन निष्कामेण कर्त्रा यत् कृतं कर्म तत् सात्त्विकमुच्यते ।। यत्तु कर्म कामेप्सुना फलं प्राप्तुमिच्छुना साहङ्कारेण वा मत्समः कोऽन्यः श्रोत्रियोऽस्तीत्येवं निरूढाहङ्कारयुक्तेन च क्रियते तच्च पुनर्बहुलायाससंक्लिष्टं प्रयुक्तम् तद्राजसमुदाहृतम् २। अनुबध्यत इत्यनुबन्धः पश्चाद्भावि शुभाशुभं क्षयं वित्तक्षयं हिंसां परपीडां पौरुषं स्वसामर्थ्यमनपेक्ष्यापर्य्यालोच्य केवलं मोहादेव यत् कर्मारभ्यते तत्तामसमुदाहृतम्"३ श्री०। प्रकारान्तरेण तत्त्रिविधं शुक्लकृष्णशुक्लकृष्णभेदात् तत्र शुक्लं हिंसादिरहितं पुण्यजनकं स्वाध्यायादि। कृष्णं शास्त्रनिषिद्धं पापजनकं ब्रह्महत्यादि। कृष्णशुक्लम् हिंसादिसहितं वेदविहितं पुण्यापुण्यजनकं पशुयागादि। कर्मविपाकशब्दे उदा०। तच्च प्रकारान्तरेण द्विविधं, प्रवृत्तं निवृत्तं च यथाह मनुः "इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते। निष्कामं ज्ञानपूर्वन्तु निवृत्तमुपदिश्यते। प्रवृत्तं कर्म संसेव्य देवानामेति साष्टिताम्। निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै"। "कामनापूर्वकं कर्म भूयोऽप्रवृत्तिहेतुत्वात् प्रवृत्तं, तदेव कर्म कामनारहितं ब्रह्मज्ञानाभ्यासपूर्वकं संसारनिवृत्तिहेतुत्वात् निवृत्तमुच्यते" मल०त०रघुन०

विहितकर्माचरणप्रकारः कर्मयोगशब्दे दृश्यः। ५ क्रमौ च "तद्यथेह कर्मचितो लोकः क्षीयते" श्रुतिः "फलञ्च कर्मनिष्पत्तेरौत्सुक्यात्" जै०सू०। अत्र कर्मशब्दः लौकिकवैदिककर्माभिप्रायः। "एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयतीति" श्रुतिः। "फलं कर्मायत्तम्" मीमांसकाः।

कर्मनाशा स्त्री कर्म नाशयति नश-णिच्-अण्। कीकटदेशस्थे नदीभेदे, यस्याः जलस्पर्शेन सर्वपुण्यकर्माणि नश्यन्ति। "कर्मनाशाजलस्पर्शादिना नाश्यसमो मतः" भाषा०।

कर्मनिष्ठ त्रि० कर्मणि निष्ठा यस्य। १यागादिकर्मासक्ते "ज्ञाननिष्ठा द्विजाः केचित् तपोनिष्ठास्तथाऽपरे। तपःस्वाध्यायनिष्ठाश्च कर्मनिष्ठास्तथा परे" मनुः। ७त०। २कर्मासक्तौ स्त्री।

कर्मन्द पु० भिक्षुसूत्रकारके ऋषिभेदे कर्मन्देन प्रोक्तं भिक्षुसूत्रमधीयते इनि। कर्मन्दिन् तत्प्रोक्तभिक्षुसूत्राध्यायिषु ब०व० सि०कौ०। इत्येवंरूपेण पा० विधानात् अमरे एकवचनप्रयोगश्चिन्त्यः।

कर्मपथ पु० कर्मणां कायिकादीनां पन्थाः अच् समा०। "कायेन त्रिविधं कर्म वाचा चापि चतुर्विधम्। मनसा त्रिविधञ्चैव दश कर्मपथांस्त्यजेत्" भा० अनु० १३ अ० उक्तेषु दशसु शुभाशुभकर्ममार्गेषु ते च दशकर्मपथास्तत्रोक्ता यथा "प्राणातिपातं स्तैन्यञ्च परदारमथापि वा। त्रीणि पापानि कायेन सर्वतः परिवर्जयेत्। असत्प्रलापं पारुष्यं पैशुन्यमनृतं तथा। चत्वारि वाचा राजेन्द्र! न जल्पेन्नानुचिन्तयेत्। अनभिध्या परस्वेषु सर्वसत्त्वेषु सौहृदम्। कर्मणां फलमस्तीति त्रिविधं मनसा चरेत्। तस्माद्वाक्कायमनसा नाचरेदशुभं नरः। शुभाशुभान्याचरन् हि तस्य तस्याश्नुते फलम्"।

कर्मप्रवचनीय पु० कर्म क्रियां प्रोक्तवान् इति कर्म+प्र+वच+अनीयर् कर्त्तरि भूते बा० अनीयर्। "कर्मप्रवचनीयाः" इत्यधिकृत्य पाणिन्युक्ते अन्वादिषु शब्देषु। ते हि संप्रति क्रियां न आहुः नापि द्योतयन्ति किन्तु क्रियानिरूपितसम्बन्धविशेषं द्योतयन्तीति तेषां तथात्वं यथोक्तं हरिणा "क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः। नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदकः" इति "अधिपरी अनर्थकौ" इत्यादेस्तद्द्योतकत्वाभावेऽपि योग्यतया तथात्वम्। अन्वादयः अर्थभेदे तत्तत्सूत्रे चार्था मा०दर्शिताः यथा "कर्मप्रवचनीयाः" इत्यधिकृत्य "अनुर्लक्षणे" "तृतीयार्थे" "हीने" "उपोऽधिके च" "अपपरी वर्जने" "आङ्मर्यादावचने" "लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्य्यनवः" "अभिरभागे" "प्रतिः प्रतिनि

पद्यते पुंसां क्षयाय पापस्य कर्म्मण । श्रुतिः “तमेतमात्मानं ब्राह्मणा विविदिषन्ति वेदानुवचनेन ब्रह्मचर्य्येण तपसा दानेन श्रद्धया यज्ञेनानशनेन चे”ति “अतएव यज्ञादीनां मार्गोपतास्वावधार्य्य निष्कामेषु कर्म्मसु प्रवर्त्तयन्ते । पण्डितेनापि मूर्खे काम्ये कर्म्मणि न प्रवर्त्तयितव्य इत्याह षष्ठस्कन्धे—“स्वयं निःश्रेयसं विद्वान् न वक्त्यज्ञाय कर्म्म हि । न राति रोगिणेऽपथ्यं वाञ्छतेऽपि भिषक्तम”। राति ददाति”। म०त०रघु० ।

इदमपि ज्ञाननिष्ठाप्रशंसामात्रम् अन्यथा न कारस्य धर्म्मा-धर्म्ममूलकतया धर्म्मकार्य्यस्य फलाभावे कथं सुखादिभोगः, कथं वा संसारप्रवृत्तिः । किञ्च ईश्वरगन्धे दर्शिते “फलमत उपपत्ते” इत्यादिके शा॰सूत्रभाष्ये धर्म्मस्य फलदातृत्व मतनिवारणेनेश्वरस्यैव फलदातृत्व यदुक्तं तद्विरुद्धं स्यात् । एकान्ततोऽसति कर्म्मण फले कथमीश्वरस्य तद्दातृत्वोक्तिः सङ्गच्छते ।

अतएव तत्रैव भाग० ११,३, ४६ । “परोक्षवादो वेदोऽयं बालानामनुशासनम् । कर्म्ममोक्षाय कर्म्माणि विधत्ते ह्यगदं यथा” इति पूर्व्वतरवाक्ये कर्म्मणा कर्म्म-मोक्षस्यैव उत्तमफलत्वमुक्त न तु फलाभाव । व्याकृत श्चैतत् श्रीधरेण यथा—“ननु स्वर्गाद्यर्थं कर्म्माणि विधत्ते न कर्म्ममोक्षाय तत्राह बालानामनुशासनं यथा भवति तथा तत्र दृष्टान्त अगदम् औषधं यथा पिता बालमगदं पाययन् खण्डलड्डुकादिभिः प्रलोभयन् पाययति ददाति च तानि, नैतावताऽगदपानस्य तल्लाभ प्रयोजनं अपि त्वारोग्यं तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् कर्म्ममोक्षायैव कर्म्माणि विधत्ते” । तत्र दृष्टान्ते ददाति च तानीति वदता दार्ष्टा-न्तिकेऽपि खण्डलड्डुकादिदानवत् फलवत्त्वं सूचितं किन्तु तस्य न मुख्योद्देश्यत्वम् तत्रारोग्यस्थानीयमोक्ष-स्यैवेति सुस्थितं कर्म्मणः फलवत्त्वमिति दिक् ।

कर्म्मबन्ध न॰ कर्म्मणा बन्धः शरीरसम्बन्धः । १कर्म्मजन्यादृष्टेन पूर्व्वदेहस्य सम्बन्धरूपे संसारे “कर्म्मबन्धं प्रहास्यसि” गीता कर्म्मबन्धनमप्यत्र । कर्म्म बन्धनं बन्धसाधनं यस्य । कर्म्मरूपबन्धनसाधनयुक्ते त्रि॰ । “लोकोऽयं कर्म्मबन्धनः” गीता । [जन्यसुखदुःखादिभोगे तत्साक्षात्कारे ।

कर्म्मभोग पु॰ कर्म्मणः कर्म्मजन्यसुखदुःखादेर्भोगः । कर्म्म-

कर्म्मभू स्त्री कर्म्मणः कृषिकर्म्मणो भूः । १कृष्टभूमौ (चषाजमि) हेमच॰ २भारतवर्षे च । [दीर्घम् तत्रात्यन्य तत्रास्यम् ।

कर्म्ममूल न॰ कर्म्मणो मूलमिव मूलमस्य । कुशदले शब्दच॰ ।

कर्म्ममीमांसा स्त्री ६त॰ । कर्म्मविदकशास्त्रसन्दर्भाणां सन्ना (?) पूर्व्वपक्षसिद्धान्तनिर्णयात्मके कर्म्म विषयके विचारशास्त्रभेदे सा च “अथातो धर्म्मजिज्ञासा” इत्यादिका जैमिनिमीमांसा

कर्म्मयुग न॰ क—हिंसायाम् आधारे मनिन् कर्म्म धा॰ । कलि-युगे त्रिका॰ तत्र हिंसाप्रधानकर्म्माधारत्वात् तथात्वम् ।

कर्म्मयोग पु॰ कर्म्मसु योगः कौशलम् । फलसाधनस्यापि कर्म्मणोऽफलसाधनत्वापादानरूपे १कौशलभेदे २फलसिद्ध्य-सिद्ध्योः समत्वभावने च । यथा च तत्कौशलं तथा भावनं च कर्त्तव्यं तथा गीतायां नानास्थानेषु दर्शितं यथा “एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु । बुद्ध्या युक्तो यया पार्थ! कर्म्मबन्धं प्रहास्यसि । नेहाभि-क्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्म्मस्य त्रायते महतो भयात् । व्यवसायात्मिका बुद्धिरेकेह कुरु-नन्दन! । बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् । यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः । वेदवा-दरताः पार्थ! नान्यदस्तीतिवादिनः । कामात्मानः स्वर्ग-पराजन्मकर्म्मफलप्रदाम् । क्रियाविशेषबहुलां भोगैश्व-र्य्यगतिं प्रति । भोगैश्वर्य्यप्रसक्तानां तयापहृतचेतसाम् । व्यवसायात्मिका बुद्धिः समाधौ न विधीयते । त्रैगुण्य-विषया वेदा निस्त्रैगुण्यो भवार्ज्जुन! । निर्द्वन्द्वो नित्यसत्त्वस्थो-निर्योगक्षेम आत्मवान् । यावानर्थ उदपाने सर्व्वतः स-म्प्लुतोदके । तावान् सर्व्वेषु वेदेषु ब्राह्मणस्य विजा-नतः । कर्म्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्म्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्म्मणि । योगस्थः कुरु कर्म्माणि सङ्गं त्यक्त्वा धनञ्जय! । सिद्ध्यसिद्ध्योः समोभूत्वा समत्वं योग उच्यते । दूरेण ह्यवरं कर्म्म बुद्धियोगाद्धनञ्जय! । बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः । बुद्धियुक्तोजहातीह उभे सुकृतदुष्कृते । तस्माद् योगाय युज्यस्व योगः कर्म्मसु कौशलम् । कर्म्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः । जन्मबन्धवि-निर्म्मुक्ताः पदं गच्छन्त्यनामयम्” ।

अधिकारिभेदेन कर्म्मयोगस्यानुष्ठानप्रकारमाह गीता “लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ! । ज्ञानयोगेन सांख्यानां कर्म्मयोगेन योगिनाम् । न कर्म्मणामनारम्भान्नैष्कर्म्म्यं पुरुषोऽश्नुते । न च सन्न्यस-नादेव सिद्धिं समधिगच्छति । न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्म्मकृत् । कार्य्यते ह्यवशः कर्म्म सर्व्वः प्रकृतिजै-र्गुणैः । कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा

[illegible]

[illegible]

[illegible]

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् । अयुक्तः कामकारेण फले सक्तो निबध्यते ॥ सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी । नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥ न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः । न कर्मफलसंयोगं स्वभावस्तु प्रवर्त्तते" । एवं गीतायां नानास्थानेषु फलाभिसन्धित्यागेनैव कर्मणां परम्परया मोक्षसाधनत्वमुक्तमत्रत्य वक्ष्यमाण पात० भाष्ये ईश्वरार्पणबुद्ध्यानुष्ठीयमानानां योगसाधनत्वोक्तेश्च मुमुक्षुणा उक्तयाऽन्यरीत्यैव कर्म करणीयमिति स्थितम् । कर्म क्रियैव योगो योगसाधनम् । तपःस्वाध्यायेश्वर-प्रणिधानादिरूपे क्रियायोगे २योगसाधने । यथा च तपःप्रभृतीनां योगसाधनत्वं तथा साधनपादे पातञ्जलसूत्रभाष्यविवरणेषूक्तं यथा—
"तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" सू० । "उद्दिष्टः समाहितचित्तस्य योगः, कथं व्युत्थितचित्तोऽपि योगयुक्तः स्यादित्येतदारभ्यते । नातपस्विनो योगः सिध्यति अनादिकर्मक्लेशवासनाचित्रा प्रत्युपस्थितविषयजाला चाशुद्धिर्नान्तरेण तपः सम्भेदमापद्यते इति तपस उपादानं तच्च चित्तप्रसादनमबाधमानमनेनासेव्यमिति मन्यते, स्वाध्यायः प्रणवादिपवित्राणां जपो मोक्षशास्त्राध्ययनं वा । ईश्वरप्रणिधानं सर्वक्रियाणां परमगुरावर्पणं तत्फलसंन्यासो वा" भा० । "उद्दिष्ट इति । अभ्यासवैराग्ये हि योगोपायौ प्रथमे पादे उक्तौ, न च तौ व्युत्थितचित्तस्य झगित्येव सम्भवत इति द्वितीयपादोपदेश्यानुपायानपेक्षते सत्त्वशुद्ध्यर्थं, ततो हि विशुद्धसत्त्वः कृतपरिकर्माभ्यासवैराग्ये प्रत्यग्रं भावयति । समाहितस्याविक्षिप्तस्य, कथं व्युत्थानचित्तोऽप्युपदेक्ष्यमाणैरुपायैर्युक्तः सन् योगी स्यादित्यर्थः । तत्र वक्ष्यमाणेषु नियमेषु व्याख्या प्राथमिक प्रत्युपयुक्ततरतया प्रथमं क्रियायोगमुपदिशति सूत्रकारः । तपःस्वाध्यायेत्यादि, क्रियैव योगः क्रियायोगो योगसाधनत्वात् । अतएव विष्णुपुराणे खाण्डिक्यकेशिध्वजसंवादे । 'योगयुक् प्रथमं योगी युञ्जानोऽभिधीयते" इत्युपक्रम्य तपः "स्वाध्यायादयो" दर्शिताः । व्यतिरेकमुखेन तपस उपायत्वमाह । नातपस्विन इति तपसोऽवान्तरव्यापारमुपायतोपयोगिनं दर्शयति अनादीति । अनादिभ्यां कर्मक्लेशवासनाभ्यां चित्रा अतएव प्रत्युपस्थितमुपनतं विषयजालं यस्याः सा तथोक्ता । अशुद्धीरजस्तमःसमुद्रेको नान्तरेण तपः सम्भेदमापद्यते सान्द्रस्य नितान्तविरलता सम्भेदः, ननूपादीयतामेतदपि तपोधातुवैषम्यहेतुतया योगप्रतिपक्ष इति कथं तदुपाय इति अत आह—तच्चेति, तावन्मात्रमेव तपश्चरणीयं न यावता धातुवैषम्यमापद्यत इत्यर्थः । प्रणवादयः पुरुषसूक्तरुद्रमण्डलब्राह्मणादयो वैदिकाः, पौराणिकाश्च मन्त्राः नारादय, परमगुरुर्भगवानीश्वरस्तस्मिन्, यदेतदुक्तम्—"कामतोऽकामतो वापि यत् करोमि शुभाशुभम् । तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तः करोम्यहम्" इति "तत्फलसंन्यासो वा" फलानभिसन्धानेन कार्यकरणम् । यदेतदुक्तम् "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि" (गीता) विव०

"स हि क्रियायोगः" भा० "समाधिभावनार्थः क्लेशतनूकरणार्थश्च" सू० "स हि आसेव्यमानः समाधिं भावयति, क्लेशांश्च प्रतनूकरोति, प्रतनूकृतान् क्लेशान् प्रसंख्यानाग्निना दग्धबीजकल्पानप्रसवधर्मिणः करिष्यतीति तेषां तनूकरणात् पुनः क्लेशैरपरामृष्टा सत्त्वपुरुषान्यताख्यातिः सूक्ष्मा प्रज्ञा समाप्ताधिकारा प्रतिप्रसवाय कल्पिष्यते इति" भा० । "तस्य प्रयोजनाभिधानाय सूत्रमवतारयति स हीति" ननु क्रियायोग एव चेत् क्लेशान् प्रतनूकरोति हन्त तर्हि प्रसंख्यानेनेत्यत आह प्रतनूकृतानिति क्रियायोगस्य प्रतनूकरणमात्रे व्यापारो न तु वन्ध्यत्वे क्लेशानां, प्रसंख्यानस्य तु तद्वन्ध्यत्वे, दग्धबीजकल्पानिति वन्ध्यत्वेन दग्धशालिबीजसाधर्म्यमुक्तम् स्यादेतत् प्रसंख्यानमेव चेत् क्लेशान् अप्रसवधर्मिणः करिष्यति कृतमेषां प्रतनूकरणेनेत्यत आह तेषामिति । क्लेशानामतनुत्वे हि बलवद्विरोधिग्रस्ता सत्त्वपुरुषान्यताख्यातिरुदेतुमेव नोत्सहते किमु प्रागेव तद्वन्ध्यभावं कर्त्तुम्, प्रतनूकृतेषु तु दुर्बलेषु तद्विरोधिन्यपि वैराग्याभ्यासाभ्यामुपजायते उपजाता च तैरपरामृष्टा अनभिभूता सैव यावत् परामृश्यते सत्त्वपुरुषान्यताख्यातिसूक्ष्मप्रज्ञायन्विततया सूक्ष्मोऽस्या विषय इति सूक्ष्मा प्रज्ञा प्रतिप्रसवाय प्रविलयाय कल्प्यते, कुतः ? समाप्तोऽधिकारः कार्यारम्भणं गुणानां यया हेतुभूतया सा तथोक्तेति" विव० । क्रियायोगोऽप्यत्र ।

कार्म्मरङ्ग पुन० कर्मणे हिंसायै रज्यते रन्ज–घञ् अनुषङ्गादिवत् निमित्तार्थे हृत० । (कामराङ्गा) १शिरालफलके वृक्षे शब्दच० २तत्फले न० तद्गुणा भाव० उक्ता "कर्मरङ्गं हिमं ग्राहि स्वाद्वम्लं कफवातनुत्" कफवात-

[illegible]

कर्मपरो [illegible]

कर्मभञ्ज [illegible]

कर्मगाटी [illegible]

कर्मविपाक [illegible]

चित्रीकृतमिव सर्वतोमत्स्यजालग्रन्थिभिरिवाततम् इत्येता अनेकभवपूर्व्विका वासना । यस्त्वयं कर्माशय एष एकभविक उक्त इति । ये संस्काराः स्मृतिहेतवस्ता वासनास्ताश्चानादिकालीना इति यस्त्वसावेकभविकः कर्माशयः स नियतविपाकश्चानियतविपाकश्च तत्र दृष्टजन्मवेदनीयस्य नियतविपाकस्यैवायं नियमो नत्वदृष्टजन्मवेदनीयस्यानियतविपाकस्य, कस्मात् ? योह्यदृष्टजन्मवेदनीयोऽनियतविपाकस्तस्य त्रयी गतिः—कृतस्याविपक्वस्य नाशः १ प्रधानकर्मण्यावापगमनं २वा नियतविपाकप्रधानकर्मणाभिभूतस्य वा चिरमवस्थानमिति३ । तत्र कृतस्याविपक्वस्य नाशो यथा शुक्लकर्मोदयादिहैव नाशः कृष्णस्य, यत्रेदमुक्तम् "द्वे द्वे ह वै कर्मणी वेदितव्ये पापकस्यैकोराशिः पुण्यकृतोऽपहन्ति तदिच्छस्व कर्माणि सुकृतानि कर्तुमिहैव कर्म कवयो वेदयन्ते" प्रधानकर्मण्यावापगमनं २यत्रेदमुक्तम् "स्यात् स्वल्पः सङ्करः सपरिहारः सप्रत्यवमर्षः कुशलस्य नापकर्षायालम्" कस्मात् ? कुशलं हि मे बह्वन्यदस्ति यत्रायमावापङ्गतः स्वर्गेऽप्यपकर्षमल्पं करिष्यतीति । नियतविपाकप्रधानकर्मणाभिभूतस्य वा चिरमवस्थानम् ३कथमिति ? दृष्टजन्मवेदनीयस्यैव नियतविपाकस्य कर्मणः समानं मरणमभिव्यक्तिकारणमुक्तं न त्वदृष्टजन्मवेदनीयस्यानियतविपाकस्य, यत्त्वदृष्टजन्मवेदनीयं कर्मानियतविपाकं तन्नश्येत् आवापं वा गच्छेत् अभिभूतं वा चिरमप्युपासीत यावत् समानं कर्माभिव्यञ्जकं निमित्तमस्य विपाकाभिमुखं करोतीति तद्विपाकस्यैव देशकालनिमित्तानवधारणादियं कर्मगतिश्चित्रा दुर्विज्ञाना चेति, नचोत्सर्गस्यापवादात् निवृत्तिरित्येकभविकः कर्माशयोऽनुज्ञायत इति" भा० ।

"स्यादेतदविद्यामूलत्वे कर्माशयो विद्योत्पादे सत्यविद्याविनाशात् मा नाम तस्य कर्माशयान्तरं चैषीत्, प्राक्तन कर्माशयानामनादिभवपरम्परासञ्चितानामसंख्यातानामनियतविपाककालानां भोगेन क्षपयितुमशक्यत्वादशक्योच्छेदः संसारः स्यादित्यत आह सतीति । एतदुक्तं भवति सुखदुःखफलो हि कर्माशयस्तादर्थ्येन तन्नान्तरीयकतया जन्मायुषी अपि प्रसूते सुखदुःखे च रागद्वेषानुषक्ते तदविनिर्भागवर्त्तिनी तदभावे न भवतः, न चास्ति सम्भवो, न च तत्र यस्तुष्यति वोद्विजते वा, न च तस्य सुखं दुःखं वेति । तदियमात्मभूमिः क्लेशसलिलावसिक्ता कर्मफलप्रसवक्षेत्रमित्यतः क्लेशानां फलोपजननेऽपि कर्माशयसहकारितेति क्लेशसमुच्छेदे सहकारिवैकल्यात् सम्भवन्नोऽप्यनियतविपाककालोऽपि प्रसङ्ख्यानदग्धबीजभावो न फलाय कल्पत इति । उक्तमर्थं भाष्यमेव द्योतयति सत्स्विति । अत्रैव दृष्टान्तमाह—यथा तुषेति । सतुषा अपि दग्धबीजभावा स्वेदादिभिः । दार्ष्टान्तिके योजयति तथेति । ननु न क्लेशा शक्या अपनेतुं, न हि सतामपनय इत्यत आह न प्रसङ्ख्यानदग्धक्लेशबीजभाव इति । विपाकस्य त्रैविध्यमाह स चेति । विपच्यते साध्यते कर्मभिरिति विपाकः । कर्मैकत्व भूयस्त्वाभ्यां जन्मैकत्वानेकत्वगोचरा प्रथमा विचारणा, द्वितीया तु कर्मानेकत्वं भूयस्त्वा जन्मैकत्वानेकत्वगोचरा । तदेवं चत्वारो विकल्पाः—तत्र प्रथमं विकल्पमपाकरोति—न तावदेकं कर्मैकस्य जन्मनः कारणम्१ । पृच्छति कस्मादिति । उत्तरम् अनादिकाले ऐकैकजन्मसञ्चितस्य अत एव असङ्ख्येयस्य एकैकजन्मसञ्चितादेकैकस्मात् कर्मणोऽवशिष्टस्य कर्मणः साम्प्रतिकस्य च फलक्रमानियमादनाश्वासो लोकस्य प्रसक्तः स चानिष्ट इति । एतदुक्तं भवति कर्माशयस्य निरन्तरत्वात् तदुत्पत्तिपाङ्क्त्यासङ्ख्यान्योन्यसम्पीडिताश्च कर्माशया निरन्तरोत्पत्तयो निरुच्छ्वासाः स्वविपाकं प्रतीति न फलक्रमं शक्योऽवधारयितुं मेधावतेत्यनाश्वासो पुण्यानुष्ठानं प्रति प्रसक्त इति । द्वितीयं विकल्पं निराकरोति न च एकं कर्मानेकस्य जन्मनः कारणम्२ । पृच्छति कस्मादिति । उत्तरम् अनेकस्मिन् जन्मन्याहितमेकमेव कर्मानेकस्य जन्मलक्षणस्य विपाकस्य निमित्तमित्यवशिष्टस्य विपाककालाभावः प्रसक्तः स चाप्यनिष्ट इति कर्मवैफल्येन तदनुष्ठानाप्रसङ्गात् । यदैकजन्मसमुच्छेद्ये कर्मण्येकस्मिन् फलक्रमानियमादनाश्वासस्तदा कैव कथा बहुजन्मसमुच्छेद्ये कर्मण्येकस्मिन् ? तत्र ह्यवसराभावात् विपाककालाभाव एव साम्प्रतिकस्येति भावः । तृतीयं विकल्पं निराकरोति—न चानेकं कर्मानेकस्य जन्मनः कारणम्३ । अत्र हेतुमाह तदनेकं जन्म युगपच्च सम्भवत्वयोगिन इति क्रमेण वाच्यं यदि हि कर्मसहस्रं युगपज्जन्मसहस्रं प्रसुवीत तत एव कर्मसहस्रप्रक्षयादवशिष्टस्य विपाककालाच्च फलक्रमे नियमश्च न स्यात् अत्यस्ति जन्मनां यौगपद्यम्, एवमेव प्रथमपक्षप्रयोक्तदूषणमित्यर्थः । तदेवं पक्षत्रये निराकृते पारिशेष्यादनेकं कर्मैकस्य जन्मनः कारणमिति४ पक्षोऽवशिष्यते तस्माज्ज-

यस्य नेह प्राधान्यमभिमतं मरणक्रियया यदीयस्तस्य नियतविपाकस्य नान्यदानवकाशत्वात्, अनियतविपाकस्य तु दुर्बलत्वमन्यदा नाशकाशत्वात्, चिरमवस्थानं बीजभावमात्रेण, न पुनः प्रधानोपकारितया, तस्य स्वतन्त्रत्वात् । ननु प्रायणेनैकदैव कर्माशयोऽभिव्यज्यत इत्युक्तमिदानीन्तु चिरावस्थानमुच्यते, तत् कथं ? न पूर्वेण न विरुध्यत इत्याशयवान् पृच्छति कथमिति । उत्तरम् अदृष्टेति । जात्यभिप्रायमेकवचनम् । तदितरस्य नानात्वतामवधारयति यस्त्वदृष्टेति । शेषं सुगमम्" विव० ।

"ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात्" सू० ।

"ते जन्मायुर्भोगाः पुण्यहेतुकाः सुखफलाः, अपुण्यहेतुकाः दुःखफला इति यथा चेदं दुःखं प्रतिकूलात्मकम् एवं विषयसुखकालेऽपि दुःखमस्त्येव प्रतिकूलात्मकं योगिनः" भा० ।

"उक्तम् क्लेशमूलत्वं कर्मणः, कर्ममूलत्वञ्च विपाकानाम् । अथ विपाकाः कस्य मूलम् ? येनामी त्यक्तव्या इत्याह ते इत्यादि । व्याचष्टे—ते जन्मायुर्भोगा इति । यद्यपि जन्मायुषोरेव ह्लादपरितापपूर्व्वभावितया तत्फलत्वं न तु भोगस्य ह्लादपरितापोदयानन्तरभाविनस्तदनुभवात्मनः, तथाप्यनुभाव्यतया भोग्यतया भोगफलत्वमिति मन्तव्यम् । नन्वपुण्यहेतुका जात्यायुर्भोगाः परितापफला भवन्तु तेषां प्रतिकूलवेदनीयत्वात् कस्मात् पुनः पुण्यहेतुका अप्यमी न सुखफलाः ? अनुकूलवेदनीयत्वात् । नचैषां प्रत्यात्मवेदनीयानुकूलता शक्या सहस्रेणाप्यनुमानागमैरपाकर्तुम्, न च ह्लादपरितापौ परस्पराविनाभूतौ यतो ह्लादे उपादीयमाने परितापोऽप्यवर्जनीयतयाऽऽपतेत् तयोर्भिन्नहेतुकत्वात् इत्यत आह—यथा चेदमिति" विवरणम् ।

मरणस्य यथा सर्व्वकर्माभिव्यञ्जकत्वं तथा शा० भा०

"अपि च प्रायणमनारब्धफलस्य कर्मणोऽभिव्यञ्जकं न प्राक् प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्य अभिव्यक्त्यनुपपत्तेः । तच्चाविशेषाद्यावत् किञ्चिदनारब्धफलं तस्य सर्व्वस्याभिव्यञ्जकम्, न हि साधारणे निमित्ते नैमित्तिकमसाधारणं भवितुमर्हति, नह्यविशिष्टे प्रदीपसन्निधौ घटोऽभिव्यज्यते न पट इत्युपपद्यते इत्याशङ्का निराकृता यथा—

"अपि च केन हेतुना प्रायणमनारब्धफलस्य कर्मणोऽभिव्यञ्जकं प्रतिज्ञायत इति वक्तव्यम् । आरब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तेः तदुपशमात् प्रायणकाले वृत्त्युद्भवो भवतीति यद्युच्येत ततो वक्तव्यं यथैव हि प्राक्प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तिरेवं प्रायणकालेऽपि विरुद्धफलस्यानेकस्य कर्मणो युगपत्फलारम्भासम्भवात् बलवता प्रतिबद्धस्य दुर्बलस्य वृत्त्युद्भवानुपपत्तिरिति । नह्यनारब्धफलत्वसामान्येन जात्यन्तरोपभोग्यफलमप्यनेकं कर्मैकस्मिन् प्रायणे युगपदभिव्यक्तं सदेकां जातिमारभत इति शक्यं वक्तुम्, प्रतिनियतफलत्वविरोधात् । नापि कस्यचित् कर्मणः प्रायणे अभिव्यक्तिः कस्यचिदुच्छेद इति शक्यं वक्तुम्, ऐकान्तिकफलत्वविरोधात् । न हि प्रायश्चित्तादिभिर्हेतुभिर्विना कर्मणामुच्छेदः सम्भाव्यते । स्मृतिरपि विरुद्धफलेन कर्मणा प्रतिबद्धस्य कर्मान्तरस्य चिरमवस्थानं दर्शयति । "कदाचित् सुकृतं कर्म कूटस्थमिह तिष्ठति । पच्यमानस्य संसारे यावद्दुःखाद्विमुच्यते" इत्येवंजातीयका । यदि च कृत्स्नमनारब्धफलं कर्मैकस्मिन् प्रायणेऽभिव्यक्तं सदेकां जातिमारभेत, ततः स्वर्गनरकतिर्य्यग्योनिष्वधिकारानवगमात् धर्माधर्मानुत्पत्तौ निमित्ताभावान्नोत्तरा जातिरुपपद्येत, ब्रह्महत्यादीनाञ्चैकैकस्य कर्मणोऽनेकजन्मनिमित्तत्वं स्मर्य्यमाणमुपरुध्येत । न च धर्माधर्मयोः स्वरूपफलसाधनादिसमधिगमे शास्त्रादतिरिक्तं कारणं शक्यं सम्भावयितुम् । न च दृष्टफलस्य कर्मणः कारीर्य्यादेः प्रायणमभिव्यञ्जकं सम्भवतीत्यव्यापिकापीयं प्रायणस्याभिव्यञ्जकत्वकल्पना । प्रदीपोपन्यासोऽपि कर्मबलाबलप्रदर्शनेनैव प्रतिनीतः । स्थूलसूक्ष्मरूपाभिव्यक्तिवच्चेदं द्रष्टव्यम् । यथा हि—प्रदीपः समानेऽपि सन्निधाने स्थूलरूपमभिव्यनक्ति न सूक्ष्मम् एवं प्रायणं समानेऽप्यनारब्धफलस्य कर्मजातस्य प्राप्तावसरत्वे बलवतः कर्मणो वृत्तिमुद्भावयति न दुर्बलस्येति । तस्मात् श्रुतिस्मृतिन्यायविरोधादश्लिष्टोऽयमशेषकर्माभिव्यक्त्यभ्युपगमः । शेषकर्मसद्भावेऽनिर्मोक्षप्रसङ्ग इत्ययमप्यस्थाने सम्भ्रमः सम्यग्दर्शनादशेषकर्मक्षयश्रुतेः" ।

एवं शुभाशुभकर्मविपाकः सामान्यतो निरूपितः । इदानीमशुभकर्मविपाको विशेषतो निरूप्यते स चाधर्मशब्दे १२२० पृ० उक्तोऽपि प्रपञ्चार्थमिहोच्यते—

पुराणसर्व्वस्वे विष्णु पु० २ अ० ६ अ० पराशरमैत्रेयसंवादे ।

"पराशर उवाच । ततश्च नरकान् विप्र ! भुवोऽधः सलिलस्य च । पापिनो येषु पात्यन्ते तान् शृणुष्व समाहितः । रौरवश्चैव वेधश्च शूकरो विशसनस्तथा । महाज्वालस्तप्तकुम्भो लवणोऽथ विमोहनः । रुधिरान्धो वैतरणी

पादाभ्यङ्गञ्च यः कुर्य्यादश्वपृष्ठेन स व्रजेत् । हेमरत्नप्रदानेन याति दुर्गाणि निस्तरन् । धरामकुसुमप्रदानेन पथयानेन गच्छति । अन्नपानप्रदानेन पिबन् खादंश्च गच्छति । इत्येवमादिभिर्दानैः सुखं यान्ति यमालयम् । स्वर्गेऽपि विपुलान् भोगान् प्राप्नोति विविधान्नरः । सर्व्वेषामेव दानानामन्नदानं परं स्मृतम् । सद्यः प्रीतिकरं दिव्यं बलपुष्टिविवर्द्धनम् । नान्नदानसमं दानं त्रिषु लोकेषु विद्यते । अन्नाद्भवन्ति भूतानि तदभावे म्रियन्ति च । रक्तं मांसं वसा शुक्रं क्रमादन्नात् प्रवर्त्तते । शुक्राद्भवन्ति भूतानि तस्मादन्नमयं जगत् । हेमरत्नाश्वनागेन्द्रनारीस्रक्चन्दनादिभिः । समस्तैरपि सम्प्राप्तैर्न रमन्ते बुभुक्षिताः । गर्भस्था जायमानाश्च बालाः वृद्धाश्च मध्यमाः । आहारमभिकाङ्क्षन्ति देवदानवतापसाः । क्षुधा हि सर्व्वरोगाणां व्याधिः श्रेष्ठतमः स्मृतः । तस्मादौषधिलेपेन (आहारेण) प्रतीकारः प्रकीर्त्तितः । नास्ति क्षुधासमं दुःखं नास्ति रोगः क्षुधासमः । नास्त्याहारसमं सौख्यं नास्ति क्रोधसमो रिपुः । अतएव महापुण्यमन्नदानं प्रधानतः । यतः क्षुधाग्निसन्तप्ता म्रियन्ते सर्व्वदेहिनः । अन्नदः प्राणदः प्रोक्तः प्राणदश्चापि सर्व्वदः । तस्मादन्नप्रदानेन सर्व्वदानफलं लभेत् । त्रैलोक्ये यानि रत्नानि भोगस्त्रीवाहनानि च । अन्नपानप्रदः सर्व्वमिहामुत्र च तल्लभेत् । यस्यान्नपानपुष्टाङ्गः कुरुते पुण्यसञ्चयम् । अन्नप्रदातुस्तस्यार्द्धं कर्त्तुश्चार्द्धं न संशयः । धर्म्मार्थकाममोक्षाणां देहः परमसाधनम् । स्थितिस्तस्यान्नपानाभ्यामतस्तत् सर्व्वसाधनम् । अन्नं प्रजापतिः साक्षादन्नं विष्णुः शिवः स्वयम् । तस्मादन्नसमं दानं न भूतं न भविष्यति । त्रयाणामपि लोकानामुदकं जीवनं स्मृतम् । पवित्रममृतं दिव्यं शुद्धं सर्व्वरसाश्रयम् । अन्नपानाश्वगोवस्त्रशय्याच्छत्रासनम् । प्रेतलोके प्रशस्तानि दानान्यष्टौ विशेषतः । एवं दानविशेषेण धर्म्मराजपुरं नराः । यस्माद्यान्ति सुखेनैव तस्माद्दानं समाचरेत् । ये पुनः क्रूरकर्म्माणः पापा दानविवर्जिताः । ते घोरेण पथा यान्ति दक्षिणेन यमालयम् । षडशीतिसहस्राणि योजनानामतीत्य वै । वैवस्वतपुरं ज्ञेयं नानारूपव्यवस्थितम् । समीपस्थमिवाभाति नराणां शुभकर्म्मणाम् । पापानामतिदूरस्थं पथा रौद्रेण गच्छताम् । तीक्ष्णकण्टकयुक्तेन शर्कराशिचितेन च । क्षुरधारानिभैस्तीक्ष्णैः पाषाणैर्निचितैस्तथा । क्वचित् पङ्केन महता उत्तार्य्येश्च खातकैः । क्वचित् सूचीनिभैर्दर्भैः सङ्कुलेन पथा क्वचित् । तटप्रपातविषमैः पर्व्वतैर्वृक्षसङ्कुलैः । प्रतप्ताङ्गारयुक्तेन यान्ति मार्गेण दुःखिताः । क्वचिद्विषमगर्त्तैश्च क्वचिल्लोष्ट्रैः सुपिच्छलैः । प्रतप्तवालुकाभिश्च तथा तीक्ष्णैश्च शङ्कुभिः । अनेकशाखाविततैर्व्याप्तं वंशवनैः क्वचित् । कष्टेन तमसा मार्गमनालम्बनं क्वचित् । अयःशृङ्गाटकैर्व्याप्तं क्वचिद्दावाग्निना पुनः । क्वचित्तप्तशिलाभिश्च क्वचिद्व्याप्तं हिमेन च । क्वचिद्वालुकया व्याप्तमाकण्ठान्तप्रवेशया । क्वचिद्दुष्टाम्बुना व्याप्तं क्वचिच्च गोमयाग्निना । क्वचित् सिंहैर्वृकैर्व्याघ्रैर्दंशैः कीटैश्च दारुणैः । क्वचिन्महाजलौकाभिः क्वचिच्चाजगरैः पुनः । मक्षिकाभिश्च रौद्राभिः क्वचित् सर्पैर्विषोल्वणैः । मत्तमातङ्गयूथैश्च बलोन्मत्तैः प्रमाथिभिः । पन्थानमुल्लिखद्भिश्च तीक्ष्णदंष्ट्रैर्महावृषैः । महाविषाणैर्महिषैः शृङ्गैः मत्तैश्च रौद्रकैः । डाकिनीभिश्च रौद्राभिर्विकरालैश्च राक्षसैः । व्याधिभिश्च महाघोरैः पीड्यमाना व्रजन्ति ते । महाधूलिविमिश्रेण महाचण्डेन वायुना । महापाषाणवर्षेण हन्यमाना निराश्रयाः । क्वचिद्विद्युत्प्रपातेन दह्यमाना व्रजन्ति च । महाटङ्कप्रवर्षेण भिद्यमानाश्च सर्व्वतः । पतद्भिर्वज्रसङ्घातैरुल्कापातैश्च दारुणैः । प्रतप्ताङ्गारवर्षेण दह्यमाना रुदन्ति च । महता पांशुवर्षेण पूर्य्यमाणा रुदन्ति हि । अकुम्भधरवैर्घोरैर्वित्रास्यन्ते मुहुर्मुहुः । निशितायुधवर्षेण पूर्य्यमाणाश्च सर्व्वतः । महाक्षाराम्बुधाराभिः सिच्यमाना व्रजन्ति च । महाशीतेन महता रूक्षेण परुषेण च । समन्ताद्धूयमानास्ते शुष्यन्ते कम्पयन्ति च । इत्थं रौद्रेण मार्गेण पाथेयरहितेन च । निरालम्बेन दुर्गेण निर्ज्जनेन समन्ततः । अविश्रामेण महता निर्गतापाश्रयेण च । तमोरूपेण कष्टेन सर्व्वदुःखाश्रयेण च । नीयन्ते देहिनः सर्व्वे ये मूढाः पापकारिणः । यमदूतैर्महाघोरैस्तदाज्ञाकारिभिर्बलात् । एकाकिनः पराधीना मित्रबन्धुविवर्जिताः । शोचन्तः स्वानि कर्म्माणि रुदन्तस्ते मुहुर्मुहुः । प्रेतीभूता विवस्त्राश्च शुष्ककण्ठौष्ठतालुकाः । त्रासाद्भीतभीताश्च दह्यमानाः क्षुधाग्निना । बद्धाः शृङ्खलया केचिदुत्ताना पादयोर्नराः । आकृष्यन्ते दृश्यमाना यमदूतैर्बलोत्कटैः । उरसाऽधोमुखाश्चान्ये कृष्यमाणाः सुदुःखिताः । केशपाशनिबद्धाश्च समाकृष्यन्ति रज्जुना । ललाटे चाङ्कुशेनान्ये भिन्ना कृष्यन्ति देहिनः । उत्ताना कण्टकपथा क्वचिद्-

[illegible] । [illegible] मटरे च [illegible] ।
[illegible] [illegible] [illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible] । [illegible]
[illegible] [illegible] । [illegible] [illegible] [illegible] [illegible]
[illegible] च [illegible] । [illegible] च [illegible]
[illegible] । [illegible] [illegible] [illegible] [illegible]
[illegible] । [illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] । [illegible]

[illegible] च [illegible] । [illegible] [illegible] [illegible] [illegible]
[illegible] । [illegible] [illegible] [illegible] । [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] । [illegible] [illegible]
[illegible] [illegible] [illegible] । [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] । [illegible] च [illegible] ।

च भयानकः” इत्युपक्रम्य “कराला विकराला च वज्रविंशतिमा स्मृता । त्रिकोणा पञ्चकोणा च सुदीर्घा परिवर्त्तुला । सप्तभौमाष्टभौमा च दीप्तमायेति चाष्टमी । एता नाम्ना समुद्दिष्टा घोरा नरककोटयः । अष्टाविंशतिरेवैता पापानां यातनात्मिकाः । आसां क्रमेण विज्ञेयाः पञ्चपञ्चैव नायकाः । प्रत्येकं सर्वकोटीनां नामतस्तन्निबोधत । रौरवः प्रथमस्तेषां रुदन्ति यत्र देहिनः । महारौरवपीडाभिर्महान्तोऽपि रुदन्ति हि । ततः शीतं तथा चोष्णं पञ्चाद्ये नायकाः स्मृताः । सुघोरः सुतलस्तीक्ष्णः पद्मः सञ्जीवनः शठः । महामायी विलोमश्च सुलोमश्च कटङ्कटः । तीव्रवेगः करालश्च विकरालः सुकम्पनः । महापद्मः सुचक्रश्च कालसूत्रः प्रगर्जनः । सूचीमुखः सुनेमिश्च खादकः सुप्रपीडितः । कुम्भीपाकः सुपाकश्च क्रकचश्चातिदारुणः । अङ्गारराशिभवनं मेरुरसृक्पूयह्रदस्तथा । तीक्ष्णायसस्तु शकुनिर्महासम्वर्त्तकः क्रतुः । तप्तजन्तुः पङ्कलेपः पूतिमांसो द्रवत्त्रपुः । उच्छ्वासश्च निरुच्छ्वासः सुदीर्घः कूटशाल्मलिः । अरिष्टः सुमहानादः प्रवाहोऽसृक्प्रवाहणः । अपमेघः स्फटिकश्च सिंहव्याघ्रगजाननः । श्वसूकराश्वमहिषवृषच्छागखराननाः । ग्राहकुम्भीरनक्राख्याः सर्पकूर्माश्च वायसाः । गृध्रोलूकजलौकाश्च शार्दूलककपिकर्कटाः । गण्डकः पूतिवक्त्रश्च रक्ताक्षः पूतिमृत्तिकः । कणधूमस्तथाग्निश्च क्रमीणां निचयस्तथा । अभेद्यश्चातितिष्ठश्च रुधिराम्बुरभोजनः । लालाभक्षश्चात्मभक्षः सर्वभक्षः सुदारुणः । सङ्कटः सुविलम्बश्च विषमः कटपूतनः । अम्बरीषः कटाहश्च कष्टा वैतरणी नदी । सुतप्तलोहशयनमेकपादप्रपूरणः । असितालवनं घोरमस्थिभङ्गः प्रपीडनम् । तिलातसी सुतप्तौ च कूटपापः प्रमर्द्दनः । महाचूर्णः सुचूर्णश्च तप्तलोहमयी शिला । पर्व्वतः क्षुरधाराख्यस्तथा यमलपर्व्वतौ । मूत्रविष्ठाश्रुकूपश्च क्षारतूयश्च शोषणः । मुषलोद्वलयन्त्रं च शिलाशकटलाङ्गलम् । तालपत्रासिगहनं महामशकमण्डलम् । सम्मोहनोऽस्थिभङ्गश्च तप्तशूलमयोगुडः । बहुदुःखं महादुःखं कश्मलं समलं मलम् । हालाहलो विरूपश्च सुरूपश्च यमानुगः । एकपादो द्विपादश्च तीव्रश्चावीचिवर्त्तिनः । अष्टाविंशतिरित्येते क्रमशः परतः स्थिताः । एषां नामानुपूर्व्येण पञ्चपञ्चैव नायकाः । रौरवादिं परीच्यन्ते

नरकाणां शतं स्मृतम् । चत्वारिंशत्समधिकं महानरकमण्डलम् । एषु पापाः विपच्यन्ते नराः कर्म्मानुरूपतः । यातनाभिर्विचित्राभिरा कर्म्मप्रचयात् क्षयम् । यथा मलक्षयात् यद्वदग्नौ ध्मायन्ति धातवः । तथाऽऽपापक्षयात् पापाः शोध्यन्ते नरकाग्निषु । हस्तयोः पादयोर्बद्धा तप्तशृङ्खलया नराः । महावृक्षाग्रमारोप्य लम्ब्यन्ते यमकिङ्करैः । ततस्ते सर्व्वयत्नेन क्षिप्ता दोल्यन्ति किङ्करैः । दोल्यमानश्चातिवेगेन निःसज्ञा यान्ति योजनम् । अन्तरीक्षस्थितानाञ्च लोहभारः समन्ततः । पादयोर्बध्यते तेषां यमदूतैर्महाबलैः । तेन भारेण महता भृशमात्मेन दुःखिताः । ध्यायन्तः स्वानि कर्म्माणि तूष्णीं तिष्ठन्ति निश्चलाः । कशाभिरग्निवर्णाभिर्लौहदण्डैः सकण्टकैः । हन्यन्ते किङ्करैर्घोरैः समन्तात् पापकारिणः । ततः क्षारेण दीप्तेन वह्निनापि विशेषतः । समन्ततः प्रलिप्यन्ते जताङ्गा जर्ज्जरीकृताः । पुनर्विदार्य्य चाङ्गेषु शिरःप्रभृति क्रमात् । वार्त्ताकुवत् प्रभज्यन्ते तप्ततैलकटाहके । विष्ठापूर्णे ततः कूपे कृमीणां निचये तथा । मेदोऽसृक्पूयपूर्णायां वाप्यां क्षिप्यन्ति ते पुनः । भक्ष्यन्ते कृमिभिस्तीक्ष्णैर्लौहतुण्डैश्च वायसैः । श्वभिर्दंशैर्वृकैर्व्याघ्रैश्च विकृताननैः । पच्यन्ते मांसवच्चापि प्रतप्ताङ्गारराशिषु । भिन्नाः शूलेषु तीक्ष्णेषु नराः पापेन कर्म्मणा । तैलपीडैरिवाक्रम्य घोरकर्म्मभिरात्मजैः । तिलवत् सम्प्रपीड्यन्ते चक्राख्ये नरके नराः । तुद्यन्ते चातितप्तेषु लौहभाण्डेष्वनेकधा । तैलपूर्णकटाहेषु सुतप्तेषु तथा पुनः । बन्धनं पाद्यते जिह्वा येऽसत्यप्रियवादिनः । सन्दंशेन सुदीप्तेन प्रपीड्योरश्च पादनः । मिथ्यागमप्रवक्तृश्च जिह्वाईमाप्तनिर्गतात् । जिह्वाग्रात् क्रोशविस्तारां कुठरैस्तीक्ष्णैश्च पाट्यते । निर्भर्त्सयन्ति ये क्रूरा मातरं पितरं गुरुम् । तेषां वज्रशलोकाभिः समापूर्य्य सीव्यते । ततः क्षारेण दीप्तेन ताम्रेण त्रपुणा पुनः । दृतेनापूर्य्य तेऽप्यथ तप्ततैलेन तन्मुखम् । दृतमतः पुनर्बद्धा भृगमापूर्य्य हन्यते । विष्ठाभिः कृमिमिश्राभिः सोपानश्चरणैर्नरैः । परिष्वजन्ति चात्यन्तं प्रदीप्तं लौहशाल्मलिम् । हन्यन्ते पृष्ठदेशे च पुनर्भीमैर्महानसैः । दन्तुरैश्चातिकर्णैर्मेस्क्रकचेन बलीयसा । शिरःप्रभृति पूर्व्वशो घोरैः कर्म्मभिरात्मजैः । खाद्यन्ते च स्वमांसानि पाय्यन्ते शोणितं स्वकम् । अन्नपानं न दत्तं दैवैर्मूढै-

नरकेषु च सर्व्वेषु विविधा देहयातनाः । भवन्ति बहुशः कष्टाः पापिनामदयसङ्कुलाः । शिवायतनभग्नान्ते शिवारामेषु कुत्रचित् । समुत्सृजन्ति ये पापाः पुरीषं मूत्रमेव वा । तेषां शिश्नं सवृषणं चूर्ण्यते लौहमुद्गरैः । सूचीभिरग्निवर्णाभिस्तत्रापूर्य्यते पुनः । लोहदण्डश्च सुमहानग्निवर्णः सकण्टकः । आरोप्यते गुदे तेषां यावन्मूर्द्धविनिर्गतः । ततः क्षारेण महता ताम्रेण सहसा पुनः । द्रुतेनापूर्य्यते गाढं गुदं शिश्नञ्च देहिनाम् । मनः सर्व्वेन्द्रियाणाञ्च यस्मादुक्तं प्रवर्त्तकम् । तस्मादिन्द्रियदुःखेन जायते तद् सुदुःखितम् । धने सत्यपि ये दानं न प्रयच्छन्ति तृष्णया । अतिथिञ्चावमन्यन्ते कालप्राप्तं गृहाश्रमे । तेनैते घोरयैर्व्वा हस्तयोश्चापि ताडिताः । प्रसारिताङ्गाः शुष्यन्तस्तिष्ठन्त्यब्दशतं नराः । हस्तपादललाटेषु कीलिता लौहशङ्कुभिः । शिश्नञ्च विततं वक्त्रं कीलकत्रयताडितम् । कर्णमभि माणिशिरोषु लौहदण्डैश्च घातयेत् । उपद्रवैर्बहुविधैस्त्वमन्त्र प्रपीड्यते । जिह्वावेधनिबद्धाश्च सम्पीड्यन्ते ऽथ पुनः । तिष्ठन्ति लम्बमानाश्च लौहभाराः सुवर्त्तुलाः । शिश्ने सवृषणे तद्वत् लौहभारद्वयं पुनः । तिष्ठते लम्बमानञ्च बाहुभ्याञ्च चतुर्गुणम् । ततः स्वमांसमुत्कृत्य तिलमात्रप्रमाणतः । खादितुं दीयते तेषां स्वच्छन्दे च तु शोणितम् । यदा निर्मांसतां प्राप्ताः कालेन महता नराः । ततः क्षारेण दीप्तेन तच्छरीरं विलिप्यते । छिद्यन्ते वर्षधाराभिः क्लिश्यन्ते वै पुनः पुनः । शुष्का सिच्यन्ति तैलेन तप्तेन समन्ततः । पच्यन्ति भूयो भूयोऽपि दूरस्थेन शनैः शनैः । निःशेषयातनाभिश्च पीड्यन्ते क्रमशः पुनः । अथ बुभुक्षया घोरं कष्टा चातिपिपासया । अत्युष्णेनातिशीतेन पापाना स्वरूपेण च । एवमाद्या महाघोरा यातना पापकर्म्मिणाम् । एकैकनरके घोरा शतशोऽथ सहस्रशः । प्रत्येकं यातनाश्चित्राः सर्व्वेषु नरकेषु च । कष्टा वर्षशतेनापि सर्व्वा वक्तुं न शक्यते । इति तैर्विविधैर्घोरैः पाच्यमाना स्वकर्म्मभिः । म्रियन्ते नैव पापिष्ठा यावत् पापस्य न क्षयः । तस्मान्या यातना कष्टा विविधा पापकारिणाम् । महाघोरातिघोराश्च कल्पाग्निसदृशोपमाः । श्रुत्वैव यातनास्तूर्णं म्रियन्ते मृदुचेतसः । ततस्तेनाल कथिता पापा इच्छन्ति या स्वयम् । पुत्रमित्रकलत्रार्थं यदनुष्ठं त्वया कृतम् । एकाकी दह्यसे तेन नात पश्यसि बान्धवान् । आत्मनैव कृतं पापं भोक्तव्यं

भुञ्जस्वात्मना । तत् किमात्मोपघातार्थं मूढ । पापं कृतं त्वया । एवं दूतैर्यमपालश्चास्तान् पृच्छन्ति तत्र पुनः । कियन्तं केन पापेन कालं वसते नराः । देवद्रव्यविनाशेन गुरुद्रोहादिकर्म्मभिः । क्रमात् सर्व्वेषु पच्यन्ते नरकेषु महोच्चयात् । महापातकिनश्चापि सर्व्वेषु नरकेष्विह । आचन्द्रतारकं यावत् पीड्यन्ते विविधैर्वधैः । महापातकिनः सर्व्वे निरयार्णवकोटिषु । चतुर्दशमन्वन्तरकल्पान्तं विविधैर्वधैः । उपपातकिनश्चापि तदर्द्धं यान्ति मानवाः । पापशेषैस्तदर्द्धञ्च कालञ्चापि तथाविधम् । तस्मात् पापं न कुर्व्वीत चञ्चले जीविते सति । पापेन हि ध्रुवं यान्ति नरकेषु नराः स्वयम् । यः करोति नरः पापं तस्यात्मा ध्रुवमप्रियः । पापस्य हि फलं दुःखं तद्भोक्तव्यमिहात्मना । कथं ते पापनिरता नरा रात्रिषु शेरते । मन्वन्तरान्तं तेषां च नरके तीव्रयातनाः । एवं क्लिष्टा विशुद्धाश्च शान्तशेषेण कर्म्मणा । ततः क्षितिं समासाद्य पुनर्जायन्ति देहिनः । स्थावरा विविधाकारास्तृणगुल्मादिभेदतः । तमानुभूय दुःखानि जायन्ते कीटयोनिषु । निष्क्रान्ताः कीटयोनिभ्यस्ततो जायन्ति पक्षिणः । पक्षिणां पक्षिभावेन भवन्ति मृगजातिषु । मार्गेषु समतिक्रम्य जायन्ते पशुयोनिषु । क्रमाद्गोयोनिमासाद्य पुनर्जायन्ति मानुषाः । एवं योनिषु सर्व्वासु परिभ्रम्य क्रमेण तु । कालान्तरवशाद् यान्ति मानुष्यमतिदुर्लभम् । व्युत्क्रमेणापि मानुष्यं प्राप्यते पुण्यगौरवात् । विचित्रा गतयः प्रोक्ताः कर्म्मणां गुरुलाघवात् । मानुष्यं यः समासाद्य स्वर्गमोक्षप्रसाधकम् । द्वयोर्न साधयेदेकं स मृतस्तप्यते चिरम् । देवासुराणां सर्व्वेषां मानुष्यमतिदुर्लभम् । तत् सम्प्राप्य तथा कुर्य्यान्न गच्छेन्नरकं यथा । स्वर्गापवर्गलाभाय यदि नास्ति समुद्यमः । सर्व्वस्य मूलं मानुष्यं तद्यत्नादनुपालय । धर्म्ममूलेन मानुष्यं लब्ध्वा सर्व्वार्थसाधकम् । यदि लाभे न यत्नस्ते मूलं रक्षस्व यत्नतः । मानुषत्वे च विप्रत्वं यदि प्राप्नोति दुर्लभम् । न करोत्यात्मनः श्रेयः कोऽन्योऽस्मादस्त्यचेतनः । सर्व्वेषामेव देशानामयं देशः परः स्मृतः । इतः स्वर्गश्च मोक्षश्च यतः संप्राप्यते नरैः । देशेऽस्मिन् भारते पुण्यं प्राप्य मानुष्यसम्भवम् । यः कुर्य्यान्नात्मनः श्रेयस्तेनात्मा वञ्चितश्चिरम् । भोगभूमिः स्मृतः स्वर्गः कर्म्मभूमिरियं मता । इह यत् क्रियते कर्म्म स्वर्गे तदुपभुज्यते । यावत् स्वस्थशरीरस्त्वं तावद्धर्म्मं समाचर । अस्वस्थो नोदितोऽ-

रति ब्राह्मणस्य वाऽपहरति अन्यस्य वाऽनापदि पुरुषस्तममुत्र राजन् । यमपुरुषा अयस्मयैरग्निपिण्डैः सन्दंशैस्त्वचि निष्कुषन्ति । यस्त्विह वा अगम्यां स्त्रियं पुरुषोऽगम्यं वा पुरुषं योषिदभिगच्छति । तावमुत्र कशया ताडयन्तस्तिग्मया सूर्म्या १२ लोहमय्या पुरुषमालिङ्गयन्ति । स्त्रियं च पुरुषरूपया सूर्म्या । यस्त्विह वै सर्वाभिगमस्तममुत्र निरये वर्त्तमानं वज्रकण्टकशाल्मलीं १३ आरोप्य निष्कर्षन्ति । ये त्विह वै राजन्या राजपुरुषा वा पाषण्डा धर्मसेतून् भिन्दन्ति ते सम्परेत्य वैतरण्यां १४ निपतन्ति भिन्नमर्य्यादास्तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाश्चासुभिरुह्यमानाः स्वाघेन, कर्मपाकमनुस्मरन्तो विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यन्ते । ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्य्यां चरन्ति । ते चापि प्रेत्य पूयविण्मूत्रश्लेष्ममलापूर्णे १५ निपतन्ति तदेवातिबीभत्सितमश्नन्ति । ये त्विह वै श्वगर्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान् निघ्नन्ति । तानपि सम्परेतान् लक्ष्यभूतान् यमपुरुषा इषुभिर्विध्यन्ति १६ । ये त्विह वै दाम्भिका दम्भयज्ञेषु पशून् विशसन्ति । तानमुष्मिन् लोके वैशसे १७ नरके पतितान्निरयपतयो यातयित्वा विशसन्ति । यस्त्विह वै सवर्णां भार्य्यां द्विजो रेतः पाययति काममोहितस्तं पापकृतममुत्र रेतःकुल्यायां पातयित्वा रेतः सम्पाययन्ति लालाभक्ष्ये १८ । ये त्विह वै दस्यवोऽग्निदा गरदा ग्रामान् सार्थान् वा विलुम्पन्ति राजानो राजभटा वा तांश्चापि हि परेत्य यमदूता वज्रदंष्ट्राः श्वानः १९ सप्तशतानि विंशतिश्च सरभसं खादन्ति । यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथञ्चित्, स वै प्रेत्य नरके अवीचिमति २० अधःशिरा निरवकाशे योजनशतोच्छ्रायाद् गिरिमूर्ध्नः सम्पात्यते । यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत् तिलशो विशीर्य्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति । यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुरां व्रतस्थोऽपि वा पिबति प्रमादतः तेषां निरयं नीतानामुरसि पदाऽऽक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं २१ निषिञ्चन्ति । अथ च यस्त्विह वा आत्मसम्भावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहु मन्येत स मृतक एव क्षारकर्दमे २२ निरयेऽवाक्शिरा निपातितो दुरन्ता यातना ह्यश्नुते । ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून् खादन्ति तांश्च ताश्च ते पशव इह निहता यमसदने यातयन्तो रक्षोगणाः सौनिका इव स्वधितिनाऽवदायाऽसृक् पिबन्ति नृत्यन्ति च गायन्ति च हृष्यमाणा यथेह पुरुषादाः २३ । ये त्विह वा अनागसोऽरण्ये ग्रामे वा वैश्रम्भकैरुपसृतानुपविश्रम्भय्य जिजीविषून् शूलसूत्रादिषूपप्रोतान् क्रीडनकतया यातयन्ति तेऽपि च प्रेत्य यमयातनासु शूलादिषु प्रोतात्मानः २४ क्षुत्तृड्भ्यां चाभिहताः कङ्कवटादिभिश्चेतस्ततस्तिग्मतुण्डैराहन्यमाना आत्मशमलं स्मरन्ति । ये त्विह वै भूतान्युद्वेजयन्ति नरा उल्वणस्वभावा यथा दन्दशूकास्तेऽपि प्रेत्य नरके दन्दशूकाख्ये २५ निपतन्ति । यत्र नृप । दन्दशूकाः पञ्चमुखा वा उपसृत्य ग्रसन्ति यथा बिलेशयान् । ये त्विह वा अन्धावटकुशूलगुहादिषु भूतानि निरुन्धन्ति तथामुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुन्धन्ति २६ । यस्त्विह वा अतिथीनभ्यागतान् वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुण्डा गृध्राः कङ्ककाकवटादयः प्रसह्योरुबलादुत्पाटयन्ति २७ । यस्त्विह वा आढ्याभिमतिरहङ्कृतिस्तिर्य्यक्प्रेक्षणः सर्वतोऽभिविशङ्की अर्थव्ययनाशचिन्तया परिशुष्यमाणहृदयवदनो निर्वृतिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे २८ नरके निपतति । यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोऽङ्गेषु सूत्रैः परिवयन्ति । एवंविधा नरका यमालये सन्ति शतशः तेषु च सर्वे एवाधर्मवर्त्तिनो ये केचिदिहोदिताश्चावनिपते । पर्य्यायेण विशन्ति", तथैव धर्मानुवर्त्तिन इतरत्र । इह तु पुनर्भवे त उभयशेषाभ्यां विशन्ति"

भा० अनु० ७ अ० शुभकर्मविशेषविपाक उक्तो यथा

"युधिष्ठिर उवाच । "कर्मणाञ्च समस्तानां शुभानां भरतर्षभ ! । फलानि भरतश्रेष्ठ ! प्रब्रूहि परिपृच्छतः ॥ भीष्म उवाच । हन्त ते कथयिष्यामि यन्मां पृच्छसि भारत ! । रहस्यं यदृषीणान्तु तच्छृणुष्व युधिष्ठिर ! ॥ या गतिः प्राप्यते येन प्रेत्यभावे चिरेप्सिता । येन येन शरीरेण यद्यत्कर्म करोति यः ॥ तेन तेन शरीरेण तत्तत्फलमुपाश्नुते । यस्यां यस्यामवस्थायां यत्करोति शुभाशुभम् ॥ तस्यां तस्यामवस्थायां भुङ्क्ते जन्मनि जन्मनि । न नश्यति

[illegible]

विप्रयुक्तश्च तैर्भूतैः पुनर्यात्यपरां गतिम् । सर्व्वभूतसमायुक्तः प्राप्नुते जीव एव हि । ततोऽस्य कर्म पश्यन्ति शुभं वा यदि वाऽशुभम् । देवताः पञ्चभूतस्थाः किं भूयः श्रोतुमिच्छसि । युधिष्ठिर उवाच । त्वगस्थिमांसमुत्सृज्य तैश्च भूतैर्विवर्जितः । जीवः स भगवन्! क्वस्थः सुखदुःखे समश्नुते । बृहस्पतिरुवाच । जीवः कर्म्मसमायुक्तः शीघ्रं रेतस्त्वमागतः । स्त्रीणां पुष्पं समासाद्य सूते कालेन भारत! । यमस्य पुरुषैः क्लेशं यमस्य पुरुषैर्वधम् । दुःखं संसारचक्रञ्च नरः क्लेशञ्च विन्दति । इह लोके च स प्राणी जन्मप्रभृति पार्थिव! । स्वकृतं कर्म्म वै भुङ्क्ते धर्म्मस्य फलमाश्रितः । यदि धर्म्मं यथाशक्ति जन्मप्रभृति सेवते । ततः स पुरुषो भूत्वा सेवते नित्यदा सुखम् । अथान्तरा तु धर्म्मस्याप्यधर्म्ममुपसेवते । सुखस्यानन्तरं दुःखं स जीवोऽप्यधिगच्छति । अधर्म्मेण समायुक्तो यमस्य विषयं गतः । महद्दुःखं समासाद्य तिर्य्यग्योनौ प्रजायते । कर्म्मणा येन येनेह यस्यां योनौ प्रजायते । जीवो मोहसमायुक्तस्तन्मे निगदतः शृणु । यदेतदुच्यते शास्त्रे सेतिहासे च छन्दसि । इह स्थानानि पुण्यानि देवतुल्यानि भूपते! । तिर्य्यग्योन्यतिरिक्तानि गतिमन्ति च सर्व्वशः । यमस्य सदने दिव्ये ब्रह्मलोकसमे गुणैः' ।

इतः परं कर्मविपाकोऽभिहितः तत्र अधर्मशब्दे १२१।१२२ पृष्ठे "कर्मभिर्नियतैर्मेह' इत्यारभ्य "धर्मे कुरु मनः सदा" इत्यन्तं वाक्यं हरिवंशवाक्यत्वेन प्रमादात् लिखितम् । तच्च मा०अनु०१११अ०स्थं बोध्यम् । एवमधर्मशब्दे पृ०१२२ पृष्ठादौ मिता० दर्शितवाक्यादपि कर्मविपाकभेदोऽवधेयः ।

भुक्तावशिष्टकर्म्मणां विपाकस्तु शातातपेन दर्शितो यथा "प्रायश्चित्तविहीनानां महापातकिनां नृणाम् । नरकान्ते भवेज्जन्म चिह्नाङ्कितशरीरिणाम् । प्रतिजन्म भवेत्तेषां चिह्नं तत्पापसूचितम् । प्रायश्चित्ते कृते याति पश्चात्तापवतां पुनः । महापातकजं चिह्नं सप्तजन्मनि जायते । उपपापोद्भवं पञ्च त्रीणि पापसमुद्भवम् । दुष्कर्म्मजा नृणां रोगा यान्ति चोपक्रमैः शमम् । जपैः सुरार्च्चनैर्होमैर्दानैस्तेषां शमो भवेत् । पूर्व्वजन्मकृतं पापं नरकस्य परिक्षये । बाधते व्याधिरूपेण तस्य जप्यादिभिः शमः । कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा । मूत्रकृच्छ्राश्मरीकासा अतीसारभगन्दरौ । दुष्टव्रणं गण्डमाला पक्षाघातोऽक्षिनाशनम् । इत्येवमादयो रोगा महापापोद्भवाः स्मृताः । जलोदरं यकृत्प्लीहा शूलरोगव्रणानि च श्वासाजीर्णज्वरच्छर्द्दिभ्रममोहगलग्रहाः । रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः । दण्डापतानकश्चित्रवपुःकम्पविचर्च्चिकाः । वल्मीकपुण्डरीकाद्या रोगाः पापसमुद्भवाः । अर्शआद्या नृणां रोगा अतिपापाद्भवन्ति हि । अन्ये च बहवो रोगा जायन्ते वर्णसङ्कराः । उच्यन्ते च निदानानि प्रायश्चित्तानि वै क्रमात् । महापापेषु सर्व्वं स्यात्तदर्द्धमुपपातके । दद्यात् पापेषु षष्ठांशं कल्प्यं व्याधिबलाबलम् । अथ साधारणं तेषु गोदानादि च कथ्यते । गोदाने वत्सयुक्ता गौः सुशीला च पयस्विनी । वृषदाने शुभोऽनड्वान् शुक्लाम्बरसकाञ्चनः । निवर्त्तनानि भूदाने दश दद्याद् द्विजातये । दशहस्तेन दण्डेन त्रिंशद्दण्डं निवर्त्तनम् । दश तान्येव गोचर्म्म दत्त्वा स्वर्गे महीयते । सुवर्णशतनिष्कन्तु तदर्द्धार्द्धप्रमाणतः । अश्वदाने मृदुस्पर्शमश्वं सोपस्करं दिशेत् । महिषीं माहिषे दाने दद्यात् स्वर्णायुधान्विताम् । दद्याद्गजं महादाने सुवर्णकलसद्युतम् । लक्षं च रक्षार्हणं पुष्पं प्रदद्याद्देवार्च्चने । दद्याद्द्विजसहस्राय मिष्टान्नं द्विजभोजने । रुद्रं जपेल्लक्षपुष्पैः पूजयित्वा च त्र्यम्बकम् । एकादश जपेद्रुद्रान् दशांशं गुग्गुलैर्घृतैः । कृत्वाभिषेचनं कुर्य्यान्मन्त्रैर्वरुणदैवतैः । शान्तिके गणशान्तिश्च ग्रहशान्तिपूर्व्वकम् । धान्यदाने शुभं धान्यं खारीषट्त्रिंशत्कृतम् । वस्त्रदाने पट्टवस्त्रद्वयं कर्पूरसंयुतम् । दशपञ्चाष्ट चतुर उपवेश्य द्विजान् शुभान् । विधाय वैष्णवीं पूजां सहस्रं निजकाम्यया । धेनुं दद्याद्द्विजातिभ्यो दक्षिणाञ्चापि शक्तितः । अलङ्कृत्य यथाशक्ति वस्त्रालङ्करणैर्द्विजान् । याचेद्दण्डप्रणामेन प्रायश्चित्तं यथोदितम् । तेषामनुज्ञया कृत्वा प्रायश्चित्तं यथाविधि । पुनस्तान् परिपूर्णार्थान् वदेद्विधिवद्द्विजान् । सन्तुष्टा ब्राह्मणा दद्युरनुज्ञां व्रतकारिणे । जपच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्म्मणि । सर्व्वं भवति निश्छिद्रं यस्य चेच्छन्ति ब्राह्मणाः । ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः । सर्व्वदेवमया विप्रा न तद्वचनमन्यथा । उपवासो व्रतञ्चैव स्नानं तीर्थफलं तपः । विप्रैः सम्पादितं सर्व्वं सम्पूर्णं तस्य तत्फलम् । सम्पूर्णमिति यद्वाक्यं वदन्ति क्षितिदेवताः । प्रणम्य शिरसा धार्य्यमग्निष्टोमफलं लभेत् । ब्राह्मणाज्ञा तीर्थं निर्मलं सार्व्वकामिकम् । तेषां वाक्यात् देवैश्च शुध्यन्ति मलिना जनाः । तेभ्योऽनुज्ञामभिप्राप्य प्रगृह्य च तथाशिषः । पूजयित्वा द्विजान् शक्त्या भुञ्जीत

[illegible] । [illegible] । [illegible] । [illegible] ।

[illegible] । [illegible] । [illegible] ।

दद्याच्च चन्दनान्यघनुत्तये । महिषीघातने चैव कृष्णगुल्मः प्रजायते । खरे विनिहते चैव खररोमा प्रजायते । निष्कत्रयस्य प्रकृतिं स प्रदद्याद्धिरण्मयीम् । तरक्षौ निहते चैव जायते केकरेक्षणः । दद्याद्रत्नमयीं धेनुं स तत्पातकशान्तये । शूकरे निहते चैव दन्तुरो जायते नरः । स दद्यात्तु विशुद्ध्यर्थं घृतकुम्भं सदक्षिणम् । हरिणे निहते खञ्जः शृगाले तु विपादकः । अश्वस्तेन प्रदातव्यः सौवर्णपलनिर्म्मितः । अजाभिघातने चैव अधिकाङ्गः प्रजायते । अजा तेन प्रदातव्या विचित्रवस्त्रसंयुता । उष्ट्रे निहते चैव पाण्डुरोगः प्रजायते । कस्तूरिकापलं दद्याद्ब्राह्मणाय विशुद्धये । मार्जारे निहते चैव पीतपाणिः प्रजायते । पारावतं स सौवर्णं प्रदद्यान्निष्कमात्रकम् । शुकशारिकयोर्घाते नरः स्खलितवाग्भवेत् । सच्छास्त्रपुस्तकं दद्यात् स विप्राय सदक्षिणम् । बकघाते दीर्घनसो दद्याद्गां धवलप्रभाम् । काकघाती कर्णहीनो दद्याद्गामसितप्रभाम् । हिंसायां निष्कृतिरियं ब्राह्मणे समुदाहृता । तदर्द्धप्रमाणेन क्षत्रियादिष्वनुक्रमात्" । २ अ० ।

"सुरापः श्यावदन्तः स्यात् प्राजापत्यन्तु तारकम् । शर्करायास्तुलाः सप्त दद्यात् पापविशुद्धये । जपित्वा तु महारुद्रं दशांशं जुहुयात्तिलैः । ततोऽभिषेकः कर्त्तव्यो मन्त्रैर्वरुणदैवतैः । मद्यपो रक्तपित्ती स्यात् स दद्यात् सर्पिषो घटम् । मधुनोऽर्द्धघटञ्चैव सहिरण्यं विशुद्धये । अभक्ष्यभक्षणे चैव जायते क्रिमिलोदरः । यथावत्तेन शुद्ध्यर्थमुपोष्यं भीष्मपञ्चकम् । उदक्यावीक्षितं भुक्त्वा जायते क्रिमिलोदरः । गोमूत्रयावकाहारस्त्रिरात्रेणैव शुद्ध्यति । भुक्त्वा चास्पृश्यसंस्पृष्टं जायते क्रिमिलोदरः । त्रिरात्रं समुपोष्याथ स तत्पापात् प्रमुच्यते । परान्नविघ्नकरणादजीर्णमभिजायते । लक्षहोमं स कुर्व्वीत प्रायश्चित्तं यथाविधि । मन्दोदराग्निर्भवति सति द्रव्ये कदन्नदः । प्राजापत्यत्रयं कुर्य्याद्भोजयेच्च शतं द्विजान् । विषदः स्याच्छर्द्दिरोगी दद्याद्धेनुं पयस्विनीम् । मार्गहा पादरोगी स्यात् सोऽश्वदानं समाचरेत् । पिशुनो नरकस्यान्ते जायते श्वासकासवान् । घृतं तेन प्रदातव्यं सहस्रपलसम्मितम् । धूर्त्तोऽपस्माररोगी स्यात् स तत्पापविशुद्धये । ब्रह्मकूर्च्चमयीं धेनुं दद्याद्दाश्च सदक्षिणाम् । शूली परोपतापेन जायते तत्प्रमोचने । सोऽन्नदानं प्रकुर्व्वीत तथा रुद्रं जपेन्नरः । दावाग्निदायकश्चैव रक्तातिसारवान् भवेत् । तेनोदपानं कर्त्तव्यं रोपणीयस्तथा वटः । सुरालये जले वापि शकृन्मूत्रं करोति यः । गुदरोगो भवेत्तस्य पापरूपः सुदारुणः । मासं सुरार्च्चनेनैव गोदानद्वितयेन तु । प्राजापत्येन चैकेन शाम्यन्ति गुदजा रुजः । गर्भपातनजा रोगा यकृत्प्लीहजलोदराः । तेषां प्रशमनार्थाय प्रायश्चित्तमिदं स्मृतम् । एतेषु दद्याद्विप्राय जलधेनुं विधानतः । सुवर्णरूप्यताम्राणां पलत्रयसमन्विताम् । प्रतिमाभङ्गकारी च अप्रतिष्ठः प्रजायते । संवत्सरत्रयं सिञ्चेदश्वत्थं प्रतिवासरम् । उद्वाहयेत्तमश्वत्थं स्वगृह्योक्तविधानतः । तत्र संस्थापयेद्देवं विघ्नराजं सुपूजितम् । दुष्टवादी खण्डितः स्यात् स वै दद्याद्द्विजातये । रूप्यं पलद्वयं दुग्धघटद्वयसमन्वितम् । खल्वाटः परनिन्दावान् धेनुं दद्यात् सकाञ्चनाम् । परोपहासकृत् काणः स गां दद्यात् समौक्तिकाम् । सभायां पक्षपाती च जायते पक्षघातवान् । निष्कत्रयमितं हेम स दद्यात् सत्यवर्त्तिनाम्" ७ अ० ।

"कुनखी नरकस्यान्ते जायते विप्रहेमहृत् । स तु स्वर्णशतं दद्यात् कृत्वा चान्द्रायणत्रयम् । औडुम्बरी ताम्रचौरो नरकान्ते प्रजायते । प्राजापत्यं स कृत्वाथ ताम्रं पलशतं दिशेत् । कांस्यहारी च भवति पुण्डरीकसमन्वितः । कांस्यं पलशतं दद्यादलङ्कृत्य द्विजातये । रीतिहृत् पिङ्गलाक्षः स्यादुपोष्य हरिवासरम् । रीतिपलशतं दद्यादलङ्कृत्य द्विजं शुभम् । मुक्ताहारी च पुरुषो जायते पिङ्गमूर्द्धजः । मुक्तापलशतं दद्यादुपोष्य स विधानतः । त्रपुहारी च पुरुषो जायते नेत्ररोगवान् । उपोष्य दिवसं सोऽपि दद्यात् पलशतं त्रपु । सीसहारी च पुरुषो जायते शीर्षरोगवान् । उपोष्य दिवसं दद्याद्घृतधेनुं विधानतः । दुग्धहारी च पुरुषो जायते बहुमूत्रकः । स दद्याद्दुग्धधेनुञ्च ब्राह्मणाय यथाविधि । दधिचौर्य्येण पुरुषो जायते मदवान् यतः । दधिधेनुः प्रदातव्या तेन विप्राय शुद्धये । मधुचौरस्तु पुरुषो जायते नेत्ररोगवान् । स दद्यान्मधुधेनुञ्च समुपोष्य द्विजातये । इक्षोर्विकारहारी च भवेदुदरगुल्मवान् । गुडधेनुः प्रदातव्या तेन तद्दोषशान्तये । लोहहारी च पुरुषः कर्वुराङ्गः प्रजायते । लोहं पलशतं दद्यादुपोष्य स तु वासरम् । तैलचौरस्तु पुरुषो भवेत् कण्ड्वादिपीडितः । उपोष्य स तु विप्राय दद्यात्तैलघटद्वयम् । आमान्नहरणाच्चैव दन्त

स्नान्यान्तु गमने पण्डुकुष्ठं प्रजायते । कृष्णाजिनप्रदानेन प्रायश्चित्तं समाचरेत् । मातृष्वस्रभिगमने वामाङ्गे व्रणवान् भवेत् । तेनापि निष्कृतिः कार्य्या वस्त्रयुग्दानप्रदानतः । भ्रातृभार्य्याभिगमने मृतभार्य्यः प्रजायते । तत्पातकविशुद्ध्यर्थं द्विजमेकं विवाहयेत् । सगोत्रस्त्रीप्रसङ्गेन जायते च भगन्दरी । तेनापि निष्कृतिः कार्य्या महिषीदानयत्नतः । तपस्विनीप्रसङ्गेन प्रमेही जायते नरः । मासं रुद्रजपः कार्य्यो दद्याच्छक्त्या च काञ्चनम् । दीक्षितस्त्रीप्रसङ्गेन जायते दुष्टरक्तदृक् । स पातकविशुद्ध्यर्थं प्राजापत्यद्वयञ्चरेत् । स्वजातिजायागमने जायते हृदयव्रणी । तत्पापस्य विशुद्ध्यर्थं प्राजापत्यद्वयञ्चरेत् । पशुयोनौ च गमने मूत्राघातः प्रजायते । तिलपात्रद्वयञ्चैव दद्यादात्मविशुद्धये । अश्वयोनौ च गमनाद्गुदस्तम्भः प्रजायते । सहस्रकमलस्नानं मासं कुर्य्यात् शिवस्य च । एते दोषा नराणां स्युर्नरकान्ते न संशयः । स्त्रीणामपि भवन्त्येते तत्तत्पुरुषसङ्गमात् । अथ शूकरदंष्ट्रादि कृमिस्थशकटेन च । अग्निघातकशस्त्राम्बुविषोद्बन्धनजलैर्मृताः । व्याघ्राहिगजभूपालचौरवैरिष्टका-हताः । छत्रतल्पस्थिता ये च शौचसंस्कारवर्जिताः । विसूचिकाग्रकवलद्रवातीसारतोमृताः । शाकिन्यादिपिशाचैश्च विद्युत्पातहताश्च ये । अस्पृश्याश्च पतिताः पुत्रवर्जिताः । पञ्चत्रिंशत्प्रकारैश्च नाप्नुवन्ति गतिं मृताः । पित्राद्याः पिण्डभाजः स्युस्त्रयो लेपभुजस्तथा । ततो नान्दीमुखाः प्रोक्तास्त्रयोऽप्यश्रुमुखास्त्रयः । द्वादशैते पितृगणास्तर्पिताः सन्ततिप्रदाः । गतिहीनाः सुतादीनां सन्ततिं नाशयन्ति ते । दश व्याघ्रादिनिहता गर्भं निघ्नन्त्यथो क्रमात् । द्वादशाश्वादिनिहता आकर्षन्ति च बालकम् । विषादिनिहता घ्नन्ति दशमे द्वादशेऽपि । वर्षैश्च बालकं कुर्य्याद्दम्पत्योरनपत्यताम् । व्याघ्रेण हन्यते जन्तुः कुमारीगमनेन च । विप्रद्वेषी च सर्पेण गजेन नृपदुष्टकृत् । राज्ञा राजकुमारस्त्रीचौरेण पशुहिंसकः । वैरिणा मित्रभेदी च शकटस्तिर्यकेण तु । गुरुघाती च शय्यायां मत्सरी शौचवर्जितः । द्रोही संस्काररहितः शृङ्गी निक्षेपहारकः । नरो विहन्यतेऽरण्ये शूकरेण च पापिनः । कृमिभिः कृतवासस्य कामिन्या यो निकृन्तकः । वह्निना यद्गुरुद्रोही शकटेन च सूचकः । भृगुणा वेदनिन्दी चौरोऽयथिमा शस्त्राग्नि-हृत् । दवेन दक्षिणाचौरः शस्त्रेण श्रुतिनिन्दकः । अग्रजन्मा द्विजमिन्द्राक्षद्वेषेण कुमतिप्रदः । उद्बन्धनेन हिंस्रः स्यात् सेतुभेदी जलेन तु । द्रुमेण राजदन्तिहृद्तीसारेण लौहहृत् । शाकिन्याद्यैश्च म्रियते सदपेक्षार्थ्यकारकः । अनध्यायेऽप्यधीयानो म्रियते विद्युता तथा । अस्पृश्यस्पर्शसङ्गी च चान्तमाश्रित्य शास्त्रहृत् । पतितो मद्यविक्रेता नपत्यो द्विजपत्नीहृत् । अथ तेषां क्रमेणैव प्रायश्चित्तं विधीयते । कारयेन्निष्कमात्रन्तु पुरुषं प्रेतरूपिणम् । चतुर्भुजं दण्डहस्तं महिषासनसंस्थितम् । पिष्टैः कृष्णतिलैः कुर्य्यात् पिण्डं प्रस्थप्रमाणतः । मध्वाज्यशर्करायुक्तं स्वर्णकुण्डलसंयुतम् । अकालमूलं कलशं पञ्चपल्लवसंयुतम् । कृष्णवस्त्रसमाच्छन्नं सर्व्वौषधिसमन्वितम् । तस्योपरि न्यसेद्देव पात्रं धान्यफलैर्युतम् । सप्तधान्यन्तु सफलं तत्र तत् सकलं न्यसेत् । कुम्भोपरि च विन्यस्य पूजयेत् प्रेतरूपिणम् । कुर्य्यात् पुरुषसूक्तेन प्रत्यहं दुग्धतर्पणम् । षडङ्गञ्च जपेद्रुद्रं कलसे तत्र वेदवित् । यमसूक्तेन कुर्व्वीत यमपूजादिकं तथा । गायत्र्याश्चैव कर्त्तव्यो जपः स्वात्मविशुद्धये । गृहशान्तिकपूर्व्वञ्च दशांशं जुहुयात्तिलैः । अमुकनामगोत्राय प्रेताय सतिलोदकम् । प्रदद्यात् पितृतीर्थेन पिण्डं मन्त्रमुदीरयेत् । इमं तिलमयं पिण्डं मधुसर्पिःसमन्वितम् । ददामि तस्मै प्रेताय यः पीडां कुरुते मम । सजलान् कृष्णकलशान् तिलपात्रसमन्वितान् । दश प्रेतमुद्दिश्य दद्यादेकञ्च विष्णवे । ततोऽभिषिञ्चेदाचार्य्यो दम्पती कलशोदकैः । शुचिभैरायुधसौमन्त्रैर्वैष्णवदैवतैः । यजमानस्ततो दद्यादाचार्य्याय स दक्षिणाम् । ततो नारायणबलिः कर्त्तव्यः शास्त्रनिश्चयात् । एष साधारणविधिरगतीनामुदाहृतः । विशेषस्तु पञ्चसंयो व्याघ्रादिनिहतेष्वपि । व्याघ्रेण निहते प्रेते वरकन्यां विवाहयेत् । सर्पदंशे नागबलिर्देयः सर्पस्तु काञ्चनः । चतुर्भिर्निष्कनिर्मितं हेमगजं दद्याद्गजैर्हते । राज्ञा विनिहते दद्यात् पुरुषन्तु हिरण्मयम् । चौरेण निहते धेनुं वैरिणा निहते वृषम् । वृकेण निहते दद्यात् यथाशक्ति च काञ्चनम् । शय्यामृते प्रदातव्या शय्या तूलीसमन्विता । निष्कमात्रसुवर्णस्य विष्णुना समधिष्ठिता । शौचहीने मृते चैव द्विनिष्कस्वर्णजं हरिम् । संस्का-

[illegible]

च

[illegible]

[illegible]

स्तकप्रयोगैः । तं पूर्व्वजन्मजनितं तु विज्ञाय सम्यक् कार्य्या सभा तदुपदिष्टयथोक्तशान्तिः” १ अ० ।

२ नपुंसकता “साध्वी यौवनसम्पन्ना त्यक्ता दोषैर्म्महिषी कृता । तेन दोषेण राजेन्द्र ! नपुंसत्वमनुगच्छति । मुष्कच्छेदनकर्त्तुस्तु सोऽपि षण्ढत्वमश्नुते । रजस्वलाम् स्त्रियं भार्य्यां सन्निधौ यो न गच्छति । षण्डत्वन्तु भवेत् तस्य जन्म चासाद्य भूपते !” ।

३ अल्पायुःप्रजता “शृणु विप्र ! पुरा कान्तं गतस्त्वं सरितस्तटम् । गावः कतिपयास्तत्र तृष्यार्त्ता वारितास्त्वया । तस्य विप्रस्य पाकोऽयं जायन्तेऽल्पायुषः प्रजाः” ।

४ अकिञ्चनता “अदाता निष्ठुरो जातः स च धर्म्मस्य निन्दकः । महाधनो न देयाग्निं ब्राह्मणं तोषयन् पुरा । आयुःशेषे मृतिं प्राप्य गृहीतो यमकिङ्करैः । बद्ध्वा पाशेन सनीतो यत्रास्ते धर्म्मराड्विभुः । चित्रगुप्तेन तत्पापं विस्तृतञ्च यमाज्ञया । तेन मर्त्त्ये महाढ्येन कृतं दत्तं न किञ्चन । लोलाख्यस्य नरकस्य विषयेऽयं द्विजो भवेत् । आज्ञप्तः किङ्करैर्नीतो निक्षिप्तो नरकार्णवे । लोलाख्यनरके घोरे सर्व्वप्राणिभयङ्करे । लोलाख्यनरकस्येह लक्षणं त्वमतः शृणु । सर्व्वत्र दर्शयेत् सर्व्वं भक्ष्यपानादि सर्व्वतः । मृगतृष्णाजलाकारं दृश्यते न तु लभ्यते । नैराश्यं प्राप्य विवशः क्षुत्पिपासासमाकुलः । बहुकालन्तु विविधं भुक्त्वा जन्म प्रपद्य च । अकिञ्चनत्वमासाद्य महाक्लेशञ्च विन्दति । अत्यर्थं कदन्नं भुङ्क्ते कदन्नमतिदुर्लभम् । स तु भिक्षाटनेनापि जीर्णाम्बरधरः सदा” ।

५ वियोगः “अयं दुष्टो दुराचारं दुष्टबुद्ध्या चकार यत् । स्नेहभङ्गकरो यस्मात्तस्माद्दण्ड्यो यमस्य हि । इत्युक्त्वा शृङ्खलैर्बद्ध्वा ताडयित्वा भृशं बहु । नीत्वा नियोगिनस्तत्र यत्रास्ते दण्डनायकः । दृष्ट्वा तं चित्रगुप्तेन तत्पापं प्रकटीकृतम् । व्यामोहके तु नरके पातितो दुर्म्मतिर्नृप ! । व्यामोहकस्य यच्चिह्नं नाम यच्चास्य शेषतः । व्यायामः सप्ततिस्तस्य योजनं दुर्व्वहं परम् । कुम्भाकारं निराकारं धूमाभ्यान्तमन्तरम् । वायोर्गतिर्न तत्रास्ति न च रश्मिर्विभावसोः । मूढस्य पतनं तत्र यश्च मैत्रीविभेदकः । ज्ञात्वा मन्त्रस्य निष्पाद्य विमन्त्रं यो विधास्यति । सोऽपि मृत्युवशं प्राप्य मोहकाख्यञ्च गच्छति । मिथ्यापवादमन्येषां यः करोति सुधामति । तस्य मिथ्याभिशंसेन मोहकाख्ये गतिर्भवेत् । यानि मिथ्याभिशंसेन पतन्त्यश्रूणि रोदनात् । तानि पुत्रान् पशून् घ्नन्ति तेषां मिथ्याभिशंसिनाम् । मोहकाख्ये महाघोरे पतन्त्यन्ते दुराशयाः । पूर्व्वापरपरिज्ञानविहीनः परिसञ्च च । एवमेतत् सहस्राणि वर्षाणि च चतुर्दश । भुक्त्वा मृगतनुं प्राप्य मृगो देहसमाकुलः । व्यापादितोऽन्यवंशेन नवशोकसमावृतः । मृगयूथपरित्यक्तस्त्वेकाकी तिष्ठते पुनः । सोऽपि मृत्युवशं प्राप्य मत्स्ययोनौ प्रजायते । ततो मानुष्यमासाद्य वियोगे परितप्यते” ।

६ नेत्रामयः । “पुरा विप्र ! गृहस्थस्य दीपस्य हरणं कृतम् । तव पुत्रेण भो विप्र ! तेन काणत्वमस्य वै । कोटरीञ्च प्रपश्येद्यः सतीं वापि पराङ्गनाम् । सकामः कामतो मोहाद्दृष्टिमालम्ब्य पश्यति । सोऽपि नेत्रामयं प्राप्य सीदतीह स्वकर्म्मतः । सभयं निरयं घोरं सम्प्राप्य कदनं बहु । भुक्त्वा जन्म समासाद्य दुष्टकर्म्मसमुद्भवाम् । मानुषोन्तु तनुं प्राप्य निष्कृतिं न करोति यः । पुनर्जन्म समासाद्य प्राप्य कर्म्म न मुञ्चति” ।

७ कुब्जत्वम् । “देवताप्रतिमां दृष्ट्वा यस्तां नैवाभिवादयेत् । ब्राह्मणञ्च गुरुं श्रेष्ठं ब्रह्मचारितपस्विनम् । श्मशाने जायते वृक्षः काकगृध्रोपसेवितः । भुक्त्वा कालमशेषञ्च मानुषत्वमवाप्य सः । कुब्जत्वमश्नुते तस्मात् कर्म्मणो मानुषो ध्रुवम्” ।

८ खञ्जत्वम् छिन्नपादत्वञ्च “उपानहं हरेद्यस्तु तथैव काष्ठपादुकाम् । तप्तवालुकदुर्भेद्यमध्ये प्राप्य च सीदति । स नीतो यमदूतैश्च ताड्यमानो भृशं मुहुः । प्रवेश्य दक्षिणद्वारं बद्ध्वा पादद्वये दृढम् । हाहाकारस्तु सर्व्वत्र श्रूयते यत्र भीषणः । नीत्वा यमाज्ञया दूतै रौरवे च निवेशितः । रौरवस्य च यन्नाम तन्मे निगदतः शृणु । अश्वयोजनविस्तीर्णं गभीरं स्याद्द्वियाष्टतम् । दह्यमानस्तु तत्रैव पतितः पुनरुत्थितः । पुनः पतति तत्रैव क्रन्दमानो मुहुर्मुहुः । अनेककालमासाद्य पारं प्राप्य सुदुःखितः । मानुषीं योनिमासाद्य खञ्जपादो भवेन्नरः । गृध्रसी(छिन्नपादता)व्याधिसंयुक्तो भवेज्जन्मनि-जन्मनि” ।

९ छिन्नभाषता “श्रुतिस्मृतिकथायान्तु यस्तत्र विघ्नमाचरेत् । देवद्विजातिधर्म्मस्य सदा यो देवनिन्दकः । सोऽपि मृत्युवशं प्राप्य यत्र याति च तत् शृणु । नैर्ऋते पश्चिमे भागे पिङ्गला नाम या पुरी । पिशाचा यत्र तिष्ठन्ति सोऽपि तत्र स्वकर्म्मतः । यमाज्ञया तत्र नीतो रक्षितस्तत्र दुर्म्मतिः । तत्र दुःखं महाघोरं भुक्त्वा कर्म्मा-

निर्जने दुर्गमे घोरे विकटाद्रौ महस्रशे । तस्मिन्भूत्वा वसे-त्तत्र क्षुत्पिपासासमाकुलः । मन्वन्तरत्रयं तत्र ततोनीहा-रसम्भवे । शीर्य्यमाणस्तु निर्वेदः शीतवातार्द्दितो भृशम् । पल्यमानन्तु दु तेन मानुषोजायते स्फुटं । मद्यपश्री-भवेत् सोऽपि पुत्रं न लभते प्रिया ।

२०दौर्भाग्यम् "तृतीयासु च सर्व्वासु तैलस्पर्शन्त्वया कृतं । दुर्भगत्वञ्च ते जातं न तापं कुरु सुन्दरि ।" ।

२१सापत्न्यम् । "शृणु देवि । प्रवक्ष्यामि यत्तु सापत्न्यसम्भवम् । दुःखं सुदारुणं स्त्रीणां स्वकर्म्मवशात् खलु । मिथ्यावाक्यप्रवादेन विवादं कुरुते तु या । अन्योन्य-स्नेहवैषम्यं कारयित्वा व्रजेदथ । कर्म्मानुयायिनी भूत्वा जीवेद्वर्षचतुष्टयम् । ततः पुनरसौ दीना दैवाद्भवति मानुषी । सापत्न्यं प्राप्य सततं चित्तपीडासमन्विता । भवतीति न सन्देहस्तस्य दानमतः शृणु" ।

२२जात्यन्तरम् "शृणु देव । प्रवक्ष्यामि येन जात्यन्तरं गतः । मनुष्यो हि समाप्नोति भवेद् गर्हितो जनः । पुरा राजकुले-जातो विप्रसेनेति नामतः । एकदा ब्राह्मणी रम्या यौवनस्था तपस्विनी । पुष्पार्थिनी पुष्पवनं गता दृष्टाथ तेन सा । कामबाणार्द्दितेनाथ बलात्कारेण धर्षिता । दुःखरोगाभिसंतप्ता तत स्वभवनं गता । अत्रान्तरे गृहं तस्या भिक्षुरेकः समागतः । धर्षिता सापि तस्यन्नो भिक्षवेऽन्नं ददौ मुदा । इदं कृतं तया पापं शृणु तस्य फलं तथा । तत्कर्म्मवशमासाद्य यमस्य विषयं गता । पुनर्जन्म समासाद्याऽभवन्म्लेच्छकुलोद्भवा । म्लेच्छयोनिं परित्यज्य ततः कैवर्त्तयोनिजा । एवं बहुविधां योनिं समासाद्य द्विजाङ्गना । अमेध्यायञ्च यतये दत्त्वा प्राप गतिं नृप । । मनुष्योऽप्याप्नोति स भवेद्गर्हितोजनः"

२३मूकत्वम् "पुरा देवालये राजन् । गायमानो द्विजः कश्चित् । शृण्वन् प्रणुवन् वाक्यैर्हास्ययुक्तैश्च निन्दितः । तस्य विप्रस्य पापेनाऽद्य न वाक् प्रसरते मुखात् । न्त्ययमानन्तु देवाग्रे गायमानं महन्नं च । नोपहासं प्रकुर्व्वीत महादोषो-भवेद्यतः" ।

२४गद्गदवक्त्रता "अतः परं महाभाग । गद्गदत्वेन दूषितः । भवन्ति मायया मर्त्यास्तच्छृणुष्व वदामि ते । जिगीषालम्पट-हृदयोविवादं प्रकरोति यः । गुरोर्निन्दाञ्च मूर्खत्वादस्य पापमतः शृणु । यमलोके तस्यैव गृह्यते जिह्वे जिह्वामि किङ्करैः क्रुद्धैरजस्रं तस्य दीयतः । अयोबद्धापथ्यैर्स्तं दुःखं प्राप्य महत्तरम् । मानुषत्व-मनुप्राप्य गद्गदो जायते नरः । ततो गद्गदया वाचया मर्त्यः सीदति सर्व्वदा" ।

२५मुखरोगः । "मिष्टदेवगुरोर्निन्दा ये वै मिथ्या वदन्ति च । अभक्ष्यभक्षका ये च ते वै मुखगदार्द्दिताः । भवन्ति नरकस्यान्ते मानुषास्तस्य निष्कृतिम् शृणु वच्म्यामि भूपाल ।" ।

२६कर्णरोगः । "परस्वन्तु यच्छृणोति पापमन्तर्गतन्तु यत् । समाकर्ण्यापि मनुजः कर्णरोगी भवेत् सदा । कर्णमूलं भवेदेवं पूयशोणितसम्भवम् । कर्णरोगमिति ख्यात-मवाप्य परितप्यते" ।

२७दुर्गन्धगात्रता । "चोरयित्वा तु गन्धाढ्यं द्रव्यं लोभपरा-यणः । पच्यते नरके घोरे मूत्रविष्ठासमाकुले । अप्र-तिष्ठेऽतिदुर्गन्धे दिव्यवर्षायुतत्रयम् । मर्त्ये तु शशको भूत्वा जीवेद्वर्षचतुष्टयम् । ततोऽन्तगस्तु सौगन्धो भूत्वा शस्त्रेण हन्यते । दुर्गन्धेन समायुक्तो मानुषत्वमवाप्य सः । स्वकर्म्मवशतो राजन् । दुर्गन्धं गात्रमश्नुते" ।

२८दारिद्र्यं विरूपता च । "पुरा सद्दलस्वपतेरमात्येना सता शृणु । दानविघ्नं कृतस्तेन पापोऽयं नान्यथाऽभवत् । मा ददस्वेति यो ब्रूयाद्देयाग्निब्राह्मणेषु च । स नरकस्य पाकेन दरिद्रत्वेन दृश्यते । दरिद्रः कुरुते पापं पापाद्-याति यमालयम् । पुनरागत्य पापेन दारिद्र्येणाभिदृश्यते । न क्षयोऽस्ति च पापस्य तस्मात् पापं त्यजेत् सुधीः । अदाता च भवेत् सोऽपि विरूपश्चापि दुर्विधः । तस्मात् कर्म्म परित्याज्य दानं दद्यात् स्वशक्तितः' ।

२९सस्वेदपाणिपादता "चोरयित्वा तु लवणं स्फुटं क्षाराब्धि-सङ्कुले । नरके पच्यते पश्चान्मानुषत्वमवाप्य सः । तस्य कर्म्मभवं चिह्नं जायते हस्तपादयोः । सस्वेदं सर्व्वदा तस्य निष्कृतिं त्वमतः शृणु ।

यम् । कृष्णाजिनस्वराट्निर्म्मितैर्व्यजनैर्दृढवह्निज्वलि- महावीरं परितः प्रकीर्णाङ्गारान् दीपनाय उप- वीजयेयुः । तेषु व्यजनेषु एकं प्रतिप्रस्थाता, अपरं आग्नीध्रः, शिष्टमध्वर्युणा गृहीत्वा धूनयन्ति सव्यापसव्यं त्रि प्रदक्षिणं कार्यम् । तत्र सव्यावृत्तौ व्यजन धूननम् दक्षिणावृत्तौ व्यजनाग्रन्तः स्त्रवेति भेदः । धूननेन प्रदीप्तत्वात् जाते अर्चिषि सुवर्णशतमानं निधा- याज्येन स्रुवेण महावीरं सिञ्चेत् । एतच्च सुवर्णशतमानं महावीरादन्यत्र सुगुप्ते देशे स्थापयित्वा कार्यम् । अध्वर्यौ महावीरसेके व्यापृततया प्रतिप्रस्थाता लौकिकमिष्टाग्नौ व्रीहीणां यवानां रौहिणौ पुरोडाशौ पचेत् । रौहिण पुरोडाशयोरन्यपुरोडाशधर्म्मत्वं तेन कपालयो संस्का- रादि कार्यम् । "ईडे द्यावापृथिवी" इति मन्त्रेण परिधीन् परिधाय रौहिणौ पुरोडाशौ पात्रीस्थानीय- योरुपयम्योर्न्यञ्चौ रौहिणहवन्यो स्रुचोरुदास्य तत्स्थायेव आहवनीयदक्षिणोत्तरयोः एकं दक्षिणतोऽ- परमुत्तरतश्च स्थापयेत् । "घर्म्मस्य तन्वौ गायेति" प्रस्तोतृप्रेषणम् । यजमानसहितामार्त्विजा परिक्रम- णम् । प्रस्तोतृव्यतिरिक्ताः पञ्चर्त्विज उपतिष्ठेयुः । छन्दोगानां मते तत्सहिता षट् परिक्रमेयुः । "गर्भो देवानामिति" सकृत्, त्रिस्तूर्ष्णीं परिक्रमेयुः । पत्नी- शिरोऽपगताच्छादनं कृत्वा महावीरमीक्षमाणा पत्नीं "त्वष्टृमन्त" इत्येतं मन्त्रं वाचयेयुः । प्रातः "अहः केतु- नेति" मन्त्रेण दक्षिणं रौहिणं, सायं "रात्रिरिति" मन्त्रेण उत्तरं रौहिणं जुहुयात् । ५८० । घर्म्मधुगवत्समार्थां वायवती रज्जुः तस्मादेव पश्चात्पादबन्धनार्थं सन्दानं तदुहवमादाय "इडएहीति" मन्त्रेण उपांशु, नाम्ना च त्रिरुच्चै गार्हपत्यं गच्छन् सामाह्वयेत् । "धेनु गायेति" प्रस्तोतृप्रेषणम् । "अदित्यै रास्नासीति" मन्त्रेणागताम् गां पाशेन प्रतिमुच्य (तस्या रज्जुपाशं शृङ्गयो प्रोतं कृत्वा स्थूणायां बद्ध्वा) "पूषासीति" मन्त्रेण धेनु पश्चात्- पादयो सन्दानेन (नियमनेन) बद्ध्वा "घर्म्माय दीष्वेति" वत्सं ततोऽपाकुर्यात् । (स्तनपानात् निवर्त्तयेत्) "अश्विभ्यां पिन्वस्वेति" मन्त्रेण पिन्वने (पात्रभेदे) दुहेत् । "साहेन्द्रवदिति" मन्त्रेण पिन्वने पतितांविप्रुषोऽभि- मन्त्रयेत् । "यस्ते स्तन" इति स्तनाभिमर्शनम् । प्रतिप्रस्थाता अजामेव मयूखे दर्व्या बद्ध्वा दुहेत् । "पयो गायेति प्रति- प्रस्थातृप्रेषणम् । "उत्तिष्ठ ब्रह्मणस्पते" इति मन्त्रे होत्रोच्यमाने अध्वर्युः गो समीपादुत्तिष्ठेत् । "उप- द्रव पयसेति" मन्त्रे होत्रोच्चार्यमाणे गार्हपत्यं प्रति अध्वर्युर्गतिः । "गायत्रं छन्दोऽसीति" प्रतिमन्त्रं परी- शासावादद्यात् । "अभिष्टफौ गायेति" प्रस्तोतृप्रेष- णम् । "द्यावापृथिवीभ्यां त्वा परिगृह्णामीति" मन्त्रेण परीशासाभ्यां महावीरग्रहणम् परीशासाभ्यां महावीर- मुत्क्षिप्य कुशवेदेनोपमृज्य उपयमन्या अन्तरिक्षेणो- पयच्छामीति गृह्णीयात् । उपयमनीं च दुग्धरूपघर्म्मस्य अधस्तात् स्थापयेत् । उपयमन्या गृहीतं महावीरमजपय- सासेकेन शान्ते महावीरे "प्रैतु ब्रह्मणस्पते इति" वाक्ये होत्रोच्यमाने "इन्द्राश्विनेति" गो पयोऽपनयेत् ।

ईक्ष० आहवनीयं गच्छन् "समुद्राय त्वेति" मन्त्रेण वातनाम जपेत् । उपयमन्यां पतितं पयोऽपि वा घर्म्मे (दुग्धे) "स्वाहा घर्म्मायेति" आसिञ्चेत् । "स्वाहा घर्म्मः पित्रे" इति जपित्वाऽतिक्रम्याश्राव्य प्रस्तोतारं घर्म्मस्य यजेतिप्रेषयेत् । वषट्कारेण "विश्वा आशा इति" मन्त्रेण होम । "दिवि वा इति" मन्त्रेण महावीरं विवृत्- काययेत् । "स्वाहाऽग्नये इति" मन्त्रेण वषट्कारयोजितेन होम । हुतावशिष्टद्रव्यस्य "अश्विनी घर्म्ममिति" ब्रह्मानु- मन्त्रणम् । "अपातामिति" मन्त्रेण घर्म्मस्य यजमानानुमन्त्र- णम् । अतितप्तत्वात् पात्रमध्ये सर्वतः इतस्तत उच्छ- लन्तो ये घर्म्मलेशास्तेषाम् "इषे पिन्वस्वेति" मन्त्रेणानु- मन्त्रणम् । "घर्म्मादिति" मन्त्रेण ऐशान्यामध्वर्युरागच्- छन् "क्षमेन्यसे" इति मन्त्रेण महावीरं सिकतासु निदध्यात् । तत्र परीशासगृहीतमेव स्थापयेत् । नीचै- र्म्मध्ये शकलं प्रवेश्य तत्स्थेनाज्येन विकङ्कत- शकलम् अक्त्वा अक्त्वा "स्वाहा पूष्णे शरस" इति मन्त्रेण तदेव जुहुयात् हुत्वा हुत्वा च प्रथमपरिधौ विकङ्कतशकलान् निदध्यात् । एवं त्रिधा कृत्वा चतुर्थ- मक्तं तच्छकलमीक्षमाणो दक्षिणतो बर्हिषि उपगूहेत् (प्रवेशयेत्) । अक्त्वा सप्तमं च विकङ्कतशकलम् दक्षिणोत्त- माभ्यां एकैकपार्श्वे (महावीरस्याग्रतस्तेनैवाज्येन) मूलाग्र- पर्यन्तं प्रतिप्रस्थात्रे दद्यात् । प्रतिस्थाता तं शकलमुष्टं नियच्छेत् । घर्म्मसम्बन्धि नवनीतादि "स्वाहा व ज्यो- तिषा" इति मन्त्रेण परीशासाभ्यामुत्पाद्य उपयमन्यां स्रुच्याशिञ्चति (स्रुग्मुखस्योपरि अधोमुखं करोतीत्यर्थः) ततो द्वितीयरौहिणहोम । मध्यमपरिधौ निहितानि पञ्च वैकङ्कतशकलानि आहवनीये जुहुयात् । उपयमन्या

वीरस्य भेदने यथाकाल प्रायश्चित्तं कुर्यात् । तत्प्रायश्चित्त प्रकारादि । अभगने न द्वितीयतृतीययोर्मध्ये द्वयेनान्तरेण वा प्रवर्ग्यं चरेत् । तत्र पूर्णाहुतिर्होमप्रकार । अभिप्रयमाणो महावीरो यदि भिद्यते तदा प्रायश्चित्तहोमे प्रजापतिर्देवता । निहिताभिमर्शमादारभ्य यजमानयोऽवसेचमान्तकाले महावीरभेदने प्रायश्चित्तमेद । तत्र प्रथमदिने भेदने प्रा० सविता देवता । द्वितीयेऽहनि भेदे अग्निर्देवता तृतीयदिने भेदने वायुर्देवता ।

अथ प्रवर्ग्याधिकारिण । अग्निष्टोमप्रकारव्याति रात्रस्य प्रथमे प्रयोगे न प्रवर्ग्यचरणम् इत्येक पक्ष । विकल्पेन तत्रापि प्रवर्ग्यचरणमिति शाखान्तरम् । प्रवर्ग्ये यज्ञे दधिघर्मसम्बन्धि रीतिकर्त्तव्यता । अपविलायां अग्निष्टोमहयन्या दधिघर्मग्रहण कुर्यात् । तच्च यथा कथञ्चित् स्थालीमुखेनैव स्रुचि निनयेत् । प्रकारस्याभिधारणे आपस्य न । हुतशेषस्य "मयि त्यादति" मन्त्रेण भक्षणम् । तच्च महाप्रतीयेऽह्नि कर्त्तव्यम् । दधिभक्षानन्तर चात्वाले मार्ज्जनम् । प्रवर्ग्यचरणस्यादौ अन्ते च शान्तिकाध्यायपाठ । (शान्तिकाध्यायश्च ऋच याचमित्याद्यध्याय) । शान्तिकरणद्वयमध्ये द्वारपिधानोत्तरकाले आदिमम् । पात्रापसारणान्त्या निधानानन्तरमन्तिमम् इति भेद ।

कातीयच्छन्दःक्रमप्रतिपाद्यविषयाय विस्तरभयान्नोक्ता अत एवाशेयाः । कात्यायनश्रौतसूत्रप्रतिपाद्यविषयाश्च श्रौतक्रमपद्धत्यादौ दृश्यन्ते ।

कात्यायनी स्त्री कतस्य गोत्रापत्यं स्त्री गर्गा० यञ् लोहितकतन्ता० ष्फ षित्त्वात् ङीष् । १ कतगोत्रापत्यस्त्रियाम् । पत्न्यां ङीष् । २ कात्यायनर्षेः पत्न्याम् ३ तत्तुल्य कषायादिवस्त्रधारिण्यामर्द्धवृद्धायां विधवायां स्त्रियां ४कल्पभेदे कतगोत्रोत्पन्नाया दुर्गायां ५ याज्ञवल्क्यर्षिपत्नीभेदे च । "याज्ञवल्क्यस्य द्वे भार्य्ये बभूवतु मैत्रेयी कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायनी " वृ० उ० । [यदि गियमपोते तन्त्रभेदे ।

कात्यायनीतन्त्र न० ६त० । कात्यायनीपूजामन्त्रादिविधा-

कात्यायनीपुत्र पु० ६त० । कार्त्तिकेये ।

काथक्य पु० स्त्री कथकस्य गोत्रापत्यं गर्गा० यञ् । कथकर्षेर्गोत्रापत्ये यूनि तु यञन्तत्वात् फक् । काथक्यायन तदीय युवगोत्रापत्ये । स्त्रियां लोहितकतान्तादि० ष्फ षित्त्वात् ङीष् । काथक्यायनी तद्गोत्रापत्यस्त्रियाम् ।

कापच्चित्क न० कपच्चित्+गिरयादि० स्वार्थे ठक् तान्तत्वात् ठस्य क । कपच्चिद्दित्यर्थे ।

काथिक त्रि० कथाया चाष् कथादि० ठक् । कथारचनासमर्थे

कादम्ब पुंस्त्री गी०कदि–णिच्–अम्बच् । (कालिहाँस) १हंसभेदे स्त्रियां जातित्वेऽपि संयोगोपधत्वान्न ङीष् किन्तु टाप् । तस्य च नीलवर्णत्वम् "क्वचित् प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा । अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव" (?) ... कादम्बसंसर्गवतीव पङ्क्ति " सितासितगङ्गायमुनासङ्गमवर्णने रघु । तद्व्या० "कादम्बसंसर्गवती नीलहंससृष्टा" मल्लि० । सुश्रुते हंसप्रकारस्येत्युपक्रमे कादम्बस्य श्रयन्त सधचारिणीवोक्ता "रक्तपित्तहरा, शीता स्निग्धा वृष्या मरुज्जित । सृष्टमूत्रपुरीषाश्च मधुरा रसपाकयो " इति तेषां मांसगुणा उक्ता । २इषौ पु० विश्व । ३वाणे मेदि० । "कादम्बानामेकपातैरमोघ्यत्" माघ । कदम्बे समूहे भव अण् । ५ समूहनके त्रि० । कदम्बस्येदम् अण् । ६कादम्बसम्बन्धिनि त्रि० "कादम्बमर्द्धोद्गतकेशरञ्च" रघु । 'कादम्ब' नीपकुसुम"मिति मल्लि० । वस्तुतः कदम्बशब्दस्य पुष्पपरत्वे कदम्बमित्येव ह्रस्वपाठ स्यात् दीर्घपाठे तु कदम्बानां कुसुमानां समूह इत्यर्थेऽण् । इति तस्य कदम्बसमूहपरतेति बोध्यम् । कदम्ब एव स्वार्थेऽण् । ७ कादम्बवृक्षे पु० "नैतत्कादम्बपल्लवजकरमकराकरम्भापञ्च पुष्पविभाणि" स्वानर्थविपक्कोत्तने सुश्रु० । स्वार्थे कन् वाणे हारा० ।

कादम्बर न० कादम्ब लाति प्रकृतित्वेन ला–क वस्य र । १ऐक्षवे गुडादौ, तस्य २विकारे मद्ये च । "निषेव्य मधु माधवा सरसमत्र कादम्बरम्" माघ । तद्व्याख्यायां मल्लिनाथेनोक्ता व्युत्पत्तिरुक्ता । कादम्ब कदम्बोद्भव रस राति रा–क । तच्च स्वरसयुक्ते ३दधिसरे पु० मेदि० ।

कादम्बरी स्त्री कुत्सित सलिलमम्बर यस्य को कदादेश कदम्बरो कोलाम्बरो बलभद्रस्तस्य प्रिया अण् । हलिप्रियायाम्, मदिरायाम् । अस्या निरुक्तिर्बलभद्रप्रियता च हरि० ९८ अ० दर्शिता यथा "अथ सङ्कर्षण श्रीमान् विना कृष्णेन वीर्य्यवान् । चचार सस्य शिखरे नगस्य नगसन्निभ । प्रफुल्लस्य कदम्बस्य छायायां निषसाद ह । वायुना मदगन्धेन वीज्यमान सुखेन वै । तस्य तेनानिलौघेन सेव्यमानस्य तत्र वै । मद संस्पर्शजो गन्ध संस्पृशन् घ्राणमागत । तृष्णा चैन विवेशाशु वारुणीप्रभवा तदा । शुशोष च मुख तस्य मत्तस्येवापरेऽहनि । स्मारित स पुरावृत्तममृतप्राशनं

कर्थ वै प्रकृत छतता गतम्' इति१०६ अ०। 'भीष्म पशु पितुः प्रियचिकीर्षया सत्यवतीं मातरमुद्दहापयत् यामाहु-र्गन्धकालीमिति। तस्या पूर्व्वं कानीनो गर्भो पराशराद्द्वैपायनोऽभवदिति" भा० आ० ८५ अ०। व्यासस्य कानीनत्वमुक्तम्।

कान्त पु० कम दीप्तौ कम-क्त। १, वसन्ते "कान्तस्य स्वांसिता" उद्भट। 'शिवरात्रौ ददाम्यर्घमुमाकान्त। गृहाण मे' शिवार्घदानमन्त्र। सूर्य्यपूर्व्वक सूर्य्यकान्तमणौ (आयाम्), चन्द्रपूर्व्वक चन्द्रकान्तमणौ, अय पूर्व्व अयस्कान्तमणौ (चुम्बकपाथर) २चन्द्रे ३वसन्ते ४हिज्जलवृक्षे च। ५कुङ्कुमे, न० ६शोभने, "कान्तालकान्ताललना सुराणाम्" माघ "नात्र कान्तमुपगीतया तया' माघ। ७अभीष्टे च त्रि०। "भीमकान्तैर्नृपगुणैः" रघु। ८नार्य्यां, ९प्रियङ्गुवृक्षे च स्त्री। मेदि० १०वृहद्दे लायां ११रेणुकायां १२ नागरमुस्तायां स्त्री राजनि०। १३सुखस्थाने १४लोहभेदे न० भावप्र० तस्य लक्षणगुणादि तत्रोक्तं यथा

"यत्पात्रे न प्रसरति जले तैलविन्दुः प्रतप्ते, हिङ्गुर्गन्धं त्यजति च निजं तिक्ततां निम्बकल्कः। तप्तं दुग्धं भवति शिखराकारकं, नैति भूमिं, कृष्णं न स्यात् सजलचणकं कान्तलोहं तदुक्तम्"। मारितस्य चूर्णीकृतस्य तस्य सेवने गुणा उक्तास्तत्रैव 'गुल्मोदरार्शः शूलाममामवात भगन्दरम्। कामलाशोथकुष्ठानि क्षयं कान्तमयो हरेत्। प्लीहानमम्लपित्तञ्च यकृच्चापि शिरोरुजम्। सर्वान्रोगान् विजयते कान्तलोहं न संशयः। बलं वीर्य्यं वपुः पुष्टिं कुरुतेऽग्निं विवर्धयेत्"। तत्रैव सामान्यलोहमारणविधिगुणादि।

"शुद्धं लोहभवं चूर्णं पातालगरुडीरसैः। मर्द्दयित्वा पुटेदग्नौ दद्यादेवं पुटत्रयम्। पुटत्रयं कुमार्य्याश्च कुठारच्छिन्निकारसैः। पुटषट्कं ततो दद्यादेवं तीक्ष्णमृतिर्भवेत्"। अन्यच्च। "क्षिपेद्द्वादशभागेन दरदं तीक्ष्णचूर्णतः। मर्द्दयेत्कन्यकाद्रावैर्यामद्वयं ततः पुटेत्। एवं सप्तपुटैर्मृत्युं लोहचूर्णमवाप्नुयात्। सत्यानुभूतो योगोन्द्रैः क्रमोऽयं लोहमारणे। कथ्यते रसराजेन कौतूहलधियाऽधुना। सूतकात् द्विगुणं गन्धं दत्त्वा कुर्य्याच्च कज्जलीम्। द्वयोः समं लोहचूर्णं मर्द्दयेत्कन्यकाद्रवैः। यामद्वयं ततः पिण्डं कृत्वा ताम्रस्य पात्रके। घर्मे धृत्वा रुवूकस्य पत्रैराच्छादयेद्बुधः। यामद्वयाद्भवेदुष्णं धान्यराशौ न्यसेत्ततः। दत्त्वोपरि शरावं तु त्रिदिनान्ते समुद्धरेत्। पिष्ट्वा च गालयेद्वस्त्रादेवं वारितरं भवेत्। दाडिमस्य दलं पिष्ट्वा तक्रवर्गं च वारिणा। तद्रसेनायसश्चूर्णं सर्वीय प्लावयेदिति। आतपे शोषयेत्तच्च पुटेदेवं पुनः पुनः। एकविंशतिवारैः सन्म्रियते नात्र संशयः। एवं सर्वाणि लोहानि स्वर्णादीन्यपि मारयेत्। अथ मारितस्य लोहस्य गुणाः'। "लोहं तिक्तं सरं शीतं कषायं मधुरं गुरु। रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत्। कफं पित्तज्वरं शूलं शोफार्शः प्लीहपाण्डुताः'। मेदोमेहक्रिमीन् कुष्ठं तत्किट्टं तद्वदेव हि। गुञ्जामेकां समारभ्य यावत् स्युर्नवरक्तिकाः। तावल्लोहं समश्नीयाद्यथादोषानलं नरः'। कुष्माण्डं तिलतैलं च माषान्नं राजिकां तथा। मद्यमम्लरसञ्चैव वर्जयेल्लोहसेवकः। शिलागन्धार्कदुग्धाक्ताः स्वर्णाद्याः सर्वधातवः। म्रियन्ते द्वादशपुटैः सत्यं गुरुवचो यथा"।

"कामि कान्ते रसिका काकुरुतेन" माघ। "कान्ताजनेन रहसि गृहीता।" "वपुष्यशेषेऽखिललोककान्ता सानन्यकान्ताद्युरसीतरा तु"। माघ क प्रह्लादमनयति द्विपराद्धकाले। १५ वासुदेवे परमेश्वरे पु० "कामदेव कामपाल कामी कान्त कृतागम' विष्णुस०। १६ पत्यां स्त्री "सा कान्ते पञ्चस्थाने पर्य्याकाशे देवे साक्षी" ज्यो०त० "कान्तया कान्तसंयोगे किमकारि नवोढया" विदग्धमु०। १७ कार्त्तिकेये पु०। "आग्नेयश्चैव स्कन्दश्च" इत्युपक्रमे "कामजित् कामदः कान्तः" इत्युक्त्वा। "नामान्येतानि दिव्यानि कार्त्तिकेयस्य यः पठेत्" भा०वन० २३१अ०। "भवेत् कान्ता युगरसहयैर्यतौ नरसौ लगौ" इत्युक्तलक्षणे १८छन्दोभेदे स्त्री। १९कामदेवभेदे पु०कामशब्दे दृश्यम्।

कान्तपक्षिन् पु०स्त्री कान्तोमनोहरः पक्षोऽस्यास्य प्राशस्त्येन इनि। मयूरे शब्दच०स्त्रियां ङीप्।

कान्तपुष्प पु० कान्तं पुष्पमस्य। कोविदारवृक्षे। राजनि०।

कान्तलक पु०कान्तं लक्यते लक-आस्वादने कर्मणि घञर्थे क। (तुद) वृक्षवृक्षे अमरः।

कान्तलोह पु० कान्तं प्रियं लोहं यस्य। अयस्कान्ते। कर्म०। (कान्तिलोह) लोहभेदे। कान्तशब्दे तद्गुणाद्युक्तम्।

कान्ताङ्घ्रिदोहद पु० कान्ताङ्घ्रिः तत्ताडनं दोहदमस्य पुष्पोद्गमे। अशोकवृक्षे त्रिका०। यथा च गम्यं तथात्र तथा अशोकशब्दे ४८५पृ० उक्तम् कान्तापादताडनादयोऽस्यात्र।

कान्तायस न० नित्यकर्म० जातित्वात् अच् समा०। कान्तलोहे राजनि०।

कान्तार पु० कान्ता अभीष्टा अराश्च अन्ययोरस्य, कस्य जल-

[illegible]

कान्तारपथिक त्रि॰ [illegible]

कान्तारी स्त्री॰ [illegible]

कान्ति स्त्री॰ [illegible]

[illegible]

कान्तिद न॰ कान्तिं ददाति दा–क। [illegible]

कान्तिदायक न॰ कान्तिं ददाति दा–ण्वुल्। [illegible]

कान्तिनगरी स्त्री॰ [illegible]

कान्तिभृत् त्रि॰ कान्तिं बिभर्त्ति भृ–क्विप्। [illegible]

कान्तिमत् कान्तिरस्त्यस्य मतुप्। [illegible]

[illegible]

कान्दर्प [illegible]

कान्दर्पिक न० कन्दर्पवृद्धिः प्रयोजनमस्य ठक्। कन्दर्पवृद्धिसाधने ह०सं० उक्ते विधानभेदे। तद्विधानञ्च तत्र कान्दर्पिकनामकषट्सप्ततितमेऽध्याये उक्तं यथा। "रक्तेऽधिके स्त्री, पुरुषस्तु शुक्रे, नपुंसकं शोणितशुक्रसाम्ये। यस्मादतः शुक्रविवृद्धिदानि निषेवितव्यानि रसायनानि। हर्म्यपृष्ठमुडुनाथरश्मयः सोत्पलं मधु मदालसा प्रिया। वल्लकी स्मरकथा रहः शशी वर्ग एष मदनस्य वागुरा। माक्षीकधातुमधुपारदलोहचूर्णपथ्याशिलाजतुविडङ्गघृतानि योऽद्यात्। सैकानि विंशति दिनानि नराग्निगोऽपि सोऽशीतिकोऽपि रमयत्यबलां युवेव। क्षीरं घृतञ्च कपिकच्छुमूलं पिबेत् य स्त्रीषु न सोऽभ्युपैति। भावात् पय सर्पिषि वा विपक्वान् षट्पाममात्रांश्च पयोऽनुपानात्। विदारिकायाः स्वरसेन चूर्णं सुबहुशो भावितशोषितञ्च। घृतेन दुग्धेन सशर्करेण पिबेत्स यस्य प्रमदाः प्रभूताः। धात्रीफलानां स्वरसेन चूर्णं सुभावितं क्षौद्रसिताज्ययुक्तम्। लीढ्वानुपायाच्च पयोऽग्निशक्त्या कामं निकामं पुरुषो निषेवेत्। क्षीरेण वत्साश्वगुञ्जा घृतेन समं प्राश्य कामी बहुगामिमान् च। सुशोषितानपि पिबेत्स यश्च तस्यापत्यं किं चटकः करोति। माषसूपसहितेन सर्पिषा षष्टिकौदनमदन्ति ये नराः। क्षीरमप्यनुपिबन्ति तास्तु ते शर्वरीषु मदनेन शेरते। तिलाश्वगन्धाकपिकच्छुमूलैर्विदारिकाषष्टिकपिष्टयोगः। आजेन पिष्टा पयसा घृतेन पक्त्वा भवेच्छष्कुलिकाऽतिवृष्या। क्षीरेण वा गोक्षुरकोपयोगं विदारिकाकन्दकभक्षणं वा। कुर्वन्न सीदेद्यदि जीर्यतेऽस्य मन्दाग्निता चेदिदमत्र चूर्णम्। साजमोदवचया हरीतकी ग्रन्थिकेन सहिता च पिप्पली। मद्यतक्रतरलोष्णवारिभिश्चूर्णपानमुदराग्निदीपनम्। अत्यन्ततिक्तलवणानि कटूनि शक्तिशाकारशाकबहुलानि च भोजनानि। रक्तशुक्रवीर्यरहितं स करोत्यनेकान् व्याधीन् जरांश्च सुखाप्यबलामसाध्य"। भावप्र० तदुपायविधानाद्युक्तं यथा। "अथ वाजीकरणाधिकारः। तत्र वाजीकरणस्य लक्षणमाह। यद्द्रव्यं पुरुषं कुर्य्याद्वाजीव सुरतक्षमम्। तद्वाजीकरमाख्यातं मुनिभिर्भिषजां वरैः। अथ प्रसङ्गात् क्लैब्यस्य लक्षणं संख्यां निदानञ्चाह। क्लीवः स्यात् सुरताशक्तस्तद्भावः क्लैब्यमुच्यते। तच्च सप्तविधं प्रोक्तं निदानं तस्य कथ्यते। तैस्तैर्भावैरहृद्यैस्तु रिरंसोर्मनसि क्षते। ध्वजः पतत्यतो नॄणां क्लैब्यं समुपजायते। द्वेष्यस्त्रीसंप्रयोगाच्च क्लैब्यं तन्मानसं स्मृतम्। तैस्तैर्भावैः — भयशोकक्रोधादिभिः, — अहृद्यैः — हृदयाहितैः — तु क्षते पीडिते अनभ्युन्नते इति यावत्। ध्वजः — शिश्नः। पतति नतवद्भवति संप्रयोगेऽक्षमम्। "कटुकाम्लोष्णलवणैरतिमात्रोपसेवितैः। पित्ताच्छुक्रक्षयो दृष्टः क्लैब्यं तस्मात् प्रजायते। कट्वादिनातिमात्रेण प्रवृद्धेन पित्तेन शुक्रस्य दाहनात् क्लैब्यं भवति पित्तजमिति द्वितीयम्। अतिव्यवायशीलो यो न च वाजीक्रियारतः। ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकम्। शुक्रक्षयेण तृतीयम्। 'महता मेढ्ररोगेण चतुर्थी क्लीवता भवेत्। वीर्यवाहिशिराच्छेदान्मेहनानुन्नतिर्भवेत्। बलिनः क्षुब्धमनसो निरोधाद्ब्रह्मचर्यतः। षष्ठं क्लैब्यं स्मृतं तत्तु शुक्रस्तम्भनिमित्तकम्। बलिनं पुरुषं क्षुब्धमनसं कामात्तं चञ्चलमनसो, ब्रह्मचर्यम् आश्रित्य तस्मान्निरोधात् शुक्रस्य, क्लैब्यं भवति। जन्मप्रभृति यत्क्लैब्यं सहजं तद्धि सप्तमम्। असाध्यं क्लैब्यमाह। असाध्यं सहजं क्लैब्यं मर्मच्छेदाच्च यद्भवेत्। मर्मच्छेदात् वीर्यवाहिशिराच्छेदाच्च। अथ क्लैब्यस्य चिकित्सा। क्लैब्यानामिह साध्यानां कार्यो हेतुविपर्ययः। मुख्यं चिकित्सितं यथानिदानपरिवर्जनम्। अथ क्लैब्यस्य चिकित्सायां वाजीकरणविधिमाह। नरो वाजीकरान् योगान् सम्यक् शुद्धो निरामयः। सप्तत्यन्तं प्रकुर्वीत वर्षादूर्द्ध्वन्तु षोडशात्। न च वै षोडशादर्वाक् सप्तत्याः परतो न च। आयुष्कामो नरः स्त्रीभिः संयोगं कर्त्तुमर्हति। क्षयवृद्ध्युपदंशाद्या रोगाश्चातीव दुर्ज्जयाः। अकालमरणञ्च स्याद्भजतः स्त्रियमन्यथा। चिन्तादिनामर्द्धयतां रूपयौवनशालिनाम्। नराणां बहुभार्याणां विधिर्वाजीकरो हितः। स्थविराणां रिरंसूनां स्त्रीणां वाल्लभ्यमिच्छताम्। योषित्प्रसङ्गात् क्षीणानां क्लीवानामल्परेतसाम्। हिता वाजीकरा योगाः प्रीणयन्त्यबलं सदा। एतेऽपि पुष्टदेहानां सेव्याः कालाद्यपेक्षया। वाजीकरणान्याह। भोजनानि विचित्राणि पानानि विविधानि च। गीतं श्रोत्राभिरामाश्च वाचः स्पर्शसुखास्तथा। यामिनी चन्द्रतिलका कामिनी नवयौवना। गीतं श्रोत्रमनोहारि ताम्बूलं मदिरा स्रजः। गन्धा मनोज्ञा रूपाणि चित्राण्युपवनानि च। मनसश्चाप्रतीघातो वाजीकुर्व्वन्ति मानवम्। माक्षीकधातुमधुपारदलोहचूर्णम् पथ्याशिलाजतुविडङ्गघृतानि लिह्यात्। एकोनविंश-

[illegible]

तादृना" तन्त्रसारे मन्त्रकुलनायिकाकीर्त्तने ।

कापिक पु॰ कपिरेव अङ्गुल्यादि॰ ठक् । कपिशब्दार्थे

कापिञ्जल पुंस्त्री कपिञ्जलस्यापत्यं शिवा॰ अण् । कपि-ञ्जलस्यापत्ये स्त्रियां ङीप् ।

कापिञ्जलादि पुंस्त्री कपिञ्जलान् तन्नामानर्षीन् अदर्-अण् उप॰स॰ कपिञ्जलादस्तस्यापत्यम् "अत इञ्" पा॰ इञ् । कपिञ्जलपक्षिमांसभक्षकस्यापत्ये स्त्रियां ङीप् । तस्यापत्यम् कुर्वादि॰ ण्य । कापिञ्जलाद्य तदपत्ये पुंस्त्री ।

कापित्थ न॰ कपित्थस्य विकारः अनुदात्तादित्वात् "अनु-दात्तादेश्च" पा॰ अञ् । कपित्थविकारे

कापिल त्रि॰ कापिलं तद्दृष्टशास्त्रं वेत्त्यधीते वा अण् । १कपिल-शास्त्रज्ञे २ तदध्येतरि च हेम॰ । कपिलेन प्रोक्तम् अण् तस्येदं वा अण् । ३कपिलप्रोक्ते ४तत्सम्बन्धिनि शास्त्रे न॰ कपिलशब्दे तत्प्रोक्तविषया दर्शिता । "मार्गं स्रा कापिलाः सांख्याः" भा॰ शा॰ २०२ । "बुद्धिश्च परमा यत्र कापिलानां महात्मनाम्" "पितुर्नियो-गाज्जग्राह शुको धर्मभृतां वरः । योगशास्त्रं च निखिलं कापिलञ्चैव भारत ।" भा॰ शा॰ ३२७ अ॰ । स्वार्थेऽण् । ५पिङ्गलवर्णे पु॰ ६तद्वति त्रि॰ भरत कपिलमधिकृत्य कृतो ग्रन्थः अण् । ७कपिलाधिकारेण कृते उपपुराणभेदे "अन्यान्युपपुराणानि मुनिभिः कथितानि च" इत्युपक्रम्य "कापिलं मानवञ्चैव तथैवोशनसेरितम्" । हेमा॰ दा॰ ख॰ कूर्म्मपु॰ उपपुराणगणने उक्तम्

कापिलिक पुंस्त्री कपिलिकाया कपिलवर्णाया अपत्यम् शिवा॰ अण् । कपिलिकाया अपत्ये स्त्रियां ङीप् ।

कापिलेय पु॰ कपिलाया तन्नाम्न्या ब्राह्मण्या अपत्यम् ढक् । कपिलानाम्न्या स्तनपायितेन तदपत्ये ब्राह्मणेन कपिल-शिष्ये मुनिभेदे । तस्य सम्भवादिकं भा॰ शा॰ २१८ अ॰ वर्णितं यथा "तत्र पञ्चशिखो नाम कापिलेयो महा-मुनिः । परिधावन् महीं कृत्स्नां जगाम मिथिलामथ । सर्वसंन्यासधर्माणां तत्त्वज्ञानविनिश्चये । सुपर्य्यवसितार्थश्च निर्द्वन्द्वो नष्टसंशयः । ऋषीणामाहुरेकं तं यं कामानावृतं नृप । शाश्वतं सुखमत्यन्तमन्विच्छन् स सुदुर्लभम् । यमाहुः कपिलं सांख्याः परमर्षिं प्रजापतिम् । स मन्ये तेन रूपेण विस्मापयति हि स्वयम् । आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनम् । पञ्चस्रोतसि यः सत्रमास्ते वर्षसहस्रि-कम् । यत्र चासीनमागम्य कापिलं मण्डलं महत् । पञ्च-स्रोतसि निष्णातः पञ्चरात्रविशारदः । पञ्चज्ञः पञ्चकृत् पञ्चगुणः पञ्चशिखः स्मृतः । पुरुषावस्थमव्यक्तं परमार्थं न्यवेदयत् । इष्टसत्रेण संसृष्टो भूयश्च तपसाऽऽसुरिः । क्षेत्र-क्षेत्रज्ञयोर्व्यक्तिं बुबुधे देवदर्शनः । यत्तदेकाक्षरं ब्रह्म नानारूपं प्रदृश्यते । आसुरिर्मण्डले तस्मिन् प्रतिपेदे तदव्ययम् । तस्य पञ्चशिखः शिष्यो मानुष्या पयसा भृतः । ब्राह्मणी कपिला नाम काचिदासीत् कुटुम्बिनी । तस्याः पुत्रत्वमागम्य स्त्रियाः स पिबति स्तनौ । ततः स कापि-लेयत्वं लेभे बुद्धिं च नैष्ठिकीम् । एतन्मे भगवानाह कापिलेयस्य सम्भवम् । तस्य तत् कापिलेयत्वं सर्ववित्त्व-मनुत्तमम्" ।

व्याख्यातञ्चैतत् नीलकण्ठेन यथा "कापिलेयः कपिलायाः पुत्रः परिधावन् एकत्र वासमकुर्वन् । सुपर्य्यवसितार्थः सम्यग्निश्चितप्रयोजनः । कामैरनावृतः कामानावृत-मिति पाठे यदृच्छया स्थितं नृपं सुखम् अविच्छिन्नं स्थाप-यितुमिति शेषः । स कपिलः, तेन पञ्चशिखरूपेण तत्प्रायत्वात्तत्तुल्यत्वम् । पञ्च स्रोतांसि विषयकेदार-प्रणालिका यस्य तस्मिन् मनसि मानसं सत्रमित्यर्थः । यत्र यत्समीपे, कापिलं कपिलमतानुसारि मण्डलं मुनि-समूहं प्रति परमार्थं यो न्यवेदयदित्युत्तरेण सम्बन्धः । पञ्चस्रोतसि मनसि निष्णातः ऊहापोहकौशलवान् । पञ्चरात्रो नाम विष्णुत्वप्रापकः क्रतुः "पुरुषो ह वै नारा-यणोऽकामयतात्यतिष्ठेयं सर्वाणि भूतान्यहमेवेदं सर्वं स्यामिति स एतं पञ्चरात्रं पुरुषमेधं यज्ञक्रतुमपश्य-दिति" शतपथोक्तस्तत्र विशारदः अनुष्ठिताखिलकर्मे-त्यर्थः । पञ्च अन्नमयप्राणमयमनोमयविज्ञानमयानन्दम-यान् कोषान् मिथ आत्मनश्च विविक्तान् जानातीति पञ्च-ज्ञः अतएव पञ्चकृत् पञ्च तद्विषयाण्युपासनानि "भृगुर्वै वारुणिरित्यस्यामुपनिषदि "अन्नं ब्रह्मेति व्यजा-नादित्यादि" विहितानि करोति पञ्चकृत्, पञ्च "शान्तो-दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यतीति श्रुताः शान्तादयो गुणा यस्मिन् स पञ्चगुणः ततश्च "ब्रह्मविद्ब्रह्मैव भवतीति" श्रुतेः पञ्चभ्योऽतिरिच्य-मानत्वात् शिखेवेति पञ्चशिखं पुच्छं ब्रह्म तज्ज्ञत्वात् मुनिरपि पञ्चशिखः । ननु पञ्चकृत् कथं षष्ठं स्यादिति चेत् ? शृणु—यथान्नमयं विकारमुपासीनस्तत्प्रकृतिमन्नं विराड्ब्रह्मेति एवं मायया विकृतमानन्दं तत्प्रतिनिधीति न षष्ठोपास्तिः पृथगवक्तव्या । षष्ठज्ञानाय तस्य पञ्चसो-पास्तिफलत्वात् तदेतदाह पुरुषेति । पुरुषाः अन्नमयादयः

[illegible]

कापिञ्जल त्रि [illegible]

कापिञ्जल न [illegible]

कापिल न [illegible]

कापिशायन त्रि [illegible]

कापिशेय पु [illegible]

कापिष्ठल पु [illegible]

कापिष्ठलि पु [illegible]

कापुरुष पु [illegible]

कापेय न [illegible]

कापोत न [illegible]

कापोतक त्रि [illegible]

कापोतपाक पु [illegible]

कापोताञ्जन न [illegible]

काम्ब पु [illegible]

काम्बल त्रि [illegible]

काफल पु० कुत्सितं फलमस्य। (कट्फल) वृक्षभेदे। शब्दरत्ना०

काबर त्रि० कुत्सितो वरः कोः का वेदे पृषो०। कुत्सितवरे। "उग्रम् सुम काबर वभ्रि फल्गु शम्बर"। "पुनः कविरिव इयतो वस्वरा काबरस्य च" इत्यो धिया भर्त्स्यामि दूषयिष्यामि काबरम्" ऋष० १।८।२।४।५।

काम अव्य० कम घञ्। १अनुमतौ विश्व। २निकामे ३अल्पार्थे ४काम्ये म०मेदि० कामाय हितम् यत्। ५रेतसि न०मेदि० ६स्वारमित्यर्थे, ७अनुमतौ "काममामरणात् तिष्ठेत् गृहे कन्यर्तुमत्यपि" मनुः। "मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी" माघ। इच्छायाम् "काम सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव" श्रुते तस्य मनोधर्मत्वमिति वेदान्तिनः। आत्माश्रयत्वे मनोहेतुकत्वोक्त्यैव श्रुतेस्तात्पर्यं मन्यमाना आत्मधर्मत्वमिति नैयायिका आहुः। अभिलाषशब्दे इच्छाशब्दे चास्य विवृतिः। "सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः" इत्युपक्रम्य 'अकामस्य क्रिया काचित् दृश्यते नेह कर्हिचित्। यद्यद्धि कुरुते किञ्चित् तत्तत् कामस्य चेष्टितम्" इति मनुना सर्वां क्रियां प्रति कारणत्वेनोक्तम्। "स्वर्गकामोऽनेन कर्मणा इष्टमिदं फलं साध्यताम्" इति बुद्धिः। तथाच इष्टसाधनता ज्ञानरूपात् सङ्कल्पात् काम इच्छा भवति, ततः क्रिया-निष्पत्तिः। यथाप्राप्तविषयस्य प्राप्तिसाधने चित्तवृत्तिभेद कामस्तु रजोगुणहेतुक। यथोक्तं गीतायाम् "काम एष क्रोध एष रजोगुणसमुद्भवः" कामश्च इष्टविषयाभिलाषः। "सुखे या विषयापेक्षा स काम इति भण्यते"। सुमानादौ कामस्य एव मूलार्थकर्मकत्वम्। अतोऽस्य कार्ये चोदितः कामो लोकोऽस्य प्रधानता" "सङ्गात् सञ्जायते कामः कामात् क्रोधो ऽभिजायते" गीता। कर्मणि घञ्। ८काम्यविषये, कामविषयश्च द्विविधः बाह्याभ्यन्तरकामभेदात् तत्र स्रक्चन्दनादिकं वस्त्रादिविषयाश्च बाह्यविषयाः शारीरकामविषयाः कर्मजातम् आभ्यन्तरः तस्य सम्पत्तेतुकः वासनायाम् "न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" मनुः। धर्मार्थकाममोक्षमध्ये कामपदेन काम्यस्यैव ग्रहणं तस्यैव पुरुषार्थत्वात् स्वरूपेण इष्यमाणत्वात् इच्छायास्तथात्वाभावात्। "अप्यर्थ-कामौ तस्यास्तां धर्म एव मनीषिणः" रघु। 'कुलाम कामस्य तथेति कामम्" रघु। काम्यमानत्वात् कामं ह्रदप्रियार्थे। 'ययेति कामं गतिमन्वयान् रणे," रघु।

"इति स्वप्नोपमान् मत्वा कामान् मा गास्तदङ्गताम्" रघु। कामनाविषयश्च सुखदुःखाभावश्चेति वेदान्तिनः, तदेव मुख्यं प्रयोजनम् "नवा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवति" वृ० उप० तत्सम्बन्धेनात्मन एव परप्रेमास्पदत्वोक्तेः। तत्साधनानान्तु गौणप्रयोजनत्वम्। सुखमिव दुःखाभावोऽपि मुख्यं काम्यमिति नैयायिकादयः, ९मोक्षार्थिभिः काम्यमाने १०परमेश्वरे च। "कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः" विष्णुस०। स्त्रीपुरुषयोः उपस्थादाध्यानन्दसाधने तयोः परस्पराऽलिङ्गनादिप्रवर्त्तके ११अनुरागभेदे तत्रैव लोके कामशब्दस्य रूढिर्दृश्यते। स च तिथिविशेषे स्त्रीपुरुषयोः स्थानविशेषेषु चुम्बनादिना व्यज्यते, यथोक्तं स्मरदीपिकायाम् "पादे गुल्फे तथोरौ च भगे नाभौ कुचे हृदि। कक्षे कण्ठे तथौष्ठे च गण्डे नेत्रे श्रुतावपि। ललाटे शीर्षकेशेषु कामस्थानं तिथिक्रमात्। दक्षे पुंसां स्त्रिया वामे शुक्ले कृष्णे विपर्यय। पादाङ्गुष्ठे प्रतिपदि द्वितीयायान्तु गुल्फके। ऊरुदेशे तृतीयायां चतुर्थ्यां भगदेशतः। नाभिस्थाने च पञ्चम्यां षष्ठ्यान्तु कुचमण्डले। सप्तम्यां हृदये चैव अष्टम्यां कक्षदेशतः। नवम्यां कण्ठदेशे च दशम्यां चोष्ठदेशतः। एकादश्यां गण्डदेशे द्वादश्यां नयने तथा। श्रवणे च त्रयोदश्यां चतुर्दश्यां ललाटके। पौर्णमास्यां शिखायाञ्च ज्ञातव्यञ्च इति क्रमात्। यत्र स्थाने वसेत् कामस्तत्रैव नखचुम्बनम्। "हृदि कामः भ्रुवोः क्रोधो लोभश्चाधोरदच्छदात्" भाग०। तस्य सर्गादिरूपस्य विराजो ब्रह्मणः हृदयजातत्वेन व्यष्टीनामप्यस्मदादीनामपि मनसिजन्यत्वम्। प्राणिनां जन्मावधि सर्वकालेष्वस्य वर्त्तमानत्वेऽपि यौवने यथास्य यथा प्रादुर्भावस्तथा कालिका० पु० १८। २२ अ० वर्णितं यथा

"ब्रह्मापि तनयां सन्ध्यां द्रष्टा पूर्व्वमथात्मनः। कामाशुभसमक्षे त्यक्ता मुक्ति सतेति वै। तस्याश्च चलितं चित्तं कामबाणविलोडितम्। ऋषीणां प्रेक्षतां तेषां मानसानां महात्मनाम्। भर्गस्य वचनं श्रुत्वा सोपहासं विधिं प्रति। आत्मनश्चलचित्तत्वममर्यादमृषीन् प्रति। कामस्य तादृशं भावं मुनिमोहकरं तदा। दृष्ट्वा सन्ध्या स्वयं तत्र समाशापातिदुःखिता। ततस्तु ब्रह्मणा शप्ते मदने तदनन्तरम्। अन्तर्भूते विधौ शम्भौ गते चापि

कीर्त्त्यसे। ध्यानेन मन्त्ररेण त्वमिहागतोऽसि मानद'। शम्बराले त्वसम्पूर्णे सूतिकागारमध्यतः। अथाथ शम्बरस्य च म्रियमाणो ह्युपेक्षितः। केशवेन महाबाहो! देवकार्य्यार्थसिद्धये। येषा मायावती नाम भार्य्या वै शम्बरस्य तु। रतिं तां विद्धि कल्याणीं तव भार्यां पुरातनीम्। तव वा रक्षणार्थाय शम्बरस्य गृहेऽवसत्। माया शरीरजा न्यस्य मोहनार्थे दुरात्मनः। इतिस्तवत्प्रसादार्थाय मे भयत्र निज तदा। एव प्रद्युम्न! बहूा वै तव भार्या प्रतिच्छिताम्। कृत्वा तु शम्बरं घोरं वैष्णवास्त्रेण संयुगे। गच्छ मायावती भार्य्या द्वारकां गन्तुमर्हसि" हरि० १६५ अ० "काम प्रति नारदवाक्यम्। "सोऽभवीत् सहसा देवीं रुक्मिणीं देवतामिव। अयं स देवि! सम्प्राप्त पुत्रस्तव धनुर्धरः। अनेन शम्बरं हत्वा मायायाश्च विशारदम्। हत्वा मायाश्च या सर्वा यामिर्देवानवाधत। सती चेयं शुभा साध्वी भार्य्याऽपि तनयस्य ते। मायावतीति विख्याता शम्बरस्य गृहोषिता। मा च ते शम्बरस्यैव पत्नीति भवतु व्यथा। मन्मथेऽथ गते नाशं गते चानङ्गतां पुरा। काममत्नी, न कान्तेयं शम्बरस्य रतिः प्रिया। मायारूपेण तं दैत्यं मोहयन्त्य नकल्मषा। न चैषा तस्य कौमारे वशे तिष्ठति शोभना। आत्ममायामयं कृत्वा रूपं शम्बरमोहयत्। पत्न्येषा मम पुत्रस्य स्नुषा तव वराङ्गना" हरि० १६७ अ०। रुक्मिण्यौ प्रति तद्वाक्यम्। तेन १२ रौक्मिणेये पु० १४ बलदेवे शब्दर०। तस्य कामपालत्वात्तथात्वम्। १५ महाराज चूते राजनि०। कर्मण्युपपदे कामयते कर्त्तरि अण्। तत्तत्पदार्थकामनायुक्ते यथा स्वर्गकामोऽश्वमेधेन यजेत पशुकाम प्रजाकाम इत्यादि। पजन्तकामशब्दे परे तुमुन्नन्तस्यान्तलोपः। यथा गन्तुकाम रन्तुकाम इत्यादि इष्यादि०तस्याद्युदात्तता। कामनायुक्तप्रवाचककामादिशब्दसमभिव्याहारे यागे तद्विधेयत्वकल्प तत्प्रकृतिभाव्यत्वञ्च मतभेदेन प्रतीयते यथा स्वर्गकामो यजेतेत्यत्र स्वर्गकाम नियोज्यकस्वर्गकामभाव्यो वा याग इति बोधः। लिङादिना यागादेः कर्त्तव्यत्वबोधनात् यागादेस्तथात्वम्। यागजन्यफलं च काममात्रतीव तत्तत्फलकामकोद्देश्येऽपि भवति यथा पितृस्वर्गकामनया कृतपूर्त्तादेः फलं पितरीति मपिकम्। अर्धशब्देन द्वन्द्वेऽस्य वा पूर्व्वनिपातः। अर्थकामौ कामार्थौ। तन्त्रोक्ते १६वीजभेदे। तदुद्धारो यथा तन्त्रसा० कुलार्णवे "देवीं दक्षिणबाहुयक्षनयम काम कलाबिन्दुसंयुतम्" दक्षिणबाहु ककारस्तस्य वर्णस्य मातृकान्यासे दक्षबाहुमूले न्यस्यत्वात् तथात्वम् शक्तीलकार' नयन शब्देन तेन ईकारः कलाबिन्दुसंयुतम् बिन्दुभूषितम् तेन क्लीम् इत्येव रूपं कामम् इत्यर्थः। मकारान्तरेण तदुद्धारः तन्त्रसा०श्रीक्रमे। "ता विद्या शृणु देवेशि! काममिन्द्रसमन्वितम्। नादबिन्दुकलाभेदात् तुरीयस्वरसंयुतम्। महाश्रीसुन्दरी विद्या महात्रिपुरसुन्दरी। ककारे सर्व्वरूपञ्च कामिकैवल्यदायकम्। लकारे सकलैश्वर्य्यमीकारे सर्व्वसौख्यदम्" कुब्जिकात०। 'परा च कमला कामो वाग्भवः शक्तिरेव च"। १७ककाराक्षरे च। मिथ्याबीज (क्)। तथा काम (क) इन्द्रम्(ल) देवी (इ) मियोजयेत्। षोडशीविद्यायां शक्तिकूटोद्धारे।

कामकला स्त्री० कामस्य कला प्रिया। तत्कलाहेतुत्वात् कामपत्न्याम् १रतौ शब्दरत्ना०। २त० २कामहेतुकलायाञ्च।

कामकाति त्रि०कर्म-षष्ठे क्तिन् कामपरा कातिर्यस्य। कामशब्दयुक्ते। "ते सुप्रस्त्र शवसोऽवसन् कामकातयः"। ऋ० ८।८।११४।

कामकाम त्रि० काम काम्यं कामयते कम-णिङ्-अण् उप०स०। अभीष्टकामे "एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते" गीता। शान्ति कामकामीत्यत्र। "आपूर्य्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्। तद्वत् कामा यं प्रविशन्ति सर्व्वे, स शान्तिमाप्नोति न कामकामी' गीता। स्त्रियां ङीप्।

कामकार त्रि० काम काम्यं करोति कृ-अण् उप० स०। १काम्यविधायके। कार करणे इत०। २कामेन इच्छया फलाभिसन्धिना करणे पु०। "अयुक्तः कामकारेण फले सक्तो निबध्यते" गीता "अग्निहोत्रमपविध्याग्नीन् ब्राह्मणः कामकारतः"। "कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात्" मनु। 'यः शास्त्रविधिमुत्सृज्य वर्त्तते कामकारतः, गीता। कामचारत इति पाठान्तरम्।

कामकूट पु० कामएव कूटं गृहं प्रधानमस्य। १वेश्याप्रिये (विटे) (भाड)। हेम०। २वेश्यायाविभ्रमे च मेदि० तन्त्रोक्ते ३कामराजाख्ये श्रीविद्याया मन्त्रभेदे। "वियचन्द्रस्तत पश्चात् कर्णौ नकुलिवह्नि च। मायास्वरेण संयुक्तं नादबिन्दुकलान्वितम्। प्रथमं कामराजस्य कूटं परमदुर्लभम्' (हसकलह्रीम्) 'वियद्विष्णुयुतं कामोहृस मकस्तत परम्। महामाया तत पश्चात् स्वप्रवतीति कथ्यते" (हसकहलह्रीं) द्वितीयम् कामकूटम्। "मदनं शिवबीजं च

मिहावदे । [illegible] वस्ता [illegible] ।
[illegible] दोमिठेन विभुना [illegible] [illegible]
[illegible] यथा "[illegible] । यदि
देव [illegible] यथ यमपि । [illegible] मयव [illegible]
यन [illegible] । [illegible] देवेन । [illegible]
मुयते । न [illegible] यमेवं [illegible] । [illegible] ते । यो
[illegible] । प्रथमं [illegible] माया [illegible] हिमी
यथः । [illegible] [illegible] [illegible] [illegible] यथा । [illegible]
लय [illegible] [illegible] यदीदिय । [illegible] श्रुति यी
माये [illegible] कथित् कथित् । [illegible] [illegible]
[illegible] [illegible] यथा । [illegible] न [illegible] [illegible]
[illegible] यदीदिय" । [illegible] [illegible]
[illegible] [illegible] न [illegible] । [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible] [illegible] । [illegible] [illegible]
[illegible] यथा [illegible] [illegible] । [illegible] [illegible]
[illegible] । [illegible] [illegible] [illegible]
[illegible]" । [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] । [illegible]
[illegible] । [illegible] [illegible] [illegible]
[illegible] यथा "[illegible] । [illegible] २ [illegible] १ [illegible]
[illegible] ३ [illegible] ४ [illegible] । [illegible] ६ [illegible]
७ [illegible] ८ [illegible] ९ । [illegible] । [illegible] ११
[illegible] १२ [illegible] १३ [illegible] १४ । [illegible]
[illegible] १५ [illegible] १६ [illegible] १७ [illegible]
१८ । [illegible] १९ [illegible] २ [illegible] २१ [illegible]
२२ [illegible] । [illegible] २३ [illegible] २४ [illegible] २५
[illegible] २६ । [illegible] २७ [illegible] ८ [illegible]
२९ [illegible] १ । [illegible] ३१ [illegible] ३२ [illegible]
३३ [illegible] ३४ [illegible] ३५ । [illegible] [illegible]
३७ [illegible] ३८ [illegible] ३९ । [illegible] [illegible]
४१ [illegible] ४२ [illegible] ४३ । [illegible] ४४
[illegible] ४५ [illegible] ४६ [illegible] ४७ [illegible] । [illegible]
[illegible] ४८ [illegible] ४९ [illegible] ५ ।
[illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] ।

"[illegible] [illegible] [illegible] ।। [illegible]
[illegible] [illegible] [illegible] [illegible] । [illegible]
[illegible] [illegible] । [illegible] [illegible] [illegible]
[illegible] । [illegible] [illegible]
[illegible] । [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] न [illegible] । [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible] । [illegible] [illegible]
[illegible] [illegible] । [illegible] [illegible] [illegible]
[illegible] [illegible] ।। [illegible] [illegible] [illegible]
[illegible] । [illegible] [illegible] [illegible] [illegible]
[illegible] । [illegible] [illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible] [illegible] । [illegible] [illegible]
[illegible] [illegible] [illegible] । [illegible] [illegible] [illegible]
[illegible] [illegible] । [illegible] [illegible] [illegible] [illegible]
[illegible] । [illegible] [illegible] [illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible] । [illegible] [illegible] [illegible]
[illegible] [illegible] । [illegible] [illegible] [illegible]
[illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible] । [illegible] [illegible]
[illegible] [illegible] [illegible] । [illegible] [illegible] [illegible]
[illegible] । [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] । [illegible]
[illegible] [illegible] [illegible] । [illegible] [illegible] [illegible]
[illegible] [illegible] । [illegible] [illegible] [illegible]
[illegible] । [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible]" [illegible]
[illegible] । [illegible] । [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] । [illegible] [illegible]
[illegible] [illegible] ।। [illegible]
[illegible] । [illegible] [illegible] [illegible]
[illegible] । [illegible] [illegible] न [illegible] [illegible]

"कुमारक कामक सुयेणोमनयोऽव्यय" इति सर्पसत्रनद्धतराष्ट्रकुलजनागनामकथने भा० आ०५० अ० ।

कामताल पु० स्त्री काम तालयति प्रतिष्ठापयति तल+प्रतिष्ठाया णिच–अण् उप०स० । कोकिले त्रिका० । तस्य ध्वनिना कामोद्दीपकत्वात् तथात्वम् । स्त्रियां जातित्वात् ङीष् ।

कामतिथि पु० स्त्री कामपूजार्था तत्स्वामिका वा तिथिः त्रयोदश्यां तस्यां कामपूजाद्भुता काममहशब्दे दर्शयिष्यते ।

कामद त्रि० कामान् ददाति दा–क । १अभीष्टदायके, २कामधेनौ स्त्री मेदि० सिद्धान्ता कामपूरके ३ परमेश्वरे पु० । काम कामरूप सौन्दर्यं च द्यति दो–अवखण्डने क । ४ कार्त्तिकेये । "कामजित् कामद कान्त" भा० अ० २३१अ० । कार्त्तिकेयनामकथने ।

कामदुघ त्रि० काम दोग्धि दुह–क घादेश । १अभीष्टसम्पादके "इन्द्रस्य कामदुघा स्य कामान् धयध्वम्" आश्व० श्रौ०६,१२,४ । "आराधय सपत्नीकः प्रीता कामदुघा हि सा" "अवेहि मां कामदुघां प्रसन्नाम्" रघु । २सुरभौ गवि स्त्री ।

कामदुह् त्रि० काम दोग्धि दुह–क्विप् ६त० । कामाभिप्रादके । "एष (यज्ञ) वस्त्विष्टकामधुक्" गीता । "तस्याश्च कामधुग्धेनुर्वसिष्ठस्य महात्मनः" भा० आ०१७५ । "यद्वयार्चितमत्प्राप्तं न्यस्य (मुन्यङ्गम्) कामधुगाश्रयम्" । भाग० ७,१५,५ । "एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुग्भवति" श्रुतिः । क (कामदुग्धो-ऽस्यत्वार्थे) त्रि० तैर्त्तगुर्णैः कामदुहाय भूत्वा नरः प्रदातारमुपैति सा गौः" भा०अ०७८६अ० ।

कामदूती स्त्री कामस्य दूतीव उद्दीपकत्वात् । १नागदन्त्यौ रत्नमा०, २पाटलावृक्षे शब्दर० । स्वार्थे कन् । तत्रार्थे ।

कामदेव पु० कामरूप देव । कन्दर्पे तस्य ध्येयरूपम् हेमा० दा० विष्णुधर्मो०वाक्य यथा । 'कामदेवस्तु कर्त्तव्यो रूपेणाप्रतिमो भुवि । चापबाणकरश्चैव मदाद्घूर्णितलोचनः । रतिः प्रीतिस्तथा शक्तिर्मदशक्तिस्तथोज्ज्वला । चतस्रस्तस्य कर्त्तव्या पत्न्यो रूपमनोहराः । चत्वारश्च करास्तस्य कार्या भार्यास्तनोपगाः । केतुश्च मकरः कार्यः पञ्चबाणमुखो-महानिति" । काम्यते मोक्षकाङ्क्षिभिः काम्यस्तथाभूतः सन् दीव्यति द्योतते ।२ परमेश्वरे । "कामदेव कामपाल कामी कान्तः कृतागमः" विष्णुस० । चक्रदत्तोक्ते ३ घृतभेदे तत्पाकादिप्रकारो यथा तत्रैव

'अश्वगन्धातुलाश्चैव (?) कोविदारस्य इषस्य कुसुमस्य च । कस्मादाघृतक पुष्पफलप्रत्ये पलचतुष्टयम् । अश्वगन्धा पलमिता सटाङ्ग गोक्षुरस्य च । शतावरी विदारी च शालपर्णी बला तथा । अश्वत्थस्य च शुङ्गानि पद्मबीजं पुनर्नवा । काश्मरीफलमेतत् तु माषबीजं तथैव च । पृथग्दशपलान् भागान् यवान् तद्वत्(?) पचेत् । चतुर्भागावशेषन्तु कषायं मवतारयेत् । मृद्वीका पद्मकं कुष्ठं पिप्पली रक्तचन्दनम् । बालकं नागपुष्पञ्च आत्मगुप्ताफलं तथा । नीलोत्पलं शारिवे द्वे जीवनीयं विशेषतः । पृथक्कर्षसमश्चैव शर्करायाः पलद्वयम् । रसस्य पौण्ड्रकेक्षूणामाढकं तत्र दापयेत् । चतुर्गुणेन पयसा घृतप्रस्थं विपाचयेत् । रक्तपित्तं क्षतक्षीणं कामलां वातशोणितम् । हलीमकं तथा शोथं वर्णभेदं स्वरक्षयम् । अरोचकं मूत्रकृच्छ्रं पार्श्वशूलञ्च नाशयेत् । एतद्धृतं प्रयोक्तव्यं अङ्गना-पुरुषाणिणाम् (?) । क्षीणाङ्गे बलपत्नीना (?) वृद्धानाञ्च देहिनाम् । क्षीणानामल्पशुक्राणां जीर्णानामल्परेतसाम् । श्रेष्ठं बलकरं हृद्यं धन्यं मेध्यं रसायनम् । ओजस्तेजस्करञ्चैव आयु प्राणविवर्द्धनम् । सबर्द्धयति शुक्रञ्च पुरुषं दुर्बलेन्द्रियम् । सर्वरोगविनिर्मुक्तस्तोयसिक्तो यथा द्रुमः । कामदेव इति ख्यातः सर्वरोगेषु शस्यते" ।

कामधर पु० कामरूपस्थमत्स्यध्वजपर्वतासन्ने सरोवरभेदे कालि० ८१ अ० । तत्स्थानस्य माहात्म्यादुक्तम् । "मणिकूटाचलात् पूर्वे मत्स्यध्वजकुलाचलः । शिवस्त्वत्र मदनो दग्धे नेत्राग्निना पुरा । शरीरं प्राप्य तपसा समाराध्य वृषध्वजम् । तत्र प्राप्य स्वरूपन्तु काम देवेन संस्थितम् । न्यवसत्काय(?) सर्व्वा स सोमभाग सम-न्ततः । तदा स शाङ्करी नाम तत्रास्ते दक्षिणस्तस्य सरः कामधरो नाम तस्मिन् शैले व्यवस्थितः । स्नात्वा-न्या विधिवत् स्नात्वा पीत्वा कामधराम्भसि । विकृतं पापं युद्धात्मा शिवलोके महीयते" ।

कामधेनु स्त्री कामप्रतिपादिका धेनुः । १अभीष्टप्रतिपादिकायां स्वर्गधेन्वाम् सुरभिरन्यथा रोहिण्याः २अन्यस्यां गवि च तस्या उत्पत्त्यादिकमुक्तं कालिकापु०८०अ० । "दक्षस्य तनया यासीत् सुरभिर्नाम नामतः । सर्वमाता महाभागा सर्वलोकोपकारिणी । तस्यान्तु तनयः सञ्जे कश्यपात्तु प्रजापतेः । नाम्ना सा रोहिणी रम्भा सर्वकामदुघा नृपात् । तस्या सञ्जे शूरदेवात्सर्वारतितमोऽभवत् (तस्या सञ्जे शुभे नेकान् सुनेरतितमोऽभवत् वा पाठ) कामधेनुरिति ख्याता सर्वद्रतापयुता । सा पितामह

सुग्रीव [illegible]म्। एतुग्रीव [illegible] [illegible] ... (कृतकृत्य) [illegible] कामवृत्तम् [illegible]।

कामकृत् त्रि० कामेन करोति कृ–क्विप् ६त०। [illegible] कारिणि। कार्यं कामं करोति। [illegible] त्रि। [illegible] ... [illegible]।

कामकेलि इत्यादि [illegible]। [illegible] स्त्रिया।

कामक्रीडा स्त्री कामेन क्रीडा। [illegible]। "[illegible] कामक्रीडा [illegible]।

कामखड्गदला स्त्री कामोद्दीपकं खड्गवत् दलमस्याः। [illegible]।

कामग त्रि० कामेन गच्छति गम–ड। [illegible]। "[illegible] कामेन [illegible]" [illegible]।

कामगामिन् त्रि० कामं यथेष्टं गन्तुं शीलमस्य गम–णिनि। [illegible]।

कामगिरि पु० कामरूपस्थे गिरौ। [illegible]।

कामगुण पु० [illegible]।

कामचर त्रि० कामेन चरति चर–ट ६त०। [illegible] "[illegible]"।

कामचार त्रि० [illegible] कामेन चारः चर+घञ्। [illegible]।

"[illegible]" [illegible]।

कामचारिन् त्रि० कामेन चरति चर–णिनि। [illegible]।

कामज त्रि० कामात् जायते जन–ड ६त०। [illegible] "[illegible]"। [illegible]।

कामजान पु० स्त्री० [illegible]।

कामजित् पु० कामं जयति जि–क्विप्। [illegible]।

कामठक पु० [illegible]।

"अमाठक कामठक सुषेणोमलयोऽव्यय" इति सर्पसत्र-नष्टघृतराष्ट्रकुलजनागनामकथने भा० आ० ५७ अ० ।

कामताल पु॰ स्त्री॰ कामं तालयति प्रतिष्ठापयति तल+प्रतिष्ठायां णिच्—अण् उप॰ स॰ । कोकिले त्रिका॰ । तस्य ध्वनिना कामोद्दीपकत्वात् तथात्वम् । स्त्रियां जातित्वात् ङीप् ।

कामतिथि पु॰ स्त्री॰ कामपूजार्था तत्स्वामिका या तिथि-स्त्रयोदशी तस्यां कामपूजादिका काममहशब्दे दर्शयिष्यते ।

कामद त्रि॰ कामान् ददाति दा—क । १अभीष्टदायके, २काम-धेनौ स्त्री मेदि॰ भक्तानां कामपूरके ३ परमेश्वरे पु॰ । कामं कामरूपं सौन्दर्य्यं द्यति दो अवखण्डने क । ४ कार्त्तिकेये । "कामजित् कामदः कान्तः" भा॰ व॰ २३१ अ॰ । कार्त्तिकेयनामकथने ।

कामदुघ त्रि॰ कामं दोग्धि दुह—क घादेशः । १अभीष्टसम्पाद-के "इन्द्रस्य कामदुघा स्थ कामान् धुग्ध्वम्" आश्व॰ श्रौ॰ ६, १२, ४ । "आराधय सपत्नीकः प्रीता कामदुघा हि सा" "अवेहि मां कामदुघां प्रसन्नाम्" रघु । २सुरभौ गवि स्त्री ।

कामदुह् त्रि॰ कामं दोग्धि दुह—क्विप् ६ त॰ । काम्यसम्पा-दके । "एष (यम) वस्त्विष्टकामधुक्" गीता । "तस्या च कामधुग्धेनुर्वसिष्ठस्य महात्मनः" भा॰ आ॰ १७५ । "यद्वयार्चितमतृपात्रे न्यस्तं (सुन्यन्नम्) कामधुगक्षयम्" । भाग॰ ७, १५, ५ । "एकः शब्दः सुप्रयुक्तः सम्यग् ज्ञातः स्वर्गे लोके कामधुग्भवति" श्रुतिः । क (कामदुहो-ऽप्यत्यार्थे) त्रि॰ तैरतैर्गुणैः कामदुहाथ भूत्वा नरं प्रदा-तारमुपैति सा गौः" भा॰ अ॰ १८६ अ॰ ।

कामदूती स्त्री कामस्य दूतीव उद्दीपकत्वात् । १नागदन्तीभेदे रत्नमा॰ । २पाटलावृक्षे शब्दर॰ । स्वार्थे कन् । तत्रार्थे ।

कामदेव पु॰ काम एव देवः । कन्दर्पे तस्य ध्येयरूपम् हेमा॰ दा॰ विष्णुधर्मो॰ उक्तं यथा । "कामदेवस्तु कर्त्तव्यः रूपेण प्रतिमो भुवि । चापबाणकरश्चैव मदाकुञ्चितलोचनः । रतिः प्रीतिस्तथा शक्तिर्भार्य्या चैवास्य चोज्ज्वला । चतस्रस्तस्य कर्त्तव्याः पत्न्यो रूपमनोहराः । चत्वारश्च करास्तस्य कार्य्या भार्य्यास्तनोपगाः । केतुश्च मकरः कार्य्यः पञ्चबाणमुखो-महानिति" । काम्यते मोक्षकाङ्क्षिभिः काम्यस्तथाभूतः सन् दीव्यति द्योतते । २ परमेश्वरे । "कामदेवः कामपालः कामी कान्तः कृतागमः" विष्णुस॰ । चक्रदत्तोक्ते ३ घृतभेदे तत्पाकादिप्रकारो यथा तत्रैव "अश्वस्य कोविदारस्य दृषस्य ककुभस्य च । शाल्मल्याः त्वक् पुष्पफलमध्ये पलचतुष्टयम् । अश्वगन्धा पलमिता तदर्द्धं गोक्षुरस्य च । शतावरी विदारी च शालपर्णी बला तथा । अश्वत्थस्य च शुङ्गानि पद्मबीजं पुनर्नवा । काश्मरी-फलमेतत् तु माषबीजं तथैव च । पृथग्दशपलान् भागांश्चतुर्द्रोणेऽम्भसः पचेत् । चतुर्भागावशेषन्तु कषाय-मवतारयेत् । मृद्वीका पद्मकं कुष्ठं पिप्पली रक्तचन्दनम् । बालकं नागपुष्पञ्च आत्मगुप्ताफलं तथा । नीलोत्पलं शारिवे द्वे जीवनीयं विशेषतः । पृथक्कर्षसमञ्चैव शर्क-राया पलद्वयम् । रसस्य पौण्ड्रकेक्षूणामाढकं तत्र दापयेत् । चतुर्गुणेन पयसा घृतप्रस्थं विपाचयेत् । रक्तपित्तं क्षतक्षीणं कामलां वातशोणितम् । हलीमकं तथा शोथं वर्णभेदं स्वरक्षयम् । अरोचकं मूत्रकृच्छ्रं पार्श्वशूलञ्च नाशयेत् । एतद्राज्ञां प्रयोक्तव्यं बह्वन्तःपुरचारिणाम् । स्त्रीणाञ्चैवानपत्यानां दुर्बलानाञ्च देहि-नाम् । क्लीवानामल्पशुक्राणां जीर्णानामल्परेतसाम् । श्रेष्ठं बलकरं हृद्यं वृष्यं पेयं रसायनम् । ओजस्तेज-स्करञ्चैव आयुःप्राणविवर्द्धनम् । सवर्द्धयति शुक्रञ्च पुरुषं दुर्बलेन्द्रियम् । सर्वरोगविनिर्मुक्तस्तोयसिक्तो यथा द्रुमः । कामदेव इति ख्यातं सर्वरोगेषु शस्यते" ।

कामधर पु॰ कामरूपस्थमत्स्यध्वजपर्वतस्थिते सरोवरभेदे कालि॰ ८१ अ॰ । तत्स्थानस्थाममाहात्म्यादिकम् । "मणिकूटाच्चरात् पूर्वे मत्स्यध्वजकुलाचलः । निर्दग्धो यत्र मदनो हरनेत्राग्निना पुरा । शरीरं प्राप्य तपसा समाराध्य वृषध्वजम् । तत्र प्राप्य स्वरूपन्तु काम-देवेन सेवितम् । अधित्यकायां तस्यां स शोभमानं सम-न्ततः । तदा ऽशाश्वतो नाम तत्रास्ते दक्षिणस्तथा । सरः कामधरो नाम तस्मिन् शैले व्यवस्थितः । आश्वि-न्यां विधिवत् स्नात्वा पीत्वा कामधराम्भसि । विमुक्त-पापः शुद्धात्मा शिवलोके महीयते" ।

कामधेनु स्त्री कामप्रतिपादिका धेनुः । १अभीष्टप्रतिपादि-कायां स्वर्गधेनाम् सुरभिसन्तानायां गोविशेषायाम्, २अन्यस्यां गवि च तस्या उत्पत्त्यादिकमुक्तं कालिकापु॰ ९१ अ॰ । "दक्षस्य तनया याऽभूत् सुरभिर्नाम नामतः । सर्वा माता महाभागा सर्वलोकोपकारिणी । तस्यान्तु तनया जज्ञे कश्यपात्तु प्रजापतेः । नाम्ना सा रोहिणी शुभ्रा सर्वकाम-दुघा नृणाम् । तस्याः सप्त मुरारेर्नाम तद्वारतितमोऽप्यसात (तस्याः सप्त शुने नेकं मुनेरतितमोऽप्यसात वा पाठः) कामधेनुरिति ख्याता सर्वलक्षणसंयुता । सा सिताङ्गी

सर्व्वरा यस्त्रपाणय । योनिदेशाच्च यवना शक्रद्देशाच्छका स्तथा । रोमकूपेषु म्लेच्छाश्च हारीताः सकिरातकाः । तैस्तन्निषूदितं सर्व्वं विश्वामित्रस्य तत्क्षणात् । सपदातिगजं साश्वं सरथं रघुनन्दन ! । दृष्ट्वा निषूदितं सैन्यं वशिष्ठेन महात्मना । विश्वामित्रसुतानान्तु शतं नानाविधायुधम् । अभ्यधावत् सुसंक्रुद्धं वशिष्ठं जपतां वरम् । हूङ्कारेणैव तान् सर्व्वान् निर्द्ददाह महानृषिः" ५५ स० । दानार्थकल्पिते स्वर्णादिनिर्म्मिते षोडशमहादानान्तर्गते दानीये ४ धेनुभेदे तत्प्रकारो यथा हेमा० दा० मत्स्य० पु० । "अथातः सम्प्रवक्ष्यामि कामधेनुविधिं परम् । सर्व्वकामप्रदं नृणां महापातकनाशनम् । लोकेशावाहनं तद्वद्धोमः कार्य्योऽधिवासनम् । तुलापुरुषवत् कुर्य्यात् कुण्डमण्डपवेदिकाः । स्वल्पेप्येकाग्निमत् कुर्य्यात् गुरुरेकः समाहितः" । कुण्डमण्डपवेदिका इत्युपलक्षणम् । इह हि देवकालग्रहित्रात्ह-शिवादिपूजा ब्राह्मणवाचनाचार्य्यर्त्विग्वरण-मधुपर्कदान-वेदिकोपरिचक्राल्लेखन-पञ्चवर्णवितानतोरण-पताकादि सर्व्वं मत्स्यपुराणोक्तं तुलापुरुषदानविहितं वेदितव्यम् ।

"काञ्चनस्यातिशुद्धस्य धेनुं वत्सञ्च कारयेत् । उत्तमा पलसाहस्रं तदर्द्धेन तु मध्यमा । कनीयसी तदर्द्धेन कामधेनुः प्रकीर्त्तिता । शक्तितस्त्रिपलादूर्द्ध्वमशक्तोऽपीह कारयेत्" । अत्र यद्यपि वत्सपरिमाणमनुक्तं तथापि कामधेनुविधानं स्वप्रकाञ्चनचतुर्थांशेन वत्सं कल्पनीयं, समस्तधेनुषु परिमितद्रव्यनिष्कृष्टवत्सनिर्माणक्लृप्तिदर्शनादिहापि धेनुदानत्वाविशेषात् तथैव निश्चीयते । यथा च गुडधेन्वादिषु "चतुर्थांशेन वत्सः स्यादिति" तत्र तत्र वक्ष्यते ।

"वेद्यां कृष्णाजिनं तस्य गुडप्रस्थसमन्वितम् । न्यसेदुपरि तां धेनुं महारत्नैरलङ्कृताम् । कुम्भाष्टकसमोपेतां नानाफलसमन्विताम्" ।

कल्पतरुदाने, प्रस्थो व्याख्यातः । 'महारत्नानि पद्मराग प्रभृतीनि, वत्सन्दत्ते तु विन्यसेदिति' क्वचित्पाठः, 'नाना फलानि गोगजवाजिस्त्रीपुरुषप्रभृतीनि, सौवर्णानि, कल्पतरुदानोक्तानि ।

"तथाष्टादशधान्यानि समन्तात् परिकल्पयेत् । इक्षुभागणैश्च तद्वन्नानाफलसमन्वितम् । भाजनं चासनं तद्वत् ताम्रदोहनकं तथा" ।

"कौषेयवस्त्रद्वयसम्प्रयुक्तां दीपातपत्राभरणाभिरामाम् । सचामरां कुण्डलिनीं सघण्टागणन्निकापादुकरौप्यपादाम् । रसैश्च सर्व्वैः परितोऽभिजुष्टां हरिद्रया पुष्पफलैरनेकैः । अजाजिकुस्तुम्बुरुशर्कराभिर्वितानकं चोपरि पञ्चवर्णम् । स्नातस्ततो मङ्गलवेदघोषैः प्रदक्षिणीकृत्य सपुष्पहस्तः । आवाहयेत्ताञ्च हि धेनुमन्त्रैर्द्विजाय दद्यादथ दर्भपाणिः" ।

सघण्टागणन्निकापादुकाभिः सह वर्त्तत इति सघण्टागणन्निकापादुका सा चासौ रौप्यपादा चेति विग्रहः । गणनासाधनत्वाद्गणन्निका, अक्षमाला गलन्निकेति क्वचित्पाठः । तत्र गलन्निका कण्ठभूषणमिति केचित्, केचित्तु गलन्तिकेति पठित्वा जलपूर्णा कर्करीति व्याचक्षते । रसाः परिभाषायामुक्ताः । अजाजिर्जीरकं, कुस्तुम्बुरु धान्यकम् । एवमुपकल्पितसम्भारः पूर्व्वेद्युरधिवासनं विधाय तदन्यदिवसे प्रातः कृतपुण्याहवाचनोऽग्निकुण्डेषु ऋत्विग्भिर्होमनादिपूर्णाहुतिपर्य्यन्तकर्म्मशेषसमाप्तिं कृत्वा सर्व्वौषधिजलस्नातः शुक्लमाल्याम्बरो गृहीतकुसुमाञ्जलिर्यजमानस्त्रिः प्रदक्षिणमावृत्य गुडधेनुमन्त्रैस्तामावाहयेत् । गुडधेनुमन्त्राः । 'या लक्ष्मीः सर्व्वभूतानाम्' इत्यादयः, तत्प्रकरणे द्रष्टव्याः । आवाहनानन्तरं वक्ष्यमाणमन्त्रेणामन्त्रयेत् । "त्वं सर्व्वदेवगणमन्दिरमङ्गभूता विश्वेश्वरत्रिपथगोदधिपर्व्वतानाम् । त्वद्दानशस्त्रशकलीकृतपातकौघः प्राप्तोऽस्मि निर्वृतिमतीव परां नमामि । लोके यथेप्सितफलार्थविधायिनीं त्वामासाद्य कोऽपि भवदुःखमुपैति मर्त्त्यः । संसारदुःखशमनाय यतस्व कामं त्वां कामधेनुरिति वेदविदो वदन्ति" । "आमन्त्र्य शीलकुलरूपगुणान्विताय विप्राय यः कनकधेनुमिमां प्रदद्यात् । प्राप्नोति धाम स पुरन्दरदेवजुष्टं, कन्यागणैः परिवृतः पदमिन्दुमौलेः ।" दानवाक्यमत्र तुलापुरुषोक्तमूहनीयम् । विप्रायैकस्मैव चैकाग्निविधानपक्षे, अनेकाग्निविधानपक्षे तु प्रकृतीभूततुलापुरुषदानवदाचार्य्यादीनां विभागव्यवस्था । तदनन्तरं पुण्याहवाचनवेदिस्थितदेवतापूजनविसर्जनानि कुर्य्यात् । दक्षिणाविचारश्च पूर्व्ववत् । मत्स्य पु० उक्तो विधिः ।

"व्यासउवाच । राजर्षिरेकामपि कामधेनुं दद्यात् सुहृद्भ्यस्तु केशव वा । विप्राय वै सर्व्वगुणोपपन्नां कृत्वा व्रतं लक्षणीयमेतु । सम्यक् प्रदत्तैस्तु गवां सहस्रैः सवत्सकैः सहितैश्च हेम्ना । कामेन फलं यल्लभते मनुष्यो न कामधेनोश्च समं हि लेभ्यः । शतैः सहस्रैश्च तथा हयानां सम्यक्प्रदत्तैश्च महाधिपानाम् । कन्यारथैर्वा करिवाजियुक्तैः शतैः सहस्रैः सतत हि लेभ्यः । दत्तैः फलैर्यल्लभते मनुष्यः, सम तथा स्यान्नतु कामधेनोः ।

[illegible]

कुर्य्यात् यथाविधि। समिधन्त्वाज्यभागेन पञ्चैवञ्चेव-माचरेत्। शिवपूजा प्रकर्त्तव्या लिङ्गं स्नाप्य इत्यादि-भिः। गामालभ्य च गायत्र्या विप्रेभ्यो दापयेच्च ताम्। दक्षिणा च प्रदातव्या त्रिंशन्निष्कं महामते"। गायत्र्या गोश्चाविलग्रासस्तोलमन्त्रेणेत्यर्थः, "गौश्चामिलेतिमन्त्रेण मन्त्रयीत विचक्षण" इति शातातपोक्तेः, कालिके तु "एतादौ पूजयेद् देवं षट्कलकदशादिभिः। गामाराध्य तु गायत्र्या विप्रेभ्यो दापयेच्च ताम्। आचार्य्यं पूजयेत् पूर्व्वं केयूरकटकादिभिः। वस्त्रयुग्मञ्च दत्त्वा तु विप्राय विधिपूर्व्वकम्। दक्षिणा तु प्रदातव्या त्रिंशन्निष्का महातप"। त्रिंशन्निष्कदक्षिणादानन्तु एकाग्निपक्ष-विषयम्, अनेकाग्निपक्षे तद्दापुरूपदक्षिणा। तदुक्तं शैवे। "अथैकाग्निविधानं वा समिदाज्य हविष्ययुक्। त्रिंशन्निष्कावरा देया गुरोरैकाग्निकल्पत" इति। एकाग्नि-पक्षस्य स्वल्पवित्तविषय। पूर्व्ववच्छेषमिति, शेषमनुक्तं किञ्चित् तदखिलं लिङ्गपुराणोक्तव्रतापुरूपविहितमाचरे-दित्यर्थः। कालोत्तरे "एतमास्तु प्रदाता यस्तेन दत्तं चराचरम्। त्रिसप्तकुलसंयुक्तो विमानैर्दिव्यपक्षिभिः। शिवलोकमवाप्नोति यावदिन्द्राश्चतुर्द्दश। तदन्ते चक्रवर्त्ती स्यात्, कामवास्तु शिवं व्रजेत्"। इति नानाशास्त्रीय-कामधेनुदानम्। वोपदेवधातुपाठव्याख्याने ५ ग्रन्थभेदे।

कामधेनुतन्त्र न० शिवनिर्मिते तन्त्रभेदे। [तन्त्रशब्दे दृश्या०।

कामध्वंसिन् पु० कामं ध्वंसयति ध्वन्स–णिच्–णिनि।

कामन त्रि० कम–णिङ्–ल्यु। १कामुके अम०। भावे ल्युट्। २अभिलाषे न०। युच् अभिलाषे स्त्री इला०। "तत्तु त्रितफलकस्यापि तत्तत्कामनासहकारेण प्रत्येकफलदा-त्वम्" इति विधिस्वरूपे गदाधरेणोक्तम्।

कामन्दकि न० कमन्दकस्यापत्यम्। ऋषिभेदे तेनैव नीति-शास्त्रं प्रणीतम्। तस्येदम् "इञश्च" पा० अण्। काम-न्दकीय तत्प्रणीतनीतिशास्त्रे न०।

कामन्धमिन् पु०स्त्री कामं यथेष्टं धमति ध्मा–णिनि वा० धमादेश। कांस्यकारे (कांसारि) सङ्कीर्णजातिभेदे जटा०। स्त्रियां ङीप्।

कामनीयक न० कमनीयस्य भावः "योपधाद्गुरूपोत्तमा-द्वुञ्" पा० वुञ्। रमणीयतायाम् "व्यलोकयत् कानन-कामनीयकम्" नैष० पाठान्तरम्।

कामप(त्नी)ति स्त्री कामं पतिर्यस्याः वपूर्व्वपात्त्वात् नान्ता-देश ङीप् च वा। कामदेवभार्य्यायां रत्यां शब्दरत्ना०।

कामपाल पु० कामान् पालयति पाल–अण् उप० स०। १बलदेवे अमरः। भक्तानां कामनाविषयस्य पालके २महादेवे कामस्य वा पालके च ३विष्णौ। "कामदा कामपालश्च कामी कान्तः कृतागमः" विष्णुस०।

कामपूर त्रि० कामं पूरयति पूर–णिच्–अण् उप० स०। १अभीष्टपूरके २परमेश्वरे पु०। "कामपूरोऽसावि ह नृणाम्" भाग० ७।२।२५।

कामप्र त्रि० कामं पिपर्त्ति पृ–पूरणे मूलवि० क उप०स०। १अभीष्टपूरके। "कामप्रेण मनसा चरन्तं" ऋ० १।१०८।२। क्रि०वि०। कामानि तदर्थं "भवत परि-वेष्टारो मरुत्तस्यावसन् गृहे। आविक्षितस्य कामप्रे विश्वे देवाः सभासद" ऐतरेयब्राह्मणम्।

कामप्रद त्रि० कामं प्रददाति प्र+दा+क उप०स०। १अभीष्टस्य प्रकर्षेण दातरि। २परमेश्वरे पु०। "कान्तः काम-प्रदः प्रभुः" विष्णुस०। कामं कामजरतिभेदं प्रददाति। "द्वौ पादौ स्कन्धगतौ त्रिधा लिङ्गं भगे तथा। कामयेत् कामुकः प्रीत्या बन्धः कामप्रदो हि सः" स्मरदी-पिकोक्ते ३रतिबन्धभेदे पु०।

कामप्रवेदन न० कामस्याभिलाषस्य प्रवेदनम् आविष्कर-णम्। स्वाभिप्रायप्रकाशने "कच्चित् कामप्रवेदने" अमरः। "कामप्रवेदनेऽकच्चिति" पा०।

कामप्रश्न पु० कामं यथेष्टम् प्रश्नः। यथेष्टप्रश्ने "तस्मै ह याज्ञवल्क्यो वरं ददौ स होवाच कामप्रश्नमेव"। शत०ब्रा० ११।६।२।१०। "कामप्रश्नं यथाकामं प्रश्नः" भा०। "याज्ञव-ल्क्यो वरं ददौ सह कामप्रश्नमेव" शत०ब्रा०१४,७,१,१,

कामप्रस्थ पु०न० कामस्य कामगिरेः प्रस्थः। कामगिरिसानौ तत्र "मालादीनाञ्च" पा० ह्रस्वपूर्व्वस्यापि प्रस्थशब्दे परे आद्युदात्तता। गहा० भवाद्यर्थे छ। कामप्रस्थीय तद्भवे त्रि०।

कामफल पु० कामं यथेष्टं फलमस्य। महाराजाम्रवृक्षे। राजनि०।

कामम् अव्य० कम–णिङ्–बा० अमु। १अनुमतौ, २प्रकामे, ३पर्य्याप्ते, ४असूयायाम्, ५अकामानुमतौ, ६स्वच्छ-न्दार्थे, ७अनिष्टस्यागत्या स्वीकारे च। अमरमेदिन्यादय।

काममह पु० ६त०। चैत्रमासे कर्त्तव्ये कामस्य महोत्-सवे तदाधारत्वात् २चैत्रपौर्णमास्यां स्त्री०।

काममहस्य चैत्रपौर्णमास्याकर्त्तव्यतोक्तिः प्रायिकी यत्ते-देवताभिप्राया वा, तिथितत्त्वे भविष्यु०"चैत्रशुक्लचतुर्दश्यां दमनं मदनात्मकम्। तस्यां संपूजयेत् कामं वीजयेद्व्यजनेन

कामरेखा स्त्री काम.नां कामव्यापाराणां रेखा पङ्क्तिर्यत्र सम्य र । क मस्य च -रालगुकार्यां वेश्यायाम् शब्दमा०

कामल त्रि० कम-कलच् । १ कामुके । आधारे कलच् । २ वसन्तकाले पु० कम्र लमव्यापकोऽसम्बो यत्र । ३ मरुदेशे च मेदिनी । ४रोगभेदे पु स्त्री मेदि० । तन्निदानादि । "पाण्डुरोगी च योऽत्यर्थं पित्तलानि निषेवते । तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते" निदानम् । "हारिद्रनेत्र सुभृश हारिद्रत्वङ्नखानन । रक्तपीतशकृन्मूत्रो भेकवर्णो हतेन्द्रिय । दाहाविपाक दौर्बल्यसदनारुचिकर्षित । कामला बहुपित्तैषा कोष्ठ शाखाश्रया मता । कालान्तरात् खरीभूता कृच्छ्रा स्यात् कुम्भकामला । तस्य लक्षणम् । तस्याश्रितलक्षण यथा । कृष्णपीतशकृन्मूत्रो भृश शूनश मानव । स रक्ताक्षिमुख च्छर्दि विण्मूत्रो यस्य ताम्यति । दाहारुचितृषानाह तन्द्रामोहसमन्वितः । नष्टाग्नि स्वासकायात्तो विड्भेदी कुम्भकामलो । छर्द्यरोचकहृल्लासज्वरक्लोमनिपीडित । नष्टाग्निश्च विनश्यति हि कामलावान् विपद्यते" माधव निदानम् । [लिङ्गे हेम० ।

कामलता स्त्री कामस्य लतेव तद्गुणभूयिष्ठत्वात् । पुंचिह्ने

कामलायन पु० कमलस्यापत्य नडादि० फक् । कमलापत्ये उपकोशाख्ये मुनौ । "उपकोसलोह वै कामलायन सत्यकामे जाबाले ब्रह्मचर्यमुवास" छा० उ० ।

कामलाली स्त्री काम यथेष्ट लाति आकर्षति ला—क ताहश मलि यस्या षच् समा० विग्रहात् ङीष् । आकर्षणकारके देवीमूर्त्तिभेदे" तन्त्रसा० आकर्षणप्रकरणे । 'ध्यानमात्रेण कामलालीमनु जपेत्" तन्मन्त्रस्तु तत्रैव दृश्य ।

कामलिका स्त्री कम्र अनव्यापमोऽसम्बन्धोऽस्त्यस्य ठन् । मद्यधान्ये शब्दचि० ।

कामलिन् पु० ब०व० । कमलेन वैशम्पायनान्तेवासिभेदेन प्रोक्तमधीयते णिनि । वैशम्पायनान्तेवासिभेदकमलर्षि प्रोक्ताध्यायिषु ।

कामवत् त्रि० कामोऽस्त्यस्य मतुप् मस्य व । १अभिलाषयुक्ते २मैथुनानुरागयुक्ते च स्त्रियां ङीप् "त्यागं कामवतीना हि स्त्रीणां सद्भिर्विगर्हितं" भा० आ० १८६श्लो० । ३दारुहरिद्रायां राजनि० ।

नियम्यनियामकव्यवस्थानुपपत्तेः तस्मादव्यवहितस्यापि एव
सामग्र्यास्तदा कार्यनियमोऽभ्युपेयः तथादर्शनादि-
त्येव मन्तव्यम् । तथा च समः समाधिः । तथापि कार्य-
जन्मकालस्य कोविशेषः । अन्यथा यद्विशेषान्तरं तदपि
विशेषान्तरतः कालस्य स्यादिति अपर्यवसानमेव पर्य-
वस्येत्, तद्भावात् स्वभावतः । तथापि तत्कालस्यानुगतं किं
रूपम्? इति चेत् रूपान्तरवतोऽपि किं रूपम्? इत्यपि
पर्यनुयोगस्यानुवृत्तेः । किञ्च "अनन्तर्भावितसत्त्वस्य कारणस्य
तदसत्त्वम् । नान्तर्भावितसत्त्वस्य चेत् कारणं तदसत्त्वतः" ।
तथाप्यन्तर्भूतसत्त्वस्य यदि कारणत्वं तदा सविशिष्टे स्वसत्त्व-
रूपतः साध्यत्वमापादयति । विशिष्टस्यार्थान्तरत्वेऽपि च
यस्मिन् सत्यसत्त्वव्यतिरेकवत् सविशिष्टे स्वसत्त्वव्यतिरेक-
नियमदर्शनात् न चैव सत्ता तस्मिन्निति अन्यसत्तया सत्ता-
विशिष्टस्याभ्युपगमे तामसविशेष्य कारणत्वमभ्युपगन्तु
सर्वथैव कारणमसत्त्वं वक्ष्यति । अपरापरसत्तानिवे-
शने चापर्यवसानमेव । न च सत्ताभेदादनन्यसत्त्वेनेत्यपि
पादयमानिका निरासाय, सत्ताभेदे हि वस्तुद्वयसंसारात्
गगनमिवस्थानमसिद्ध न घटगापि सत्ता न स्यादिति कस्य-
चिद्विनिष्टतो पूर्वमपि ते सहमिति कठतरम् । न च
तदुपपत्तौ पनमाय यत्नि, भिन्नामप्यनुगतबुद्ध्याद्यावान्-
परेऽभिनिवृत्ता तया जातिमात्राय जलाञ्जलिर्दत्तैव ।
मा भूदनुगतिः स्वदपतत्र्यैतिः च वदन् तद्धर्मिणो कार-
णता कथमनुगमयितासि? । किञ्च स्वरूपसत्त्व स्वरू-
पात् घटाद्यात्मनो नाधिकसत्तोऽपि स्वरूप स्वरूपमेव
न इष्यते घटादिर्न घटादि तथा सति घटादिर्धर्मिण्यपि न
स्यात् असतोऽघटादित्वात् । यत् तदपि सत्तामनन्त-
र्भाव्य कारणं, तदानीमसदपि तत्तदास्तु सत्तासत्त्वयोः
कारणकोट्यप्रवेशाविशेषात् । अथ न सत्ता कारण-
कोटिनिविष्टा किन्तु कारणत्वं यत्र नियतपूर्वसत्ता हि
कारणतासम्पत्तिरिति मन्यसे तर्हि सत्वसे सैव कारणतास्तु
तर्हि कारणसत्तामभ्युपगतवानसीति महत्यां प्रमाणमिति
चेत् भाषानवबोधात् सत्तामसतीमभ्युपगच्छतोऽपि सत्ता किं
त्वयाभ्युपगतैव? अन्यथा कार्यस्य नीतिस्त्वमपि किं सत्ता-
नन्तर्भाव्य कारणत्वमिच्छसि? नहि च, पूर्वसत् क्वापि
सत्तात्यागो वा असत्त्वस्य वा सर्वस्वापह्न स्यात् अपसाऽवि-
शेषात् । असत्त्वाविशेषे कारणनियमः कथं स्यात् इति चेत्
सत्ताविशेषेऽपि तुल्यत्वात् । सत्त्वेऽप्यन्वयाद्यविधानं तस्य
तज्जातीयस्य वा तत्पक्षे तदसत्त्वाविशेषात् व्यतिरेकं पर,
सोऽप्यनियतो यदा कारणाभावस्तदा कार्याभावस्यानभ्य-
भ्युपगमात् नित्यासत कारणस्यागन्तु एव कदाचित्कार्योत्-
पादात् अन्ययस्तु, न कदाचिदपीति चेत् तुल्यत्वात् ।
अन्ययोनास्तीत्यभ्युपगच्छतापि अन्वयोपगमात् । अन्वय-
स्यापि सत्तान्तर्भावे कथितदोषापत्तेः, एतेन "यागा-
मोदकप्रभ ये ये घोपार्जितमोदका । इत्यादीर्व्य विपा-
कादि तेषां तत्त्व भवन्ति" इत्यस्यापि बाधकत्वमागा-
मोदकायते । सत्तामनतीवान्तर्भाव्यार्थे मत्यादेर्भावात्
यागामोदकादिनापि च इत्यादीर्व्यविपाकादिजननात्
तदसत्त्वस्य कारणं स्यात्? इति चेत् सत्तामन्तर्भाव्य कार्य-
त्वोपगमे कारणत्वकालेऽपि उक्तदोषस्यानन्तर्भावे चाऽविशे-
षस्य पूर्ववदापत्तेः तथाह् "पूर्वसत्त्वस्य नियमे हेतुत्वे
संख्य एव नौ । हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा" ।
चार्वाक मतिवन्दिपदस्थ अथ पुनरस्तु कारणत्वमव-
धेयम्? प्राक्सत्त्वनियमस्य विशेषणस्याभ्युपगमादिति चेत्
इदमनुगतनियतं प्राक् सदिति बुद्ध्या विशेषात् । भ्रान्त्यैव-

[illegible] [१८८५ निर्दिष्ट

कारकदीपक न० [illegible]

कारकविभक्ति स्त्री० [illegible]

कारङ्कर त्रि० [illegible]

कारकुलीय [illegible]

कारज त्रि० [illegible]

कारण्ड पु० [illegible]

कारन् न० [illegible]

[illegible]

व्यभिचारशङ्का दुष्परिहरेति चेत् नैवं दोषः, विनापि कारणं कार्य्यमुत्पद्यतामित्येव शिङ्कायाः व्याघातावधिकतया निवृत्तत्वात्। तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने व्याघातादयो नावतरेयुः तदुक्तम् "व्याघातावधिराशङ्केति" तस्मात्तदुत्पत्तिनियमेन व्यभिचाराभावो निर्णीयते तदुत्पत्तिनिश्चयश्च कार्य्यहेत्वोः प्रत्यक्षोपलम्भानुपलम्भपञ्चकनिबन्धनः। कार्य्यस्योत्पत्तेः प्रागनुपलम्भः१ कारणोपलम्भे२ सति उपलम्भः ३ उपलब्धस्य पश्चात् कारणानुपलम्भात् ४ अनुपलम्भः ५ इति पञ्चकारण्या धूमधूमध्वजयोः कार्य्यकारणभावो निर्णीयते"।

कारणत्वञ्च नियतपूर्व्ववर्त्तित्वं तच्च कार्य्याव्यवहितप्राक्क्षणावच्छेदेन कार्य्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वमिति नैयायिका मन्यन्ते। तच्च सत्त्वगर्भं न वेति सन्देहे सत्त्वगर्भं श्रीहर्षखण्डने निराकृतं यथा

"ननु तदसत्ताविशेषात्तत्कार्य्यं स्यादन्यदापि प्रसङ्गः, न कार्य्यस्यादावसत्ताक्षणवदन्यदापि सामग्रीसत्ताऽविशेषात्तथापि किं नान्यदा कार्य्यजन्म?। अथ न मम तदानीन्तनसामग्रीसत्त्वं तदातनस्य कार्य्यजन्मनो नियामकं किन्तु तत्प्राक् सामग्रीसत्त्वं, तथादर्शनात्। तर्हि ममापि कालान्तरस्यापि तदसत्त्वं तदातनकार्य्यजन्मनो नियामकं, तथादर्शनादेव। मम तदव्यवहितोत्तरस्य तदा कार्य्यजन्मनियामकमिति चेत् न असमसमयत्वादागन्तुकत्वाद्यविशेषेण नियम्यनियामकव्यवस्थानुपपत्तेः तस्मादन्यदास्थाया एव सामग्र्यास्तदा कार्य्यनियमोऽभ्युपेयः तथादर्शनादित्येव मन्तव्यम्। तथा च समः समाधिः। तथापि कार्य्यजन्मकालस्य कोविशेषः। अन्यथा यद्विशेषान्तरं तदपि विशेषान्तरवत् कालस्य स्यादिति अपर्य्यवसानमेव पर्य्यवस्येत्, तत्काल इत्याकलय। तथापि तत्कालस्यानुगतं किं रूपम्? इति चेत् रूपान्तरवतोऽपि किं रूपम्? इत्यपि पर्य्यनुयोगस्यानुवृत्तेः। किञ्च "अन्तर्भावितसत्त्वञ्चेत्कारणं तदसत्ततः। नान्तर्भावितसत्त्वञ्चेत् कारणं तदसत्ततः"। तथाह्यन्तर्भूतसत्त्वं यदि कारणत्वं तदा स्वविशिष्टे स्ववृत्तित्वमेव आश्रयत्वमापादयति। विशिष्टस्यार्थान्तरत्वेऽपि च स्वस्मिन् स्ववृत्तिव्यतिरेकवत् स्वविशिष्टे स्ववृत्तिव्यतिरेकनियमदर्शनात् न सैव सत्ता तद्विशिष्टेति अन्यस्यास्तत्सा-विशिष्टवृत्त्यभ्युपगमे तामपरित्यज्य कारणत्वमभ्युपगन्तुं शक्यमेव कारणसत्त्वस्यावसति। अपरापरसत्ताभिषेकगमे चापर्य्यवसानमेव। न च सत्ताभेदानन्त्यमस्त्येवेत्यपि पादप्रसारिका निस्सारय, सत्ताभेदे हि सद्बुद्धिव्यवहारानुगमनिबन्धनलक्षणप्रथमापि सत्ता न स्यादिति सत्त्वबुद्धिमिच्छतो मूलमपि ते नष्टमिति कष्टतरम्। न च स्वरूपसत्तोपगमाय स्वस्ति, भिन्नामप्यनुगतमुद्राद्याधानपदेऽभिषिञ्चता त्वया जातिमात्राय जलाञ्जलिर्वितीर्णेति। मा भूदनुगतिः स्वरूपसत्त्वस्येति च वदन् तद्गर्भिणीं कारणतां कथमनुगमयितासि?। किञ्च स्वरूपसत्त्वं स्वरूपात् घटाद्यात्मनो नाधिकमसतोऽपि स्वरूपं स्वरूपमेव न त्यजत् घटादिर्न घटादि तथा सति घटादिर्न्यपि न स्यात् असतोऽघटादित्वात्। अथ सदपि सत्तामनन्तर्भाव्य कारणं, तदानीमसदपि तत्तथास्तु सत्त्वासत्त्वयोः कारणकोट्यप्रवेशाविशेषात्। अथ न सत्ताकारणकोटिनिविष्टा किन्तु कारणस्य सत्त्वं नियतपूर्व्वसत्ता हि कारणताप्यन्ये इति मन्यसे तर्हि मन्यसे सैव कारणतास्तु तर्हि कारणसत्तामभ्युपगतवानसीति यष्टकुट्या प्रभातमिति चेन्न भावानवबोधात् सत्तामसतोऽभ्युपगच्छताऽपि सत्ता किं मयाभ्युपगतैव? अन्यथा कालावसर्पीति त्वमपि किं सत्तान्तत्त्वतामन्तर्भाव्य कारणत्वमिच्छसि? नत्वेव, पूर्ववत् क्वापि सत्तात्यागो वा अनवस्थाया पर्य्यवसानं स्यात् असत्ताऽविशेषात्। असत्त्वाविशेषे कारणनियमः कथं स्यात् इति चेन्न सत्ताविशेषेऽपि तुल्यत्वात्। सत्त्वेऽप्यन्वयाद्यनुविधानं तस्य तज्जातीयस्य वा त्वत्पक्षे असत्त्वाविशेषात् व्यतिरेकः परं, सोऽप्यनियतो यदा कारणाभावस्तदा कार्य्याभावाभ्युपगमात् नित्यासत्कारणस्यासत्त्वस्य कदाचित्कार्य्योत्पादात् अन्वयस्तु न कदाचिदपीति चेन्न तुल्यत्वात्। अन्वयोनास्तीत्यभ्युपगच्छतापि अन्वयोपगमात्। अन्वयस्यापि सत्तान्तर्भावे कथितदोषापत्तेः, एतेन "आकाशमोदकाख्या ये ये चोपार्ज्जितमोदकाः। रसवीर्य्यविपाकादि तेषां तुल्यं प्रसज्यते" इत्यस्यापि बाधकत्वमाकाशमोदकायते। सत्तान्तर्भावानन्तर्भावाभ्यां प्रत्याख्यानात् आकाशमोदकादिनापि च रसवीर्य्यविपाकादिजननात् तदसत्कथं कार्य्यं स्यात्? इति चेन्न सत्तामन्तर्भाव्य कार्य्यत्वोपगमे कारणत्वकालेऽपि उक्तदोषस्यानन्तर्भावे वाऽविशेषस्य पूर्व्ववदापत्तेः तस्मात् "पूर्व्वसम्बन्धनियमे हेतुत्वे तुल्य एव नौ। हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा"। आस्तां प्रतिबन्दिप्रपञ्चः अथ पुनरसत् कारणमवधियम्? प्राक्सत्त्वनिगमस्य विशेषस्याभ्युपगमादिति चेन्न इदमनुगतनिरुक्तं प्राक् सदिति मुद्रा विशेषात्। भ्रान्त्यैव-

[illegible] । [illegible] [१८८४ [illegible]

कारकदीपक न [illegible]

कारकविभक्ति स्त्री [illegible] । कारक [illegible]

"[illegible]" [illegible] ।

कारक त्रि [illegible] । [illegible]

कारकुलीय [illegible]

[illegible] ।

कारण त्रि [illegible]

[illegible] ।

कारण न [illegible]

[illegible]

[illegible]

"[illegible]" ।

कारण न [illegible]

[illegible]

[illegible]

[illegible] ।

"[illegible]" [illegible] ।

[illegible]

[illegible]

[illegible] ।

[illegible]

"[illegible]" [illegible]

[illegible] ।

[illegible]

[illegible] ।

[illegible]

"[illegible]"

[illegible]

पारस्थय पूर्वम् [illegible] महात्मा [illegible] लिप्सया । तदेव । [illegible] भा० आ० २२३ । २२४ अ० । तत्र

"ततः कदाचित् कौन्तेयः [illegible] भारतर्षभ । [illegible] सुहृत्तानि [illegible] । [illegible] कौन्तेयस्य सह सत् तावत् । [illegible] [illegible] । [illegible] पीतवस्त्र [illegible] । पाण्डव [illegible] तत् । भारत [illegible] कौन्तेय [illegible] । [illegible] [illegible] [illegible] । [illegible] [illegible] । [illegible] । [illegible] । तत्र [illegible] । वैशम्पायन उवाच । तेषां [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । न समादाय कौन्तेय [illegible] । [illegible] । [illegible] कौऽर्जुनेन [illegible] । [illegible] । [illegible] दिव्यरूपा मनोरमा । [illegible] । [illegible] । [illegible] । [illegible] । कौन्तेय । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । तत [illegible] माधव [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] भारत । [illegible] । [illegible] । स च [illegible] मनो वीर । [illegible] । [illegible]

[illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । वैशम्पायन उवाच । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । क नु नाम? [illegible] । [illegible] । [illegible] भारत । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । [illegible] । वैशम्पायन उवाच । [illegible] । [illegible] ।

कारन्धम नृपम्" तत्रैव २५० । मरुत्तस्य कारन्धमिति विशेषणात् । तत्सन्देहस्य । ३नारीतीर्थभेदे म० तत्तीर्थप्रादुर्भावादि भा० आ० २१७ । १८अ० । यथा

"ततः समुद्रे तीर्थानि दक्षिणे भरतर्षभ । अभ्यगच्छत् सुपुण्यानि शोभितानि तपस्विभिः । वर्ज्जयन्ति स्म तीर्थानि पञ्च तत्र तु तापसाः । आचीर्णानि यान्यासन् पुरस्तात्तु तपस्विभिः । अगस्त्यतीर्थं सौभद्रं पौलोमञ्च सुपावनम् । कारन्धमं प्रसन्नञ्च हयमेधफलञ्च तत् । भारद्वाजस्य तीर्थन्तु पापप्रशमनं महत् । एतानि पञ्च तीर्थानि ददर्श कुरुसत्तमः । विविक्तान्युपलक्ष्याथ तानि तीर्थानि पाण्डवः । दृष्ट्वा च वर्ज्ज्यमानानि मुनिभिर्धर्म्मबुद्धिभिः । तपस्विनस्ततोऽपृच्छत् प्राञ्जलिः कुरुनन्दनः । तीर्थानीमानि वर्ज्ज्यन्ते किमर्थं ब्रह्मवादिभिः । तापसा ऊचुः । ग्राहाः पञ्च वसन्त्येषु हरन्ति च तपोधनान् । अत एतानि वर्ज्ज्यन्ते तीर्थानि कुरुनन्दन ॥ वैशम्पायन उवाच । तेषां श्रुत्वा महाबाहुर्वार्य्यमाणस्तपोधनैः । जगाम तानि तीर्थानि द्रष्टुं पुरुषसत्तम । ततः सौभद्रमासाद्य महर्षेस्तीर्थमुत्तमम् । विगाह्य सहसा शूरः स्नानं चक्रे परन्तप । अथ तं पुरुषव्याघ्रमन्तर्जलचरो महान् । जग्राह चरणे ग्राहः कुन्तीपुत्रं धनञ्जयम् । स तमादाय कौन्तेयो विस्फुरन्तं जलेचरम् । उदतिष्ठन्महाबाहुर्बलेन बलिनां वरः । उत्कृष्ट एव ग्राहस्तु सोऽर्ज्जुनेन यशस्विना । बभूव नारी कल्याणी सर्व्वाभरणभूषिता । दीप्यमाना श्रिया राजन् । दिव्यरूपा मनोरमा । तदद्भुतं महद्दृष्ट्वा कुन्तीपुत्रो धनञ्जयः । तां स्त्रियं परमप्रीत इदं वचनमब्रवीत् । का वै त्वमसि कल्याणि ! कुतो वासि जलेचरी । किमर्थञ्च महत् पापमिदं कृतवती पुरा ? । वर्गोवाच । अप्सरास्मि महाबाहो ! देवारण्यविहारिणी । इष्टा धनपतेर्नित्यं वर्गा नाम महाबल । । मम सख्यश्चतस्रोऽन्याः सर्व्वाः कामगमाः शुभाः । ताभिः सार्द्धं प्रयातास्मि लोकपालनिवेशनम् । ततः पश्यामहे सर्व्वा ब्राह्मणं संशितव्रतम् । रूपवन्तमधीयानमेकमेकान्तचारिणम् । तस्य वै तपसा राजंस्तद्वनं तेजसा वृतम् । आदित्य इव तं देशं कृत्स्नं सर्व्वं व्यकाशयत् । तस्य दृष्ट्वा तपस्तादृग्रूपञ्चाद्भुतमुत्तमम् । अवतीर्णाः स्म तं देशं तपोविघ्नचिकीर्षया । अहञ्च सौरभेयी च समीची बुद्बुदा लता । यौगपद्येन तं विप्रमभ्यगच्छाम भारत । । गायन्त्योऽथ हसन्त्यश्च लोभयन्त्यश्च तं द्विजम् । स च नास्मासु कृतवान् मनो वीर ! कथञ्चन । नाकम्पत महातेजाः स्थितस्तपसि निर्म्मले । सोऽशपत् कुपितोऽस्मांस्तु ब्राह्मणः क्षत्रियर्षभ ! । ग्राहभूता जले यूयं चरिष्यथ शतं समाः । । वर्गोवाच । ततो वयं प्रव्यथिताः सर्व्वा भारतसत्तम । । अयाम शरणं विप्रं तं तपोधनमच्युतम् । रूपेण वयसा चैव कन्दर्पेण च दर्पिताः । अयुक्तं कृतवत्यः स्म क्षन्तुमर्हसि नो द्विज ! । एष एव वधोऽस्माकं सुपर्य्याप्तस्तपोधन ! । यद्वयं संशितात्मानं प्रलोब्धुं त्वामिहागताः । अवध्यास्तु स्त्रियः सृष्टा मन्यन्ते धर्म्मचारिणः । तस्माद्धर्म्मेण वर्द्धस्व नास्मान् हिंसितुमर्हसि । सर्व्वभूतेषु धर्म्मज्ञ ! मैत्रो ब्राह्मण उच्यते । सत्यो भवतु कल्याण एष वादो मनीषिणाम् । शरणञ्च प्रपन्नानां शिष्टाः कुर्व्वन्ति पालनम् । शरणं त्वां प्रपन्नाः स्म तस्मात्त्वं क्षन्तुमर्हसि । वैशम्पायन उवाच । एवमुक्तः स धर्म्मात्मा ब्राह्मणः शुभकर्म्मकृत् । प्रसादं कृतवान् वीर ! रविसोमसमप्रभः । ब्राह्मण उवाच । शतं शतसहस्रन्तु सर्व्वमक्षय्यवाचकम् । परिमाणं शतं त्वेतन्नैतदक्षय्यवाचकम् । यदा च वो ग्राहभूता गृह्णन्तीः पुरुषान् जले । उत्कर्षति जलात्तस्मात् स्थलं पुरुषसत्तमः । तदा यूयं पुनः सर्व्वाः स्वं रूपं प्रतिपत्स्यथ । अनृतं नोक्तपूर्व्वं मे हसतापि कदाचन । तानि सर्व्वाणि तीर्थानि ततः प्रभृति चैव ह । नारीतीर्थानि नाम्नेह ख्यातिं यास्यन्ति सर्व्वशः । पुण्यानि च भविष्यन्ति पावनानि मनीषिणाम् । वर्गोवाच । ततोऽभिवाद्य तं विप्रं कृत्वा चापि प्रदक्षिणम् । अचिन्तयामापसृत्य तस्माद्देशात् सुदुःखिताः । क्व नु नाम ? वयं सर्व्वाः कालेनाल्पेन तं नरम् । समागच्छेम यो नस्तद्रूपमापादयेत् पुनः । ता वयं चिन्तयित्वैव मुहूर्त्तादिव भारत । । दृष्टवत्यो महाभागं देवर्षिमुत नारदम् । सम्प्रहृष्टाः स्म तं दृष्ट्वा देवर्षिममितद्युतिम् । अभिवाद्य च तं पार्थ ! स्थिताः स्मो व्रीडिताननाः । स नोऽपृच्छद्दुःखमूलमुक्तवत्यो वयञ्च तत् । श्रुत्वा तत्र यथावृत्तमिदं वचनमब्रवीत् । दक्षिणे सागरानूपे पञ्च तीर्थानि सन्ति वै । पुण्यानि रमणीयानि तानि गच्छत मा चिरम् । तत्राशु पुरुषव्याघ्रः पाण्डवेयो धनञ्जयः । मोक्षयिष्यति शुद्धात्मा दुःखादस्मान्न संशयः । तस्य सर्व्वा वयं वीर ! श्रुत्वा वाक्यमिहागताः । तदिदं सत्यमेवाद्य मोक्षिताहं त्वया कृतम् । एतास्तु मम ताः सख्यश्चतस्रोऽन्या जले स्थिताः । कुरु कर्म्म शुभं वीर ! एताः सर्व्वा विमोक्षय । वैशम्पायन उवाच । ततस्ताः पाण्डवश्रेष्ठः सर्व्वा एव विशाम्पते । । तस्माच्छापाददीनात्मा मोक्षयामास वीर्य्यवान् ।

कारन्धम नृपम्” तत्रैव २य० गदृत्तस्य कारन्धमभिति विशेषणात्। तस्येदमण्। २नारीतीर्थभेदे न० तत्तीर्थ-प्रादुर्भावादि भा० आ० २१०,१८अ०। यथा

“तत समुद्रे तीर्थानि दक्षिणे भरतर्षभः। अभ्यगच्छत् सुपुण्यानि शोभितानि तपस्विभिः। वर्ज्जयन्ति स्म तीर्थानि पञ्च तत्र तु तापसाः। आचीर्णानि तु यान्यासन् पुरस्तात्तु तपस्विभिः। अगस्त्यतीर्थं सौभद्रं पौलोमञ्च सुपावनम्। कारन्धमं प्रसन्नञ्च हयमेधफलञ्च तत्। भारद्वाजस्य तीर्थन्तु पापप्रशमनं महत्। एतानि पञ्च तीर्थानि ददर्श कुरुसत्तमः। विविक्तान्युपलक्ष्याथ तानि तीर्थानि पाण्डव। दृष्ट्वा च वर्ज्ज्यमानानि मुनिभिर्धर्म्मबुद्धिभिः। तपस्विनस्ततोऽपृच्छत् प्राञ्जलिः कुरुनन्दन। तीर्थानीमानि वर्ज्ज्यन्ते किमर्थं ब्रह्मवादिभिः। तापसा ऊचुः। ग्राहाः पञ्च वसन्त्येषु हरन्ति च तपोधनान्। अत एतानि वर्ज्ज्यन्ते तीर्थानि कुरुनन्दन॥ वैशम्पायन उवाच। तेषां श्रुत्वा महाबाहुर्वार्य्यमाणस्तपोधनैः। जगाम तानि तीर्थानि द्रष्टुं पुरुषसत्तमः। ततः सौभद्रमासाद्य महर्षेस्तीर्थमुत्तमम्। विगाह्य सहसा शूरः स्नानं चक्रे परन्तप। अथ तं पुरुषव्याघ्रमन्तर्जलचरो महान्। जग्राह चरणे ग्राहः कुन्तीपुत्रं धनञ्जयम्। स तमादाय कौन्तेयो विस्फुरन्तं जलेचरम्। उदतिष्ठन्महाबाहुर्बलेन बलिनां वरः। उत्कृष्ट एव ग्राहस्तु सोऽर्ज्जुनेन यशस्विना। बभूव नारी कल्याणी सर्व्वाभरणभूषिता। दीप्यमाना श्रिया राजन्! दिव्यरूपा मनोरमा। तदद्भुतं महद्दृष्ट्वा कुन्तीपुत्रो धनञ्जयः। तां स्त्रियं परमप्रीत इदं वचनमब्रवीत्। का वै त्वमसि कल्याणि! कुतो वासि जलेचरी। किमर्थञ्च महत् पापमिदं कृतवती पुरा?। नार्य्युवाच। अप्सरास्मि महाबाहो! देवारण्यविहारिणी। इष्टा धनपतेर्नित्यं वर्गा नाम महाबल!। मम सख्यश्चतस्रोऽन्याः सर्व्वाः कामगमाः शुभाः। ताभिः सार्द्धं प्रयातास्मि लोकपालनिवेशनम्। ततः पश्यामहे सर्व्वा ब्राह्मणं संशितव्रतम्। रूपवन्तमधीयानमेकमेकान्तचारिणम्। तस्य वै तपसा राजन् तद्वनं तेजसा वृतम्। आदित्य इव तं देशं कृत्स्नं सर्व्वं व्यकाशयत्। तस्य दृष्ट्वा तपस्तादृग् रूपञ्चाद्भुतमुत्तमम्। अवतीर्णाः स्म तं देशं तपोविघ्नचिकीर्षया। अहञ्च सौरभेयी च सामीची बुद्बुदा लता। यौगपद्येन तं विप्रमभ्यगच्छाम भारत!। गायन्त्योऽथ हसन्त्यश्च लोभयन्त्यश्च तं द्विजम्। स च नास्मासु कृतवान् मनो वीर! कथञ्चन। नाकम्पत महातेजाः स्थितस्तपसि निर्म्मले। सोऽशपत् कुपितोऽस्मांस्तु ब्राह्मणः क्षत्रियर्षभ!। ग्राहभूता जले यूयं चरिष्यथ शतं समाः॥ वर्गोवाच। ततो वयं प्रव्यथिताः सर्व्वा भरतसत्तम!। अयाम शरणं विप्रं तं तपोधनमच्युतम्। रूपेण वयसा चैव कन्दर्पेण च दर्पिताः। अयुक्तं कृतवत्यः स्म क्षन्तुमर्हसि नो द्विज!। एष एव वधोऽस्माकं सुपर्य्याप्तस्तपोधन!। यद्वयं संशितात्मानं प्रलोब्धुं त्वामिहागताः। अवध्यास्तु स्त्रियः सृष्टा मन्यन्ते धर्म्मचारिणः। तस्माद्धर्म्मेण धर्म्मज्ञ नास्मान् हिंसितुमर्हसि। सर्व्वभूतेषु धर्म्मज्ञ! मैत्रो ब्राह्मण उच्यते। सत्यो भवतु कल्याण एष वादो मनीषिणाम्। शरणञ्च प्रपन्नानां शिष्टाः कुर्व्वन्ति पालनम्। शरणं त्वां प्रपन्नाः स्म तस्मात्त्वं क्षन्तुमर्हसि। वैशम्पायन उवाच। एवमुक्तः स धर्म्मात्मा ब्राह्मणः शुभकर्म्मकृत्। प्रसादं कृतवान् वीर! रविसोमसमप्रभः। ब्राह्मण उवाच। शतं शतसहस्रन्तु सर्व्वमक्षय्यवाचकम्। परिमाणं शतं त्वेतन्नेदमक्षय्यवाचकम्। यदा च वो ग्राहभूता गृह्णन्तीः पुरुषान् जले। उत्कर्षति जलात्तस्मात् स्थले पुरुषसत्तमः। तदा यूयं पुनः सर्व्वाः स्वं रूपं प्रतिपत्स्यथ। अनृतं नोक्तपूर्व्वं मे हसतापि कदाचन। तानि सर्व्वाणि तीर्थानि ततः प्रभृति चैव ह। नारीतीर्थानि नाम्नेह ख्यातिं यास्यन्ति सर्व्वशः। पुण्यानि च भविष्यन्ति पावनानि मनीषिणाम्। वर्गोवाच। ततोऽभिवाद्य तं विप्रं कृत्वा चापि प्रदक्षिणम्। अचिन्तयामापसृत्य तस्माद्देशात् सुदुःखिताः। क्व नु नाम? वयं सर्व्वाः कालेनाल्पेन तं नरम्। समागच्छेम यो नस्तद्रूपमापादयेत् पुनः। ता वयं चिन्तयित्वैव मुहूर्त्तादिव भारत!। दृष्टवत्यो महाभागं देवर्षिमुत नारदम्। सम्प्रहृष्टाः स्म तं दृष्ट्वा देवर्षिममितद्युतिम्। अभिवाद्य च तं पार्थ! स्थिताः स्म व्रीडिताननाः। स नोऽपृच्छद्दुःखमूलमुक्तवत्यो वयञ्च तत्। श्रुत्वा तत्र यथावृत्तमिदं वचनमब्रवीत्। दक्षिणे सागरानूपे पञ्च तीर्थानि सन्ति वै। पुण्यानि रमणीयानि तानि गच्छत मा चिरम्। तत्राशु पुरुषव्याघ्रः पाण्डवेयो धनञ्जयः। मोक्षयिष्यति शुद्धात्मा दुःखादस्मान्न संशयः। तस्य सर्व्वा वयं वीर! श्रुत्वा वाक्यमिहागताः। तदिदं सत्यमेवाद्य मोक्षिताहं त्वया कृतम्। एतास्तु मम ताः सख्यश्चतस्रोऽन्या जले स्थिताः। कुरु कर्म्म शुभं वीर! एताः पापाद्विमोक्षय। वैशम्पायन उवाच। ततस्ताः पाण्डवश्रेष्ठः सर्व्वा एव विशाम्पते!। तस्माच्छापाददीनात्मा मोक्षयामास वीर्य्यवान्।

[illegible]

४ निरर्गलश्लोके कलान्तरेण मङ्गलप्रापकश्लोकभेदे । ५ गिलितस्वभावायाम् मेदि० । ६हस्तिभेदे (हद) रमानाथ ।

कारित स्त्री कृ-णिच्-कर्मणि क्त । १कारणाय गोरिते । "निश्च शरीरवध्यप्रमक्षणीयामपर च । कारितास्ते यतो ऽतस्त्वाम्" देवीमा० । २अधमर्णेन स्वकार्यसिद्धये नियतवृद्धेरङ्गीकृताधिकवृद्धौ स्त्री "वृद्धि सा कारिता नाम यस्मिं केन स्वय कृता" मिता० मा० वृहति । "ऋणिकेन तु या वृद्धिरधिका सम्प्रकीर्त्तिता । आपत्काले कृता नित्य सा तु स्यात् कारिता मता" कात्या० ।

कारी स्त्री कृ-हिंसायाम् इञ् स्त्रियां ङीप् । कण्टकारिवृक्षे राजनि० । तस्याः कण्टकावितत्वेन हिंसासाधनत्वात् रोगहिंसाकारकत्वाद्वा तथात्वम् ।

कारीर न० करीरस्यावयव कारड भवा वा पलाशा० अञ् । १करीरस्य काण्डे २तत्पुष्पफलादौ च ।

कारीरी स्त्री क जलस्ततः ईरयति ईर-णिच् कार सजलमेघमीरयति ईर-अण् उप० स० गौ० ङीप् । वर्षहेतौ इष्टिभेदे । "वर्षकामेष्टि कारीरी" "तस्यां सति त्व पाञ्चमध्वरमीडे अग्नि स्वरम नमोभिरिति धाय्या" आश्व० श्रौ० २।१३।१।१७ । "वर्षकामस्य कारीरी नाम इष्टि कार्या । तस्याम्-कारीर्याम् । अत्र मरुद्देवत्याया याज्यामात् अन्यदा इयमेव कारीरी एकदैवत्या भवति तस्यामपि साप्यायेत तस्यां पञ्चमिति" नारा० । आरब्धायां कारीर्यां कृतार्द्धायां वर्षणे सति सा समापनीया न वेति सन्देहे कात्या० श्रौ० १।२।२२ सू० निर्णीत यथा "इष्टे तत्परिसमापनम्" कृतार्द्धायामिष्टौ वर्षणे इष्टे सति तत्परिसमापनमेव कर्म कर्त्तव्य यतपरिसमाप्य महते वर्षणे क्रियते । न तु इष्टौ इष्टायां किमप्यनुष्ठानाद्र परित्याज्यमिति । न च वर्षणं तत्र तस्या इष्टेः फलं, किन्तु कालस्वभावात् प्रतिबन्धकापगमाच्च स्वय प्रवृत्तम् इत्याशय "स०व्या० । अतएव जैमिनिना ६,२,१२, कर्मणि आरब्धे फलेच्छाराहित्ये, कथञ्चित् फलप्राप्तौ च आरब्धस्य काम्यकर्मणः समाप्यत्वमुक्त यथा "प्रक्रमात्तु नियुज्येतारम्भस्य निमित्तत्वादिति" व्याख्यात चेद शबरस्वामिना यथा "प्रजाकामो यजेत, ग्रामकामो यजेत"-इत्येवमादि कर्म समाम्नायते । तत्र सन्देहः-किं प्रक्रान्त नियोगत समापनीयम्, उतेच्छया कार्यं चेय वा ?-इति कुतः ? एव प्राप्त ?-नियोगत परिसमापयितव्यम्-इति । कुत.? एव हि श्रूयते,-इदकामो यजेत-इति, एव

तस्य व्याख्यातार अर्थम् उपदिशन्ति, 'उपक्रमप्रभृति अपवर्गपर्यन्तम् याग'-इति उपक्रमादारभ्य यावत् परिसमाप्ति -इत्येतावान् व्यापारविशेष तस्य अर्थ, न यथा पाक स्याग -इति । तत्र हि पाकशब्दात्मात्र निर्दिश्यते न आरभ्य परिसमापयितव्यम् । एव च व्याख्यातार्थे लौकिका अपि प्रतिपद्यन्ते, तत्र न आरम्भे पुरुषप्रयत्न' चोद्यते-इति गम्यते । यतो चोदित न नियोगत आरभन्ते, नियोगत पुन परिसमापयन्ति, तेन नोभे आरम्भपरिसमाप्ती शब्दार्थ किन्तर्हि ?-परिसमाप्ति शब्दार्थ परिसमाप्त्या ऽर्थप्राप्तत्वात् आरम्भस्य । तस्मात् परिसमाप्ति शब्दार्थ. -इति गम्यते । सा चेत् शब्दार्थ , सा कर्त्तव्यतया चोद्यते, आरम्भे नास्ति कर्त्तव्यतावचन' तेन न नियोगत आरम्भ , नियोगतस्तु परिसमाप्ति. । तेन उपक्रान्ते कर्मणि यदि चोयात् फलेच्छा, अपाप्नोति वा फल, तस्यामप्यवस्थायां, कर्त्तव्यमेव उपक्रान्तस्य परिसमापनम् । ननु अधिको योऽर्थः सोऽत्र कर्त्तव्यतयोच्यते' । नैतदेव, वाक्यार्थो हि स भवति, यागस्य तु कर्त्तव्यता श्रुत्या गम्यते । तस्मात् ग्रामकामेण याग आरब्धः परिसमापनीय ग्रामादिकामनावचन निमित्तत्वेन तदा भवति निमित्ते, च उत्पन्ने यत् कर्त्तव्यम्-इत्युच्यते, तद्विनष्टेऽपि निमित्ते कर्त्तव्यम्, न हि तद्विनष्टम् असुत्पन्न भवति, उत्पन्नमेव निमित्त न भाव तस्मात् वीतायामपि फलेच्छायाम् उपक्रान्त परिसमापयितव्यम । क्रियाया हि निमित्तम् आरम्भ सोऽपि परिसमाप्ते " इति ।

कारीरीष्टि प्रशस्य श्रूयते च । "यदि वर्षेत्तावत्येव जुहुयात्" "कारीरीमनुइष्टिः" सि०कौ० ।

कारीष न० करीषाणां समूह अण् । शुष्कगोमयसमूहे ।

कारीषगन्धि त्रि० कारीषस्येव गन्धोऽस्य इत्समा० । शुष्कगोमयसगन्धयुक्ते स्त्रियां ष्यङ् चाप् । कारीषगन्ध्या तस्या तत्पुरुषे पुत्रपत्योः परयो समा० दीर्घश्च । कारीषगन्धीपुत्र कारीषगन्धीपति । एव परमकारीषगन्धीपुत्र । उपसर्ज्जने तु न, अतिकारीषगन्ध्यापति । बन्धुशब्दे परे तु बहुव्रीहौ तथा वा, कारीषगन्ध्याबन्धु कारीषगन्धीबन्धु । एव कौमुदगन्ध्याशब्दस्यापि संप्रसारणदीर्घौ ।

कारु त्रि० कृ-उण् । १शिल्पिनि । "इति स्म सा कारुतरेण लेखित नलस्य च स्वस्य च सख्यमीक्षते" नैष० । "कारुभिला तु कर्माणि कारु पञ्चाप्त पश्चयेत्" कूर्मपु०

[illegible] ।

कारम्भमिन् [illegible] ।

कारपथ पुं देशभेदे । [illegible] ।

कारम [illegible] ।

कारम् [illegible] ।

कारमिहिका [illegible] ।

कारया [illegible] ।

कारयितृ [illegible] ।

कारव [illegible] ।

कारवल्ली [illegible] ।

कारवी [illegible] ।

कारवीय [illegible] ।

कारवेल्ल [illegible] ।

कारस्कर [illegible] ।

कारस्करटिका [illegible] ।

कारा [illegible] ।

कारागार [illegible] ।

कारागुप्त [illegible] ।

कारापथ पुं देशभेदे । [illegible] ।

कारायिका [illegible] ।

कारावुनी [illegible] ।

कारि [illegible] ।

कारिका [illegible] ।

सुरामाविशति तथा च सति कारोत्तरात् चर्म्मणि सुरा पतति" सं॰व्या॰ । "तस्य लोमान्येव पुष्पाणि, त्वक् तोक्मानि, मांसं लाजा अस्थि कारोतरो मज्जा मासर एव परिस्रुन्नग्नहुँ लोहितं, रेत पय, मूत्र सुरोद्यम् मत्कसम्" शत॰ ब्रा॰ १२,९,१२ । एवं कारोत्तरशब्दस्य चालनीपरत्वे स्थिते सुरामण्डस्य तत्साध्यत्वात् तथात्वं बोध्यम् ।

कार्कश्य न॰ कर्कशस्य भाव ष्यञ् । कठोरत्वे "आश्लेष लोलुपवधूस्तनकार्कश्यसाक्षिणी" माघ ।

कार्कषि पु स्त्री कर्कं श्यति शो क—पृषो॰ साधु कर्कषः काठिन्यनाशक तस्यापत्यम् पक्षे इञ् तदपत्ये पक्षे वाकिन्या । वा फिञ् कुक् च । कार्कषकायनि तत्रार्थे पु स्त्री ।

कार्कीक त्रि॰ कर्कः शुक्लोऽश्व स इव ईकक् । श्वेताश्वतुल्ये ।

कार्ण पु स्त्री कर्णस्यापत्य विदा॰ अण् । १ कर्णापत्ये तस्येतो कर्णस्येदम् अण् । २ कर्णसम्बन्धिमलादौ त्रि॰ ।

कार्णायनि त्रि॰ कर्णेन निर्वृत्तादि कार्ण+कर्णा॰ चतुरर्थ्यां फिञ् । कर्णेन निर्वृत्तादौ । सुतङ्गमादिपाठात् पक्षे इञ् । कार्णिरप्यत्र त्रि॰ ।

कार्त्त त्रि॰ कृत कृत्प्रत्ययस्य व्याख्यानोग्रन्थ अण् । १ कृत्प्रत्ययव्याख्याने ग्रन्थे । कृतस्येदम् अण् । २कृतसम्बन्धिनि अस्य कौजपेन द्वन्द्वे कार्त्तकौजपा॰ पूर्वपदे प्रकृतिस्वर । कृतमेव स्वार्थे अण् । ३कृतयुगे "द्विद्वारच कार्त्तयुगप्रधाम" भा॰आ॰९॰अ॰ ।

कार्त्तकौजपादि पु॰ पाणिन्युक्ते द्वन्द्वे पूर्वपदे प्रकृतिस्वरनिमित्ते शब्दगणभेदे स च गण "कार्त्तकौजपौ सावर्णिमाण्डूकेयौ अवन्त्यश्मका पैलश्यापर्णेयाः कपिश्यापर्णेयाः शैतिकाक्षपाञ्चालेयाः कटुकवार्चलेयाः शाकलशुनकाः शाकलशणकाः शणकबाभ्रवाः आर्चाभिमौद्गलाः कुन्तिसुराष्ट्राः चिन्तिसुराष्ट्राः तण्डवतण्डाः अविमत्तकामविद्धाः बाभ्रवशालङ्कायनाः बाभ्रवदानच्युताः कठकालापाः कठकौथुमाः कौथुमलौकाक्षाः स्त्रीकुमारम् मौदपैप्पलादाः वत्सजरत् सौश्रुतपार्थिवाः जरामृत्यू याज्यानुवाक्ये" ।

कार्त्तवीर्य्य पु॰ कृतवीर्य्यस्यापत्यम् अण् । कृतवीर्य्यनृपापत्ये सहस्रबाहौ अर्जुने । "अर्जुनः कृतवीर्य्यस्य सप्तद्वीपेश्वरोऽभवत् । दत्तात्रेयाद्धरेरंशात् प्राप्तयोगमहागुणः । न नूनं कार्त्तवीर्य्यस्य गतिं यास्यन्ति पार्थिवाः । यज्ञदानतपोयोगैः श्रुतवीर्य्यदयादिभि" भाग॰९,२३,२७ । तत्कथादि अर्जुनशब्दे ३९६ पृ॰ उक्तप्रायमधिकं भा॰ आनु॰ १५२ अ॰ उक्तं यथा ।

"सहस्रभुजभृत् श्रीमान् कार्त्तवीर्य्योऽभवत् प्रभु । अस्य लोकस्य सर्व्वस्य माहिष्मत्यां महाबल । स तु रत्नाकरवतीं सद्वीपां सागराम्बराम् । शशास पृथिवीं सर्व्वां हैहयः सत्यविक्रम । स्ववित्तं तेन दत्तन्तु दत्तात्रेयाय कारणे । क्षत्रधर्म्मं पुरस्कृत्य विनयं श्रुतमेव च । आराधयामास च तं कृतवीर्य्यात्मजो मुनिम् । न्यमन्त्रयत सन्तुष्टो द्विजश्चैनं वरैस्त्रिभि । स वरैश्छन्दितस्तेन नृपो वचनमब्रवीत् । सहस्रबाहुर्भूयासं चमूमध्ये गृहेऽन्यथा । मम बाहुसहस्रन्तु पश्यन्तां सैनिका रणे । विक्रमेण महीं कृत्स्नां जयेयं संशितव्रत । तान्तु धर्म्मेण संप्राप्य पालयेयमतन्द्रित । चतुर्थं च वरं याचे त्वामहं द्विजसत्तम । तं ममानुग्रहकृते दातुमर्हस्यनिन्दित । अनुशासन्तु मां सन्तो मिथ्योद्वृत्तं त्वदाश्रयम् । इत्युक्तः स द्विज प्राह तथास्त्विति नराधिपम् । एवं समभवंस्तस्य वरास्ते दीप्ततेजस । ततः स रथमास्थाय ज्वलनार्कसमद्युतिम् । अब्रवीद्वीर्य्यसम्मोहात् कोऽस्ति सदृशो मम । धैर्य्ये वीर्य्ये यशः शौर्य्ये विक्रमेणौजसाऽपि वा । तद्वाक्यान्तेऽन्तरीक्षे वै वागुवाचाशरीरिणी । न त्वं मूढ विजानीषे ब्राह्मणं क्षत्रियाद्वरम् । सहितो ब्राह्मणेनेह क्षत्रिय शास्ति वै प्रजा । अर्ज्जुन उवाच । कुर्य्यां भूतानि तुष्टोऽहं क्रुद्धो नाशं तथा नये । कर्म्मणा मनसा वाचा न मत्तोऽस्ति वरो द्विजः । पूर्व्वो ब्रह्मोत्तरो वादो द्वितीयः क्षत्रियोत्तर । त्वयोक्तौ हेतुयुक्तौ तौ अथ तु ब्राह्मणो वर । यद्यभूतप्रधानांस्तान् भैक्षजीवनहं सदा । आत्मसम्भावितान् विप्रान् स्थापयाम्यात्मनो वशे । कथितं ह्यनया सत्यं गायत्र्या कन्यया दिवि । विजेष्याम्यवशान् सर्व्वान् ब्राह्मणांश्चर्म्मवाससः । न च मां च्यावयेद्राष्ट्रात् त्रिषु लोकेषु कश्चन । देवो वा मानुषो वापि तस्माज्ज्येष्ठो द्विजादहम् । अद्य ब्रह्मोत्तरं लोकं करिष्ये क्षत्रियोत्तरम् । न हि मे संयुगे कश्चित् सोढुमुत्सहते बलम् । अर्जुनस्य वचः श्रुत्वा वित्रस्ताऽभून्निशाचरी । अथैनमन्तरिक्षस्थस्ततो वायुरभाषत । त्यजैनं कलुषं भावं ब्राह्मणेभ्यो नमस्कुरु । एतेषां कुर्व्वतः पापं राष्ट्रक्षोभो भविष्यति । अथ वा त्वां महीपाल! शमयिष्यन्ति वै द्विजाः । निरसिष्यन्ति ते राष्ट्राद्धतोत्साहं महाबला । तं राजा कस्त्वमित्याह ततस्तं प्राह मारुतः । वायुर्वै देवदूतोऽस्मि हितं त्वां प्रब्रवीम्यहम् । अर्ज्जुन उवाच । अहो त्वयाऽद्य विप्रेषु भक्तिरागं प्रदर्शितं । यादृशं पृथिवीभूतं तादृशं ब्रूहि वै द्विजम् । वायोर्वा सदृशं किञ्चिद्ब्रूहि त्वं ब्राह्मणोत्त-

सुरामधिकृत्य तथा च मति कारोत्तरात् अम्रंपि सुरा पतति" स०व्या०। "तस्य सोमान्धेर्दुग्धानि, तक्रं तोक्मानि, मासं लाजा अस्मि कारोत्तरो मज्जा मासर रस परिस्रुतनग्नसौहित, देहः पय, सूनं सुरोवध्यम् पक्कसम्" यजु० मा० १२,८,१२। एव कारोत्तरशब्दस्य चालनीपरत्वे स्थिते सुरामण्डस्य तत्साध्यत्वात् तथात्वं बोध्यम्।

कार्कश्य न० कर्कशस्य भाव ष्यञ्। कठोरत्वे "आश्लेष लोलुपवधूस्तनकार्कश्यसाक्षिणी" माघ।

कार्कायणि पुंस्त्री अर्कं करोति सो व—पृषो० परम् अर्कम् काठिन्य मायक तस्यापत्यम् पचे इञ् तदपत्ये पक्षे याफिञा। वा फिञ् कुक् च। कार्कायणायनि तदर्थे पुंस्त्री।

कार्कीक त्रि० कर्क शक्रोऽस्य स इत ईकक्। श्वेताश्वयुक्ते।

कार्ण पुंस्त्री कर्णस्यापत्य शिवा० अण्। १कर्णापत्ये वृषकेतौ कर्णस्येदम् अण्। २श्रवणवन्धिमलादौ त्रि०।

कार्णायनि त्रि० कर्णेन निर्वृत्तादि कर्ण+कर्णा० चतुरर्थ्यां फिञ्। कर्णेन निर्वृत्तादौ। सुतङ्गमादिपाठात् पक्षे इञ्। कार्णिरप्यत्र त्रि०।

कार्त्त त्रि० कृत कृत्प्रत्ययस्य व्याख्यानोऽयम् अण्। १कृत्प्रत्ययव्याख्याने ग्रन्थे। कृतस्येदम् अण्। २कृतगन्धर्विमिथस्य कौजपेन द्वन्द्वे कार्त्तकौजपा० पूर्वपदे प्रकृतिस्वरः। कृतमेव स्वार्थे अण्। ३कृतयुगे "त्रिद्वारश्च कार्त्तयुगप्रधान" भा०आ०८०अ०।

कार्त्तकौजपादि पु० पाणिन्युक्ते द्वन्द्वे पूर्वपदे प्रकृतिस्वरनिमित्ते शब्दगणभेदे स च गण "कार्त्तकौजपौ सावर्णिमाण्डूकेयौ अवन्त्यश्मकाः पैलश्यापर्णेयाः कपिश्यापर्णेयाः शैतिकाक्षपाञ्चालेयाः कटुकवार्चलेयाः शाकलशुनकाः शाकलशणकाः शणकबाभ्रवाः आर्चाभिमौद्गलाः कुन्तिसुराष्ट्राः चिन्तिसुराष्ट्राः तण्डवतण्डाः अविमत्तकामविद्धाः बाभ्रवशालङ्कायनाः बाभ्रवदानच्युताः कठकालापाः कठकौथुमाः कौथुमलौकाक्षाः स्त्रीकुमारम् मौदपैप्पलादाः वत्सजरत् सौश्रुतपार्थिवाः जरामृत्यू याज्यानुवाक्ये"।

कार्त्तवीर्य्य पु० कृतवीर्य्यस्यापत्यम् अण्। कृतवीर्य्यस्यापत्ये सहस्रबाहौ अर्जुने। "अर्जुनः कृतवीर्य्यस्य सप्तद्वीपेश्वरोऽभवत्। दत्तात्रेयाद्धरेरंशात् प्राप्तयोगमहागुणः। न नूनं कार्त्तवीर्य्यस्य गतिं यास्यन्ति पार्थिवाः। यज्ञदानतपोयोगैः श्रुतवीर्य्यदयादिभिः" भाग० ९,२३,२७। तत्कथादि अर्जुनशब्दे ३९६पृ० उक्तमायशाधिक भा०आनु०१५२अ० उक्तं यथा।

"सहस्रभुजभृत् श्रीमान् कार्त्तवीर्य्योऽभवत् प्रभुः। अस्य लोकस्य सर्व्वस्य माहिष्मत्यां महाबलः। स तु रत्नाकरवतीं सद्वीपां सागराम्बराम्। शशास पृथिवीं सर्व्वां हैहयः सत्यविक्रमः। स्ववित्तं येन दत्तन्तु दत्तात्रेयाय कारणे। क्षत्रधर्म्मं पुरस्कृत्य विनयं श्रुतमेव च। आराधयामास च तं कृतवीर्य्यात्मजो मुनिम्। न्यमन्त्रयत संतुष्टो द्विजश्चैनं वरैस्त्रिभिः। स वरैश्छन्दितस्तेन नृपो वचनमब्रवीत्। सहस्रबाहुर्भूयाञ्च चमूमध्ये गृहेऽन्यथा। मम बाहुसहस्रन्तु पश्यन्तां सैनिका रणे। विक्रमेण महीं कृत्स्नां जयेयं संशितव्रत!। तां च धर्म्मेण संप्राप्य पालयेयमतन्द्रितः। चतुर्थं तु वरं याचे त्वामहं द्विजसत्तम। तं ममानुग्रहकृते दातुमर्हस्यनिन्दित!। अनुशासन्तु मां सन्तो मिथ्योद्वृत्तं त्वदाश्रयम्। इत्युक्तः स द्विजः प्राह तथास्त्विति नराधिपम्। एवं समभवंस्तस्य वरास्ते दीप्ततेजसः। ततः स रथमास्थाय ज्वलनार्कसमद्युतिम्। अब्रवीद्वीर्य्यसंमोहात् कोऽन्वस्ति सदृशो मम। धैर्य्ये वीर्य्ये यशः शौर्य्ये विक्रमेणौजसाऽपि वा। तद्वाक्यान्तेऽन्तरीक्षे वै वागुवाचाशरीरिणी। न त्वं मूढ! विजानीषे ब्राह्मणं क्षत्रियाद्वरम्। सहितो ब्राह्मणेनेह क्षत्रियः शास्ति वै प्रजाः। अर्जुन उवाच। कुर्य्यां भूतानि तुष्टोऽहं क्रुद्धो नाशं तथा नये। कर्म्मणा मनसा वाचा न मत्तोऽस्ति वरो द्विजः। पूर्व्वो ब्रह्मोत्तरो वादो द्वितीयः क्षत्रियोत्तरः। त्वयोक्तौ हेतुयुक्तौ तौ अथ तु ब्राह्मणो वरः। सर्व्वभूतप्रधानाञ्च्यान् भैक्षवृत्तीनहं सदा। आत्मसम्भावितान् विप्रान् स्थापयाम्यात्मनो वशे। कथितं त्वनया सत्यं गायत्र्या कन्यया दिवि। विजेष्याम्यवशान् सर्व्वान् ब्राह्मणांश्चर्म्मवाससः। न च मां च्यावयेद्राष्ट्रात् त्रिषु लोकेषु कश्चन। देवो वा मानुषो वापि तस्माज्ज्येष्ठो द्विजादहम्। अद्य ब्रह्मोत्तरं लोकं करिष्ये क्षत्रियोत्तरम्। न हि मे संयुगे कश्चित्सोढुमुत्सहते बलम्। अर्जुनस्य वचः श्रुत्वा वित्रस्ताऽभून्निशाचरी। अथैनमन्तरिक्षस्थस्ततो वायुरभाषत। त्यजैनं कलुषं भावं ब्राह्मणेभ्यो नमस्कुरु। एतेषां कुर्व्वतः पापं राष्ट्रक्षोभो भविष्यति। अथ वा त्वां महीपाल! शमयिष्यन्ति वै द्विजाः। निरसिष्यन्ति ते राष्ट्राद्धतोत्साहं महाबलाः। तं राजा कस्त्वमित्याह ततस्तं प्राह मारुतः। वायुर्वै देवदूतोऽस्मि हितं त्वां प्रब्रवीम्यहम्। अर्जुन उवाच। अहो त्वयाऽद्य विप्रेषु भक्तिरागः प्रदर्शितः। यादृशं पृथिवीभूतं तादृशं ब्रूहि वै द्विजम्। वाय्वग्निसदृशं किञ्चिद्ब्रूहि त्वं ब्राह्मणोत्त-

[illegible]

कार्त्तवीर्य्यदीप [illegible]

[illegible]

[illegible]

र्पित तत्र दत्तम् । मन्त्रमहोदधौ १७तरङ्गे ।
कार्त्तवीर्यमन्त्रादिकमुक्त्वा विशेषो दर्शितो यथा
“अथ दीपविधिं वक्ष्ये कार्त्तवीर्यप्रियङ्करम् । वैशाखे श्रावणे
मार्गे कार्त्तिकाश्विनपौषतः । माघफाल्गुनयोर्वापि दीप-
प्रारम्भमाचरेत् । तिथौ रिक्ताविहीनायां वारे मन्द-
कुजौ विना । हस्तोत्तराश्विरौद्रेषु पुष्यवैष्णववा-
युभेषु । द्विदैवते च रोहिण्यां दीपारम्भो हिताधि-
काम् । चरे १७ अतीपात एवो धृतौ शुभकर्मणि । सौम्यौ
ऽर्के च सौम्ये शोभनाद्युत्तरोत्तरम् । करणे विष्टिरहिते
ग्रहणेऽर्द्धोदयादिषु । योगेषु व्यस्तो पूर्वाह्णे दीपारम्भ-
णं शुभम् । कार्त्तिके शुक्लपक्षस्य निशीथेऽतीव शोभनम् ।
यदि तत्र रवेर्योगः श्रवणं तत्र दुर्लभम् । अस्मिन्नावश्य-
कार्येषु मासादीनां न शोधनम् । चान्द्रे स्वर्गोप नियतो
ब्रह्मचारी भवेत् सदा । मन्त्र ज्ञात्वा शुद्धभूमौ विधाय
गोमयोदकैः । प्राणानायम्य सङ्कल्प्य न्यासान् पूर्वोदितां-
श्चरेत् । षट्कोणं रचयेद्भूमौ रक्तचन्दनतण्डुलैः ।
मध्ये घट (क्रौं) समालिख्य षट्कोणेषु समालिखेत् ।
मन्त्रराजस्य षड्वर्णान् कामबीजविदर्भितान् । बहिर्वि-
षट् वर्णं चास्य भूपाद्यालापा भवेदिति । सर्वाङ्गे-
ऽष्टदिक्षु त्रिकोणं तद्बहिः शुभम् । एवं विलिखिते यन्त्रे
निदध्याद्दीपभाजनम् । स्वर्णजं राजतं वा ताम्रजं
तदभावतः । कांस्यपात्रं मृण्मयञ्च कनिष्ठं लौहजं स्मृतौ ।
शान्तये मुद्गपूर्णञ्च मध्ये गोधूमपूर्णकम् । शुभदं
समाशं तु पात्रं कुर्यात् प्रयत्नतः । वर्णं दिग्ध्रुवघट
पञ्चषट्त्रामाद्युर्वैश्यतम् । भाज्ये पलसहस्रे तु पात्रं
शतपलं स्मृतम् । भाज्येऽयुतपले पात्रं पलपञ्चमतो
मतम् । पञ्चसहस्रपले तु पात्रं पदिपलं मतम् ।
त्रिसहस्रोऽस्तपले शताङ्कं १०५ पलमानकम् । द्वि-
सहस्रौ शरविंश ११५ शताङ्गे विजता मितम् । शते
ऽष्टिशरं ५५ सल्यातमेवमन्यत कल्पयेत् । नित्यदीपे
वह्निपलं पात्रमानं स्मृतं पलम् । एवं पात्रं प्रति-
ष्ठाप्य वर्त्तीः सूत्रोत्थिताः क्षिपेत् । एका तिस्रोऽथ वा
पञ्च सप्ताद्या विषमाप्यपि । तिथि १५माद्या ऽसहस्रं
अन्तु तन्तुसंख्या विनिर्मिता । गोघृतं प्रक्षिपेत्तत्र
शुद्धवस्त्रविशोधितम् । सहस्रपलसंख्याद्य दशांशं
कार्य्यगौरवात् । स्वर्णादिकृतां रम्यां शलाकां षोडशा-
ङ्गुलाम् । तदर्द्धां वा तदर्द्धां वा स्वल्पाग्रां स्थूल-
मूलिकाम् । विधत्रे दक्षिणे भागे पात्रमध्ये कृताग्रकाम् ।
वामाद्दक्षिणदिग्भागे शलाकाग्रं प्रसारयेत् । अधोऽग्रा
दक्षिणाधारा निजनैव्यर्थिका शुभाम् । दीपं प्रज्वा-
लयेत्तत्र गणेशस्मृतिपूर्वकम् । दीपात् पूर्वत्र दि-
ग्भागे सर्वतोभद्रमण्डले । तण्डुलाष्टदले वापि
विधिवत् स्थापयेद्घटम् । तत्रावाह्य नृपाधीशं पञ्चोप-
चारैः पूजयेत् सुधीः । मासानाम प्रमादाय दीपं सङ्कल्प-
येत ततः । दीपसङ्कल्पमन्त्रोऽयं कथ्यते दीपं ५०
प्रमितं” । तत्सङ्कल्पादिकमुक्त्वा मासविधिर्दर्शितो यथा
‘एवं दीपप्रदानस्य कर्त्तव्योऽयं विधिः स्मृतः । दीपप्रबोध-
काले तु वर्ज्जयेदशुभागिरम् । विप्रस्य दर्शनं तत्र
शुभदं परिकीर्त्तितम् । शूद्राणां मध्यमं प्रोक्तं म्लेच्छस्य
वधबन्धनम् । आखोर्मार्जारदर्शने दुःखं गवाश्वस्य सुखावहम् ।
दीपज्वाला यदा सिद्धा तदा मानविधायिनी । कृते दीपे
यदा पात्रभङ्गो दृश्येत दैवतः । पक्षाद्वर्वाक् तदा नष्टो
यजमानोऽपि मानवः । वर्त्यन्तरं यदा कुर्यात् कार्य्यं विघ्ने
विनश्यति । नेत्रहीनो भवेत् कर्त्ता तस्मिन् दीपान्तरे
कृते । अशुचिस्पर्शने व्याधिर्दीपनाशे तु चौरतः ।
श्वमार्जारादिसंस्पर्शे भवेद्भूपतितो भयम् । दारारम्भे
पक्षपन्ने कृतोद्दीपोऽभिरक्षितः । तथा दीपं प्रयत्नेन
रक्षणीयोऽन्तरायतः । आ समाप्ते पठ्यन्ते ब्रह्मचर्यं च
भूशय । स्त्रीशूद्रपतितादीनां सम्भाषामपि वर्ज्जयेत् ।
जपेत् सहस्रं प्रत्यहं मन्त्रराजं समाहितः । स्तोत्र-
पाठं प्रतिदिनं निशीथिन्यां विशेषतः । एकपादेन
दीपाग्रे स्थित्वा यो मन्त्रनायकम् । सहस्रं प्रजपेद्रात्रौ
सोऽभीष्टं क्षिप्रमाप्नुयात् । समाप्य शोभने पक्षे सभोज्य
द्विजनायकान् । कुम्भोदकेन कर्त्तारमभिषिञ्चेन्मनुं स्मरन् ।
कर्त्ता तु दक्षिणां दद्यात् गुरवे तोषहेतवे । गुरौ तुष्टे
ददातीष्टं कार्त्तवीर्य्यो नृपोत्तमः । गुर्वाज्ञया स्वयं कुर्य्याद्विप्रैर्
वा कारयेद्द्विजम् । यथा दत्तादिदानेन दीपदानं धरा-
पतेः । गुर्वाज्ञामन्तरा कुर्यात् दीपं खेटसिद्धये ।
प्रत्युतानुभवत्येव हानिमेव पदे पदे । दीपदानविधि
ब्रूयात् क्षमादिषु यो गुरुः । दुष्टेभ्यः कथितो मन्त्रो वक्तु-
र्दुःखावहो भवेत् । उत्तमं गोघृतं प्रोक्तं मध्यमं महि-
षीभवम् । तिलतैलन्तु तादृक् स्यात् कनीयोऽजादिजं
घृतम् । अक्षिरोगे सुगन्धेन दद्यात्तैलेन दीपकम् ।
विद्वेषार्थसम्भवेनाथ दिपता नागसिद्धये । सहस्रेण पल-
दीपे विहिते वेद दृश्यते । कार्य्यसिद्धिस्तदा कुर्य्याद्गुरुसार-
दीपक विधिम् । तदा सुदुर्लभं कार्य्यं सिध्यत्येव न

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

कार्त्तिके मासभक्षणात्' पद्म पु० "शेते विष्णुः सदाषाढे भाद्रे च परिवर्त्तते। कार्त्तिके परिबुध्येत शुक्लपक्षे हरेर्दिने" मत्स्यपु०। तत्र "नानार्थशब्दानामेकत्र शक्तिरन्यत्र लक्षणेति सिद्धान्तात् चान्द्रे मुख्यत्वम्, सौरे गौणत्वमिति रघु०। उभयत्र शक्तिरिति कालमाधवीये स्थितम्। मासशब्दे विवृतिः। एवं मार्गादीनां चान्द्रसौरलक्षणमूह्यम्। २कृत्तिकानक्षत्रयुक्तपौर्णमासीघटिते पर्द्धमासात्मके तत्पक्षे च। "नक्षत्रेण युक्तः कालः" "साऽस्मिन् पौर्णमासीति संज्ञायाम्" पा० व्या० जयादित्येन अस्मिन्निति दशरात्रादिव्यावृत्त्यर्थं मासार्द्धमाससम्वत्सराणामिव सञ्ज्ञेति व्याख्याय उदाहृतं पौषो मासः पौषोऽर्द्धमासः पौषः संवत्सर इति"। गुरौ कृत्तिकारोहिण्योरन्यतरनक्षत्रे च पर्यन्तियोगे गुरोरस्तोदयोपलक्षिते ४वर्षे च यथोक्तं सू० सि० रङ्गनाथाभ्याम् "अथ प्रसङ्गात् कार्तिकादिबृहस्पतिवर्षाण्याह" रङ्ग०। "वैशाखादिषु कृष्णे च योगः पञ्चदशे तिथौ। कार्तिकादीनि वर्षाणि गुरोरस्तोदयात्तथा" सू० सि०।

"यथा पौर्णमास्यां नक्षत्रसम्बन्धेन तत्तन्नामा मासो भवति। तथेति समुच्चयार्थकम्। बृहस्पतेः सूर्यसान्निध्यदूरत्वाभ्यामस्तादुदयाद्वा वैशाखादिषु द्वादशसु मासेषु कृष्णपक्षे पञ्चदशे तिथावमायामित्यर्थः। चकारः पौर्णमासीसम्बन्धसमुच्चयार्थकः। योगे उक्तनक्षत्रसम्बन्धे कार्तिकादीनि द्वादश वर्षाणि भवन्ति। वैशाखकृष्णपक्षीयामायां बृहस्पतेरस्ते उदये वा जाते सति तदादि बृहस्पतिवर्षं कृत्तिकादिनक्षत्रसम्बन्धात् कार्तिकसञ्ज्ञम्। एवं ज्यैष्ठाषाढश्रावणभाद्रपदाश्विनमार्गशीर्षपौषमाघफाल्गुनचैत्रमासादिषु मृगपुष्यमघापूर्वफाचित्राविशाखाज्येष्ठापूर्वाषाढश्रवणपूभाश्विनीदिनक्षत्रसम्बन्धान्मार्गशीर्षादीनि भवन्ति। अत्रापि प्रोक्तनक्षत्रद्वयत्रयसम्बन्धः प्रागुक्तो बोध्यः। अमेत्याद्युपलक्षणम्। तेन यद्दिने बृहस्पतेरुदयोऽस्तो वा तद्दिने यच्चन्द्राधिष्ठितनक्षत्रं तत्सञ्ज्ञं बार्हस्पत्यं वर्षं भवतीति तात्पर्यम्। संहितापन्थेऽस्तोदयग्राह्यत्वोक्तिः परमिदानीमुदयवर्षव्यवहारो गणकैर्गण्यते "येनोदितेज्य" इत्युक्तेरिति" रङ्ग०।

तस्य च विवृतिः मलमासतत्त्वे यथा

"यथा मासानां पौर्णमास्या कृत्तिकादिसम्बन्धात् कार्त्तिकादित्वं तथा वर्षाणां बृहस्पतेरस्तोदयसम्बन्धात् कार्त्तिकादित्वम् तेन कृत्तिकारोहिण्योरेकतरस्मिन् बृहस्पतेरस्तोदयैकतरलाभे कार्त्तिकवर्षम् एवं मार्गशीर्षादि। यत्र वर्षद्वयघटकयोर्नक्षत्रयोरेकतरस्मिंस्तु गतो गुरुरन्यस्मिन्नुदेति तत्र का गतिरिति चेत् कार्त्तिकोत्तरं मार्गशीर्षं मार्गशीर्षोत्तरं पौषमित्यादिक्रमात्प्रतिः"

बार्हस्पत्यवर्षप्रयोजनमुक्तं सू० सि० "बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः"। षष्ट्यब्दं प्रभवादिवर्षाणि।

यथा च कार्त्तिकशब्दस्य कार्त्तिकीयुक्तार्द्धमासपरत्वं वर्षभेदपरत्वं च जयादित्येन दर्शितं तथा चाषाढाग्रहायणाश्विनादिशब्दानामपि तादृशपौर्णमासीघटितपक्षवत्सरपरत्वं पूर्ववत्तत्क्रममपि ज्ञेयम्।

कृत्तिकाणामयं पोष्यत्वेन अण्। अग्नौ निषिक्तरुद्रतेजोजाते ५स्कान्दे देवे। तस्य कृत्तिकापोष्यत्वकथा च भा० अनु० ८४अ० यथा।

"शूलपाणेर्भगवतो रुद्रस्य च महात्मनः। गिरौ हिमवति श्रेष्ठे तदा भृगुकुलोद्वह!। देव्या विवाहे निर्वृत्ते रुद्राण्या भृगुनन्दन!। समागमे भगवतो देव्या सह महात्मनः। ततः सर्वे समुद्विग्ना देवा रुद्रमुपागमन्। ते महादेवमासीनं देवीञ्च वरदामुमाम्। प्रसाद्य शिरसा सर्वे रुद्रमूचुर्भृगूद्वह!। अयं समागमो देव! देव्या सह तवानघ!। तपस्विनस्तपस्विन्या तेजस्विन्याऽतितेजसः। अमोघतेजास्त्वं देव! देवी चेयमुमा तथा। अपत्यं युवयोर्देव!। बलवद्भविता विभो!। तन्नूनं त्रिषु लोकेषु न किञ्चिच्छेषयिष्यति। तदेभ्यः प्रणतेभ्यस्त्वं देवेभ्यः पृथुलोचन!। वरं प्रयच्छ लोकेश! त्रैलोक्यहितकाम्यया। अपत्यार्थं निगृह्णीष्व तेजः परमकं विभो!। त्रैलोक्यसारौ हि युवां लोकं सन्तापयिष्यथः। तदपत्यं हि युवयोर्देवानभिभवेद्ध्रुवम्। न हि ते पृथिवी देवी न च द्यौस्त्रिदिवं विभो!। नेदं धारयितुं शक्ताः समस्ता इति नो मतिः। तेजःप्रभावनिर्दग्धं तस्मात् सर्वमिदं जगत्। तस्मात् प्रसादं भगवन्! कर्त्तुमर्हसि नः प्रभो!। न देव्यां सम्भवेत् पुत्रो भवतः सुरसत्तम!। धैर्यादेव निगृह्णीष्व तेजो ज्वलितमुत्तमम्। इति तेषां कथयतां भगवान् गोवृषध्वजः। एवमस्त्विति देवांस्तान् विप्रर्षे! प्रत्यभाषत। इत्युक्त्वा चोर्द्ध्वमनयद्रेतो वृषभवाहनः। ऊर्द्ध्वरेताः समभवत्ततः प्रभृति चापि सः। रुद्राणी तु ततः क्रुद्धा प्रजोच्छेदे तथा कृते। देवानथाब्रवीत्तत्र स्त्रीभावात् परुषं वचः। यस्मादपत्यकामो वै भर्त्ता मे विनिवर्त्तितः। तस्मात् सर्वे सुरा यूयमनपत्या भविष्यथ। प्रजोच्छेदो मम कृतो यस्माद्

गङ्गा त्वपि नदी तत्रस्था पोढं धारयितुं तदा । न हि ते किञ्चिदप्राप्यमस्मत्तो भारतर्ते । सा वह्निना वार्य्यमाणा देवैरपि सरिद्वरा । समुत्ससर्ज तं गर्भं मेरौ गिरिवरे तदा । समर्था धारणे चापि रुद्रतेजःप्रधर्षिता । नाशकत् तदा गर्भं सन्धारयितुमोजसा । सा समुत्सृष्टवती तं दुःखाद्दीप्तवैश्वानरप्रभम् । दर्शयामास चाग्निस्तां तदा गङ्गां भृगूद्वह ! । पप्रच्छ सरितां श्रेष्ठां कच्चिद्गर्भः सुखोदयः । कीदृग्वर्णोऽपि वा देवि ! कीदृग्रूपश्च दृश्यते । तेजसा केन वा युक्तः सर्व्वमेतद्ब्रवीतु मे ।

"गङ्गोवाच । जातरूपः स गर्भो वै तेजसा त्वमिवानघ ! । सुवर्णो विमलो दीप्तः पर्व्वतञ्चावभासयन् । पद्मोत्पलविमिश्राणां ह्रदानामिव शीतलः । गन्धोऽस्य स कदम्बानां तुल्यो वै तपतां वर ! । तेजसा तस्य गर्भस्य भास्करस्येव रश्मिभिः । यद्द्रव्यं परिसृष्टं वै पृथिव्यां पर्व्वतेषु च । तत् सर्व्वं काञ्चनीभूतं समन्तात् प्रत्यदृश्यत । पर्य्यधावत शैलांश्च नदीः प्रस्रवणानि च । व्यादीपयंस्तेजसा च त्रैलोक्यं सचराचरम् । एवंरूपः स भगवान् पुत्रस्ते हव्यवाहन ! । सूर्य्यवैश्वानरसमः कान्त्या सोम इवापरः । एवमुक्त्वा तु सा देवी तत्रैवान्तरधीयत । पावकश्चापि तेजस्वी कृत्वा कार्य्यं दिवौकसाम् । जगामेष्टं ततो देशं तदा भार्गवनन्दन ! । एतैः कर्म्मगुणैर्लोके नामाग्नेः परिगीयते । हिरण्यरेता इति वै ऋषिभिर्विबुधैस्तथा । पृथिवी च तदा देवी ख्याता वसुमतीति वै । स तु गर्भो महातेजा गाङ्गेयः पावकोद्भवः । दिव्यं शरवणं प्राप्य ववृधेऽद्भुतदर्शनः । ददृशुः कृत्तिकास्तन्तु बालार्कसदृशद्युतिम् । पुत्रत्वे तास्तु तं बालं पुपुषुः स्तन्यविस्रवैः । ततः स कार्त्तिकेयत्वमवाप परमद्युतिः । स्कन्नत्वात् स्कन्दतां चापि गुहावासाद् गुहोऽभवत्" । अधिकं कार्त्तिकेयशब्दे वक्ष्यते । कार्त्तिकस्येयम् अण् ङीप् । कार्त्तिकी ई देवीशक्तिभेदे कौमार्य्याम् नवपत्रिकान्तर्गते जयन्तीस्थे देवीभेदे च कृत्तिकानक्षत्रेण युक्ता पौर्णमासी अण् ङीप् । चान्द्रकार्त्तिकमासस्य पौर्णमास्याम् स्त्री । "कार्त्तिक्या चाग्रहायणौ मासि" महाभा० ।

कार्त्तिकव्रत न० कार्त्तिके कर्त्तव्यं व्रतम् । कार्त्तिकमासे कर्त्तव्ये नियमभेदे । तन्माहात्म्यमनादि पाद्मस्कान्दयो र्दर्शितं तत्रादौ तस्य नित्यत्वमाह स्कान्दे

"दुष्प्रापं प्राप्य मानुष्यं कार्त्तिकोक्तं चरेन्न हि । धर्म्मे धर्म्मभृतां श्रेष्ठ ! । स मातृपितृघातकः । धर्म-तेन क्षिपेद्यस्तु मासं दामोदरप्रियम् । तिर्य्यग्योनिमवाप्नोति सर्व्वधर्म्मबहिष्कृतः । स ब्रह्महा स गोघ्नश्च स्वर्णस्तेयी सदाऽनृती । न करोति मुनिश्रेष्ठ ! यो नरः कार्त्तिकव्रतम् । विधवा च विशेषेण व्रतं यदि न कार्त्तिके । करोति मुनिशार्दूल ! । नरकं याति सा ध्रुवम् । व्रतन्तु कार्त्तिके मासि यदा न कुरुते गृही । इष्टापूर्त्तं वृथा तस्य यावदाभूतनारकी । समाप्ते कार्त्तिके मासे द्विजो व्रतपराङ्मुखः । भवन्ति विमुखाः सर्व्वे तस्य देवाः सवासवाः । इष्ट्वा च बहुभिर्यज्ञैः कृत्वा श्राद्धशतानि च । स्वर्गं नाप्नोति विप्रेन्द्र ! अकृत्वा कार्त्तिके व्रतम् । यतिश्च विधवा चैव विशेषेण वनाश्रमी । कार्त्तिके नरकं याति अकृत्वा वैष्णवं व्रतम् । वेदैरधीतैः किं तस्य ? पुराणपठनैश्च किम् ? । कृतं यदि न विप्रेन्द्र ! कार्त्तिके वैष्णवं व्रतम् । जन्मप्रभृति यत् पुण्यं विधिवत् समुपार्ज्जितम् । भस्मीभवति तत् सर्व्वमकृत्वा कार्त्तिके व्रतम् । यद्दत्तञ्च परं ह्यत्र कृतञ्च सुमहत्तपः । सर्व्वं विफलतामेति अकृत्वा कार्त्तिके व्रतम् । जन्मजन्मार्ज्जितं पुण्यं वृथा भवति नारद ! । अकृत्वा कार्त्तिके मासि वैष्णवं व्रतमुत्तमम् । पापभूतास्तु ते ज्ञेया लोके नरा महामुने ! । वैष्णवाख्यं व्रतं यैस्तु न कृतं कार्त्तिके शुभम्" । किञ्च "अकृत्वा नियमं विष्णोः कार्त्तिकं यः क्षिपेन्नरः । जन्मार्ज्जितस्य पुण्यस्य फलं नाप्नोति नारद ।" । किञ्च "नियमेन विना चैव यो नयेत् कार्त्तिकं मुने ! । चान्द्रमासं तथा चैव ब्रह्महा स कुलाधमः" । किञ्च "पिण्डदानं पितॄणाञ्च पितृपक्षे न वै कृतम् । व्रतं ना कार्त्तिके मासि श्रावण्यामृषितर्पणम् । चैत्रे नान्दोलितो विष्णुर्माघस्नानं न सज्जते । न कृता भव्ये पुष्ये, श्राव- रोहिण्यष्टमी । वह्निमे न कृता येन द्वादशी श्रवणान्विता । कुत्र यास्यन्ति ते मूढा नाहं वेद्मि कथञ्चन !" । पाद्मे च "शौनकादिमुनिगणसंवादे "मानुष्यं कर्म्मभूमौ च कार्त्तिकं नयते वृथा । चिन्तामणिं करे प्राप्य क्षिपते कर्द्दमाम्बुनि । नियमेन विना विप्रा ! कार्त्तिकं यः क्षिपेन्नरः । कृष्णः पराङ्मुखस्तस्य यस्मादूर्ज्जोऽस्य वल्लभः । यैर्न दत्तं हुतं जप्तं न स्नानं न हरेर्व्रतम् । न कृतं कार्त्तिके पुत्र ! द्विजास्ते च नराधमाः" । किञ्च "यैर्न दत्तं हुतं जप्तं कार्त्तिके न व्रतं कृतम् । तेषामाशा हारितो नूनं न प्राप्तं वाञ्छितं फलम्" । अन्यत्र च "समाप्ते कार्त्तिके मासि ये रता न

त्यस्य कार्त्तिके पुरतो हरेः । यः करोति नरो भक्त्या लभते चाक्षयं फलम् । हरेर्नाम सहस्राख्यं गजेन्द्रस्य च मोक्षणम् । कार्त्तिके पठते यस्तु पुनर्जन्म न विद्यते । कार्त्तिके पश्चिमे यामे स्तवं गानं करोति यः । वसते श्वेतद्वीपे स पितृभिः सह नारद ! ॥ नैवेद्यदानेन हरेः कार्त्तिके यत्संख्यया । युगानि वसते स्वर्गे तावन्ति मुनिसत्तम ! ॥ अपूपन्तु सकर्पूरं ये ददत् केशवाग्रतः । कार्त्तिके तु मुनिश्रेष्ठ ! युगान्ते न पुनर्भव” किञ्च “नियमेन कथा विष्णोर्ये शृण्वन्ति च भाविताः । श्लोकार्द्धं श्लोकपादं वा कार्त्तिके गोशतं फलम् । सर्व्वधर्म्मान् परित्यज्य कार्त्तिके केशवाग्रतः । शास्त्रस्योच्चारणं पुण्यं श्रोतव्यञ्च महामुने ! ॥ श्रेयसा लोभबुद्ध्या वा यः करोति हरेः कथाम् । कार्त्तिके मुनिशार्द्दूल ! कुलानां तारयेच्छतम् । नित्यं शास्त्रविनोदेन कार्त्तिकं यः क्षिपेन्नरः । निर्द्दहेत् सर्व्वपापानि यज्ञायुतफलं लभेत् । न तथा तुष्यते दानैर्न यज्ञैर्गोगजादिकैः । यथा शास्त्रकथालापैः कार्त्तिके मधुसूदनः । कार्त्तिके मुनिशार्द्दूल ! यः शृणोति हरेः कथाम् । स निस्तरति दुर्गाणि जन्मकोटिगतानि च । यः पठेत् प्रयतो नित्यं श्लोकं भागवतं मुने ! । अष्टादशपुराणानां कार्त्तिके फलमाप्नुयात्” किञ्च “सर्व्वान् धर्म्मान् परित्यज्य इष्टापूर्त्तादिकान्नरः । कार्त्तिके परया भक्त्या वैष्णवैः सह संवसेत्” । पद्मे “कार्त्तिके भूमिशायी यो ब्रह्मचारी हविष्यभुक् । पलाशपत्रे भुञ्जानो दामोदरमथार्च्चयेत् । स सर्व्वपातकं हित्वा वैकुण्ठे हरिसन्निधौ । मोदते विष्णुसदृशो भजनानन्दनिर्वृतः” किञ्च “कार्त्तिकं सकलं मासं प्रातःस्नायी जितेन्द्रियः । जपन् हविष्यभुक् दान्तः सर्व्वपापैः प्रमुच्यते । कार्त्तिकन्तु नरो मासं यः कुर्य्यादेकभोजनम् । शूरश्च बहुवीर्य्यश्च कीर्त्तिमांश्च स जायते” । किञ्च “पलाशपत्रभोजी च कार्त्तिके पुरुषो नरः । निष्पापः स्यात्तु नैवेद्यं हरेर्भुक्त्वा विमुच्यते । मध्यस्थपर्णं वर्जयेद्ब्राह्मणेतरः” । किञ्च “अपराधसहस्राणि पातकानि महान्त्यपि । क्षमतेऽस्य हरिर्द्देवः पूजितः कार्त्तिके प्रभुः । नैवेद्यं पायसं विष्णोः प्रियं घृतं शर्करान्वितम् । विभज्य तच्च भुञ्जानो यज्ञस्यान्यदिने दिने’ । तत्रैव श्रीकृष्णसत्यासंवादे “स्नानं जागरणं दीपं तुलसीवनपालनम् । कार्त्तिके ये प्रकुर्व्वन्ति ते नरा विष्णुमूर्त्तयः । इत्थं दिनत्रयमपि कार्त्तिके ये प्रकुर्व्वते । देवानामपि ते वन्द्याः किं यैराजन्म तत् कृतम्” । स्कान्दे कार्त्तिकव्रताङ्गानि “हरिजागरणं प्रातःस्नानं तुलसिसेवनम् । उद्यापनं दीपदानं व्रतान्येतानि कार्त्तिके” । किञ्च “पञ्चभिर्व्रतकैरेभिः सम्पूर्णं कार्त्तिके व्रती । फलमाप्नोति तत्प्रोक्तं भुक्तिमुक्तिफलप्रदम् । विष्णोः शिवस्य वा कुर्य्यादालये हरिजागरम् । कुर्य्यादश्वत्थमूले वा तुलसीनां वनेषु च । आपद्गतो यदाप्यम्भो न लभेत् स्नानाय च । व्याधितो वा पुनः कुर्य्याद्विष्णोर्नाम्नाऽवमार्ज्जनम् । उद्यापनविधिं कर्त्तुमशक्तो यो व्रते स्थितः । ब्राह्मणान् भोजयेच्छक्त्या व्रतसम्पूर्णहेतवे । अशक्तो दीपदानस्य परदीपान् प्रबोधयेत् । तेषां वा रक्षणं कुर्य्याद्वातादिभ्यः प्रयत्नतः । अभावे तुलसीनाञ्च पूजयेद्वैष्णवं द्विजम् । सर्व्वाभावे व्रती कुर्य्याद्ब्राह्मणानां गवामपि । सेवां वा बोधिवटयोर्व्रतसम्पूर्णहेतवे” । तत्र दीपदानमाहात्म्यम्” स्कान्दे

“हत्या कोटिसहस्राणि पातकानि बहून्यपि । निमेषार्द्धेन दीपस्य विलयं यान्ति कार्त्तिके” किञ्च “शृणु दीपस्य माहात्म्यं कार्त्तिके केशवप्रियम् । दीपदानेन विप्रेन्द्र ! न पुनर्जायते भुवि । रविग्रहे कुरुक्षेत्रे नर्म्मदायां शशिग्रहे । तत् फलं कोटिगुणितं दीपदानेन कार्त्तिके । घृतेन दीपको यस्य तिलतैलेन वा पुनः । ज्वाल्यते मुनिशार्द्दूल ! अश्वमेधेन तस्य किम् ? । मन्त्रहीनं क्रियाहीनं शौचहीनं जनार्द्दने । सर्व्वं सम्पूर्णतां याति कार्त्तिके दीपदानतः । तेनेष्टं क्रतुभिः सर्व्वैः कृतं तीर्थावगाहनम् । दीपदानं कृतं येन कार्त्तिके केशवाग्रतः । तावद्गर्ज्जन्ति पुण्यानि स्वर्गे मर्त्त्ये रसातले । यावन्न ज्वलते ज्योतिः कार्त्तिके केशवाग्रतः । श्रूयते चापि पितृभिर्गाथा गीता पुरा द्विज ! ॥ भविष्यति कुलेऽस्माकं पितृभक्तः सुतो भुवि । कार्त्तिके दीपदानेन यस्तोषयति केशवम् । मुक्तिं प्राप्स्यामहे नूनं प्रसादाच्चक्रपाणिनः” किञ्च “मेरुमन्दरमात्राणि कृत्वा पापान्यशेषतः । दहते नात्र सन्देहो दीपदानात्तु कार्त्तिके । गृहे वाऽऽयतने वापि दीपं दद्याच्च कार्त्तिके । पुरतो वासुदेवस्य महाफलविधायिनः । स जातो मानुषो लोके स धन्यः स च कीर्त्तिमान् । प्रदत्तः कार्त्तिके मासि दीपो येन मधुहाग्रतः । निमेषार्द्धार्द्धमात्रेण दीपदानेन कार्त्तिके । न तत् क्रतुशतैः प्राप्यं फलं तीर्थशतैरपि । सर्व्वानुष्ठानहीनोऽपि सर्व्वपापरतोऽपि सन् । पूयते नात्र सन्देहो दीप

[illegible]

[illegible]

स्तवस्तु कार्त्तिके पुरतो हरेः । यः करोति नरो भक्त्या लभते चाक्षयं फलम् । हरेर्नामसहस्राख्यं गजेन्द्रस्य च मोक्षणम् । कार्त्तिके पठते यस्तु पुनर्जन्म न विद्यते । कार्त्तिके पश्चिमे यामे स्तवं गानं करोति यः । वसते श्वेतद्वीपे तु पितृभिः सह नारद ! । नैवेद्यदानेन हरेः कार्त्तिके वत्सलप्रिया । युगानि वसते स्वर्गे नात्र कार्या विचारणा । कर्पूरं ये प्रयच्छन्ति श्रीकृष्णाय सुपूजितम् । कार्त्तिके तु मुनिश्रेष्ठ । युगान्ते न पुनर्भव" किञ्च "नियमेन कथा विष्णोर्ये शृण्वन्ति च भाविताः । श्लोकार्द्धं श्लोकपादं वा कार्त्तिके गोशतं फलम् । सर्व्वधर्मान् परित्यज्य कार्त्तिके केशवाग्रतः । शास्त्रस्योच्चारणं पुण्यं श्रोतव्यञ्च महामुने । श्रेयसा लोभबुद्ध्या वा यः करोति हरेः कथाम् । कार्त्तिके मुनिशार्दूल । कुलानां तारयेच्छतम् । नित्यं शास्त्रविनोदेन कार्त्तिकं यः क्षिपेन्नर । निर्द्दहेत् सर्व्वपापानि यज्ञायुतफलं लभेत् । न तथा तुष्यते दानैर्न यज्ञैर्गोगजादिकैः । यथा शास्त्रकथालापैः कार्त्तिके मधुसूदनः । कार्त्तिके मुनिशार्दूल । यः शृणोति हरेः कथाम् । स निस्तरति दुर्गाणि जन्मकोटिशतानि च । यः पठेत् प्रयतो नित्यं श्लोकं भागवतं मुने । अष्टादशपुराणानां कार्त्तिके फलमाप्नुयात्" किञ्च "सर्व्वान् धर्म्मान् परित्यज्य इष्टापूर्त्तादिकान्नर । कार्त्तिके परया भक्त्या वैष्णवैः सह सम्वसेत्" । पद्मे "कार्त्तिके भूमिशायी यो ब्रह्मचारी हविष्यभुक् । पलाशपत्रे भुञ्जानो दामोदरमथार्च्चयेत् । स सर्व्वपातकं हित्वा वैकुण्ठे हरिसन्निधौ । मोदते विष्णुसदृशो भजमानश्चिरं नृप" किञ्च "कार्त्तिकं सकलं मासं प्रातःस्नायी जितेन्द्रियः । जपन् हविष्यभुक् दान्तः सर्व्वपापैः प्रमुच्यते । कार्त्तिकन्तु नरो मासं यः कुर्य्यादेकभोजनम् । शूरश्च बहुवीर्य्यश्च कीर्त्तिमांश्च स जायते" । किञ्च "पलाशपत्रभोजी च कार्त्तिके पुरुषो नरः । निष्पापः स्यात्तु नैवेद्यं हरेर्भुक्त्वा विमुच्यते । मध्यस्यमेश्वरं पत्रं वर्जयेद्ब्रह्मवेतरः" । किञ्च "अपराधसहस्राणि पातकानि महान्त्यपि । क्षमतेऽस्य हरिर्देवः पूजितः कार्त्तिके प्रभुः । नैवेद्यं पायसं विष्णोर्मिष्टं घृतं षड्रसान्वितम् । निवेद्य तच्च भुञ्जानो यस्त साम्यं दिने दिने' । तत्रैव श्रीरुक्माङ्गदमोहिनीसंवादे "स्नानं जागरणं दीपं तुलसीवनपालनम् । कार्त्तिके ये प्रकुर्व्वन्ति ते नरा विष्णुमूर्त्तयः । इत्थं दिनत्रयमपि कार्त्तिके ये प्रकुर्व्वते । देवानामपि ते वन्द्याः किं यैराजन्म तत् कृतम्" । स्कान्दे कार्त्तिकव्रतान्याह "हरिजागरणं प्रातः स्नानं तुलसिसेवनम् । उद्यापनं दीपदानं व्रतान्येतानि कार्त्तिके" । किञ्च "पञ्चभिर्व्रतकैरेभिः सम्पूर्णे कार्त्तिके व्रती । फलमाप्नोति तत्प्रोक्तं भुक्तिमुक्तिफलप्रदम् । विष्णोः शिवस्य वा कुर्य्यादालये हरिजागरम् । कुर्य्यादश्वत्थमूले वा तुलसीनां वनेषु च । आपद्गतो यदाप्यम्भो न लभेत् स्नानाय च । व्याधितो वा पुनः कुर्य्याद्विष्णोर्नाम्नाऽपमार्ज्जनम् । उद्यापनविधिं कर्त्तुमशक्तो यो व्रते स्थितः । ब्राह्मणान् भोजयेच्छक्त्या व्रतसम्पूर्णहेतवे । अशक्तो दीपदानस्य परदीपान् प्रबोधयेत् । तेषां वा रक्षणं कुर्य्याद्वातादिभ्यः प्रयत्नतः । अभावे तुलसीनाञ्च पूजयेद्वैष्णवं द्विजम् । सर्व्वाभावे व्रती कुर्य्याद्ब्राह्मणानां गवामपि । सेवां वा बोधिवटयोर्व्रतसम्पूर्णहेतवे" । तत्र दीपदानमाहात्म्यं स्कान्दे

प्रागभावप्रतियोगित्वादिरूपस्य धर्म्मस्वरूपस्य वा कार्य्य-
त्वस्य लघुत्वादित्यभिप्राय। वस्तुतस्तु लाघवाल्लिङ्मात्रस्य
कृतावेव शक्तिः साध्यत्वं संसर्गः। वेदे च प्रागभावपरत्वादि-
रूपकार्य्यत्वाश्रये धर्म्मिणि लक्षणाऽस्त्वेवेत्याशयः। ननु
लोकस्थले कार्य्यस्वरूपेणापूर्वमेवाऽर्थोऽस्तु किं लक्षणयेत्यत
आह नचेति पूर्व्यमिति वेदे तु अनादिलिङ्प्रवादादेवा
व्यापकानामपूर्वावगमात्तत्र तात्पर्य्यसम्भव इति भाव।
वस्तुतोऽपूर्व्वं लोके बाधित मानाभावादित्येव द्रष्टव्यम्।
ननु लिङः शक्तिपक्षे क्रियाभिन्नधर्म्मिणो विषयत्वेऽपि
कार्य्यत्वस्य शक्यतावच्छेदकतया क्रियाया शक्तिरस्त्येव
तथा च लोकेऽपि पाकः कार्य्याभिन्न इत्यभेदान्वयबोधस्य
शक्त्यैवोपपत्तौ किं लक्षणया इत्यत आह क्रियासाधार-
णेति। लक्षणैव कार्य्यत्वे लक्षणैव। पाककार्य्यतावगम्यते इत्या-
धाराधेयभावसम्बन्धेन पकविशेष्यककृतिसाध्यत्वप्रकार-
कान्वयबोधो जायते इत्यर्थः। अन्यथा सवृत्त्यनुपपत्तेस्तथा
च प्रवर्त्तकज्ञानानुरोधाल्लक्षणेति भाव। इदन्त्वाभ्युपगमवादे-
नोक्त वस्तुतो धात्वर्थप्रत्ययार्थयोरभेदान्वयबोधस्याव्युत्पन्न
तया क्रियासाधारण्यशक्तावपि शक्त्यानोपपत्तिरन्यथा नि-
त्यनिषेधस्थलेऽपि तथान्वयबोधसम्भवादपूर्वलोपापत्तेरिति
ध्येयम्। ननु लोके पचेतेत्यादौ लिङो लक्षणायां लिङ्

[illegible]

[illegible]

हेतुहेतुमद्भावे यथा घटदण्डयोः कार्य्यकारणभावः। "कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात्। अविनाभावनियमो दर्शनान्तरदर्शनात्" सर्व्वद० बौद्धदर्शने। तत्र कार्य्यभेदेन कारणभेदे च रत्नमञ्जू० १८२८पृ० उक्तप्रायेऽपि किञ्चिदधिकमुच्यते। कारणं तावत् द्विविधं मुख्यममुख्यञ्च तत्र घटादिकं प्रति मृदादिकं मुख्यं, तथा प्रत्यक्षे इन्द्रियसन्निकर्षादि। तद्भिन्नममुख्यं तच्च सहकारि कारणम्। मुख्यमपि त्रिविधं न्यायमते समवायि असमवायि निमित्तमिति भेदात् तत्र घटादिकं प्रति मृदादिकं समवायिकारणं, कपालद्वयसंयोगादि असमवायिकारणं, दण्डादयो निमित्तकारणानि। तत्राद्ये असाधारणे एव कारणे। असाधारणकारणमपि कार्य्यभेदादनेकविधम्। निमित्तकारणमपि द्विविधं साधारणासाधारणभेदात् तत्र साधारणनिमित्तकारणानि षड्विधानि ईश्वरतज्ज्ञानेच्छाकृतयः दिक्कालौ अदृष्टं प्रागभावश्चेति भेदात्। असाधारणनिमित्तकारणानि अनेकविधानि। प्रतिबन्धकाभावस्य कारणत्वं नैयायिका मन्यन्ते। स च निमित्तकारणमेव। वेदान्तिनस्तु अभावस्य न कारणत्वम् इच्छन्ति "कथमसतः सज्जायेतेति" श्रुतेः "नासतो विद्यते भाव" इति गीतोक्तेश्च। तदेतद्विपरीतं तैत्तिरीयोपनिषद्भाष्ये यथा

"नित्यानाञ्चाकरणमभावस्ततः प्रत्यवायानुपपत्तिरिति। अतः पूर्व्वोपचितदुरितेभ्यः प्राप्यमाणायाः प्रत्यवायक्रियाया नित्याकरणं लक्षणमिति "अकुर्व्वन् विहितं कर्मेति" हि शत्रनुपपत्तिः। अन्यथा अभावाद्भावोत्पत्तिरिति सर्व्वप्रमाणव्याकोप" भा०।

व्याख्यातञ्चैतत् आनन्दगिरिणा यथा

"यदुक्तमकरणनिमित्तप्रत्यवायपरिहारार्थानि नित्यानीति तत्राह नित्यानाञ्चेति। आगामि दुःखं प्रत्यवाय उच्यते तस्य भावरूपस्य नाभावो निमित्तम् "पापः पापेनेति" श्रुतेः। निषिद्धाचरणनिमित्तत्वाद् दुःखस्य सर्व्वं। "अकुर्व्वन् विहितं कर्म निन्दितञ्च समाचरन्। प्रसक्तश्चेन्द्रियार्थेषु नरः पतनमृच्छतीति" शतृप्रत्ययादकरणस्यापि प्रत्यवायनिमित्तत्वमवगतमित्याशङ्क्याह अत इति। यदि यथाप्रविनित्यनैमित्तिकानुष्ठानमभविष्यत् तदा सञ्चितदुरितक्षयोऽभविष्यत्। न चायं विहितमकार्षीदितः प्रत्यवायो भविष्यतीति निर्द्दिश्यते। यथा "विचिन्वन् श्रोत्रिय" इति। तत्र शतृप्रत्ययस्यान्यथाव्युत्पन्नत्वाच्च लक्षणादकरणस्य हेतुत्वमवगन्तुं न शक्यत इत्यर्थः।

"लक्षणहेत्वोः क्रियायाः" इति (पा०) शतृप्रत्ययस्योभयत्र विधाने सति किमिति हेतुत्वमेव न स्यात्? तत्राह अस्य चेति। अभावरूपस्य कार्य्यस्य भावरूपमेव कारणमिति प्रत्यक्षादिभिरवगतं शतृप्रत्ययादभावस्य हेतुत्वाभिधाने सर्व्वप्रमाणविरोधः स्यादित्यर्थः।

ननु स्वाध्यायाकरणस्य प्रत्यवायजनकत्वमिष्टम्। भाट्टैश्चानुपलब्धाभावप्रमितिहेतुत्वमिष्यते। तार्किकैश्च प्रतिबन्धकाभावस्य तत्संसर्गाभावस्य च तत्तत्कार्य्यव्यवस्थापकत्वमिष्यते अतश्च भावस्यैव कारणत्वम् तदुक्तम्। 'भावो यथा तथाऽभावः कारणं कार्य्यवन्मतम्" इति उच्यते। "अभावस्य स्वरूपेण कारणत्वं नेष्टं किन्तु ज्ञानस्य प्रत्यवायजनकत्वमिष्टम्। तेन च रूपेण न प्रत्यवायजनकत्वमिष्यते। नित्याकरणज्ञाने प्रत्यवायाभावप्रसङ्गात्। भाट्टानामपि च ज्ञेयाज्ञानस्य योग्यानुपलम्भस्याभावप्रमितिहेतुत्वमिष्टं ज्ञानकरणतया तु प्रमितिहेतुत्वेऽभावप्रमायाः प्रत्यक्षत्वापातः। तार्किकाणामपि प्रतिबन्धकाभावस्य कारणत्वेऽन्योन्याश्रयप्रसङ्गात् प्रामाणिकत्वम्। प्रागभावस्यापि ज्ञातरूपेण जन्यज्ञापकत्वमेव। घटादिः प्राङ्नासीत्कपालादौ जातमिति। न तु जनकत्वं प्रागभावस्य, नियतप्रागभावित्वेन कारणत्वे प्राकाशस्य सहकारितापातः। प्रागभावित्वमपि नान्यथासिद्धमित्युक्तं तत्त्वालोके'।

कार्य्यविशेषश्च कार्य्यशब्दे उक्ता। तत्र समवायिकारणोत्पाद्यं समवेतात्मकमुपादेयमित्युच्यते तद्भिन्नं कार्य्यं कार्य्योत्पाद्यादिशब्देन व्यवह्रियते इति भेदः।

कार्य्यकुशल त्रि० ७त०। कार्य्ये क्रियादक्षे।

कार्य्यचिन्तक त्रि० कार्य्यं चिन्तयति चिन्ति–ण्वुल् उप० स०। कर्त्तव्यविषये तत्त्वातत्त्वचिन्तके। "धर्म्मज्ञा शुचयो ऽलुब्धाः भवेयुः कार्य्यचिन्तकाः" याज्ञ०।

कार्य्यता स्त्री कार्य्यस्य भावः तल्। कर्त्तव्यतायां कृतिसाध्यतायाम्। सा कार्य्यता तत्त्वार्थे म० गुरुमते यथा च तज्ज्ञानस्यैव प्रवर्त्तकत्वं तथा शब्दचि० गुरुमतप्रदर्शने दर्शितं यथा। "कार्य्यत्वज्ञानं प्रवर्त्तकमिति गुरवः तथाहि ज्ञानस्य कृतौ जनयितव्यायां चिकीर्षातिरिक्तं न कर्त्तव्यमस्ति तदुपक्षये कृतिविलम्बहेत्वन्तराभावात्। चिकीर्षा च कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयेच्छा पाकं कृत्वा साधयामीति तदनुभवात्। सा च स्वकृतिसाध्यताज्ञानसाध्या इच्छायाः स्वप्रकारकधीसाध्यत्वनियमात् अतएव स्वकृति-

[illegible]

[illegible]

[illegible]

हेतुहेतुमद्भावे यथा घटदण्डयोः कार्य्यकारणभावः। "कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात्। अविनाभावनियमो दर्शनान्तरदर्शनात्" सर्व्वद० बौद्धदर्शने। तत्र कार्य्यभेदेन कारणभेदे कारणशब्दे १८४८पृ० उक्तप्रायेऽपि किञ्चिदभिधीयते। कारणं तावत् द्विविधं मुख्यममुख्यञ्च तत्र घटादिकं प्रति मृदादिकं मुख्यं, तथा प्रत्यक्षे इन्द्रियमित्यादि। तद्भिन्नममुख्यं तच्च सहकारि कारणम्। मुख्यमपि त्रिविधं न्यायमते समवायि असमवायि निमित्तमिति भेदात् तत्र घटादिकं प्रति मृदादिकं समवायिकारणं, कपालसंयोगादि असमवायिकारणं, दण्डादयो निमित्तकारणानि। तत्राद्ये असाधारणे एव कारणे। असाधारणकारणमपि कार्य्यभेदान्नानाविधम्। निमित्तकारणमपि द्विविधं साधारणासाधारणभेदात् तत्र साधारणनिमित्तकारणानि चाष्टविधानि ईश्वरतज्ज्ञानेच्छाकृतयः दिक्कालौ अदृष्टं प्रागभावश्चेति भेदात्। असाधारणनिमित्तकारणानि चानेकविधानि। प्रतिबन्धकाभावस्य कारणत्वं नैयायिका मन्यन्ते। स च निमित्तकारणमेव। वेदान्तिनस्तु अभावस्य न कारणत्वम् इच्छन्ति "कथमसतः सज्जायेतेति" श्रुतेः "नासतो विद्यते भावः" इति गीतोक्तेश्च। तदेतन्निर्णीतं तैत्तिरीयोपनिषद्भाष्ये यथा

"नित्यानामकरणमभावस्ततः प्रत्यवायानुपपत्तिरिति। अतः पूर्व्वोपचितदुरितेभ्यः प्राप्यमाणायाः प्रत्यवायक्रियाया नित्याकरणं लक्षणमिति "अकुर्व्वन् विहितं कर्म्मेति" हि शतुर्नानुपपत्तिः। अन्यथा अभावाद्भावोत्पत्तिरिति सर्व्वप्रमाणव्याकोपः" भा०।

व्याकृतञ्चैतत् आनन्दगिरिणा यथा

"यथोक्तमकरणनिमित्तप्रत्यवायपरिहारार्थानि नित्यानीति तत्राह नित्यानाञ्चेति। आगामि तु स प्रत्यवाय उच्यते तस्य भावरूपस्य नाभावो निमित्तम् "पापं पापेनेति" श्रुतेः। निषिद्धाचरणनिमित्तत्वाद् इत्येतदर्थः। "अकुर्व्वन् विहितं कर्म्म निन्दितञ्च समाचरन्। प्रसक्तश्चेन्द्रियार्थेषु नरः पतनमृच्छतीति" शतृप्रत्ययादकरणस्यापि प्रत्यवायनिमित्तत्वमवगतमित्याशङ्क्याह अतः पूर्व्वेति। यदि यथार्थविद्यनैमित्तिकानुष्ठानमभविष्यत्तदा सञ्चितदुरितक्षयो भविष्यत्। न चायं विहितमकार्षीदित्यतः प्रत्यवायो भविष्यतीति निर्द्दिश्यते। यथा "विचिचित्सन् जोषिय" इति। तत्र शतृप्रत्ययस्यान्यथाप्युपपन्नत्वान्न तद्बलादकरणं हेतुत्वमवगन्तुं शक्यत इत्यर्थः।

"लक्षणहेत्वोः क्रियायाः" इति (पा०) शतृप्रत्ययस्योभयत्र विधाने सति किमिति हेतुत्वमेव न गृह्यते? तत्राह अन्यथेति। अभावरूपस्य कार्य्यस्य भावरूपमेव कारणमिति प्रत्यक्षादिभिरवगतं शतृप्रत्ययादभावस्य हेतुत्वाभिधाने सर्व्वप्रमाणविरोधः स्यादित्यर्थः।

ननु नित्याकरणस्य प्रत्यवायलक्षणत्वमिष्टम्। भाट्टैरनुपलब्ध्याभावप्रमितिहेतुत्वमिष्यते। तार्किकैः प्रतिबन्धकाभावस्य तत्प्रागभावस्य च तत्तत्कार्य्योत्पादकत्वमिष्यते तत्कथं भावस्यैव कारणत्वम् उक्तम्। 'भावो यथा तथाऽभावः कारणं कार्य्यवन्मतम्" इति उच्यते। "अकरणाभिधायाभावस्य स्वरूपेण कारणत्वं नेष्टं किन्तु सद्भावस्य प्रत्यवायगमकत्वमिष्टम्। तेन च रूपेण न प्रत्यवायजनकत्वमिष्यते। नित्याकरणापाने प्रत्यवायाभावप्रसङ्गात्। भाट्टानामपि च केषाञ्चिज्ज्ञातस्य योग्यानुपलम्भस्याभावप्रमितिहेतुत्वमिष्टं ज्ञापकतया तु प्रमितिहेतुत्वेऽभावप्रमाया प्रत्यक्षत्वापातः। तार्किकाणामपि प्रतिबन्धकाभावस्य कारणत्वेऽन्योन्याश्रयप्रसङ्गाच्च प्रामाणिकत्वम्। प्रागभावस्यापि ज्ञातरूपेण जन्यज्ञापकत्वमेव। यथाऽऽदिदं प्रागासीत्पटादयो जाता इति। न तु जनकत्वं प्रागभावस्य, नियतप्रागभावित्वेन कारणत्वे साक्षात्कारस्य सहत्तितापातः। प्रागभावित्वमपि चान्यथासिद्धमित्युक्तं तत्त्वालोके'।

कार्य्यं त्रिविधं कार्य्यशब्दे उक्तम्। तत्र समवायिकारणे स्थितं समवेतमुपादेयमित्युच्यते तद्भिन्नं कार्य्यं कार्य्यं तूपादानादिशब्देन व्यवह्रियते इति भेदः।

कार्य्यकुशल त्रि० ७त०। कार्य्ये क्रियादक्षे।

कार्य्यचिन्तक त्रि० कार्य्यं चिन्तयति चिन्ति—ण्वुल् उप० स०। कर्त्तव्यविषये कृताकृतचिन्तके। "धर्म्मज्ञाः शुचयोऽलुब्धा भवेयुः कार्य्यचिन्तकाः" याज्ञ०।

कार्य्यता स्त्री कार्य्यस्य भावः तल्। कर्त्तव्यतायां कृतिसाध्यतायाम्। स्य कार्य्यत्वं तत्त्वार्थे म०गुरुमते यथा च तज्ज्ञानस्यैव प्रवर्त्तकत्वं तथा शब्दचि० गुरुमतप्रदर्शने दर्शितं यथा। "कार्य्यताज्ञानं प्रवर्त्तकमिति गुरवः तथाहि ज्ञानस्य कृतौ जनयितव्यायां चिकीर्षातिरिक्तं न कर्त्तव्यमस्ति तदुत्पत्ते कृतिविषयस्य हेत्वन्तराभावात्। चिकीर्षा च कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयेच्छा पाकं कृत्या साधयामीति तदनुभवात्। सा च स्वकृतिसाध्यताज्ञानसाध्या इच्छायाः स्वप्रकारकधीसाध्यत्वनियमात् अतएव स्वकृति-

[illegible]

[illegible] इति भावः । [illegible]

[illegible] इति भावः । [illegible]

[illegible] इति भावः । [illegible]

[illegible] । [illegible]

[illegible]

हेतुहेतुमद्भावश्च घटदण्डयोः कार्य्यकारणभावः । "कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात् । अविनाभावनियमो दर्शनान्तरदर्शनात्" सर्वद० बौद्धदर्शने । तत्र कार्य्यभेदेन कारणभेदे कारणशब्दे १९२८पृ० उक्तप्रायमेव किञ्चिदधिकमुच्यते । कार्य्यं तावत् द्विविधमुत्पत्तिमत् तत्र घटादिकं प्रति कपालादिकमुक्तं, तथा ज्ञाने इन्द्रियसन्निकर्षादि । इन्द्रियसम्पर्कः स्वरूपादि कारणम् । कारणमपि त्रिविधं न्यायमते समवायि असमवायि निमित्तमिति भेदात् तत्र घटादिकं प्रति कपालादिकं समवायिकारणं, कपालद्वयसंयोगादि असमवायिकारणं, दण्डादयो निमित्तकारणानि । तत्रापि समवायिकारणं द्रव्यमेव । असमवायिकारणमपि कार्य्यभेदाद्बहुविधम् । निमित्तकारणमपि द्विविधं साधारणासाधारणभेदात् तत्र साधारणनिमित्तकारणानि साधारणानि ईश्वरतज्ज्ञानेच्छाकृतय दिक्कालौ अदृष्टं प्रागभावश्चेति भेदात् । असाधारणनिमित्तकारणानि अनेकविधानि । प्रतिबन्धकाभावस्य कारणत्वं नैयायिका मन्यन्ते । स च निमित्तकारणमेव । वेदान्तिमते अभावस्य न कारणत्वम् इच्छन्ति "कथमसतः सज्जायेतेति" श्रुतेः "नासतो विद्यते भाव" इति गीतोक्तेश्च । तदेतन्निरूपितं तैत्तिरीयोपनिषद्भाष्ये यथा

"नित्यानामकरणमभावस्ततः प्रत्यवायानुपपत्तिरिति । अतः पूर्व्वोपचितदुरितेभ्यः प्राप्यमाणायाः प्रत्यवायक्रियायाः नित्याकरणं लक्षणमिति "अकुर्वन् विहितं कर्मेति" हि शतुर्नानुपपत्तिः । अन्यथा अभावाद्भावोत्पत्तिरिति सर्वप्रमाणव्याकोपः" भा० ।

व्याख्यातञ्चैतत् आनन्दगिरिणा यथा

"पूर्वोक्तमकरणनिमित्तप्रत्यवायपरिहारार्थानि नित्यानीति तत्राह नित्यानामिति । अभावाभि तु स प्रत्यवाय उच्यते तस्य भावरूपस्य नाभावो निमित्तम् "पाप पापेनेति" श्रुतेः । निषिद्धाचरणनिमित्तत्वाद् प्रत्येकर्थ । "अकुर्वन् विहितं कर्म निन्दितञ्च समाचरन् । प्रसजंश्चेन्द्रियार्थेषु नरः पतनमृच्छतीति" शतृप्रत्ययादकरणस्यापि प्रत्यवायनिमित्तत्वमवगतमित्याशङ्क्याह अत पूर्व्वेति । यदि यथाविध्यनैमित्तिकानुष्ठानमभविष्यत्तदा सञ्चितदुरितक्षयोऽभविष्यत् । न चायं विहितमकार्षीदित्यतः प्रत्यवायो भविष्यतीति निर्देशोऽस्ति । यथा "पिपिक्षिषम् ओमिति" इति । तत्र शतृप्रत्ययस्यान्यथाप्युपपत्तेर्न तद्बलादकरणस्य हेतुत्वमवगन्तुं शक्यत इत्यर्थः । "लक्षणहेत्वोः क्रियायाः" इति (पा०) शतृप्रत्ययस्योत्पत्तिविधाने इति किमिति हेतुत्वमेव न स्यादिति? तत्राह अन्यथेति । अभावरूपस्य कार्य्यस्य भावरूपमेव कारणमिति प्रत्यक्षादिभिरवगतं शतृप्रत्ययादभावस्य हेतुत्वविधाने सर्वप्रमाणविरोधः स्यादित्यर्थः" ।

ननु तदाप्यकरणस्य प्रत्यवायजनकत्वमिष्टम् । भाट्टैश्च नुपपत्त्या तादृशाभावो हेतुत्वमिष्यते । तार्किकैश्च प्रतिबन्धकाभावस्य तत्संसर्गाभावस्य च तत्तत्कार्य्यजनकत्वादङ्गीक्रियते तस्य भावस्यैव कारणत्वम् तद्वत् । "भावो यथा तथाभावः कारणं कार्य्यवन्मतम्" इति उच्यते । "प्रत्यभिज्ञादभावस्य स्वरूपेण कारणत्वं नेष्टं किन्तु तद्भावत्व प्रध्वंसाभावस्य । तत्र च रूपेण न [illegible] दाहजनकत्वमिष्यते । नित्याकरणस्थाने प्रत्यवायाभावप्रसङ्गात् । भाट्टानामपि च देवादिकल्पनया योग्यानुपलब्ध्याभावप्रतीतिहेतुत्वमिष्टं ज्ञानत्वतया तु प्रतीतिहेतुत्वेऽभावप्रमाया प्रत्यक्षापात । तार्किकाणामपि प्रतिबन्धकाभावस्य कारणत्वेऽन्योन्याश्रयप्रसङ्गात् मायाविलम्बनम् । प्रागभावस्यापि प्रागभावेन अन्यथासिद्धत्वमेव । दण्डादिव प्रागभावस्य हेतुत्वं ज्ञानमिति । न तु जनकत्वं प्रागभावस्य, नियतप्रागभावित्वेन कारणत्वे प्रागभावस्य कारणतापात । प्रागभावित्वमपि चान्यथासिद्धमिति तत्त्वालोके" ।

कार्य्यं त्रिविधं कार्य्यशब्दे उक्तम् । तत्र समवायिकारणोत्पाद्यं समवेतात्समुत्पादयमित्युच्यते तद्भिन्नं कार्य्यं कार्य्यौ गुणाद्यादिशब्देन व्यवह्रियते इति भेदः ।

कार्य्यकुशल त्रि० ७त० । कार्य्यक्षे क्रियादक्षे ।

कार्य्यचिन्तक त्रि० कार्य्यं चिन्तयति चिन्ति–ण्वुल् उप० स० । कर्त्तव्यविषये कृताकृतचिन्तके । "धर्म्मशा शुचयो ऽलुब्धा भवेयुः कार्य्यचिन्तकाः" याज्ञ० ।

कार्य्यता स्त्री कार्य्यस्य भावः तल् । कर्त्तव्यताया कृतिसाध्यतायाम् । स्वकार्यत्वमतार्थे म०गुरुमते यथा च तज्ज्ञानस्यैव प्रवर्त्तकत्व तथा शब्दचि० गुरुमतप्रदर्शने दर्शितं यथा । "कार्य्यत्वज्ञानं प्रवर्त्तकमिति गुरवः तथाहि सामग्र्या कृती जनयितव्याया चिकीर्षातिरिक्तं न कर्त्तव्यमस्ति तदुपस्थितिविषयकत्वेनान्तरभावात् । चिकीर्षा च कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयेच्छा पाकं कृत्या साधयामीति तदनुभवात् । सा च स्वकृतिसाध्यताज्ञानसाध्या इच्छाया स्वप्रकारकधीसाध्यत्वनियमात् अतएव स्वकृति-

तत्कृतिसाध्योऽचिकीर्षितत्वात् कृते खञ्जप्रयाणाद्-कारातिरिक्ते चिकीर्षाविषयमात्रे जनकत्वात् नहि भोजनादिचिकीर्षाधीनकृत्या गमनं साध्यत इति केचित् तन्न गुरुतरभारोत्तोलने कायसाध्ये श्रमात् पृष्ठस्य निगडनियन्त्रितदेहस्य वा कृतौ सत्यामपि चलनक्रियानुत्पादेऽपि श्रमानुभवात् कृतेरेव कारणत्वात्। न तु तज्जन्यक्रियायाः, सुखे व्यभिचाराच्च न हि सुखं कृतिसाधनचिकीर्षाविषय उपायचिकीर्षाजन्या हि कृतिः न तु सुखचिकीर्षाजन्या। चिकीर्षाजन्यकृतिसाध्यत्वं न श्रमे, उपयोनियत्नादपि तदुत्पत्तेरित्यपरे तन्न यत्नु श्रथवेष्टसाधनत्वेन चिकीर्षाजन्यकृतिसाध्यत्वात् द्वेषस्य यत्नाजनकत्वात् द्वेषविहितेषु यत्नु द्वेषीत्यबाधितानुभवत्वात्। यस्तु श्रमः कृतित्वेन कृतिसाध्यो न चिकीर्षाधीनकृतित्वेन, यद्यचिकीर्षितेऽपि श्रमे चिकीर्षाधीनकृतित्वेन कारणता स्यात्तदा चिकीर्षितमेव भोजनं कृत्या साध्यते नाचिकीर्षितं गमनादीति न स्यात् श्रमवद्गमनेऽपि तज्जन्यत्वप्रसङ्गात्। भोजनादिषु चिकीर्षाधीनकृतिविशेषात् नहि कृतिमात्रं व्यभिचरति जीवयोनिकृतेरुदत्तत्वादात्। यद्वा श्रमो न भोजनकृतिसाध्यः किन्तु तदितरकरोत्पन्नाज्जीवनयोनियत्नादेवेति तन्न नहि कृतित्वेन श्रमजनकत्वं नापि कृत्यन्तरादेव श्रमोत्पत्तिः जीवनयोनियत्नेन चापि शरीरोद्वहनादि कर्म कुर्वतस्तादृशश्रमानुभवेन तस्य श्रमाजनकत्वात्। तथाभोजनादिवत् श्रमविशेषाणामपि भोजनादिकृतिसाध्यत्वमनन्यगतिकत्वात्। सुप्तस्य स्वेदादाविव श्रमस्तज्जन्य इति चेत् न स्वेदादेः श्रमाभ्यहेतुकत्वात् अन्यथा जागरेऽपि तदनुवृत्तौ श्रमानुवृत्तिप्रसङ्गादिति नैवं स्वेच्छाधीनत्वस्य कृतिविशेषणत्वात्। श्रमस्य नियमतोऽनिच्छाधीनकृतिसाध्य श्रमे तु त्वरेण इच्छाविरहात्। अतएवान्येच्छाजन्यकृतिसाध्यत्वेन तत्प्रमाणान्तरीयकं दृश्यते। स्वचिकीर्षाधीनत्वन्तु न कृतौ विशेषणं, गौरवात्। अन्ये तु कृतिगतधर्मान्तरभेदोद्दिष्टत्व तद्विशिष्टकृतिसाध्यत्व न श्रमे अचिकीर्षितत्वात् किन्तु कृतिमात्रसाध्य अतएव कष्टं कर्मेत्युभयोर्लोकानाम्। एवं चिकीर्षायां ममैव 'कृतिसाध्यत्वं' प्रयोजकं तत्र तु कृतिसाध्यत्वे सतीष्टसाधनस्य सुखस्य दुःखाभावस्य चेति चतुष्टयम् इच्छाप्रयोजकन्तु मम सुखस्य दुःखाभावस्य चेति इव इष्टसाध्ये सुखे केच्छा घटिमपि विपर्यीकरोति। बलवदनिष्टसाधनत्वेन तदिच्छासाधनत्वस्य इच्छाविरोधित्वात्

तत्र तु तत्र विषभक्षणे कृतिसाध्यत्वेऽपि बलवदनिष्टसाधनत्वेन चिकीर्षा नास्तीति कृतौ चिकीर्षाजन्यत्व विशेषणमिति कश्चित् तन्तुच्छं विषभक्षणे कृतिसाध्यत्वमेव न स्यात् जीवनयोनिकृतेस्तत्रानुत्पत्तेरिति व्यर्थविशेषणम्। एतेन इष्टसाधनताज्ञानादिविषभक्षणे चैत्यवन्दने च चिकीर्षाजन्यकृतिसाध्यत्वमस्ति प्रागप्रयुक्तत्वात् कार्यत्वस्य, तथाच सञ्जातबाधोऽपि तत्र कार्यज्ञानात् प्रवर्त्तेत तथा तृप्तोऽपि भोजने तद्व कृतिसाध्यतानुभवत्तथा, अन्यथेष्टसाधनताज्ञाने विषभक्षणेऽपि प्रवर्त्तेत। नचेष्टसाधनताज्ञानभेदो यादृशभावकोऽस्त्विति चेत् न वस्तुतस्तस्य कृतिसाध्यत्वे सिद्धान्तरेणाप्रवाहकाभावे वा सदनुभवायश्रयात् सिद्धाभावाच्च तद्वा प्रवृत्तिप्रसङ्गाच्च भेदापत्तेरादिनत्त्वान्न तदनुभवाभावात् चैत्र स्वविशेषणवत्तामतिसन्धान जन्य हि कार्यताज्ञानं प्रवर्त्तकं तथाहि काम्ये पुरुषविशेषणं कामना तत काम्यसाधनाज्ञानेन यागपाकादौ कार्यताज्ञानं नित्ये च कालशौचादि स्वविशेषणं तथाचैतत्सन्ध्यायामहं कृतिसाध्यसन्ध्यावन्दनः सन्ध्याकाले शौचादिमत्त्वात् पूर्वसन्ध्यायामहमिवेति, कार्यताज्ञानं शौचादिस्वविशेषणज्ञानजन्यम्। तदुक्तं "स कार्यविशेषः पुरुषविशेषभावगत प्रवृत्तिहेतुरिति"। सञ्जातबाधस्य च विषभक्षणे चैत्यवन्दने च श्रमद्वयोरपि नेष्टसाधनताज्ञानमस्ति येन तज्जन्यकार्यताज्ञानात् प्रवर्त्तेत। तृप्तस्य च तृप्तौ कामनादिरहेष्टसाधनताज्ञानाभावान्न तथा बोध। अन्ये त्वात्मनो जीवत्वप्रतिसन्धानजन्य श्रमे कृतिसाध्यताज्ञानं न सम्भवतीति जीवनव्यतिरिक्तत्व स्वविशेषणे विशेषणमिति, तन्न श्रमे स्वेच्छाधीनकृतिसाध्यत्वज्ञानाभावेन साध्यत्वाभावात्। इष्टसाधनताभिन्नं कार्यताज्ञानं प्रवर्त्तकमित्यपरे तन्न भिन्ने तदभावात्। ननु विषभक्षणव्यावृत्तमिष्टसाधनत्वमेव कृतिसाध्यताज्ञाने विषयतया विशेषणमस्तु स्वविशेषणवत्ताज्ञानजन्यत्वापेक्षया लघुत्वात्। किञ्चोपायविषया चिकीर्षा इष्टसाधनताज्ञानसाध्या उपायेच्छावत् इष्टेच्छावत्। भोगचिकीर्षाया तदभावादप्रयोजकमिष्टसाधनत्वमिति चेत् न तथापि स्वविशेषणधीजन्यत्वाभावेन तत्र तस्याप्रयोजकत्वात् कृतिहेतुचिकीर्षाया तत्प्रयोजकं न भोगचिकीर्षायां तथा, उपायचिकीर्षातएव कृतित्वप्रवादिति चेन्न तुल्यमिति नैव साध्यत्वसाधनत्वयोर्विरोधेनैकत्र ज्ञातुमशक्यत्वात् असिद्धावस्थस्य हि साध्यत्वं, सिद्धतादशायां तदभावात् सिद्धतादशायाञ्च साधनत्वम्

[illegible]

[illegible]

[illegible] क्रिया- [illegible]

[illegible] क्रियाविशेषण [illegible]

[illegible]

संयोगादिसाध्यकप्रवृत्तौ दण्डाद्युपादानकप्रवृत्तित्वेन तदुपादानकप्रवृत्तिसामग्र्याः घटादिसाध्यकप्रवृत्तिसामग्र्यपेक्षया विशेषसमाजविरहात् दण्डोपादानकप्रवृत्तिर्नापि कपालोपादानकघटसाध्यकप्रवृत्त्या घटसाध्यकप्रवृत्तित्वेन तदुपादानकप्रवृत्तिसामग्र्या घटादिसाध्यकप्रवृत्तिसामग्र्यपेक्षया सामान्यसामग्रीविरहादिति चेन्न सामग्र्याः सामान्यविशेषभावानापन्नत्वेऽपि दण्डचक्रादिसाद्यन्यतमोपादानकप्रवृत्त्यतिरिक्ताया घटादिसाध्यकप्रवृत्तेरसत्तया तादृशान्यतमोपादानकप्रवृत्तिसामग्रीविरहादेव तादृशान्यतमोपादानकप्रवृत्त्यभावदशायां तदनुत्पत्तेः तद्धर्मावच्छिन्नयत्किञ्चिद्व्यक्तिसामग्रीसहिताया एव तद्धर्मावच्छिन्नसामग्र्यास्तद्धर्मावच्छिन्नकार्योपधायकत्वात् इदमेव च कारणसमाजाधीना कार्योत्पत्तिरिति गीयते । एतेन घटादिचिकीर्षाविरहेऽपि दण्डयोगमत्त्वात् दण्डोपादानकप्रवृत्त्यापत्तिस्तदवच्छिन्नस्य सत्त्वादित्यपि निरस्तम् संयोगभ्रम्याद्यन्यतमसाध्यकप्रवृत्त्यतिरिक्ताया दण्डोपादानकप्रवृत्तेरलीकतया तादृशान्यतमसाध्यकप्रवृत्तिसामग्रीविरहादेव तदनुत्पादात् कार्योत्पत्तेः कारणसमाजाधीनत्वात् । वस्तुतस्तु उपादानप्रत्यक्षस्य हि स्वातन्त्र्येण न हेतुता किन्तु घटादिचिकीर्षाया दण्डाद्युपादानकत्वौत्सर्गिकत्वाच्च कारणस्य च सत्त्वेऽपि दण्डादौ घटसाधनताज्ञानाभावदशायां घटसाध्यकदण्डोपादानकप्रवृत्तिवारणाय दण्डोपादानकचिकीर्षाविषयघटादिसाधनताज्ञानस्यापि घटादिसाध्यकदण्डाद्युपादानकप्रवृत्तित्वावच्छिन्नं प्रति न्यायमते परमते च विशेषकारणत्वावश्यकत्वात्तदेव चिकीर्षाविषयसाधनताज्ञानमुपादानगोचरलौकिकप्रत्यक्षात्मकं हेतुरुपेयते कार्यकारणभावद्वयकल्पनामपेक्ष्य लाघवात् । न च घटसाध्यककपालोपादानकघटध्वंससाध्यकदण्डोपादानकप्रवृत्तौ दण्डनिष्ठघटसाधनताज्ञानस्य हेतुत्वात् तत्र व्यभिचारवारणाय घटत्वावच्छिन्नसाध्यतानिरूपितदण्डत्वावच्छिन्नोपादानतावच्छिन्नप्रवृत्तित्वमेव कार्यतावच्छेदकमुपेयम् तथा च दण्डत्वावच्छिन्नोपादानतानिरूपितघटत्वावच्छिन्नसाध्यतावत्प्रवृत्तित्वमादाय विनिगमनाविरहोऽस्त्येवापि गुरुतरकार्यकारणभावद्वयमावश्यकमिति वाच्यम् दण्डाद्युपादानकचिकीर्षाविषयघटसाधनताज्ञानस्य घटादिसाध्यकदण्डाद्युपादानकप्रवृत्तिं प्रति विशेषकारणत्वावश्यकतया विनिगमनाविरहात् तादृशकार्यकारणभावद्वयस्य सर्वसंमत-

त्वात् । इत्थं च विशेषसामग्रीविरहादेव उपादानप्रत्यक्षाभावदशायां न घटादिसाध्यकप्रवृत्त्युत्पत्तिप्रसङ्गः । एतेन घटादिनिष्ठचिकीर्षाविरहेऽपि दण्डगोचरप्रत्यक्षात् दण्डनिष्ठघटसाधनताज्ञानात् विशेषसामग्रीसत्त्वात् दण्डोपादानकप्रवृत्त्यापत्तिस्तदवच्छिन्नसामग्रीसत्त्वादिति हितव्याप्तिप्रसङ्गोऽपि निरस्तः, केवलदण्डोपादानकप्रवृत्तित्वस्य कार्यतानवच्छेदकत्वात् घटादिसाध्यकदण्डाद्युपादानकप्रवृत्तेर्घटादिनिष्ठचिकीर्षाजन्यघटादिसाध्यकप्रवृत्तिसामान्यसामग्रीविरहादेवासम्भवादिति प्रकृतम् । अथ प्रत्यक्षविषयकपालव्यक्तौ इदं न कपालमित्यप्रमाप्रत्यक्षत्वेऽपि कपालत्वप्रकारेण कपालं घटसाधनमिति कपालत्वावच्छिन्नविषयकत्वाच्छेदकत्वकपालविषयकलौकिकप्रत्यक्षात् कपालत्वप्रकारेण तत्कपालोपादानकप्रवृत्त्यापत्तिः । न च कपालत्वप्रकारेण तद्व्यक्तौ वृत्तिविषयप्रवृत्तिरिति वाच्यम् अनुभवविरोधादिति चेन्न तदुपादानतावच्छेदकीभूतधर्मितावच्छेदकतदुपादानविशेष्यकप्रत्यक्षस्य घटसाधनमित्याकारस्य या तत्तदुपादानतावच्छेदकतदुपादानकप्रवृत्तिं प्रति हेतुत्वेन निर्धर्मितावच्छेदकताकप्रत्यक्षस्याहेतुत्वात् । नचैवमिदं घटसाधनमिति लौकिकप्रत्यक्षादिदन्त्वप्रकारेणेदमुपादानकप्रवृत्तिर्न स्यात् तस्य इदन्त्वांशे निर्धर्मितावच्छेदकत्वादिति वाच्यम् उपादानतावच्छेदकभेदेन कार्यकारणभावभेदादिदन्त्वस्याने निर्धर्मितावच्छेदकज्ञानस्यापि प्रवर्तकत्वात् इदमिदं नेत्यप्रमाप्रत्यक्षसम्भवेन तत्रापि प्रसङ्ग-विरहादित्यास्तां विस्तरः । चिकीर्षा चेति व्यापारीभूतचिकीर्षा चेत्यर्थः । अन्यथा चिकीर्षासामान्यस्य लक्षणे फलचिकीर्षायामतिव्याप्तिवारक कर्तृसाध्यान्वयक्रियाविषयत्व विशेषण व्यर्थं स्यादित्यनुपदमेव स्फुटीभविष्यति । कर्तृसाध्यत्वप्रकारकेति । अत्र फलचिकीर्षाया व्यापारत्वाभावेन तत्र यावत्तत्रातिव्याप्तिवारणाय कृतिसाध्यक्रियेति क्रियापदं धर्मिमात्रपरम् कृतिसाध्यत्वस्य साध्यत्वाख्यफलीभूतविषयतायामिवत्त्व तथा च स्वसाध्यत्वाख्यफलीभूतकृतिविषयताशालिधर्मिविषयकत्वार्थः फलस्य न तादृशविषयताशालीति भावः । केचित्तु क्रियापदमेव साध्यत्वाख्यफलीभूतकृतिविषयताशालिपरम् न चैवं पृथक् कृतिसाध्यत्वस्य क्रियाविशेषणं व्यर्थमिति वाच्यं कृतिसाध्यत्वप्रकारकज्ञानस्य व्यापारीभूता या चिकीर्षा सैव प्रकृते लक्ष्या सा च यागादिनी चिकीर्षैव, विष-

न मानाभावेन गौरवेऽपि तस्याप्रसिद्धेः । पाकमात्रं पक्ष इति चेत् न मात्रार्थो यदि पाकत्वं तदा बाधो सङ्कासिद्धिः। सर्व्वपाकपरत्वे च तस्य सिद्धपाकभागे बाधः, अनागतभागे चाश्रयासिद्धिः । वर्त्तमानाद्युदासीनः पाक पक्ष पाकसामान्ये च कृतिसाध्यत्वं बाधितमित्यनेन सिद्धस्य पक्षत्वं नासिद्धस्येत्यनुमितेश्च सिद्धविषयत्वे बाधात् असिद्धविषयत्वे चासिद्धविषये स्वप्रवृत्त्यनुत्पादकत्वात् । कृतक्रियमाणसाधारणकृतिसाध्यताज्ञानादेवासिद्धविषया चिकीर्षा कृतिश्चोत्पद्यते अनन्यगतिकत्वेन तथा कारणत्वस्य कल्पनादिति चेत् तर्हि यादृश कृतिसाध्यत्व चिकीर्षायां प्रकारः तादृश ज्ञाने नास्तीत्यन्यप्रकारक ज्ञानादेव चिकीर्षा स्यात् । तथा च सिद्धज्ञानमेव प्रवृत्ति हेतुरस्तु लाघवात्। यत्तु कृतपाके न कृतसाध्यत्वासंसर्गाग्रहात् प्रवृत्तिः, अन्वयासंसर्गाग्रह इष्टसाधनताज्ञानादिति तन्न कृतपाकस्य सिद्धत्वेन तत्र कार्य्यत्वासंसर्गाग्रहात्तु न बाधात् । कृतपाकस्य सिद्धत्वं तदा न गृह्यते इति चेत् तर्हि कृतपाकस्य सिद्धत्वग्रहे ओदनार्थी पाके न प्रवर्त्तेत सिद्धौदनोऽपि पाके तृप्तोऽपि भोजने प्रवर्त्तेत। ननु तत्र पाकादौ सिद्धत्वग्रहात् तदसंसर्गाग्रह इति चेन् तुल्यम्। अपि च कृतपाके कार्य्यत्वासंसर्गाग्रहा इव मानासंसर्गाग्रहादिव वादिनो प्रवृत्तिः स्यात् । किञ्च सिद्धपाकज्ञानादज्ञानेऽसिद्धे पाके इच्छाप्रवृत्ती स्यातामिति । अत्र ब्रूमः । पाके कृतिसाध्यत्वं सिद्ध्यत् सिद्धे बाधादनागत पाकमादाय सिद्ध्यति । पक्षतावच्छेदकधर्म्मसामानाधिकरण्य साध्यमानस्य सिद्धे न सिद्ध्यतीत्यनुमाने कृप्तत्वात् यथा प्रसिद्धवह्निबाधेऽपि वह्निमात्रं न बाधितमित्यप्रसिद्धोऽपि वह्निः सिध्यति । अप्रसिद्धयो पक्षसाध्ययोः सिद्धावविशेषात् तस्मात् "असिद्धस्य क्वचित् सिद्धे सिद्धे सिद्धस्य च क्वचित् । अप्रसिद्धस्य चासिद्धे सिद्धिस्तेनात्मना त्रिधा" । अन्यथा कृतिसाध्येष्टसाधनतापक्षेऽपि पाकादौ कृतिसाध्यत्वं कथमवगम्यते?। किञ्च तथापीष्टसाधनताज्ञानात् कथं सुखादाविच्छा? सिद्धत्वस्येच्छाविरोधित्वादनागतस्य ज्ञातुमशक्यत्वात् । अतएव सिद्धासिद्धविकल्पनिरासेन सुखादिज्ञानात् फलेऽपि नेच्छेति न इच्छादाविष्टसाधनतापि । न च इच्छादिसाधनज्ञानादिच्छादाविच्छा इच्छाया सिद्धासिद्धत्वादितत्फलविषयकत्व विकल्पपातात्। अथ सामान्यलक्षणाप्रत्यासत्त्या इच्छादित्वेन सुखादित्वेन च सिद्धासिद्धेच्छादितत्फलविषयकज्ञान सम्पन्नं तेन सिद्ध विरोधिन त्यक्त्वाऽसिद्धविषयेच्छोत्पद्यते । यदि च सामान्यलक्षणा नास्ति तदा येन रूपेण इष्टसाधनताग्रहस्तेन रूपेण ज्ञातेऽसिद्धे चेच्छोत्पद्यते अन्वयव्यतिरेकाभ्यां तादृशज्ञानस्य तादृशेच्छाजनकत्वावधारणात्। सुखेच्छायामप्येवमिति चेत तर्हि ममापि पाकत्वावच्छेदेन कृतिसाध्यताज्ञानादनागते चिकीर्षा । तच्च ज्ञान सकलपाकविषयं वह्निकरपाकविषयं वेत्यन्यदेतत् । बालस्य चाद्यप्रवृत्तेर्जीवनादृष्टोद्बोधितजन्मान्तरीयसंस्कारजन्यात् स्तनपानं कार्य्यमिति स्मरणात् तस्य चेष्टसाधनतास्मरणात्तत्र प्रवृत्तिरनन्यगतिकत्वात् । न च जन्मान्तरेऽपि पर्य्यनुयोगः, जन्मधारावा अनादित्वात् । प्रत्यक्षानुमानमूलत्वाच्च नान्वयपरम्परा। वस्तुतस्तु शुष्ककण्ठतया बालो दुःखमनुभवन् विरोधितया सुखं स्मरति तत्र सुखवृत्ति कार्य्यत्वं सुखवृत्तितया अन्तरङ्गत्वात् नातु स्तनपानमिष्टसाधनमिति स्मरेत् सुखावृत्तित्वेन बहिरङ्गत्वात् । सुखकार्य्यत्वञ्च स्तनपानद्वारा जन्मान्तरानुभूतमिति कार्य्यत्व स्मरणे स्तनपानमपि विषयः तेन स्तनपाने कार्य्यत्वज्ञानादेव प्रवृत्तिः इष्टसाधनताज्ञानस्य तदानीं सामग्र्यभावात् । एवञ्चाद्यप्रवृत्तौ कार्य्यताज्ञानं प्रयोजकं क्लृप्तमित्यग्रेऽपि तदेव प्रवर्त्तकं लघुत्वात्" ।

अत्र दिङ्मात्रं मथुरानाथव्याख्या प्रदर्श्यते ।

"कार्य्यताज्ञानमिति कृतिसाध्यताज्ञानमित्यर्थः, न च कृतिसाध्यताज्ञानं विनापि घटयागपाकादिकर्त्तुस्तदुपायकपालहविस्तण्डुलादिसिद्धविषयकप्रवृत्तिदर्शनाद्व्यभिचार इति वाच्यं प्रवृत्तेर्हि विषयता त्रयी एका साध्यत्वाख्यविषयता सा च यन्निष्ठकृतसाध्यताज्ञानचिकीर्षादिना प्रवृत्तिस्तन्निष्ठा, तच्च घटयागपाकादावेव न तु तज्जनकीभूतकपालहविस्तण्डुलादिसिद्धनिष्ठा अतएव घटं करोमि यागं करोमीत्याद्येवानुव्यवसायो । न तु कपालहविरादे सिद्धतादशायां कपालं करोमि हवि करोमीत्याद्यनुव्यवसायः व्यवहारो वा कृतिवाचिधातुयोगिद्वितीयाया साध्यताख्यविषयतार्थकत्वनियमात् । न च साध्यताख्याया एव विषयताया कृतिवाचिधातुयोगिद्वितीयार्थत्वनियमे कपालतन्त्वादेः सिद्धतादशायां कपालं करोति तन्तुं करोतीत्यादि व्यवहाराभावेऽपि कपालं घटवत् करोति, तन्तुं पटवत् करोतीत्यादि व्यवहारोऽपि न स्यादिति वाच्यं साध्यत्वविशिष्टबोधकपदासमभिव्याहृतकृतिवाचिधातुयोगिद्वितीयाया एव तथानियमात् तत्र कपालादि-

संयोगादिसाध्यकप्रवृत्तौ दण्डाद्युपादानकप्रवृत्तित्वेन तदुपादानकप्रवृत्तिसामग्र्या घटादिसाध्यकप्रवृत्तिसामग्र्यपेक्षया विशेषसामग्रीविरहात् दण्डोपादानकप्रवृत्तित्वेनापि कपालोपादानकघटसाध्यकप्रवृत्त्या घटसाध्यकप्रवृत्तित्वेन तदुपादानकप्रवृत्तिसामग्र्याः घटादिसाध्यकप्रवृत्तिसामग्र्यपेक्षया सामान्यसामग्रीविरहादिति चेन्न सामग्र्याः सामान्यविशेषभावानापन्नत्वेऽपि दण्डचक्रादितादात्म्यसमोपादानकप्रवृत्त्यतिरिक्ताया घटादिसाध्यकप्रवृत्तेरसत्त्वतया तादृशान्यतमोपादानकप्रवृत्तिसामग्रीविरहादेव तादृशान्यतमोपादानकप्रवृत्त्यभावदशायां तदनुत्पत्तेस्तदन्यतमत्वावच्छिन्नयत्किञ्चिद्व्यक्तिसामग्रीमहिम्ना या एव तदवच्छिन्नसामग्र्यास्तद्धर्मावच्छिन्नकार्योपधायकत्वात् इदमेव च कारणसमाजाधीना कार्योत्पत्तिरिति गीयते । एतेन घटादिचिकीर्षाविरहेऽपि दण्डगोचरप्रत्यक्षात् दण्डोपादानकप्रवृत्त्यापत्तिस्तदवच्छिन्नस्य प्रत्यादिकमपि निरस्तं संयोगभ्रम्याद्यन्यतमसाध्यकप्रवृत्त्यतिरिक्ताया दण्डोपादानकप्रवृत्तेरसत्त्वतया तादृशान्यतमसाध्यकप्रवृत्तिसामग्रीविरहादेव तदनुत्पादात् कार्योत्पत्तेः कारणसमाजाधीनत्वात् । वस्तुतस्तु उपादानप्रत्यक्षस्य हि स्वातन्त्र्येण न हेतुता किन्तु घटादिनिर्माणचिकीर्षाया दण्डाद्युपादानकलौकिकप्रत्यक्षस्य च सत्त्वेऽपि दण्डादौ घटसाधनत्वज्ञानाभावदशायां घटसाध्यकदण्डोपादानकप्रवृत्तिवारणाय दण्डोपादाननिष्ठचिकीर्षाविषयघटादिसाधनताज्ञानस्यापि घटादिसाध्यकदण्डाद्युपादानकप्रवृत्तित्वं प्रति न्यायनये परमते च विशेषकारणत्वावश्यकत्वात्तदेव चिकीर्षाविषयसाधनताज्ञानमुपादानांशे लौकिकप्रत्यक्षात्मक हेतुरूपेयते कार्यकारणभावद्वयकल्पनामपेक्ष्य लाघवात् । न च घटसाध्यककपालोपादानकघटध्वंससाध्यकदण्डोपादानकप्रवृत्त्यन्यतमप्रवृत्तौ दण्डनिष्ठघटसाधनताज्ञानस्य हेतुत्वात् तत्र व्यभिचारवारणाय घटत्वावच्छिन्नसाध्यतानिरूपितदण्डत्वावच्छिन्नोपादानताशालिप्रवृत्तित्वमेव कार्यतावच्छेदकमेव तथाच दण्डत्वावच्छिन्नोपादानतानिरूपितघटत्वावच्छिन्नसाध्यताशालिप्रवृत्तित्वमादाय विनिगमनाविरहात्तयोः पृथक्कार्यकारणभावद्वयमावश्यकमिति वाच्यम् दण्डाद्युपादाननिष्ठचिकीर्षाविषयघटसाधनताज्ञानस्य घटादिसाध्यकदण्डाद्युपादानकप्रवृत्तिं प्रति विशेषकारणत्वावश्यकतया विनिगमनाविरहात् तादृशकार्यकारणभावद्वयस्य सर्वसम्मतत्वात् । इत्थं च विशेषसामग्रीविरहादेव उपादानप्रत्यक्षाभावदशायां न घटादिसाध्यकप्रवृत्त्युत्पत्तिप्रसङ्गः । एतेन घटादिनिर्माणचिकीर्षाविरहेऽपि दण्डगोचरप्रत्यक्षात् दण्डनिष्ठघटसाधनताज्ञानात् विशेषसामग्रीसत्त्वात् दण्डोपादानकप्रवृत्त्यापत्तिः कदाचिद्विशेषसामग्रीसत्त्वादिति द्वित्यातिप्रसङ्गोऽपि निरस्तः, केवलदण्डोपादानकप्रवृत्तित्वस्य कार्यतानवच्छेदकत्वात् घटादिसाध्यकदण्डाद्युपादानकप्रवृत्तेश्च घटादिनिर्माणचिकीर्षाजन्यघटादिसाध्यकप्रवृत्तिसामान्यसामग्रीविरहादेवाभावादिति न दोषः । अथ घटजनकविषयकपालव्यक्तौ घटः न कपालमित्यनुभवसाक्षिकत्वेऽपि कपालत्वप्रकारेण कपाले घटसाधनमिति कपालत्वांशे निर्धर्मितावच्छेदककतत्कपालविषयकलौकिकप्रत्यक्षात् कपालत्वप्रकारेण तत्कपालोपादानकप्रवृत्त्यापत्तिः । न च कपालत्वप्रकारेण तद्बुद्धौ घटाविषयत्वापत्तिरिति वाच्यम् अनुभवविरोधादिति चेन्न तदुपादानतावच्छेदकांशे इदन्त्वधर्मितावच्छेदककतदुपादानविशेष्यकप्रत्यक्षस्येदं घटसाधनमित्याकारस्य वा तत्तदुपादानतावच्छेदककतदुपादानकप्रवृत्तिं प्रति हेतुत्वेन निर्धर्मितावच्छेदकज्ञानस्याहेतुत्वात् । नचैवमिदं घटसाधनमिति लौकिकप्रत्यक्षादिदन्त्वप्रकारेणैव तदुपादानकप्रवृत्तिः स्यात् तस्य इदन्त्वांशे निर्धर्मितावच्छेदककत्वादिति वाच्यम् उपादानतावच्छेदकभेदेन कार्यकारणभावभेदादिदन्त्वस्यापि निर्धर्मितावच्छेदककस्यापि प्रवर्तकत्वात् इदमिदं नेत्यनुभवसाक्षिकत्वेन तत्रापि एतत्प्रविरहादित्यास्तां विस्तरः । चिकीर्षा चेति व्यापारीभूतचिकीर्षा चेत्यर्थः । अन्यथा—'चिकीर्षासामान्यस्य लक्षणे' । तत्र फलचिकीर्षायामतिव्याप्तिवारक कृतिसाध्यक्रियाविषयत्व विशेषणं व्यर्थं स्यादित्यनुपदमेव स्फुटीभविष्यति । कृतिसाध्यत्वप्रकारिकेति । अत्र फलचिकीर्षाया व्यापारत्वाभावेन तत्र वास्तवातिव्याप्तिवारणाय कृतिसाध्य'क्रियेति क्रियापदं धर्मिमात्रपरम् कृतिसाध्यस्य साध्यत्वाख्यफलीभूतविषयताशालित्वम् तथा च स्वसाध्यफलीभूतकृतिविषयताशालिधर्मिविषयिकत्वार्थं फलस्य न तादृशविषयताशालित्वमिति भावः । केचित्तु क्रियापदमेव साध्यत्वाख्यफलीभूतकृतिविषयताशालिपरम् न चैवं पृथक् कृतिसाध्यत्व क्रियाविशेषणं व्यर्थमिति वाच्यं कृतिसाध्यत्वप्रकारकज्ञानस्य व्यापारीभूता या चिकीर्षा सैव प्रवर्तिका सा च यागादिनो चिकीर्षैव, विध-

बाध्यतानिर्णयस्य प्रतिबन्धकत्वेऽपि यत्र कारणान्तरा-
भावादिष्टसाधनताज्ञाने कृतिसाध्यत्वस्य न भानं तत्र
कथं चेष्टसाधनताज्ञानाच्चिकीर्षोत्पत्तेर्दुर्वारत्वाच्च इत्यपि
बोध्यम्। उक्तनियमभङ्गस्यैव तटस्थ गद्यते अयेतीति।
अभाव—कृत्यसाध्यतानिश्चयाभाव। उभयसिद्धः—चिकी
र्षापूर्व्वमुभयसिद्ध, असिद्धा—चिकीर्षापूर्व्वमुभयासिद्धा। न
चापवादस्य इति कृतिसाध्यताज्ञानस्य सदपि चापव
न कारणतावच्छेदकतायां विनिगमकम् इत्यर्थः लघु गुरु-
धर्म्मद्वयावच्छिन्न यदि फलपूर्व्वमुभयवादिसिद्ध तदैव
लाघवस्य कारणतावच्छेदकतायां विनिगमकत्वादिति भाव।
दैवात्प्रतिबन्धकविरहात्। सा—चिकीर्षापूर्व्वं कृतिसाध्य-
साधी। लाघवावतारादिति कृतिसाध्यताज्ञानत्वरूपलघु
धर्म्मावच्छिन्नस्य चिकीर्षापूर्व्वमुभयमते सत्त्वादित्यर्थः।
इच्छाया इति तत्प्रकारकसवादीच्छायास्तत्प्रकारक
ज्ञानजन्यतानियमेनेत्यर्थः। आवश्यकत्वात्—चिकीर्षा
हेतुत्वावश्यकत्वात् अपि च कृत्यसाध्यताज्ञानप्रतिबन्ध
कतान्यथानुपपत्त्या कृतिसाध्यताज्ञानस्य चिकीर्षाहेतुता
सिद्धिरित्याह जनकज्ञानमिति। तज्जनकीभूतज्ञान
विघटकस्यैव ज्ञानस्य विधिप्रतिबन्धकत्वाङ्गीत्यर्थः। अत्र
व्याप्तौ दृष्टान्तमाह व्याप्तिज्ञानविघटनद्वारेति अनुमिति
जनकव्याप्तिज्ञानविघटनेनेत्यर्थः। तथा च यत् यत्प्रति-
बन्धकं ज्ञानं भवति तत्तज्जनकज्ञानविघटकं यथा
व्यभिचारज्ञानमनुमितिप्रतिबन्धकं ज्ञानं भवत् अनु
मितिजनकव्याप्तिज्ञानविघटकमपि भवति इति सामा
न्यतो व्याप्त्या कृत्यसाध्यतानिश्चयस्य चिकीर्षाप्रतिब
न्धकज्ञानत्वेन हेतुना चिकीर्षाजनकज्ञानविघटकत्वसा
धने पक्षधर्म्मताबलात्कृतिसाध्यताज्ञानस्यैव चिकीर्षाजन-
कत्वसिद्धिरिति भावः। न च जनकज्ञानविघटकत्वे मा-
ऽन्यथासिद्धतया तदभावस्याहेतुत्वात् स्वरूपासिद्धिर्दृष्टान्ता
सिद्धिश्च इति वाच्य प्रतिबन्धकत्व हि न कारणीभूता-
भावप्रतियोगित्वम् किन्तु प्रयोजकीभूताभावप्रतियोगित्वम्।
प्रयोजकत्वं च कारणकारणव्यावृत्तान्यथासिद्धिचतुष्टय-
राहित्ये सति नियतपूर्व्ववर्त्तित्वम्—कारणतत्कारणसाधा-
रणम्। हेतौ ज्ञानपदोपादानादेव च विषयान्तरसञ्चारादौ
न व्यभिचार। साध्य च ज्ञानपदं स्वरूपकथनम्। विघट
कत्वञ्च प्रतिबन्धकत्वमेव तत्त्वेककालावच्छेदेन तदधिकरणा
वृत्तित्वरूपविरोधित्व गुरुमतेऽधिकरणज्ञानरूपतया कृति
साध्यताज्ञानस्यापि कृत्यसाध्यताज्ञानाभावस्य ज्ञानात्मकस्य

विरोधितया सिद्धसाधनापत्ते। नचासाधुत्वज्ञाने साधु-
त्वज्ञानाजन्यशाब्दधीप्रतिबन्धके व्यभिचार इति वाच्यम्
निराकाङ्क्षत्वरूपासाधुत्वज्ञाने आकाङ्क्षाज्ञानमादाय
साध्यस्यापि सत्त्वात् असाधुत्वज्ञानत्व च प्रतिबन्धकत्वे मा-
नाभावात्। न च तथापि सिद्धौ व्यभिचार इति वाच्यम्
गुरुमते सिद्धेरप्रतिबन्धकत्वात तद्व्यावृत्तप्रतिबन्धकताया वा
हेतौ निवेशात्। अतएवासिद्धत्वज्ञानाजन्येच्छाप्रतिबन्धक-
सिद्धत्वज्ञानेऽपि न व्यभिचार तद्व्यावृत्तप्रतिबन्धकताया
एव हेतौ निवेशात् अनिष्टत्वनिश्चयस्यापि इच्छाहेतुत्वाद्वा।
अथ तथापि बाधसत्प्रतिपक्षादौ व्यभिचार। न च
तद्व्यावृत्तापि प्रतिबन्धकता हेतौ निवेशनीयेति वाच्यम्
कृत्यसाध्यताज्ञानाभावव्यभिचारज्ञानाभावयोरपि बाधा-
भावतयैव चिकीर्षानुमित्योः प्रयोजकतया स्वरूपासिद्धि
दृष्टान्तासिद्ध्योरापत्ते। न च साक्षाद्विरोधित्वे सती-
त्यनेन हेतुर्विशेषणीय इति वाच्यम् साक्षाद्विरोधित्व
हि न बाधाभावतद्व्याप्याद्यनवगाहित्व, प्रकृतेऽपि तद-
सिद्धे कृत्यसाध्यताज्ञानस्य चिकीर्षाप्रकारीभूतकृतिसाध्य-
त्वाभावावगाहित्वात् अतएव न कारणीभूताभावप्रति-
योगित्वमपि, प्रकृतेऽपि तदसिद्धे पूर्व्वपक्षिणा कृत्यसाध्यता
धिय साक्षादेव प्रतिबन्धकत्वाभ्युपगमात् न च हेतौ
प्रतिबन्धकज्ञानत्वपदेन ज्ञानत्वावच्छिन्नप्रतिबन्धकताशालित्व
विवक्षित बाधसत्प्रतिपक्षादेः निश्चयत्वेन प्रतिबन्धकत्वमिति
वाच्यम् प्रकृते तदसिद्धे उक्तयुक्त्या कृत्यसाध्यतानिश्च
यस्यैव पूर्व्वपक्षिमते प्रतिबन्धकत्वादिति चेन्न हेतौ स्वपाद्य-
विरोधावगाहिज्ञानभिन्नत्वेन यत्पदार्थविशेषणात्। स्वपद
प्रतिबन्धकज्ञानपरं चिकीर्षायाश्च ज्ञानभिन्नत्वादेव सपक्ष
स्वपाद्यविरोधावगाहित्वन्तु स्व यत्र यदभावतद्व्याप्य
तदवच्छेदकाद्यन्यतमावगाहिते तत्र तदवगाहित्व सत्यादि-
त्वेनापि हेतौ यत्पदार्थो विशेषणीय तेन इष्टभेदपक्षे
प्रवृत्त्यादिप्रतिबन्धके तद्वये न व्यभिचार। कृत्यादि-
प्रवृत्तौ विशिष्टज्ञानमेव हेतुरिति लाघवस्यादेव न तमा-
दाय व्यभिचार। न च तथापि कूटभ्रमपरामर्शलिङ्ग-
स्थले लिङ्गांशसंसर्गापेक्षेण दैङ्गिकांशसंसर्गापेक्षाधीनसवादी-
च्छाप्रवृत्तिप्रतिबन्धकेष्टभेदपक्षे जनकीभूतविशिष्टज्ञानविघ
टकत्वाभावाद्व्यभिचार इति वाच्यम् विशिष्टज्ञानस्य
सवादीच्छाप्रवृत्तिहेतुत्वेनाभावत्वा तत्सापेक्षाप्रवृत्त्योर्विष-
यान्तरविषयकत्वकल्पनेन सिद्धवादित्वस्य तैः स्वीकारादिति
दिक्। अन्यथा—एतादृशव्याप्त्यनङ्गीकारे। उपेक्षणीयत्वम्-

साध्यतानिर्वाहस्य प्रतिबन्धकत्वेऽपि यत्र कारणान्तरा-
भावादिरूपाधनताज्ञाने कृतिसाध्यत्वज्ञानं न भाव तत्र
फलेच्छासाधनताज्ञाने चिकीर्षापत्तेर्दुर्वारत्वात् इष्टसाध-
नोऽयम् । एतन्नियमनस्यैव इष्टत्व गदते घटोवोति ।
आह—कृतिसाध्यत्वाविषयताभाव । उभयसिद्धा—चिकी-
र्षोद्देश्यत्वयसिद्धः, असिद्धा—चिकीर्षोद्देश्यत्वमुभयासिद्धा । न
चाचचेत्तर इति कृतिसाध्यताज्ञानत्वस्य यदपि चाचर
न कारणतावच्छेदकतायां विनिगमकम् इत्थं लघु गुरु
धर्मद्वयापेक्षया यदि फलद्वयभयत्वादिविशिष्ट तदैव
कारणस्य कारणतावच्छेदकतायां विनिगमकता इति भाव ।
हेतावप्रतिबन्धकविरहात् । स—चिकीर्षापूर्वं कृतिसाध्य-
तादौ । साधकत्वादादिति कृतिसाध्यताज्ञानादुच्यते
धर्मोऽवच्छेदकत्व चिकीर्षापूर्वमुभयत्र सत्यादित्यर्थः ।
इच्छाया इति तत्प्रकारकसंशयादीच्छायास्तत्प्रकारक
ज्ञानसाध्यतानियमेनेत्यर्थः । असाधकत्वात्—चिकीर्षा
हेतुत्वाभावकत्वात् अपि च इष्टसाधनताज्ञानप्रतिबन्ध
कताश्रयानुपपत्त्या कृतिसाध्यताज्ञानस्य चिकीर्षाहेतुता
सिद्धिरित्याह सम्भवज्ञानमिति । तज्जनकीभूतज्ञान
विघटकस्यैव ज्ञानस्य विधिप्रतिबन्धकत्वाभ्युपगमे । अत्र
व्याप्तौ दृष्टान्तमाह व्याप्तिज्ञानविघटनद्वारेति अनुमिति
जनकव्याप्तिज्ञानविघटनेनेत्यर्थः । तथा च यत् यत्प्रति
बन्धकं ज्ञानं भवति तत्तज्जनकज्ञानविघटकं यथा
व्यभिचारज्ञानमनुमितिप्रतिबन्धकं ज्ञानं भवत् अनु
मितिजनकव्याप्तिज्ञानविघटकमपि भवति इति सामा-
न्यतो व्याप्त्या इष्टसाधनतानिश्चयस्य चिकीर्षाप्रतिब
न्धकज्ञानत्वेन हेतुना चिकीर्षाजनकज्ञानविघटकत्वसा
धने पक्षधर्मताबलात् कृतिसाध्यताज्ञानस्यैव चिकीर्षाजन-
कत्वसिद्धिरिति भाव । न च जनकज्ञानविघटकत्वमा-
ऽन्यथासिद्धतया तदभावव्याप्तेस्त्वात् स्वरूपासिद्धिर्दृष्टान्ता
सिद्धिश्च इति वाच्यं प्रतिबन्धकत्वं हि न कार्यीभूता-
भावप्रतियोगित्वम् किन्तु प्रयोजकीभूताभावप्रतियोगित्वम् ।
प्रयोजकत्वं च कारणकारणव्यावृत्तान्यथासिद्धत्वशून्य
राहित्ये सति नियतपूर्ववर्त्तित्वम्—कारणतत्कारणसाधा-
रणम् । हेतौ ज्ञानपदोपादानादेव च विषयान्तरसञ्चारादौ
न व्यभिचार । साध्ये च ज्ञानपदं स्वरूपकथनम् । विघट
कत्वस्य प्रतिबन्धकत्वमेव तत्त्वे ककारावच्छेदेन तदधिकरणा
वृत्तित्वरूपविरोधित्व गुरुमतेऽधिकरणज्ञानरूपतया कृति
साध्यताज्ञानस्यापि इष्टसाध्यताज्ञानाभावस्य ज्ञानात्मकस्य
विरोधितया सिद्धसाधनापत्तेः । तथाच गुरुमते साध्य-
त्वज्ञानाद्ज्ञानात्मकाप्रतिबन्धकत्वे व्यभिचार इति वाच्यम्
निराकाङ्क्षत्वरूपाभावज्ञाने ज्ञानाज्ञानमादाय
साध्यस्यापि सत्त्वात् ज्ञानाधिकरणज्ञानस्य च प्रतिबन्धकत्वे प्र-
माणाभावात् । न च तथापि सिद्धौ व्यभिचार इति वाच्यम्
गुरुमते सिद्धेरप्रतिबन्धकत्वात् तद्रूपेणप्रतिबन्धकताया वा
हेतौ निवेशात् । अतएवानिष्टसाधनताज्ञानस्याप्रतिबन्धक-
सिद्धत्वान्नेऽपि न व्यभिचार तद्रूपेणप्रतिबन्धकताया
एव हेतौ निवेशात् अनिष्टानिश्चयस्यापि द्वेषद्वारैवाहा ।
अथ तथापि बाधकज्ञानप्रत्यादौ व्यभिचार । न च
तद्रूपेणापि प्रतिबन्धकता हेतौ निवेशनादेति वाच्यम्
कृतिसाध्यताज्ञानाभावव्यभिचारज्ञानाभावयोरपि सा(धा)-
भावत्वेन चिकीर्षानुमित्योः प्रयोजकतया स्वरूपासिद्धि
दृष्टान्तासिद्ध्योरापत्ते । न च साक्षाद्विरोधित्वं हेतौ
त्वेन हेतुविशेषणीय इति वाच्यम् साक्षाद्विरोधित्वं
हि न पाचाभावतद्व्याप्याद्यनवगाहित्वं, प्रकृतेऽपि तद्-
सिद्धे इष्टसाध्यताज्ञानस्य चिकीर्षाप्रकारीभूतकृतिसाध्य-
त्वाभावानवगाहित्वात् अतएव न कार्यीभूताभावप्रति-
योगित्वमपि, प्रकृतेऽपि तदसिद्धेः पूर्वपक्षिणा कृतिसाध्यता-
विरह साक्षादेव प्रतिबन्धकत्वाभ्युपगमात् न च हेतौ
प्रतिबन्धकज्ञानत्वपदेन ज्ञानाभावप्रयुक्तप्रतिबन्धकतावत्त्व
विवक्षित बाधकज्ञानादेव निश्चयत्वेन प्रतिबन्धकत्वमिति
वाच्यम् प्रकृते तदसिद्धेः इष्टसाध्यतानिश्च
यस्य पूर्वपक्षिमते प्रतिबन्धकत्वादिति चेन्न हेतौ स्वसाध्य
विरोधावगाहिज्ञानभिन्नत्वेन यत्पदार्थविशेषणात् । स्वपद
प्रतिबन्धकज्ञानपरं चिकीर्षाद्य ज्ञानभिन्नत्वादेव स्वपद
स्वसाध्यविरोधावगाहित्वन्तु स यत्र यदभावतद्व्याप्य
तदवच्छेदकाद्यन्यतमप्रकारकते तत्र तदवगाहित्वं सर्वादि-
त्वेनापि हेतौ यत्पदार्थो विशेषणीय तेन इष्टभेदपक्षे
प्रवृत्त्यादिप्रतिबन्धके तथये न व्यभिचार । सर्वादि-
प्रवृत्तौ विशिष्टज्ञानमेव हेतुरिति साधकत्वादेव न तमा-
दाय व्यभिचार । न च तथापि कूटभ्रमपरामर्शलिङ्ग-
स्थले लिङ्गासंसर्गाग्रहेण वह्निकासंसर्गाग्रहाधीनवह्न्यादी-
च्छाप्रवृत्तिप्रतिबन्धकेऽभेदपक्षे जनकीभूतविशिष्टज्ञानविघ-
टकत्वाभावाद्व्यभिचार इति वाच्यम् विशिष्टज्ञानस्य
सर्वादीच्छाप्रवृत्तिहेतुत्वेनाभावात् तत्रापीच्छाप्रवृत्त्योर्विष-
यान्तरविषयकत्वकल्पनेन चित्रवादित्वस्य वै स्वीकारादिति
दिक् । अन्यथा—एतद्भिन्नव्यापारसङ्ग्रहकारे । उपेक्षणीयत्वम्-

[illegible]

[illegible]

प्रयोजकत्वात्, फलेच्छाविच्छेदस्य प्रतिबन्धकत्वाभावेन यथा श्रुतासङ्गतेः। तत्र-चिकीर्षितस्य पाकस्यान्यस्य सिद्धत्वज्ञान स्थले। सिद्धत्व-सिद्धत्वपदं पाकस्य सिद्धत्वज्ञानात् स्ववि-षयसङ्कल्पज्ञानम् ओदनस्य सिद्धत्वज्ञानात् फलेच्छाविच्छेद इति भावः। ननु स्वविषयतावच्छेदकावच्छिन्नविशेष्यताकसिद्ध-त्वज्ञानत्वेन प्रतिबन्धकत्वस्य स्वचान्तर्भावात् अननुगम न च तद्धर्मावच्छिन्नविशेष्यकेच्छां प्रति तादृशसिद्धत्वज्ञानं विरोधीति वाच्यं चिकीर्षाटीच्छाया अप्रसङ्गात्। अथ तद्धर्माव-च्छिन्नविशेष्यताकसिद्धत्वज्ञानं विरोधि नचेत् शूद्रादि-पाके सिद्धत्वज्ञानेऽपि ब्राह्मणस्य पाके चिकीर्षा न स्यादिति वाच्यं तदानीं स्वीयपाकत्वादिरूपेणेव" ब्राह्मणस्य चिकी-र्षोत्पादः नु पाकत्वरूपेण तदनुत्पादः नु इति चेन्न ग्रामे स्वर्गे मे भवत्विति सिद्धग्रामादिगोचरेच्छाया ग्रामत्वादि-रूपेण सिद्धत्वज्ञानेऽपि न नयनायां व्यभिचारात् कपाल-द्विरादिरूपेण सिद्धत्वज्ञानेऽपि कपालद्विराद्युपादाने-च्छायां व्यभिचारात् सिद्धत्वज्ञानदशायां तदनभ्युपगमे त-दानीं प्रवृत्तेरप्यपलापप्रसङ्गात् उपादानेच्छाया प्रवृत्तौ हेतुत्वादतएव तद्धर्मप्रकारकत्वावच्छिन्नस्वविशेष्यता-केच्छां प्रति तद्धर्मावच्छिन्नविशेष्यताकसिद्धत्वज्ञानं विरोधि नातो ग्रामे स्वर्गे मे भवत्विति सिद्धग्रामादिगोचरेच्छायां व्यभिचार इति कस्यचित् मतमपि निरस्तम्, कपालद्वि-राद्युपादानेच्छायां व्यभिचारात् पाकत्वादिरूपेण सिद्धत्व-ज्ञानदशायां मम कृतिसाध्यपाको भवत्विति चिकीर्षाया अनुत्पादात् घटत्वादिरूपेण सिद्धत्वज्ञानदशायामपि नी-लोघटोभवत्वितीच्छाया अनुत्पत्तिप्रसङ्गाच्च इति चेत्? नैव तद्धर्मोद्देश्यतावच्छेदकेच्छां प्रति तद्धर्मप्रकारकसिद्धत्व-ज्ञानस्य प्रतिबन्धकत्वात्। उद्देश्यत्वञ्च स्वर्गस्त्वित्यादिपदाभि-लप्यमानो विषयताविशेषः ग्रामे स्वर्गे मे भवत्वित्यादौ ग्रामादिर्नोद्देश्यः किन्तु स्वर्ग एव कपालाद्युपादान-गोचरेच्छायामपि कपालादिर्नोद्देश्यः। उद्देश्यतावच्छेदकत्वञ्च तत्पर्य्याप्त्यधिकरणत्वम् तेन घटत्वादिरूपेण सिद्धत्वज्ञान-दशायां नीलोघटोभवत्वितीच्छोत्पत्तिः। अतएव यदा पाकादिविषयकचिकीर्षायां, पाकत्वादिमात्रमुद्देश्यता पाकत्वादिरूपेण सिद्धत्वज्ञानादेव वार्य्यते यदा तु कृति-साध्यपाकत्वादिरूपेण, सा तु कृतिसाध्यपाकत्वादिरूपेण सिद्धत्वज्ञानादेव वार्य्यते इति विभागः। तादृशविलक्षण-विषयतानङ्गीकारे तु तत्तद्धर्मवत्त्वेनैव प्रतिबध्यता, प्रति-बन्धकता तु सामान्यतस्तद्धर्मावच्छिन्नविशेष्यताकसिद्धत्व-ज्ञानत्वेन तत्तद्धर्मवत्त्वेन वेत्यन्यदेतत्। कोऽपिच्च यद्धर्मा-वच्छेदेनेष्टसाधनताज्ञानाधीना इच्छा तद्धर्मप्रकारकसिद्ध-त्वज्ञानयोर्विरोधः। इष्टसाधनताविषयत्वञ्च यत्र पाकत्व-रूपेण गृहीतं तत्र पाकत्वप्रकारकसिद्धत्वधियैव सापगच्छति यत्र कृतिसाध्यपाकत्वादिना तद्ग्रहः, तत्र तदवच्छिन्न-सिद्धत्वधियैवेति विभागः। तेन प्रतिबध्येष्टसाधनत्वानभ्य-स्येष्टसाधनत्वावच्छेदकत्वात् प्रकारान्तरेण तज्ज्ञानेऽपि न तदपगमः। न च सिद्धत्वज्ञानदशायां घटयागादिसाध्यकस्प-र्शनमकपालद्विराद्युपादानेच्छाया व्यभिचार इति वाच्यम् गुरुमते उपादानगोचरचिकीर्षाविषयसाधनताज्ञा-नस्य वाचादेः प्रवृत्तिहेतुत्वेन तादृगिच्छायां मानाभावात्। तच्चाग्रे स्फुटं भविष्यति एव न्यायमतेऽपि। न च तथापि यथा पाकत्वरूपेण इष्टसाधनताज्ञानात् कृतिसाध्यत्वप्र-कारकज्ञानसहकृतात् पाकः कृतिसाध्यो भवतु इतीच्छाया ग्रामत्वादिरूपेण सिद्धग्रामादाविष्टसाधनताज्ञानात् स्वीय-स्वत्वप्रकारकज्ञानसहकृतात् ग्रामो मे स्वं भवतु इति सिद्धग्रामविशेष्यकेच्छायामोत्पत्तौ बाधकाभावात् तत्र व्यभि-चारः ग्रामत्वादिरूपेण सिद्धत्वज्ञानेऽपि तदुत्पत्तेरिति वाच्यम् स्वत्वसाध्यतातिरिक्तस्थले तत्प्रकारकफलार्थी-च्छायां तत्प्रकारकफलसाधनताज्ञानस्य फलवत्त्वेन हेतुतया ग्रामत्वरूपेणेष्टसाधनताज्ञाने तादृशेच्छाया एवासिद्धेरि-त्याहुः, तदपत् गुरुमते सिद्धविषयकेच्छाया अप्रसङ्गात्। घटादिसाध्यकप्रवृत्तौ घटादिचिकीर्षावत् कपालाद्युपा-दानकप्रवृत्तौ घटादिचिकीर्षावत्कपालाद्युपादानकप्रवृत्तौ कपालादीच्छाया अपि हेतुत्वेन कपालाद्युद्देशकेच्छाया व्यभिचारस्य दुर्वारत्वाच्च, अन्यथा चिकीर्षाविषयसाधनता-ज्ञानस्य लौकिकप्रत्यक्षस्य चाविशिष्टत्वेऽपि यत्रेच्छा तत्र-योपादानतया प्रवृत्तिर्यत्र नेच्छा तत्र नेति नियमानुप-पत्तेः। न्यायमीमांसासिद्धान्तस्य च युक्तिविरुद्धत्वेनानुपा-देयत्वादिति सङ्क्षेपः"। अधिकं तद्ग्रन्थे दृश्यम्।

न्यायमते तु कार्य्यत्वज्ञानमिष्टसाधनत्वज्ञानं बलवदनिष्टा-ननुबन्धित्वज्ञानं चेति यथायथम् प्रवर्त्तकमिति भेदः विस्तरस्तु आकरे दृश्यः।

कार्य्यपुट पु० कार्य्ये कर्त्तव्ये कर्म्मणि न पुटति पुट-क्षेपे क ७त०। क्षपणके उन्मत्ते अनर्थकरे त्रि० मेदि०।

कार्य्यप्रद्वेष पु० कार्य्यं प्रद्विष्यतेऽनेन प्र+द्विष-करणे घञ् ६त०। आलस्ये राजनि० आलस्येन हि कार्य्यद्वेषा-त्मकस्य तथात्वम्।

शक्तिकल्पनमयुक्तं हेत्वभावात् उपस्थित्यन्तरे गौरवात् । अथ कार्य्यान्वितज्ञानोपस्थितावाम्यान्वितज्ञानमप्युपस्थितमिति लाघवात् कार्य्यांशमपहायान्विते शक्तिस्तु ज्ञानमिति चेत् न ज्ञाने हि पदानां शक्ति शक्यत्वात्, नार्थे । अन्यच्च कार्य्यान्विते ज्ञानमन्यदन्वितज्ञान विषयभेदेन ज्ञानभेदात् । तदुक्तमभावबादे, "अन्यदुभूतलज्ञानं अन्यञ्च घटाद्युक्तं भूतलज्ञानमिति" अन्वितज्ञानमुपस्थाप्य तत्र शक्तिग्रह इति गौरवमेव लघुनि शक्ये सम्भवत्यन्यस्य गुरुन, युगपदुपस्थितौ तथ स्यात् । न च तस्याप्यनुपस्थिति पूर्वापरविशेषदोषात् सर्व्वैरेवाद्यप्रवृत्तौ तथानवगमात् । तथापि न कार्य्यान्विते शक्ति कार्य्यं वाचिलिङादीनां व्यभिचारादिति चेत् न सर्व्वपदानां कार्य्यत्वविशिष्टधीजनकत्वात् तच्च कार्य्यान्वितस्वार्थप्रतिपादकतयेतरान्वितस्वार्थकार्य्यं प्रतिपादकतया वेति । एवं कार्य्यान्वितव्युत्पत्तौ सत्यामनाकाङ्क्षादौ व्यभिचारादाकाङ्क्षादेरुपाधित्वम् । तयोश्चोपजीव्यप्रथमभाविकार्य्यान्वितव्युत्पत्त्युपरोधेन सिध्यत्तावपि कार्य्याध्याहारः । कश्चित्तु गणा रक्तं चन्दनमानयेह इति सिद्धार्थेऽन्वयप्रतीतिदर्शनादुत्तरकालमन्वितमात्रे शक्तिरेव कल्प्यता प्राचीनकार्य्यान्वितज्ञानं बाध्यमानमित्यपतएव निरस्य पूर्व्वकल्पनात् कल्पनान्तरप्रसङ्गाच्च । उत्तरकालभाविसिद्धार्थप्रयोगस्य लक्षणादिभिरप्युपपत्तेरन्यथासिद्धत्वाभावेन प्राचीनज्ञानाबाधकत्वात् उपजीव्यव्याघाताच्च । अथ सिद्धार्थेऽपि व्युत्पत्ति सम्भवति तथाहि उपलब्धचैत्रपुत्रजन्मा बालस्तु हर्षेण वार्त्ताहारेण चैत्रसमीप गत -चैत्र ! पुत्रस्ते जात इति वार्त्ताहारवाक्य श्रृण्वन् चैत्रस्य मुखप्रसादं पश्यन् मोदहर्षमनुमिमोति । हर्षाच्च तत्कारणं पुत्रजन्मनाम कल्पयति उपस्थितत्वात् उपपादकत्वात च योग्यत्वौ गौरवाच्च तत्र वाक्यस्य कारणता कल्पयति लाघवादिति चेत् न हर्षहेतूना बहूनां सम्भवात् हर्षेण लिङ्गेन पुत्रजन्मज्ञानस्य बालेनानुमातुमशक्यत्वात् प्रियान्तरज्ञानस्य परिशेषादनुमशक्यत्वात् । अथ पुत्रजन्मज्ञानाव्यभिचारि दृष्टिमाहार्दिक्रियाविशेषदर्शनात् पुत्रजन्मज्ञानानुमानमिति चेत तर्हि पुत्रस्ते जात इति यावद् तत्तत्क्रियाकर्त्तृ यता परमेवति कार्य्यान्वितज्ञानजनकत्वमेव तस्य यदकतो जाते तदुत्तरक ल पुत्रजन्मज्ञानानुमानमिति न व्युत्पत्तिकाय सम्भवति । यत्रापि कञ्चन नरौ दिशोदेशामि प्रसिद्धार्थकपदग्रामभाधिकरण्यादिभिर्व्युत्पत्ति-

त्तत्रापि व्यवहाराधीनव्युत्पत्तिपूर्व्विका कार्य्यान्वित एव युक्ता विकपदशक्ति । पूर्व्वं नायातीति चेत् तत्रापि पिकमानयेत्यादौ क्वचित् कार्य्यान्विते एव व्युत्पत्ते उपजीव्यजातीयतया च तस्यामकल्पनम् । किञ्चेदमपि घट कार्य्यान्वितज्ञानजनकम् पदत्व दिति सामान्यतोऽवगत विशेष तार्थे पर नाधिगत स इदानीं कुम्भादिपदेनादिभिरवगम्यते । अत सिद्धप्रवृत्तिपराणां यद्वा ना प्रवर्त्तकजानजनकता तच्च क्वचित् साक्षात् क्वचित् परम्परया, कार्य्यान्वयात् कार्य्यान्वितस्वार्थबोधकमिति । यत्र- पुराणभारतादिपाठे फलश्रुतिरस्ति तत्रार्थ पादकल्पितविधिशेषीभूतत्वेन प्रवृत्तिपरत्वेन तेषामिति परम्परया कार्य्यान्वय न् कार्य्यान्वितस्वार्थबोधकत्व सत्कुपाख्यानपराणान्तु काव्यनाटकादीनां पदार्थसंसर्गाय्हेऽपि संसर्गव्यवहारो न संसर्गपरइति ।

तदेतन्मत पूर्व्वपक्षत्वेनोक्त्वा मणिकृता निराकृतं यथा– "यत्रोच्यते घटमानयेति वाक्यश्रवणानन्तर प्रयोज्यस्य घटानयनगोचरप्रवृत्त्या घटानयनकार्य्यताज्ञानमनुमित बालेन तद्धि कार्य्यान्वितज्ञान प्रवृत्तिविशेषे तस्याऽहेतुत्वात् विषयादिपदशक्तिग्रहे तथानुपयोगाच्च तत्र च ज्ञानविशेषे घटमानयेति वाक्यविशेषस्याकाङ्क्षितपदविभागस्य हेतुत्वमवधार्य्य घटपदादीनामावापोद्वापाभ्यामानयनकार्य्यत्वादेः प्रत्येकावापोद्वापैश्च घटकर्मत्वानयनकार्य्यत्वज्ञानेषु प्रत्येक कारणत्वमवगम्य शक्तिं कल्पयति । प्रयातापृत्तिसामान्येनानुमितकार्य्येन्वितज्ञाने वाक्यमात्रस्यान्वयव्यतिरेकाभ्यां कार्य्यायसप्रकार्य्यान्वितज्ञानमात्रे शक्ति कल्पयति तद्यु प्रथम वाक्यमात्रस्य कार्य्यान्वितज्ञानमात्रहेतुत्वकल्पनम् ।

अथ घटानयनक्रियायाः प्रथम क्रियात्वज्ञानमात्रप्रवृत्तिमात्रानुमान न तु कार्य्यान्वितज्ञानमनुमाय तत्र वाक्यमात्रस्य हेतुत्वं कल्पयित्वा शक्ति कल्पयति तदुपर विशेषयो कार्य्यकारणभाव इति चेत् न प्रथमं प्रवृत्तिमात्रकार्य्यान्वितज्ञानमात्रयोरनुमानं मानस्य क्रमशो भवत्यत्र मानाभावात् घटादिपदशक्तिग्रहस्य तेन विनापि सम्भवात न च तदनुमानसामग्री तदा वृत्तेति बाध्यम तदा व्याप्त्यादिस्मृतो मानाभावात् सामान्ययो च हेतुहेतुमद्भावग्रहो विशेषयोर्ग्रहपूर्व्वके हेतुरिति चेत न विशेषयोरन्वयव्यतिरेकाभ्यामेव तद्ग्रहात् यथा धूमवह्निविशेषयो कार्य्यकारणभावग्रहे तत्सामान्ययोरपि चेदहेतुमद्भावो गृह्यते अन्यथा न सहदृष्टगतया व्याप्ति

शक्तिकल्पनमयुक्तं हेत्वभावात् उपस्थित्यन्तरे गौरवात् । अथ कार्य्यान्वितज्ञानोपस्थितावन्वितज्ञानमप्युपस्थित-मिति लाघवात् कार्य्यांशमपहायान्विते शक्तिरस्त्विति चेत् न ज्ञाने हि पदानां शक्तिः शक्यत्वात्, नार्थे । अन्यच्च कार्य्यान्विते ज्ञानमन्यदन्वितज्ञानं विषयभेदेन ज्ञान-भेदात् । तदुक्तमभाववादे, "अन्यद्भूतलज्ञानं अन्यच्च घटवद्भूतलज्ञानमिति" अन्वितज्ञानमुपस्थाप्य तत्र शक्ति-ग्रह इति गौरवमेव लघुनि शक्ये सम्भवत्यन्यस्य गुरु-त्वं, युगपदुपस्थितौ तथा स्यात् । न च तस्याप्यनुपस्थिति पुरुषविशेषदोषात् सर्व्वैरेवाद्यप्रवृत्तौ तथानवगमात् । तथापि न कार्य्यान्विते शक्तिः कार्य्यवाचिलिङादीनां व्यभिचारादिति चेत् न सर्व्वपदानां कार्य्यत्वविशिष्टधी-जनकत्वात् तच्च कार्य्यान्वितस्वार्थप्रतिपादकतयेतरान्वित-स्वार्थकार्य्यप्रतिपादकतया वेति । एवं कार्य्यान्वितव्युत्पत्तौ सत्यामनाकाङ्क्षादौ व्यभिचारादाकाङ्क्षादरूपाधिरत्वम् । तयोश्चोपजीव्यप्रथमभाविकार्य्यान्वितव्युत्पत्त्यनुरोधेन सिद्ध-स्थलेऽपि कार्य्याध्याहारः । कश्चित्तु तथा च पदप्रयोगोऽपि ह इति सिद्धार्थेऽन्वयप्रतीतिदर्शनादुत्तरकालमन्वितमात्रे शक्तिरेव कल्प्यतां प्राचीनकार्य्यान्वितज्ञानं वाध्यतामि-त्यत्यतएव निरस्तं पूर्व्वकल्पनातः कल्पनान्तरप्रसङ्गाच्च । उत्तरकालभाविसिद्धार्थप्रयोगस्य लक्षणादिभिरप्युपपत्तेरन-न्यथासिद्धत्वाभावेन प्राचीनज्ञानावाधकत्वात् उपजी-व्यव्याघाताच्च । अथ सिद्धार्थेऽपि व्युत्पत्तिः सम्भवति तथाहि उपलब्धचैत्रपुत्रजन्मा वार्त्ताहरेणैव वार्त्ता-हारेण चैत्रसमीपं गत-चैत्र ! पुत्रस्ते जात इति वार्त्ता-हारवाक्यं शृण्वन् चैत्रस्य मुखप्रसादं पश्यन् मोदहर्षं मनुमिनोति । हर्षश्च तत्कारणं पुत्रजन्मज्ञानं कल्पयति उपस्थितत्वात् उपपादकत्वात् अयोग्यन्वितौ गौरवाच्च तत्र वाक्यस्य कारणतां कल्पयति लाघवादिति चेत् न हर्षहेतूनां बहूनां सम्भवात् हर्षेण लिङ्गेन पुत्रजन्म-ज्ञानस्य वाधेनानुमातुमशक्यत्वात् नियान्तरज्ञानस्य परि-शेषयितुमशक्यत्वात् । अथ पुत्रजन्मज्ञानाव्यभिचारि दृष्टि जातादिक्रियाविशेषदर्शनात् पुत्रजन्मज्ञानानुमानमिति चेत् तर्हि पुत्रस्ते जात इति वाक्यं तत्तत्क्रियाकर्त्तव्यता परमेवेति कार्य्यान्वितज्ञानजनकत्वमेव तस्य प्रथमतो ऽवगते तदुत्तरकालं पुत्रजन्मज्ञानानुमानमिति न व्युत्पत्ति-र्बाध्य सहते । यत्रापि हि ... दिवौकसो मेति प्रसिद्धार्थकपदसामानाधिकरण्यादिभिर्व्युत्पत्ति-

सत्यामिति व्यवहाराधीनव्युत्पत्तिपूर्व्विका कार्य्यान्वित एव दृष्टा पिकपदशक्तिः । पूर्व्वं नास्तीति चेत् तत्रापि पिकमानयेत्यादौ कथञ्चित् कार्य्यान्वित एव व्युत्पत्ते-रुपजीव्यत्वातीयत्वा च तस्यावलम्बनम् । किञ्चेदमपि पद-कार्य्यान्वितज्ञानजनकम् पदत्वादिति सामान्यतोऽवगतं विशेष-तार्थे परं नाधिगतं स इदानीं सुहृदुपदेशादिभिरव-गम्यते । अत सिद्धप्रवृत्तिपराणां शब्दानां प्रवर्त्तकज्ञान-जनकता तच्च क्वचित् साक्षात् क्वचित् परम्परया, कार्य्या-न्वयात् कार्य्यान्वितस्वार्थबोधकमिति । यत्र पुराण-भारतादिपाठे फलश्रुतिरस्ति तत्रार्थवादकल्पितविधि-शेषीभूतत्वेन प्रवृत्तिपरत्वेन तेषामिति परम्परया कार्य्या-न्वयः कार्य्यान्वितस्वार्थबोधकत्वं स्वरूपाख्यानपराणान्तु काव्यनाटकादीनां पदार्थसंसर्गोपरक्तेण संसर्गव्यवहारो न संसर्गपर इति ।

तदेतन्मतं पूर्व्वपक्षत्वेनोक्त्वा मणिकृता निराकृतं यथा– "अतोच्यते घटमानयेति वाक्यश्रवणानन्तरं प्रयोज्यस्य घटा-नयनगोचरप्रवृत्त्या घटानयनकार्य्यताज्ञानमनुमितं बालेन ननु कार्य्यान्वितज्ञानं प्रवृत्तिविशेषे तस्याऽहेतुत्वात् विषया-दिपदशक्तिपक्षे तस्यानुपयोगाच्च तत्र च ज्ञानविशेषे घट-मानयेति वाक्यविशेषस्यानाकलितपदविभागस्य हेतुत्वमव-धार्य्य घटपदादीनामावापोद्वापविधिनान्वयानां प्रत्येकावापोद्वा-रेण घटकर्म्मतानयनकार्य्यत्वज्ञानेषु प्रत्येकं कारणत्वमव-गम्य शक्तिं कल्पयति । पश्चात् प्रवृत्तिसामान्येनानुमित कार्य्यतान्वितज्ञाने वाक्यमात्रस्यान्वयव्यतिरेकाभ्यां कार्य्यताम-पहायान्वितज्ञानमात्रे शक्तिं कल्पयति ननु प्रथमं वाक्य-मात्रस्य कार्य्यान्वितज्ञानमात्रहेतुत्वकल्पनम् ।

अथ घटानयनक्रियायां प्रथमं क्रियात्वज्ञानात् प्रवृत्ति-मात्रानुमानं न तु कार्य्यान्वितज्ञानमनुमाय तत्र वाक्यमात्रस्य हेतुत्वं कल्पयित्वा शक्तिं कल्पयति तदु-त्तरं विशेषयोः कार्य्यकारणभाव इति चेत् न प्रथमं प्रवृत्तिमात्रकार्य्यान्वितज्ञानमात्रयोरनुमानं बालस्य क्रमशो भवतस्तत्र मानाभावात् घटादिपदशक्तिग्रहस्य तेन विनापि सम्भवात् न च तदनुमानसामग्री तदा वृत्तेति वाच्यम् तदा व्याप्त्यादिस्मृतौ मानाभावात् सामान्ययोः कार्य्यकारणभावग्रहो विशेषयोस्तथात्वग्रहे हेतुरिति चेत् न विशेषयोरन्वयव्यतिरेकाभ्यामेव तद्ग्रहात् यथा धूमवह्निविशेषयोः कार्य्यकारणभावग्रहे तत्सामान्ययोरपि तद्गृहेऽपि गृह्यते नत्वन्यथा न सद्ग्रहणमन्ता व्याप्ति

शक्तिर्न स्यात् प्रयोज्यज्ञानहेतुता सङ्गतात्। अन्यथासिद्धशब्दानुविधानस्य च सत्त्वात् अन्यविषयज्ञानस्यान्यत्राप्यन्यत्रापि वा तदुपस्थितिनियमे मानाभावात् सन्देहाभावोपपत्ते लिङ्गाभासजन्यकाकतालीयसम्वाद-वादानुमितिवद्धर्मेण लिङ्गेन पुत्रजन्मज्ञानानुमानसम्भवात्। नचाभासत्वेनानुमितेर्भ्रमत्वे तद्वेगजनितपक्षे भ्रम, विषयस्य तथात्वेन तयोर्यथार्थत्वात्। यथा कश्चित् स्वयमश्वाराधिष्ठित टाङ्कपुत्रक घटमानयेति निरुक्तं स च समानयति तदा चेतनव्यवहारादिवत् तद्गौ बालो व्युत्पद्यते–इय क्रिया, कृतिजन्या, सा ज्ञानजन्या, ज्ञानं तद्वाक्यजन्यमित्यनुमितिपरम्पराया भ्रमत्वेऽपि तद्वेतु शक्तिग्रह तज्जन्यशाब्दबोधश्च यथार्थ एव विषयस्य तथाभावादिति सिद्ध भिन्नार्थे शक्तिग्रह इति। अतएव यत्र दु खेन सम्भिन्न न च ग्रस्तमनन्तरम्। अभिला षोपनीतच्च तत् सुख स्वःपदास्पदम्" इत्यर्थवादोपस्थिते सुखे वेदादेव स्वर्गपदस्य शक्तिग्रह"।

कार्य्यिन् त्रि॰ कार्य्यमस्त्यस्य इनि १कार्य्ययुक्ते २कार्य्यार्थिनि (उमेदार) व्याकरणोक्ते ३आदेशस्थानिनि च "कार्य्यमनुभवन् हि कार्य्यी निमित्ततया नाश्रीयते" परिभा॰ १ अत्र कार्य्यीति निर्द्देशात् "एकाचरात् कर्तोजाते सप्तम्याञ्च मतौ (इनिठनौ) स्मृतौ" इत्युक्तिरप्रमिता। ततः मतुप् मस्य व कार्य्यवत्। ठन् कार्य्यिक-तदर्थे त्रि॰। तत्र इनौ मतुपि च स्त्रियां ङीप्।

कार्गकेय पुस्त्री क्रगकस्यापत्यं वा॰ ढञ्। क्रगकर्षेरपत्ये ऋषिभेदे स्त्रियां ङीप् "कार्गकेयीपुत्रात् कार्गकेयीोऽत्र" शत॰ ब्रा॰ १४,६,४ ३२, वंश ब्राह्मणे।

कार्गम्बीय त्रि॰ क्रगाम्बेन निर्वृत्तादि क्रशाश्वा॰ चतुरर्थ्यां छण्। कृशाश्वर्षिर्निवृत्तादौ।

कार्म्मरी स्त्री कृञ–स्वार्थे णिच्–भावे मनिन् कर्म तत् राति रा–क गौरा॰ ङीप्। श्रीपर्णीवृक्षे कर्के २गाम्भारीवृक्षेभरत।

कार्श्य न॰ कृशस्य भाव ष्यञ्। १कृशत्वे 'निर्बन्धसञ्जातरुषार्थकार्श्यम्" रघु। स्वार्थे ष्यञ्। २कृशे ३शालवृक्षे, ४कचूरे (इंथो) वृक्षे ५कर्चूरे च पु॰ राजनि॰।

कार्ष त्रि॰ कृषि भीवनमस्य कृष्या॰ ण। कृषिजीवे कृषीवले भरत।

कार्षापण पु न॰ कर्षस्येदम् स्वार्थे या अण्। तेन आपणायते आ+पण–कर्मणि घ। १अशीतिरक्तिके ताम्रिके कर्षे 'कार्षापणस्तु विज्ञेय कार्षिकस्ताम्रिक पण' मनु। २षोडशपणात्मके पुराणे (काहन) इति ख्याते मानभेदे। "माष षोडशभागस्तु ज्ञेय कार्षापणस्य तु। काकिणी (गुडि) तु चतुर्भागो माषस्य परिकीर्त्तिता। पञ्चनद्याः प्रदेशे तु संज्ञेय व्यावहारिकी। कार्षापणप्रमाणन्तु तन्निबद्धम् (परिभाषितम्) इहैव तत्"काव्या॰ अत्र षोडशेत्यत्र रैमा॰ द्वी विंशतीति पाठ। अतएव 'द्वाविंशतिर्पणिकाणांशो पणस' पौराणिकोभवेत्" काव्या॰ अतो पुराणद्वयवाच्यवद्वाति-शत्पणानां न गृत्यसेनाभिधानम्। "अशीतिभिर्वराटकै पण इत्यभिधीयते। ते षोडश पुराण स्यात् रजत सप्तभिस्तु ते" भविष्यपु॰। "कार्षापणैकमूल्या हि दरिद्राणा प्रकीर्त्तिता" मा॰त॰। "कार्षापण भवेद्दण्ड्यो यत्रान्य प्राकृतोजन। तत्र राजा भवेद्दण्ड्य सहस्रमिति धारणा।" "समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि। स द्वौ कार्षापणौ दद्यात्"मनु। 'कार्षापणो दक्षिणस्या दिशि रौप्य प्रवर्त्तते। पणैर्निबद्ध पूर्व्वस्या षोडशैव पणा पणम्। इति नारदोक्ते ३दक्षिणदेशप्रसिद्धे पूर्व्वदेशप्रसिद्धपण परिमाणे च। कार्षापणेन क्रीत ठिठन् वा प्रतिरादेशश्च इदुभ्ज्ञापणे कार्षापणिक पक्षे प्रतिक तत्क्रीते त्रि॰ स्त्रियांङीप्। कार्षापणिकी प्रतिकी अध्यर्द्धपूर्वात् द्विगोश्च तस्य वा लुक्। अध्यर्द्धकार्षापण अध्यर्द्धक पर्णिक सार्द्धकार्षापणक्रीते एव द्विकार्षापण द्विकार्षापणिक कार्षापणद्वयक्रीते त्रि॰। पर्श्वादिपाठात् स्वार्थेऽण्। कार्षापण कार्षापणसङ्घजीविषु त्रि॰ ग॰द॰।

कार्षि त्रि॰ कर्षतीति कर्ष तत स्वार्थे बा॰ इञ्। १कर्षक गोपे २अन्तर्गतमलापनेतरि। 'कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि" यजु॰६,२८। कर्षतीत्येवंशील कार्षि अन्तर्गतमलस्यापनेतासि" वेददी॰ "कार्षिरसीत्याह शमलमेवासायमप्लावयति" तैत्ति॰।

कार्षिक त्रि॰ कर्ष मित्यमर्हति छेदा॰ ठञ्। १नित्यकर्षण र्ह कर्षेण क्रीत ठञ्। १कर्षेण क्रीते। तत्परिमाणमस्य ठक्। ३कर्षपरिमाणयुक्ते। कर्ष कर्षेण गौरमस्य ठक। ४कृषके हेमच॰। स्वार्थे ठक्। ५कर्षपरिमाणे। "ताम्रिक कार्षिक पण" मनु।

कार्ष्ण्य न॰ कृष्णस्य भाव दृढा॰ ष्यञ्। कृष्णस्य पक्षे इमनिच् कृष्णिमन् तदर्थे पु॰। षित्त्वात् स्त्रियां ङीष् यलोपौ।

कार्ष्ण त्रि॰कृष्णस्येदम् अण्। १कृष्णसम्बन्धिनि। "कार्ष्णरौरव-वास्तानि चर्म्माणि ब्रह्मचारिण"मनु। २कृष्णद्वैपायनसम्बन्धिनि च "कार्ष्णं वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते" भा॰आ॰प॰१अ॰। कृष्णादिभ्यश्च अण्। ३कृष्णाख्य-

[illegible]

[illegible]

सूर्य्यगतयो विशेषणतामनुभवन्ति। न च स्वरूपप्रत्ययासत्त्वा एव ता तस्मादेतादृशविशिष्टप्रत्ययान्यथानुपपत्त्या विशेषणप्रापकं यद्द्रव्यं स कालः” उपस्कारवृत्तिः।

“ननु विभुस्तु कालः, स तु नित्यो द्रव्यं चेति न प्रमाणमत आह”।

“द्रव्यत्वनित्यत्वे वायुना व्याख्याते” क॰ सू॰।

“यथा वायुपरमाणोर्गुणवत्त्वाद्द्रव्यत्वम् अद्रव्यद्रव्यत्वाच्च नित्यत्वं तथा कालस्यापीत्यर्थः” उप॰।

“तथापि सन्तु बहवः कालाः इत्यत आह”।

“तत्त्वम्भावेन” क॰ सू॰।

व्याख्यातमिति विपरिणतेनान्वयः। परापरादिप्रत्ययानां काललिङ्गानां सर्व्वत्राविशेषादनेकत्वेऽप्यसत्प्रमाणमिव विशेषलिङ्गाभावात् सत्तावदेकत्वं कालस्येत्यर्थः। नन्वेवं क्षणलवमुहूर्त्तयामदिवसाहोरात्रपक्षमासर्त्त्वयनसंवत्सरादिभेदेन भूयांसः कालास्तत् कथमेक इति चेन्न भेदप्रत्ययस्य उपाधिनिबन्धनत्वात् यथा एक एव स्फटिकमणिर्जवातापिञ्छाद्युपाध्युपरागेण भिन्न इव भासते तथैक एव कालः सूर्य्यस्पन्दाद्यवच्छेदभेदेन तत्तत्कार्य्यावच्छेदकभेदेन च भिन्न इव भासत इत्युपगमात् तथाच कालोपाधिव्यापकः कालोपाधिः, स्वाधेयकादाचित्कभावप्रतियोग्यनाधारः कालोपाधिर्वा क्षणः प्रतिक्षणं कस्यचिदुत्पत्तेः कस्यचिद्विनाशादेतदध्यवसेयम्। क्षणद्वयन्तु लव इत्याद्यागमप्रसिद्धम्। ननु तथाप्यतीतानागतवर्त्तमानभेदेन कालत्रयस्तु, श्रूयते हि ‘त्रैकाल्यमुपावर्त्तते’ “त्रैकाल्यासिद्धेः” इत्यादौति चेन्न त्रैकाल्यव्यवहारात् येन हि वस्तुना यः कालोऽवच्छिद्यते स तस्य वर्त्तमानः यत्प्रागभावेन यः कालोऽवच्छिद्यते स तस्य भविष्यत्कालः यद्ध्वंसेन यः कालोऽवच्छिद्यते स तस्यातीतकालः तथाचावच्छेदकत्रित्वाधीनः कालत्रित्वव्यवहारः” उपस्कारवृत्तिः।

“इदानीं सर्व्वोत्पत्तिमतां कालः कारणमित्याह”।

“नित्येष्वभावादनित्येषु भावात् कारणे कालाख्येति” क॰ सू॰।

इतिशब्दो हेतौ इतिहेतोः कारणे—सर्व्वोत्पत्तिमत्कारणे काल इत्याख्या। हेतुमाह नित्येष्वभावात् अनित्येषु भावादिति नित्येषु आकाशादिषु युगपज्जातः चिरजातः क्षिप्रं जातः इदानीं जातः दिवा जातः रात्रौ जात इत्यादिप्रत्ययाभावात् अनित्येषु घटपटादिषु यौगपद्यादिप्रत्ययानां भावात् अन्वयव्यतिरेकाभ्यां कारणं काल इत्यर्थः। न केवलं यौगपद्यादिप्रत्ययबलात् कालस्य सर्व्वोत्पत्तिमन्निमित्तकारणत्वम् अपि तु पुष्पफलादीनां हैमन्तिकवासन्तिकप्रावृषेण्यादिव्यपदेशबलादेव तदध्यवसेयम्” उप॰।

भाषापरिच्छेदसिद्धान्तमुक्तावल्योश्च सङ्क्षेपेण तन्निर्णयो यथा

“जन्यानां जनकः कालो जगतामाश्रयो मतः।”

“परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः” भाषा।

“कालं निरूपयति जन्यानामिति तत्र प्रमाणं दर्शयितुमाह जगतामिति तथाहि इदानीं घट इत्यादिप्रतीतिः सूर्य्यपरिस्पन्दादिकं यदि विषयीकरोति तदा सूर्य्यपरिस्पन्दादिना घटादेः सम्बन्धो वाच्यः स च संयोगादिर्न सम्भवतीति कालएव तत्सम्बन्धघटकः कल्प्यते इत्थञ्च तस्याश्रयत्वमपि सम्यक्। प्रमाणान्तरं दर्शयति परापरत्वेति परत्वापरत्वयोरसाधारणं निमित्तं काल एव परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघवादतिरिक्तः कल्प्यत इति भावः। नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदो न स्यादत आह क्षणादिरिति कालस्त्वेकोऽपि उपाधिभेदात् क्षणादिव्यवहारविषयः। उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म, पूर्व्वसंयोगावच्छिन्नविभागो वा पूर्व्वसंयोगावच्छिन्नोत्तरसंयोगप्रागभावो वा उत्तरसंयोगावच्छिन्नं कर्म वा। न चोत्तरसंयोगानन्तरं क्षणव्यवहारो न स्यादिति वाच्यं कर्मान्तरसत्त्वादिति। महाप्रलये क्षणादिव्यवहारो यद्यपि, तदाऽभावस्तथाप्येवमेवोपपादनीय। दिनादिव्यवहारस्तु तत्तत्क्षणकूटैरेवेति” मुक्तावली।

तार्किकशिरोमणिना रघुनाथशिरोमणिना च पदार्थनिरूपणप्रकरणे “तत्र दिक्कालौ नेश्वरादतिरिच्येते” इति वदता विभुरूपस्यैकस्य कालस्य खण्डनं कृतम्। रघुदेवरामभद्राभ्यां तद्दृष्टतत्त्वं व्याख्याय पदार्थतत्त्वसारे च जयनारायणतर्कपञ्चाननेन दर्शितं यथा

“दिक्कालौ नेश्वरादतिरिक्तौ प्राच्यां घट इदानीं घट इत्यादिव्यवहारस्य ईश्वरात्मकविभुविषयकत्वेनैवोपपत्तेः, न च तयोर्भिन्नविषयकत्वमनुभवसिद्धमिति वाच्यं तथा सति प्राच्यां घटः प्रतीच्यां घटः इदानीं घटः तदानीं घट इत्यादेरपि भिन्नभिन्नविषयकत्वानुभवात् कालदिशोरपि बहुत्वाङ्गीकारप्रसङ्गात्, तथा च उपाधिभेदादेकया दिशा एकेन कालेन च यथा भवतां बहुधा व्यवहाराः सम्पद्यन्ते तथाऽस्माकमपि एकेनेश्वरेणागमानुमानाभ्यां सिद्धेन सर्व्वेषामेव तादृशव्यवहाराणामुपाधिभेदादुपपत्तिः सम्भवति,

[illegible]

[illegible]

पञ्चरात्रादीनां चाप्रामाण्योपनीतत्वेन तेष्वपि प्रवृत्त पद्वेष षेन वार्य्यते ? । यत्र तेषां विशिष्य ऽप्रत्यक्षेऽपि सुखदुःख-मोहात्मकत्वेन गुणत्रयान्तर्गतत्वं दृश्यते श्रूयते संप्रपञ्च्यते तर्हि कालस्याप्यसौ न दुरुद्धार इति बुद्धि समाधत्ते । कालस्य गुणत्रयपरिणामत्वे सावयवत्वमनित्यता च घटादेरिव प्रसज्यतेति चेत् ? निरवयवत्वनित्यत्वाभिनिवेशवतो वैशेषिकादेः पक्षस्य ऽनुपहार विरोधि । वेदवादिनां तु न कापि क्षतिः । कालस्योत्पत्तिसावयवत्वयोः प्रत्यक्षश्रुतावुपलभ्यमानत्वात् । तैत्तिरीयशाखा नारायणीये कालोत्पत्तिराम्नायते "सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि कला मुहूर्त्ताः काष्ठाश्चाहोरात्राश्च सर्वशः । अर्द्धमासा मासा ऋतवः संवत्सरश्च कल्पन्तामिति" तथामेव शाखायामारुणकेतुकचयनब्राह्मणे सावयवत्वं श्रूयते "ऋक्षोभेषो शमादि च न कालावयवामिति प्रतीच्येयिति" । एतौ प्रमादनवाकावमनीषेण व्यस्तनेव क्षत्राक्षेत्र कालावयवानामृतूनां व्याख्यातव्यो येन उक्तः पञ्चाग्नि चोक्तामीयथ । नित्यत्वनिरवयवत्वाभिधायिनो वैशेषिकादिशास्त्रस्य "अस्थता देवता" इति वदापेक्षिकनित्यतायामन्तर्भावः गमयितव्यः प्रवृत्तिवत् सम्भवयोग्याशयत्वभ्यन्तराया च तात्पर्य वर्णनीयम् ।

"अथ मन्यसे महता तपसा शिवमाराध्य तत्प्रसाद सम्प्रदायपद' कणादमुनिर्वेदतात्पर्यं सम्यगवैत्तीति वेद-स्यैव मन्दमतिप्रतीतादर्थादर्थान्तर नेतव्यमिति । एवमपि वत्स प्रसादादयं सवशतामनभत प्रणव शिवो सुख्यः सर्वेषु इति तन्मतानुसारेण कणादमतस्यैवान्यथा नयनम-मन्तव्यमितम् । शिवो हि शैवेषु आगमेषु पटति गत्-तत्त्वानि निरूपयन् कालतत्त्वस्योत्पत्तिमङ्गीचकार । निखिलशैवागमसारमार्य्याभिः सङ्क्रामो भोजराज प्रभृति पञ्च तत्त्वानि शिवशक्तिसदाशिवेश्वरविद्याख्यानि निर्दिश्येतराणि निर्दिशन्मायाकार्यत्वोक्तिप्रसङ्गेनैव काल निरदिशत् "ततो जगत् स्तये मायातत्त्वमविर्भवति । कालो नियतिश्च तथा कला च विद्या च रागश्च" इति तानि मायाधिष्ठितान्येकादश तत्त्वानि सांख्यप्रसिद्धपञ्च-विंशतितत्त्वानि चोद्दिश्य विशदमिदमाह 'माया विषयाक्रमयो या समयात कालतत्त्वमेवाद्दो। भाविभवद्-भूतमय कलयति जगदेव कालोऽतः" इति । तट्टीकाकार इत्थं व्याचष्टे । 'नन्वेष कालो नैयायिकादिभिनित्यो ऽभ्युपगतः अत एव भाविभवद्भूतमयाभिति । भूतादिरूपेण त्रिविधत्वात् अनेकत्वमस्यानित्यत्वं सिद्धमिति भावः । केन कार्येणास्य सिद्धिरित्याह "कलयति जगदेव कालोऽतः" इति । चिरक्षिप्रादिप्रत्ययोपाधिद्वारेण कल-यत्यवच्छिनत्तीत्यर्थ' इति । इत्य प्रत्यक्षश्रुतिसङ्गतशैवागमे कणादशास्त्रस्य बाधे सति उत्तरमीमांसागताधिकरण-न्यायप्रयनाभिकरणन्यायोऽनुसन्धातव्ये तस्य च न्यायस्य प्रपाठकौ श्लोकौ "शाख्यस्मृत्या स्ति सङ्कोचो न वा वेदस-मन्वये । धर्मे वेद ऽास्यास्य सङ्कोच्योऽनवकाशया । प्रत्यक्षश्रुतिमूलाभिर्मन्वादिस्मृतिभि स्मृति अमूला कापिला बाध्या न सङ्कोचऽनया तत" इति । अयमर्थः । ऋग्वेदादिवदग्निष्टोमादिधर्मो ब्रह्मणो जगत्कारणत्व च प्रति पाद्यते । सांख्यस्मृत्यास्तु प्रधानस्य जगत्कारणत्व प्रतिपादयति तत्र तया स्मृत्या वेदस्य सङ्कोचोऽस्ति न वेति संशये स्मृतेर्जगत्कारणत्वमन्तरेणानवकाशत्वात् प्रावल्यं वेदस्य तु धर्मेऽपि चरितार्थत्वाद्दौर्बल्यम् । ततः स्मृत्यनुसारेण वेद सङ्कुचित इति पूर्व पक्षः । प्रत्यक्षश्रुतिभिर्वेद्यैरनुष्टचोभावन्तरौ मन्वादिस्मृतयो ब्रह्मकारणताभ्युपगते सांख्यस्मृतिस्त्वेका मूलहीना चेति दुर्बलत्वात् सैव बाध्या अतो नास्ति वेदस्य सङ्कोच इति सिद्धान्त इति । अथ तार्किकत्वाभिमानपक्षपातादौ सन् परमत एवं ब्रूषे भूतादीनामौपाधिकानां कालविशेषाणामेवो-त्पत्तिर्न तु निरुपाधिकस्य मुख्यस्य कालस्येति तर्हि चापदिक्रान्तेयमाय प्रवृत्तस्वितानपेक्षमतेत्येवमाविष रामायण मोक्षस्याभावकस्य त्वमेव विषयोऽभू । अतः साध-र्म्यवैधर्म्यज्ञानाय कृत्य दौन्यमिष्यत् परमश्रुततत्त्वमवगम । व्यवहारहेतूनां भूतादिकालविशेषाणामाधार स्वयं व्या-पकानामतो नित्यो निरवयवो मुख्योय कालः स परमात्मैव । तथाच श्वेताश्वतरा आमनन्ति । "य कालकालो गुणी सर्वविद्य' इति । आत्मा नित्यत्वानित्यत्वसावयवत्व-चिन्ता । सर्वथाप्यस्ति सांख्यतत्त्वेषु आर्थिक कालसंग्रह साधनासु यज्ञमावस्तु ज्योतिष्टोमादिवत् प्रकृतिपुरुष-विवेकानुपयोगादित्यवगन्तव्यम् । तृतीयचतुर्थपक्षौ तु भवतो वैशेषिकपरिचयगन्धोऽपि नास्तीति प्रकटयतः । वैशेषिक ग्रन्थेषु सर्वेष्वपि कालप्रकरणेषु तल्लक्षणस्य तत्साधकानुमानस्य च पर्याप्तत्वात् प्रमाणान्तराणि तु कालसाधकानि दृष्टैवोपन्यस्तानि तथा च तैत्तिरीया आरुणकेतुके मन्त्रमामनन्ति 'स्मृतिः प्रत्यक्षमैतिह्यम् अनुमानश्चतुष्टयम् । एतैरादित्यमण्डलं सर्वैरेव विधास्यते" इति । तत्र स्मृति

[illegible]

[illegible]

तस्य धर्म्मानुष्ठानेऽनुपयोगित्वेन हेयत्वादनुपादेयत्वाच्च । यस्त्वितरो मासपक्षतिथ्यादिरूपः सोऽपि ज्योतिःशास्त्रे सम्यङ्निर्णीत इति एतमनया कालनिर्णयमञ्जर्येति प्राप्ते ब्रूमः उभयमप्यत्र निर्णेतव्यं कालकालस्य जगदीश्वरस्य सर्व्वेषु कर्म्मारम्भेषु अनुसर्त्तव्यत्वात् अतएव शिष्टाः पुण्याहवाचनादावीश्वरमनुस्मरन्ति। “सर्व्वेषु कालेषु समस्तदेशेष्वशेषकार्य्येषु तथेश्वरेश्वरः । सर्व्वैः स्वरूपैर्भगवाननादिमान्ममास्तु माङ्गल्यविवृद्धये हरिः । यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतमिति” । मासादिरूपभेदस्य तु स्वरूपेण ज्योतिषे निर्णीतत्वेऽपि श्रौतस्मार्त्तकर्म्मविशेषेण सह कालस्याङ्गाङ्गिभावो निर्णेतव्यः । यद्यप्यसौ हेमाद्रिप्रभृतिषु ग्रन्थेषु निर्णीतस्तथाप्यनेकत्र विप्रकीर्णत्वेनैकत्र सङ्ग्रहार्थमत्र यत्नः क्रियते । अतेव चिकीर्षितस्य ग्रन्थस्य कालरूपो विषयः संग्रहरूपं प्रयोजनं चास्तीति अयं ग्रन्थ आरभ्यते” । “नित्यो जन्यश्च कालौ द्वौ तयोराद्यः परेश्वरः । सोऽवाङ्मनसगम्योऽपि देही भक्तानुकम्पया” नित्यकालस्य परमेश्वरत्वे प्रमाणं पूर्व्वमेवोपन्यस्तम् । परमेश्वरस्य अवाङ्मनसगोचरत्वे सर्व्वे वेदान्तास्तदनुसारिस्मृतिपुराणानि तत्त्वविदनुभवश्च प्रमाणम् । भक्तानुग्राहिमूर्त्तिस्वीकारश्च तलवकाराख्ये सामवेदशाखाविशेषे कस्याञ्चिदाख्यायिकायामाम्नायते तस्या आख्यायिकायामेवमुक्तम्—अग्निवाय्विन्द्रादयो देवा ईश्वरानुग्रहेण सर्व्वत्र विजयमानाः स्वकीयमेव सामर्थ्यमित्यभिमन्यन्ते स्म । तान् बोधयितुमवाङ्मनसगम्यः परमेश्वरः यक्षरूपां चक्षुर्ग्राह्यां काञ्चिन्मूर्त्तिं धारयित्वा प्रादुर्बभूव । तया सह वादं कृत्वापि राजसचित्तावग्निवायू तद्ब्रह्मतत्त्वं नैव बुबुधाते इन्द्रस्तु सात्त्विकचित्तो बुबुधे इति । वाशिष्ठरामायणेऽपि शुक्रोपाख्याने शुक्रं मृतमवलोक्य तत्पिता भृगुः क्रुद्धो मारयितारं कालं शशाप तदानीं कालोऽनुग्रहीतुमीदृशेन रूपेणाविर्बभूवेति पठ्यते “अथाकल्पितरूपोऽसौ कालः कवचितप्रजः । आधिभौतिकमास्थाय वपुर्मुनिमुपाययौ । खड्गपाशधरः श्रीमान् कुण्डली कवचान्वितः । ऋतुषट्कमयोदारवक्त्रषट्कसमन्वितः । मासद्वादशकोद्दामभुजद्वादशकोत्कटः । आकारसमया बहुधा वृतः किङ्करसेनया । स उपेत्य प्रशस्यादौ कुपितं तं महामुनिम् । कल्पक्षुब्धाब्धिगम्भीरं सान्त्वपूर्व्वमुवाच ह । समत्यन्ततया विप्र । नय नियतिमात्मना तेन सम्पूज्यसे पूज्य । साधो । नेतरथोपया । मा तपः क्षपयाऽमुष्य कल्पकालमहार्जितम् । यो न दग्धोऽग्निभिस्तस्य किं त्वं शापेन धक्ष्यसि ? । संसारावलयो येन निगीर्णा रुद्रकोटयः । भुक्तानि विष्णुवृन्दानि केन शक्यं वयं मुने । भोक्तारो हि वयं ब्रह्मन् भोजनं युष्मदादयः । स्वयं नियतिरेषा हि नावयोरेतदोचितमिति” । न च भक्तानुग्रहाय स्वीकृता मूर्त्तिरीश्वरस्येति कश्चिन्नियमोऽस्ति सर्व्वात्मकस्य परमेश्वरस्य भक्तचित्तप्रियाया सर्व्वस्या अपि मूर्त्तेः स्वकीयत्वात् अतएव भगवद्गीतायाम् “यो यो यां यां तनुं भक्तः श्रद्धयार्च्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् । स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान् मयैव विहितान् हितानिति” । विष्णुरुद्रादिवत् अचेतनमूर्त्तयोऽपि तत्तत्फलविशेषार्थिभिरीश्वरत्वेनोपास्याः । तदेतदृग्वेदे समाम्नायते । “एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्त एतमग्नावध्वर्य्यव, एतं महाव्रते छन्दोगा, एतमस्याम् (पृथिव्याम्) एतं दिव्येतं वायावेतमाकाश एतमोषधीष्वेतं वनस्पतिष्वेतं चन्द्रस्येतं नक्षत्रेष्वेतं सर्व्वेषु भूतेष्विति” वाजसनेयिनोऽपि महद्ब्राह्मणे “तमेतमग्निमध्वर्य्यव उपासत इत्यारभ्य पठन्ति “विषमिति सर्पा, सर्प इति सर्पविद, ऊर्गिति देवाः, रयिरिति मनुष्या, मायेत्यसुराः, स्वधेति पितरो देवजन इति देवजनविदो रूपमिति गन्धर्व्वा, गन्ध इत्यप्सरसस्तं यथायथोपासते तदेव भवतीति” । तैत्तिरीयाश्च पठन्ति “क्षेम इति वाचि योगक्षेमम् इति प्राणापानयोरित्यादि” । परब्रह्मण्यारोपितं यच्चाव्यक्तं जगद्रूपम् अस्ति तेन सर्व्वेण उपासनया परमेश्वरो रूपवान् भवतीति हिरण्मयाधिकरणतेजोमयाधिकरणयोः प्रपञ्चितम् । एवं च सति यो यदा यत्कर्म्मारभते स तदा तत्कर्म्मोपयुक्तां कालात्मकस्येश्वरस्य मूर्त्तिमिष्टदेवतारूपेणानुस्मरेत् । अत एव मन्त्रशास्त्रेषु नानाविधानि ध्यानान्युपदिष्टानि । लोकेऽप्याविद्वद्गोपालाङ्गनं सर्व्वोऽपि जन एकैकां देवतां स्वेच्छया पूजयति तदेतद्भगवानाह “यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः” इति तस्मादारभ्यमाणकर्म्मफलप्रदो निजेष्टदेवतारूपो नित्यः कालः कर्म्मारम्भेष्वनुस्मर्त्तव्य इति सिद्धम् ।

अथ जन्यं कालं निरूपयामः । ननु कालस्य जन्यत्वे सति कार्य्यप्रलये कालव्यवहारः । प्रलयत्वस्य जन्याभावाधिकरणक्षणरूपत्वात् । प्रलयोऽतीतः प्रलयो भावीति ... नित्य ... ऽपि समो दोषः । नित्यस्य कालस्य

तस्य धर्मानुष्ठानेष्वहेतुत्वेन हेयत्वादनुपादेयत्वाच्च । यस्त्वितरो मासपक्षतिथ्यादिरूपः सोऽपि ज्योतिःशास्त्रे सम्यङ्निर्णीत इति कृतमनया कालनिर्णयप्रस्तावेति नाशङ्कनीयम् उभयमप्यत्र निर्णेतव्यं कालकालस्य जगदीश्वरस्य सर्व्वेषु कर्म्मारम्भेषु अनुसर्त्तव्यत्वात् अतएव शिष्टा पुण्याहवाचनादावीश्वरमनुस्मरन्ति । "सर्व्वेषु कालेषु समस्तदेशेष्वशेषकार्य्येषु तथेश्वरेश्वर । सर्व्वैः स्वरूपैर्भगवाननादिमान्ममास्तु माङ्गल्यविवृद्धये हरिः । यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतमिति" । मासादिरूपभेदस्य तु स्वरूपेण ज्योतिषे निर्णीतत्वेऽपि श्रौतस्मार्त्तकर्म्मविशेषेण सह कालस्याङ्गाङ्गिभावो निर्णेतव्यः । यद्यप्यसौ हेमाद्रिप्रभृतिषु ग्रन्थेषु निर्णीतस्तथाप्यनेकत्र विप्रकीर्णः स एकत्र संग्रहार्थमत्र यत्नः क्रियते । तदेवं चिकीर्षितस्य ग्रन्थस्य कालरूपो विषयः संग्रहरूपं प्रयोजनं चास्तीति अथ ग्रन्थ आरभ्यते" ।

"नित्यो जन्यश्च कालौ द्वौ तयोराद्यः परेश्वरः । सोऽवाङ्मनसगम्योऽपि देहो भक्तानुकम्पया" नित्यकालस्य परमेश्वरत्वे प्रमाणं पूर्व्वमेवोपन्यस्तम् । परमेश्वरस्य वाचामनसगोचरत्वे सर्व्वं वेदान्तास्तदनुसारिस्मृतिपुराणानि तत्त्वविदनुभवश्च प्रमाणम् । भक्तानुग्राहिमूर्त्तिस्वीकारश्च तलवकाराख्ये सामवेदशाखाविशेषे क्वचिद्विद्याख्यायिकाया माम्नायते तस्यां ह्याख्यायिकायामेवमुक्तम्—अग्निवाय्विन्द्रादयो देवा ईश्वरानुगृहीताः सन्तः सर्व्वत्र विजयमाना स्वकीयमेव तत्सामर्थ्यमित्यभिमन्यन्ते स्म । तान् बोधयितुमवाङ्मनसगम्यः परमेश्वरो यक्षमूर्त्त्यां चक्षुर्ग्राह्यां काञ्चिन्मूर्त्तिं स्वीकृत्य प्रादुर्बभूव । तेन सह वादं कृत्वापि राजसचित्तावग्निवायू तद्ब्रह्मतत्त्वं नैव बुबुधाते इन्द्रस्तु सात्त्विकचित्तो बुबुधे इति । वाशिष्ठरामायणेऽपि शुक्रोपाख्याने शुक्रं मृतमवलोक्य तत्पिता भृगुः क्रुद्धो मारयितारं कालमनुसृत्य तदानीं कालोऽनुग्रहेतुमीदृशेन रूपेणाविर्भूवेति पठ्यते "अथाकल्पितरूपोऽसौ कालः कवलितप्रजः । आधिभौतिकमास्थाय वपुर्म्मुनिमुपाययौ । खड्गपाशधरः श्रीमान् कुण्डली कवचान्वितः । अनुपट्कमयोदारवक्त्रषट्कसमन्वितः । मासद्वादशकोद्दामभुजद्वादशकोत्कटः । स्वाकारसमया सत्रा युतः किङ्करसेनया । स उपेत्य प्रणम्यादौ कुपितं तं महामुनिम् । कल्पक्षुब्धाब्धिगम्भीरं शान्तपूर्व्ववचाश्च ह । त्वमत्यन्ततपा विप्र ! वयं नियतिमासक्ताः तेन सम्पूज्यसे पूज्य ! साधो ! नेतरथेच्छया । मा

तप अपयाऽसुक्न् ! कल्पकालमहानलैः । यो न दग्धोऽसि मे तस्य किं त्वं शापेन धक्ष्यसि ? । संसाराववयो ग्रस्ता निगीर्णा रुद्रकोटयः । भुक्तानि विष्णुवृन्दानि केन शक्या वयं मुने ! । भोक्तारो हि वयं ब्रह्मन् भोजनं युष्मदादयः । स्वयं नियतिरेषा हि नावयोरेतदोचितमिति" । न च भक्तानुजिघृक्षया स्वीकृता मूर्त्तिरीश्वरस्य वेति कश्चिन्नियमोऽस्ति सर्व्वात्मकस्य परमेश्वरस्य भक्तचित्तप्रियाया सर्व्वस्या अपि मूर्त्तेः स्वकीयत्वात् अतएव भगवद्गीतायाम् "यो यो यां यां तनुं भक्तः श्रद्धयार्च्चितुमिच्छति । तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् । स तया श्रद्धया युक्तस्तस्याराधनमीहते । लभते च ततः कामान् मयैव विहितान् हितानिति" । विष्णुरुद्रादिवत् अचेतनमूर्त्तयोऽपि तत्तत्फलविशेषार्थिभिरीश्वरत्वेनोपास्याः । तदेतद्बह्वृचे समाम्नायते । "एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्त एतमग्नावध्वर्य्यव, एतं महाव्रते छन्दोगा, एतमस्याम् (पृथिव्याम्) एतं दिव्येतं वायावेतमाकाश एतमोषधीष्वेतं वनस्पतिष्वेतं चन्द्रमस्येतं नक्षत्रेष्वेतं सर्व्वेषु भूतेष्विति" वाजसनेयिनोऽपि मण्डलब्राह्मणे "तमेतमग्निमध्वर्य्यव उपासत इत्यारभ्य पठन्ति "विषमिति सर्पाः, सर्प इति सर्पविद, ऊर्गिति देवा, रयिरिति मनुष्याः, मायेत्यसुराः, स्वधेति पितरो, देवजन इति देवजनविदो रूपमिति गन्धर्व्वा, गन्ध इत्यप्सरसस्तं यथायथोपासते तदेव भवतीति" । तैत्तिरीयाश्च पठन्ति "क्षेम इति वाचि, योगक्षेम इति प्राणापानयोरित्यादि" । परब्रह्मण्यारोपितं यद्यावज्जगद्रूपम् अस्ति तेन सर्व्वेण ह्युपासनया परमेश्वरो रूपवान् भवतीति हिरण्मयाधिकरणतेजोमयाधिकरणयोः प्रपञ्चितम् । एवं च सति यो यदा यत्कर्म्मारभते स तदा तत्कर्म्मोपयुक्तां कालात्मकस्येश्वरस्य मूर्त्तिमिष्टदेवतारूपेणानुस्मरेत् । अत एव मन्त्रशास्त्रेषु नानाविधानि ध्यानान्युपदिष्टानि । लोकेऽप्यविद्वद्गोपालाङ्गनपर्य्यन्तोऽपि जन एकैकां देवतां स्वेच्छया पूजयति तदेतद्भगवानाह "यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः" इति तस्मादारभ्यमाणकर्म्मफलप्रदोऽभिलषितदेवतारूपो नित्यः कालः कर्म्मारम्भेषु अनुस्मर्त्तव्य इति सिद्धम् ।

अथ जन्यं कालं निरूपयामः । ननु कालस्य जन्यत्वे सति कथं प्रलये कालव्यवहारः । प्रलयत्वस्य जन्यानधिकरणस्वरूपत्वात् । प्रलयोऽतीतः प्रलयो भावीति कालनित्यत्ववादिमतेऽपि समो दोषः । नित्यस्य कालस्य

कालेऽपचयवित्वेन ममतत्सरस्याभ्यर्हितत्वाद्ल्पसङ्ख्यतया सूचीकटाहन्यायानुसारेण च मध्ये चादौ निर्द्दिष्टम-द्तिस्थितम्” ।

सू० सि० रङ्ग० कालविभागश्चैवं प्रदर्शित

“लोकानामन्तकृत्कालः कालोऽन्यः कलनात्मकः । स द्विधा स्थूलसूक्ष्मत्वान्मूर्त्तश्चामूर्त्त उच्यते” सू० सि० ।

‘कालो द्विधा तत्रैकः कालोऽखण्डदण्डायमानः शास्त्रा-न्तरप्रमाणसिद्धः । लोकानां जीवानां सुपलक्षणादचेतना-नामपि । अन्तकृद्विनाशकः । यद्यपि कालस्तेषामुत्पत्ति स्थितिकारकस्तथापि विनाशस्यागन्तत्वात् कालस्वप्रति पादनाय चान्तकृदित्युक्तम् । अन्तकृदित्यनेनैवोत्पत्तिस्थि-तिकृदित्युक्तमन्यथा नाशकत्वासम्भवात् । अतएव “कालः सृजति भूतानि कालः संहरति प्रजाः” इत्याद्युक्तं ग्रन्थान्तरे । अन्यो द्वितीयः कालः खण्डकालः । कल-नात्मको ज्ञानविषयस्वरूपः । ज्ञातुं शक्य इत्यर्थः । स द्वितीयः कलनात्मकः कालोऽपि द्विधा भेदद्वयात्मकः । तदाह स्थूलसूक्ष्मत्वादिति महत्त्वाणुत्वाभ्याम् । मूर्त्तः—व्यवहारक्षमपरिमाणः । अमूर्त्तस्तद्भिन्नः कालतत्त्व विद्भिः कथ्यते । चकारौ क्रमेण मूर्त्तामूर्त्तसमार्थकौ । तेन महान् मूर्त्तकालोऽपरमूर्त्तः काल इत्यर्थः । अथोक्त भेदद्वय स्वरूपेण प्रदर्शयन् प्रथमभेदं प्रतिपिपादयिषु-र्द्वितीयान्तरभेदेषु भेदद्वयमाह” रङ्गनाथः ।

“प्राणादिः कथितो मूर्त्तस्त्रुट्याद्योऽमूर्त्तसंज्ञकः । षड्भिः प्राणैर्विनाडी स्यात् तत्षष्ट्या नाडिका स्मृता” सू० सि० ।

“प्राणः स्वस्थसुखासीनस्य श्वासोच्छासान्तर्वर्ती कालो दशगुर्वक्षरोच्चार्य्यमाणः आदिर्य्यस्यैतादृशः प्राणमानान्तर्गतो मूर्त्तः काल उक्तः । त्रुटिराद्या यस्यैतादृशः काल एव प्रा-णान्तर्गतत्रुटितत्परादिकोऽमूर्त्तसंज्ञः । अथामूर्त्तस्य मूर्त्ता-दिभूतस्य व्यवहारायोग्यत्वेनाप्रधानतयानन्तरोद्दिष्टस्य भेदं प्रतिपादनमुपेक्ष्य मूर्त्तकालस्य व्यवहारयोग्यत्वेन प्रधान-तया प्रथमोद्दिष्टभेदान् विवक्षुः प्रथमं पलषष्ट्याह । षड्भिरिति । षड्भिः प्राणैरसुभिः पानीयपलं भवति पलानां षष्ट्या घटिकोक्ता कालतत्त्वज्ञैः । अथ दिन-मासादिकमाह” रङ्ग० ।

‘नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम् । तत्-त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा”।

“ऐन्दवस्तिथिभिस्तद्वत् सङ्क्रान्त्या सौर उच्यते । मासैर्द्वादशभिर्वर्षं दिव्यं तदहरुच्यते” ।

“सुरासुराणामन्योऽन्यमहोरात्रं विपर्ययात् । तत्-षष्टिः षड्गुणा ३६० दिव्यं वर्षमासुरमेव च” ।

“तद्द्वादश सहस्राणि चतुर्युगमुदाहृतम् । सूर्याब्द-सङ्ख्यया द्वित्रिसागरैरयुताहतैः ४३२०००० ” ।

“सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम् । कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया” ।

‘युगस्य दशमो भागश्चतुस्त्रिद्व्येकसङ्गुणः । क्रमात् कृत-युगादीनां षष्ठांशः सन्ध्ययोः स्वकः’ ।

“युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते । कृताब्द-सङ्ख्या १७२८००० तस्यान्ते सन्धिः प्रोक्तो जलप्लवः” ।

“ससन्धयस्ते मनवः कल्पे ज्ञेयाश्चतुर्दश । कृतप्रमाणः कल्पादौ सन्धिः पञ्चदश स्मृतः” ।

“इत्थं युगसहस्रेण भूतसंहारकारकः । कल्पो ब्राह्मम् अहः प्रोक्तं शर्वरी तस्य तावती” ।

“परमायुः शतं तस्य तयाऽहोरात्रसङ्ख्यया । आयु-षोऽर्द्धमितं तस्य शेषे कल्पोऽयमादिमः” सू० सि० । अह-रादिकालभेदाः (अहन्) शब्दे उक्ताः ।

सि० शि० तु निमेषतत्परत्रुटिरूपाः सूक्ष्माः कला-श्रयाः दर्शिताः तच्च शाक० १७८८१० दर्शितम् । स च कालस्त्रिविधः वर्त्तमानभूतभविष्यद्भेदात् तत्र भूतभविष्यत् कालावपि प्रत्येकं द्विधा अद्यतनानद्यतनभेदात् तद्भेदे-नैव लकारविशेषं पाणिनिरनुशशास ।

सोऽयं कालः षडिन्द्रियवेद्य इति मीमांसका मन्यन्ते “न सोऽस्ति प्रत्ययो लोके यत्र कालो न भासते” इति तेषा-मुक्तेः । वेदान्तिनस्तु तस्य साक्षिप्रत्ययभास्यत्वमङ्गीचक्रुः तत्र प्रमाणं कालमा० अनुपदमेव दर्शितम् । सोऽयं कालः देश-वृत्त्यव्याप्यवृत्तितानियामकः । तथाहि यः पदार्थः स्वाधि-करणवृत्त्यभावप्रतियोगी सोऽव्याप्यवृत्तिरिति भण्यते तत्रा-भिव्यञ्जकश्च कालो देशश्च । कचिद्देशे स्थितस्य तादृशपदार्थस्य कालभेदेन तत्रैवाधिकरणेऽभावस्तिष्ठति यथा ज्ञानाश्रये आत्मनि सुषुप्तिकाले इच्छादिविशेषगुणान्तरकाले च ज्ञानाभावः । यथा वा गुणवति जन्यद्रव्ये उत्पत्तिकाले गुणाभावः श्यामस्य अपक्के घटे रक्तस्याभावः रक्तत्वस्य पाकोत्तरं जायमानत्वात् । कालमध्ये च देशोऽपि तथा । यथा आत्मनि ज्ञानकाले शरीरावच्छेदेन ज्ञानं, घटाद्यव-च्छेदेन तदभावः । तथा वृक्षे कपिसंयोगकालेऽपि मूले तदभावः । कालेन कृतसम्बन्धः कालिकसम्बन्धः तेन सम्बन्धेन सर्व्वेषु तदभावेषु जन्यभावानां वृत्तिमत्ता

[illegible]

वर्णवाचकात् तस्य भाव इत्यर्थे इमनिच् कालिमन् पु० तल् कालता स्त्री, त्व कालत्व न० । कृष्णवर्णे ।
तत्र "यमे शमेस्य सुनिवेशोऽथ काल प्रोवाच राघवम्" रघु । यमपरत्वे २०द्वितसंख्याया २१तत्त्वसंख्यान्विते च भरण्या यमदैवत्वात् तस्याश्च अश्विन्यादिभचक्रचक्रे द्वितीयत्वात् लक्षितलक्षणया तत्परत्वम् । शिवपरत्वे २२षट्संख्याया २२सख्यान्विते च शिवदैवतार्द्रायाः अश्विन्यादिषु षष्ठत्वादुक्तरीत्या तथात्वम् । ज्योतिर्भचक्रशब्दे १४२८पृ० दर्शित षट्कालकालेत्यादि वाक्यम् उदा० "कालस्य वेला रवित पराख्यकालानलाग्निस्त्वयो गजेन्द्रः" ज्यो०त० ।

चन्द्रादिग्रहाणां दृष्टियोग्यताप्रापककालात्मके २४ अंशभेदे च । स च सि० शि० दर्शितो यथा

"दस्रेन्दवः १२ शैलभुवश्च १७ शक्रा १४ रुद्राः ११ खचन्द्रा १० स्तिथय १५ क्रमेण । चन्द्रादित कालल्वा निरुक्ता ज्ञशुक्रयोर्वक्रगयोर्द्विहीना" सि०शि० ।

चन्द्रादीनामेते १२ । १७ । १४ । ११ १० । १५ । कालांशा ज्ञेयाः । बुधशुक्रयोस्तु वक्रगतयोर्द्विहीना १२।८ द्विवर्जिता ज्ञेया ।

अत्रोपपत्ति । कालांशा इति कालात्मका अंशा षड्भिरंशैरेका घटिका । एकस्यांशस्य दश पानीयपलानि । अतस्तदुक्तं भवति । चन्द्रस्य किल द्वादश १२ कालांशाः । अर्कस्यास्तमयादुदयाद्वा घटिकाद्वयाधिकेऽन्तरे चन्द्रो दृष्टियोग्यो भवति । तदूने तत्प्रभाच्छादितत्वाददृश्य । अवमस्य द्वादश कालांशा । एवं भौमस्य सप्तदश १७ षडंशोनाश्चितस्रो घटिका २ । ५० इत्यर्थः । एवमन्येषां यथापठितांशैर्बिम्बस्य स्थूलसूक्ष्मतावशात् न्यूनाधिकता । अत एव बुधशुक्रयोर्वक्रगतयोर्बिम्बस्य स्थूलत्वाद्द्विहीनाः । अत्रोपलब्धिरेव वासना" प्रमि०

"यत्रोदयो वास्तमयोऽवगम्यस्तद्दिग्भवो दृक्खचरो रविश्च । अस्तोदयासन्नदिने कदाचित् साध्यस्तु यस्मात् तदपि सषड्भ" सि०शि० ।

"इह केन्द्रभागैर्ग्रहस्योदयोऽस्तमयो वा यस्मिन् दिशि आयातस्तस्यासन्ने कस्मिंश्चिद्दिने त ग्रह रविं च स्फुटं कृत्वा यस्यां दिशि ग्रहोदयोऽस्तमयो वा तद्दिग्भवो दृग्ग्रह कार्य । यदि प्राच्यां तदौदयिक ग्रह तदोदयलग्न साध्यम् । यदि च प्रतीच्यां तदास्तमयिक ग्रह तत्कालग्न साध्यमित्यर्थ । यदा प्रतीच्यां, तदारवि सषड्भस्य कार्य । इदानीमिष्टकालांशानयनमाह" प्रमि० ।

"दृक्खेचरार्कान्तरजातनाड्यो रसाहताः कालल्वा स्फुरिष्टा" सि०शि० ।

"दृग्ग्रहार्कयोरन्तरघटिका साध्याः ता रस ६ हता इष्टा कालांशा भवन्ति । अथ तैरुदयास्तयोर्गतैष्या साध्या" प्रमि० ।

"उक्तोभ्य ऊनाभ्यधिका यदीष्टा खेटोदयो गम्यगतस्तदा स्यात् । अतोऽन्यथा वास्तमयोऽवगम्य प्रोक्तेष्टकालान्तरलिप्ता । खाभ्राष्टभू १८०० प्राग्युदयोदयाप्ता खेटार्कभुक्त्यन्तरभाजिताश्च । वक्रे तु भुक्त्यैक्यहृता अवाप्तास्तदन्तरोत्थे दिवसा गतैष्याः । तात्कालिकाभ्यां रविदृग्ग्रहाभ्यां यद्वा ततः स्फुटता भवन्ति" सि०शि० ।

"एव य इष्टकालांशा आनीतास्ते प्रोक्तेभ्यो यदि स्वल्पा भवन्ति तदा ग्रहस्योदयो गम्य । यद्यधिकास्तदा गत इति वेदितव्यम् । अतोऽन्यथास्तमय इति । अथ प्रोक्तोक्तेभ्योयदीष्टा स्वल्पास्तदा ग्रहस्यास्तमयोगतोयद्यधिकस्तदा गम्य इति । अथ प्रोक्तानामिष्टकालांशानां च या अन्तरे कलास्ता अष्टादशशतै १८००र्गुण्या दृग्ग्रहाक्रान्तस्य राशेः स्वदेशोदयासुभिर्भाज्या । फलकलाना ग्रहार्कभुक्त्यन्तरेण वक्रगे ग्रहे भुक्तियोगेन भागे गृहीते यल्लब्ध ते गता एष्या वा दिवसा भवन्त्युदये वास्तमये वा । तैर्दिवसैस्तात्कालिकौ दृग्ग्रहार्कौ कार्यौ एवमसकृत्कर्मणा सम्यक् तत्कालज्ञान भवति ।

अत्रोपपत्ति । इष्टकालांशसाधने लग्नवासनैव । प्रोक्तानां कालांशानामभ्यन्तरवर्ती ग्रहो दृश्यो भवति । अतो यावदिष्टा न्यूनास्तावददृश्य । उदये विलोक्यमाने उदेष्यति । अस्ते विलोक्यमानेऽस्तं गत इत्यर्थाज्ज्ञायते । इष्टा यद्यधिकास्तदा प्रोक्तेभ्यो विलोक्यमानेऽस्तगते बहिर्भूतत्वाद्ग्रहोऽदृश्य उदये विलोक्यमाने उदित अस्ते यास्यतीत्यर्थाज्ज्ञायते । अथ तेषां प्रोक्तेष्टानां कालांशानां च या अन्तरे कलास्तासां क्षेत्रलिप्तीकरणायानुपात । याद्यसुः कालकलास्तावन्त एवासवो भवन्ति । अथ यदि दृग्ग्रहोदयासुभिरष्टादशशतानि १८०० क्षेत्रलिप्ता लभ्यन्ते तदा तदन्तरकलासुभि किमिति । फल क्षेत्रलिप्ताः । ता ग्रहार्कभुक्त्यन्तरेण भाज्या । भुक्त्यन्तर हि क्षेत्रलिप्तात्मकमत सजातीयकरणाय क्षेत्रलिप्तीकरणम् । भुक्त्यन्तरेणैको दिवसो लभ्यत इति युक्तमुक्तम् । वक्रे तु भुक्तियोग एव भुक्त्यन्तरम् । दूरान्तरे स्थूलकालो भवतीत्यसकृत्कर्म सूक्ष्मार्थम् । अत्र विशेषमाह" । प्रमि०

' मान्तूणपश्चेदृमिथो दये। काहूणोऽय मा मविचरन पवय। मोजेक्काबांबबुती। बवाविः वाव्यतदामी दिग्वामवेमाः। बवा बहीवबांवाः मोम ओऽमवि वायद। अवववववव्ये चैबीज्जा हविवा बहुँबि दि "यदि मान्तूणपश्ची दयेदमिथो भवति। वय वा वचि- वमूवयी भूणो भवति यदा दे दूरवावांवा वावीजवेवां मोक्षावां च मोमयवाविविवा वावा। वायव्यवावि: वया मायाव्य वेद्यवेदयिवे वयि वयापूतमपदे वा भूणे व दयवावांवा वावदावे च यदि मोक्षेव्योऽभिवाव्यदा यदा मोक्षेव्यावांबहुती बवावियें दिग्वा। वायिवा व वा दिग्वायां वदीवाने विर्वेवीयेव।

वामोयवनि। यो पव्यायावावेदि प्रतिविवि वा वयो दयेद्यः वम् प्रविवावाम् वविवाः दनु वाव्यां दिवि मोक्षवावांवेद्यः वम् हवयावेवि। तावद्विवेव वविवा वाववियवद्। वाको दये दवव वाव्यां मोक्षवावांवा प्रवीवावपवः। वाव्यापूवे वये व दयवावांवा वावावे वे दये। हवव। वया दवववेदेव मोक्षवावां वेववाववर्य कर्तुं हुवते। वय वाव्यां दयेदमिथे हव पे व दयवावांवा वावावे वे दयेदव्यो भवति। ववोऽपववावां हववावावाद् वावांवावां वोवे वो ववववर्य कर्व भवति वया वद्वेव अवाव्यविवा वदोवा यदि वहतवववववववव वद् ववावेवावावेव। वदा हवदेवे हवव्या दवैवपववावाद वववववववदं आवावेव भवति। वव वव् ववववव वदेवव दवाविद्। वव दविवेवि विवेवावूदविवेवेददवववि वावो वदि। वववावे वाहिवविवाविदो वविवावावंववववाव दाजावेवे २१ववववदवी ववववेवे च अवावविवेव वावी दविवो वथा "प्रवयों ववदे वावं तदूवं ववावेव च वर्यों ह वावंववम् वावं वदववयादेव दीवते"। ववविवोऽदि वाव दिव्ये व वावो देव वविवावविववविवोदिववा वावो देव ववाव वाव० "वावववेववादववमोऽविवाव वावे विवाव्। विवादेव् ववदव वावोऽव्यो भवा वव।

ववववववावव वेदेविवयी वेवोवविवावववव व्वावादिवावयवा वद् हवा। बोवो वीवदेवव ववदववोव। ववववदवी २१ वोवे वावदव वद्दे ववा। वाददिवेवे दिव्मोदेव वाविवोवो वावावो विदिवे २० वोवावे। व व वौवा व दि वव। "वोवेवोदः वेवदोवेव वावोऽवांवो भवे

वदूवे वव वावा। दावावेवो वेवदीवव ववो वाव हवे वंवयो ववदीवो"। ववववि:। दावववावां वववा वोवे वाववां वोवे दविवावाद् दये वेवांवाद् हवे दविववाद्, वृवे वावववां ववो दूवंवाद्। दवव- ववदा वावव वीवे वावववावे। वोवे हु दवेवे वावे वृवे वव हवावे। वोवे च वावव दवावे दव ववोव वोवदे। ववो ह वृववदिववावे वावव्य वदवोविद्। ववोदवे ववववववयावः वावृ वावववव ह ववव। दविववव वृवा वाव दावो ववदिवावव। वावावां ववदे वेववव्योऽवव व वोवव। दावो व वेदोवव ववा दवो दावो दविववां वाव वववदां वाव दवा- दिवविवेवूवव्। २ ववदवावे (ववद) विवोवेवे, वेव। "विवववववावववववव्, वावववा वावववववदि वदि वववावववदो" २८ हववेवे ह। "वृवव ववो ववव वावो वोववाववव" वदिदं २व।

वावव्य च। वाव वावें व ववववि दवादं वव-वोवदे वव् वृ वा। ववववावे वावव। वव ववववंवाव ववावव्। २ववदि वेवव। विविवेदवा दवाव वव ववावव्। वववोऽहं वावव। "वदा दवो वव वादि वव दववविवव"। दावं वाव व वंवाव व वोव वववेव। "ववव दीवा च दवव ववववावं ववो विवव्। वावव वविववववं दवावां मोवयं ववोदेवि च। देवदे ववावें (ववृव) १विवृवेवे ववदे ह ववदा ३ववववें ववववे (वावववोवा) वर्वे ह वो ववद। वाविवो वर्वे वेव दवे वार्वे वावाव। व० वव्। वावव वाववेव दवे १ववदो वि वव ववेववाविववव दावेव दवववाऽविववाव ३ववावव्। विवावं वाव। "वाविवा वादो" वि वो। वीववविवोवे (ववव- दाविव दावे हववववववे १ देव विवि।

वावववु वो वि वव। ववववें वववेवे ववव्वि।
वावववव च वि वर्व। वीववववे। २दावव्वेवे ह।

"वौवोवोः वावववेव वृववेदवविवेववृवीवा च। १व
वावववटटद ह वाववदा वादद। विवे। "वेवदी वर ? वाची ववी वाववदूवव वा वाव वेव विववे।
वावववववव ह वी वाव ववव ववववीवव। १ववव- ववववद्दवां वि दावृदे (ववव) ववविवे ववदा विवाव वाविवाव वो। १वीववावे ववी वेवि
वावववव् ह वावा ववोऽव्य दिववावद्। दिवे व वि

अमृतमन्थनकाले उत्थितविषपानात् कालकण्ठो जातः तत्कथा भाग० ८।७अ० यथा । "ततः करतलीकृत्य व्यापि हालाहलं विषम् । अभक्षयन्महादेवः कृपया भूतभावनः ॥ तस्यापि दर्शयामास स्ववीर्य्यं जलकल्मषः । यच्चकार गले नीलं तच्च साधोर्विभूषणम् ॥" २ मयूरे । ३ दात्यूहे । ४ खञ्जने च पक्षिभेदे । मेदि० । स्त्रियां जातित्वात् ङीष् । तेषां कण्ठस्य कृष्णवर्णत्वात् तथात्वम् । वा कप् । दात्यूहे पुं० स्त्री ॥

कालकन्दक पुं स्त्री कालः कन्द इव कायति कै-क । (काल-ढोंड़ा) जलसर्पे । स्त्रियां जातित्वात् ङीष् ॥

कालकर्णी स्त्री कालः कर्णोऽस्याः ङीप् । अलक्ष्मीभेदे "अलक्ष्मी कालकर्णी च" पुरा० । स्वार्थे क ह्रस्वः । कालकर्णिका तत्रार्थे हेम० । अलक्ष्मीशब्देऽस्तन्त्रद्भुतपत्न्यादिरूपाभिधीयते पाद्मे उत्तरखण्डे देवीं प्रति शिववाक्यम् ।

"सा प्रणम्य पुनर्देवी ममन्थु क्षीरसागरम् । तस्मिन् प्रमथ्यमाने तु मया देवैश्च भाविनि ! । ज्येष्ठा देवी समुत्पन्ना रक्ताम्बरसमावृता । उत्पन्ना साऽब्रवीद्देवान् किं कर्त्तव्यं ? मयेति वै । तामब्रुवंस्तदा देवीं सर्व्वे देवगणास्तदा । येषां गृहान्तरे नित्यं कलहः सम्प्रवर्त्तते । तत्र स्थानं प्रयच्छामो वासस्तत्र शुभानने ! । यस्य गेहं कपालास्थिसकेशादिविचिह्नितम् । परुषं भाषते नित्यं वसन्त्यन्ततवादिनः । सन्ध्याकाले च ये पापाः स्वपन्ति मलचेतसः । तेषां वेश्मनि संतिष्ठ दुःखदारिद्र्यदायिनी । कपालकेशभस्मास्थितुषाङ्गाराणि यत्र तु । तत्र ते सततं स्थानं भविष्यति न संशयः । अकृत्वा पादयोः शौचं यस्त्वाचामति दुर्म्मतिः । तं भजस्व सदा देवि ! कलुषेणावृता भयम् । तुषाङ्गारकपालास्थिसवालुकायसचर्म्मभिः । दन्तधावनकर्त्तारो भविष्यन्ति नराधमाः । रमस्व कलिमा देवि ! तेषां वेश्मसु नित्यशः । तिलपिष्टञ्च नक्तञ्च कालिङ्गविप्रुष्टशनम् । शलाकं निष्पावञ्च बिल्वकोपातकीफलम् । अशाम्रं (मर्त्तुभाप) श्रीफलं ये वै खादयन्ति नराधमाः । तेषां गृहे तव स्थानं देवि ! दारिद्र्यदे ! सदा । इत्यादिष्ट सुराः सर्व्वे ते ज्येष्ठां कलिनन्दिमाम्" । तस्या उद्दालकमुनिना सह विवाहादिकथा च पाद्मे १९६ अ० ।

"समुद्रमथनादुत्थानि रत्नान्यासु सुरोत्तमाः । श्रीवत्सं कौस्तुभं तेषु विष्णवे प्रददुः सुराः । यावदलक्ष्मीकारणात् लक्ष्मीं मार्य्यार्थमात्मनः । तावद्विज्ञापयामास लक्ष्मीश्च चक्रपाणिनम् । लक्ष्मीरुवाच । असत्कृत्य कथं ज्येष्ठां कनिष्ठा परिणीयते । तस्मात्समादिशामैतामलक्ष्मीं मधुसूदन ! । विवाहोहङ्कुर्मां यथादेव धर्म्मः सनातनः । तस्मात् धर्म्मव्यतिक्रामं न कुर्य्या मधुसूदन ! । इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः । उद्दालकाय मुनये सुदीर्घतपसे तदा । आज्ञावाक्यानुरोधेन तामलक्ष्मीं ददौ किल । स्थूलोष्ठीं शुष्कवदनां विरूपां बिभ्रतीं तनुम् । अवदारक्तनयनां रूक्षपक्षशिरोरुहाम् । स मुनिर्विष्णुवाक्यात्तामङ्गीकृत्य स्वमाश्रमम् । वेदध्वनिसमायुक्तमानयामास धर्म्मवित् । होमधूपसुगन्धाढ्यं वेदघोषेण मोदितम् । आश्रमं तं विलोक्याथ व्यथिता साऽब्रवीदिदम् । ज्येष्ठोवाच । न हि वासोचितस्थानोऽयं वेदध्वनियुतो मम । नात्रागमिष्ये भो ब्रह्मन् ! नयस्वान्यत्र मां ध्रुवम् । उद्दालक उवाच । कथं नायासि किन्त्वत्र ? वर्त्तते स्वमतं तव । तव योग्या च वसतिः का भवेत्तद्वदस्व माम् । ज्येष्ठोवाच । वेदध्वनिर्भवेद्यत्र अतिथीनाञ्च पूजनम् । यज्ञदानादिकं यत्र नैव, तत्र वसाम्यहम् । परस्परानुरागेण दाम्पत्यं यत्र विद्यते । पितृदेवार्च्चनं यत्र तत्र नैव वसाम्यहम् । दामशौचे न विद्येते परद्रव्यापहारिणः । परदाररता यत्र तत्र स्थाने रतिर्मम । वृद्धसज्जनविप्राणां यत्र स्यादवमाननम् । निष्ठुरं भाषणं यत्र तत्र स्यादवसाम्यहम् । सूत उवाच । इति तद्वचनं श्रुत्वा विषण्णवदनोऽभवत् । उद्दालकस्ततोवाक्यं तामलक्ष्मीमुवाच ह । उद्दालक उवाच । अश्वत्थवृक्षमूलेऽस्मिन् अलक्ष्मि ! त्वमस्यतां क्षणम् । आश्रमस्थानमालोक्य यावदायाम्यहं पुनः । सूत उवाच । इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः । प्रतीक्षन्ती चिरं तत्र यदा न स ददर्श ताम् । तदा रुरोद करुणं भर्त्तृत्यागेन दुःखिता । तत्तस्याः क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽशृणोत् । तदा विज्ञापयामास विष्णुमुद्विग्नमानसा । लक्ष्मीरुवाच । स्वामिन् ! मद्भगिनी ज्येष्ठा स्वामित्यागेन दुःखिता । तामाश्वासयितुं यात्विह कृपालो ! यद्यहं प्रिया । सूत उवाच । लक्ष्म्या सहततो विष्णुस्तत्रागात् कृपयान्वितः । आश्वासयन्नलक्ष्मीं तामिदं वाक्यमथाब्रवीत् । विष्णुरुवाच । अश्वत्थमूलमाश्रित्य सदाऽलक्ष्मि ! स्थिरा भव । ममांशसम्भवो ह्येष आवासस्ते मया कृतः । मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति । अस्पृश्योऽसौ भवेत्तस्मात् मन्दवारं विना किल" ।

दीपान्वितामावस्यायां तत्पूजाविधानं मन्त्रविशेषात् यथा "अलक्ष्मीस्त्वं कुरूपासि कुत्सितस्थानवासिनि ! ।

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

अमृतमन्थनकाले उत्थितविषपानात् कालकण्ठो जात-
स्तत्कथा भाग० ८।७अ० यथा । "ततः स करतलीकृत्य
व्यापि हालाहलं विषम् । अभक्षयन्महादेवः कृपया भूत-
भावनः । तस्यापि दर्शयामास स्ववीर्य्यं जलकल्मषः ।
यच्चकार गले नीलं तच्च साधोर्विभूषणम् ।" २ मयूरे ३ दात्यूहे
४ खञ्जने च पक्षिभेदे त्रिका० स्त्रियां जातित्वात् ङीष् ।
तेषां कृष्णवर्णत्वात् तथात्वम् । वा कप् । दात्यूहे पुं० स्त्री

कालकन्दक पुं स्त्री कालः कन्द इव कायति कै—क । (काम-
ढोड़ा) जलसर्पे । स्त्रियां जातित्वात् ङीष् ।

कालकर्णी स्त्री कालः कर्णोऽस्याः ङीप् । अलक्ष्मीभेदे
"अलक्ष्मीः कालकर्णी च" पुरा० । स्वार्थे क ह्रस्व । काल-
कर्णिका तत्रार्थे हेम० । अलक्ष्मीशब्देऽस्तत्स्वरूपमुत्पत्त्यादि-
रुक्ताभिधीयते पाद्मे उत्तरखण्डे देवीं प्रति शिववाक्यम् ।

"मा प्रणम्य पुनर्देवा ममन्थुः क्षीरसागरम् । तस्मिन्
मथ्यमाने तु मया देवैश्च भाविनि ! । ज्येष्ठा देवी समुत्-
पन्ना रक्ताम्बरवासावृता । उत्पन्ना साऽब्रवीद्देवान् किं
कर्त्तव्यं ? मयेति वै । तामथ पुस्तदा देवीं सर्वे देवगणा-
स्तदा । येषां गृहान्तरे नित्यं कलहः सम्प्रवर्त्तते । तत्र
स्थानं प्रयच्छामो वासस्तत्र शुभानने ! । यस्य गेहं
कपालास्थिसकेशादिविचिह्नितम् । परुषं भाषते नित्यं
वसन्त्यनृतवादिनः । सन्ध्याकाले च ये पापाः स्वपन्ति
मलचेतसः । तेषां वेश्मनि संतिष्ठ दुःखदारिद्र्यदायिनी ।
कपालकेशभस्मास्थितुषाङ्गाराणि यत्र तु । तत्र ते सततं
स्थानं भविष्यति न संशयः । अक्षत्वा पादयोः शौचं यस्त्वा-
चामति दुर्म्मतिः । तं भजस्व सदा देवि ! कलुषेणावृता त्व-
गम् । तुषाङ्गारकपालास्थिवालुकायसधर्म्मभिः । दन्तधावन-
कर्त्तारो भविष्यन्ति नराधमाः । रमस्व कलिना देवि ! तेषां
वेश्मसु नित्यशः । तिलपिष्टञ्च नक्तञ्च कालिङ्गचिपुटक्षमम् ।
अश्वाकं शिङ्गराहञ्च विल्वकोषातकीफलम् । अलाबू
(धर्सुधार) श्रीफलं ये वै खादन्ति नराधमाः । तेषां गृहे
तव स्थानं देवि ! दारिद्र्यदे ! सदा । इत्यादिश्य सुराः
सर्वे ते ज्येष्ठां कलिनप्रभाम्" । तस्या उद्दालकमुनिना
सह विवाहादिकथा च पाद्मे ११६।अ० ।

"मथद्भ्यः समुद्भूतानि रत्नान्यासु सुरोत्तमाः । श्वेतञ्च
कौस्तुभं तेषु विष्णवे ददुः सुराः । यावदङ्गीचकारासौ
लक्ष्मीं भार्य्यार्थमात्मनः । तावद्विज्ञापयामास लक्ष्मीश्च
चक्रपाणिनम् । लक्ष्मीरुवाच । असंस्कृत्य कथं ज्येष्ठां
कनिष्ठा परिणीयते । तस्मान्ममाग्रजामेतामलक्ष्मीं मधु-
सूदन ! । विवाह्योद्वह मां पश्चादेष धर्म्मः सनातनः ।
तस्मात् धर्म्मव्यतिक्रमं न कुर्य्या मधुसूदन ! । इति तद्-
वचनं श्रुत्वा स विष्णुर्लोकभावनः । उद्दालकाय मुनये सुदीर्घ-
तपसे तदा । आश्रमवाक्यानुरोधेन तामलक्ष्मीं ददौ किल ।
स्थूलोष्ठीं शुष्कवदनां विरूपां बिभ्रतीं तनुम् । अव-
दारक्तनयनां रुक्षपिङ्गशिरोरुहाम् । स मुनिर्विष्णु-
वाक्यात्तामङ्गीकृत्य स्वमाश्रमम् । वेदध्वनिसमायुक्तमा-
नयामास धर्म्मवित् । होमधूमसुगन्धाढ्यं वेदघोषेण ना-
दितम् । आश्रमं तं विलोक्याथ व्यथिता साऽब्रवीदिदम् ।
ज्येष्ठोवाच । न हि वासोचितोऽयं वेदध्वनियुतो मम ।
नागमिष्ये भो ब्रह्मन् ! नयस्वान्यत्र मां ध्रुवम् । उद्दा-
लक उवाच । कथं नायासि किन्त्वत्र ? वर्त्तते स्वमतं तव ।
तव योग्या च वसतिः का भवेत्तद्वदस्व माम् । ज्येष्ठोवाच ।
वेदध्वनिर्भवेद्यत्र अतिथीनाञ्च पूजनम् । यज्ञदाना-
दिकं यत्र नैव, तत्र वसाम्यहम् । परस्परानुरागेण दाम्पत्यं
यत्र विद्यते । पितृदेवार्च्चनं यत्र तत्र नैव वसाम्यहम् ।
दानशौचे न विद्येते परद्रव्यापहारिणः । परदाररता
यत्र तत्र स्थाने रतिर्मम । वृद्धसज्जनविप्राणां यत्र
स्यादवमाननम् । निष्ठुरं भाषणं यत्र तत्र सम्य-
ग्वसाम्यहम् । सूत उवाच । इति तद्वचनं श्रुत्वा विषण्ण-
वदनोऽभवत् । उद्दालकस्ततोवाक्यं तामलक्ष्मीमुवाच ह ।
उद्दालक उवाच । अश्वत्थवृक्षमूलेऽस्मिन् अलक्ष्मि ! स्थीय-
तां क्षणम् । आश्रमस्थानमालोक्य यावदायाम्यहं पुनः ।
सूत उवाच । इति तां तत्र संस्थाप्य जगामोद्दालको
मुनिः । प्रतीक्षन्ती चिरं तत्र यदा न स ददर्श सा ।
तदा रुरोद करुणं भर्त्तुस्त्यागेन दुःखिता । तत्तस्याः
क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽशृणोत् । तदा विज्ञापयामास
विष्णुमुद्विग्नमानसा । लक्ष्मीरुवाच । स्वामिन् ! मद्-
भगिनी ज्येष्ठा स्वामित्यागेन दुःखिता । तामाश्वासयितुं
याहि कृपालो ! यद्यहं प्रिया । सूत उवाच । लक्ष्म्या सह-
ततो विष्णुस्तत्रागात् कृपयान्वितः । आश्वासयन्
लक्ष्मीं तामिदं वाक्यमथाब्रवीत् । विष्णुरुवाच । अश्वत्थ-
वृक्षमाश्रित्य सदाऽलक्ष्मि ! स्थिरा भव । ममांशसम्भवो
ह्येष आवासस्ते मया कृतः । मन्दवारे सदा नूनं लक्ष्मी-
रत्रागमिष्यति । अस्पृश्योऽश्वो भवेत्तस्मात् मन्दवारं विना
किल" ।

दीपान्वितामावस्यायां तत्पूजाविधानं कल्पलिङ्गात्
यथा "अलक्ष्मीस्त्वं कुरूपासि कुत्सितस्थानवासिनि ! ।

कालकृत पु० कालं करोति कृ-क्विप् । १सूर्य्ये शब्दरत्ना० । कालोऽवधिः कृतो यस्य । कालावधिके २ऋणादिभेदे । "काले कालकृतो नश्येत् फलभोग्यो न नश्यति" याज्ञ० । ३कालेन कृते 'भयं कालकृतं मन्ये कालो हि बलवत्तरः' पुरा० ।

कालकेय पु० कालकायाः अपत्यम् ढक् । दानवभेदे तत्कथा यथा 'पुरा कृतयुगे घोरा दानवा युद्धदुर्मदाः । कालकेया इति ख्याता गणाः परमदारुणाः' इति भा०व०१०१अ० । वृत्रासुरस्य प्रधानभूतस्य हतस्य वधे तेषां समुद्रगर्भाश्रयत्व रात्रौ च नानाश्रमवासिमर्षिणां(?) दिवा पुनः समुद्रप्रवेशो वर्णितः यथाम् विष्णोरादेशेनागस्त्यमुनिना तेषां समुद्रस्य दुर्गस्य शोषणे कृते देवैस्ते नाशिता इत्यादि 'कालकेयाश्च' केचित् हिरण्यपुरवासिनस्ते अर्जुनेन निहता इत्युक्तम् हरिवं०१०२अ० यथा "चतुर्दश शतान्यासन् हिरण्यपुरवासिनः" इत्युपक्रम्य १०६अ० तत्रैव "मरीचिर्दैत्यदानव महता तपसान्वित । पौलोमाश्च कालकेयाश्च दानवाश्च महाबलाः । अवध्या देवतानाञ्च हिरण्यपुरवासिनः । कृताः पितामहेनासौ निहताः सव्यसाचिना" । कालकायाः अपत्यम् ढक् । कालेयोऽप्यत्र उदा० तत्रैव ।

कालकेशी स्त्री काला केशा इव पत्रादयोऽस्याः, गौरा० ङीप् । १नीलामोषधौ राजनि० २कृष्णकेशयुक्तस्त्रियाञ्च ।

कालक्षेप पु० कालस्य क्षेपः क्षेपणम् । १कर्त्तव्यकर्म्मकालव्यवधाने २कालयापने च ।

कालखञ्ज पु० दानवभेदे "मयूरादौ विप्रचित्तिश्च कालखञ्जश्च दानवाः" भा०स०८अ० दनुवंश्यकीर्त्तने ।

कालखञ्जन न० कालेन खञ्जति खजि-ल्यु । यकृति हृदयस्थे रक्ताधारस्थाने हेमच० ।

कालखण्ड न० कालं कृष्णं खण्डम् । दक्षिणकुक्षिस्थे मांसखण्डे अमर । हेमाद्रिकृते कालप्रतिपादके ग्रन्थभेदे च ।

कालगङ्गा स्त्री काला गङ्गा नदी । यमुनायां शब्दचि० तस्या नदीषु कृष्णत्वात्तथात्वम् ।

कालगन्ध पु० कालः कृष्णो गन्धो यस्य । १कालागुरुणि शब्दचि० । कालस्य गन्धो लेशः । २काललेशे कालकलायां च । ३कालचन्दने शब्दचि० ।

कालग्रन्थि पु० कालस्य ग्रन्थिरिव । वत्सरे हारा० ।

कालघट पु० जनमेजयसर्पसत्रे आर्त्विज्यकारके ब्राह्मणविशेषे "आत्रेयः कुण्डजठरोऽथ कालघटस्तथा" भा० आ० ५३अ० ।

[भेदे रत्नमा० ।

कालकूत पु० ईषदवकृता को का । (कालकासुँदा) उच-

कालचक्र न० कालस्य कालगतेश्चक्रमिव । जैनमते द्वादशारे १कालचक्रादौ । (उत्सर्पिणि) जैने । २ह० स्थिति । ३कालचक्रमिवाभिवर्त्तनात् । विष्णुपुराणाद्युक्ते ज्योतिश्चक्राधिष्ठिते चक्रवत्परिवर्त्तमाने ४काले । "यथा कुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशान्तरेष्वप्युपलभ्यमानत्वात् एवं नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुञ्च प्रदक्षिणेन परिधावता सह परिधावमानानां तदाश्रयाणां सूर्य्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रान्तरे राश्यन्तरे चोपलभ्यमानत्वात्" । भाग० ५.२२.२श्लो० । भा०व० १६३अ० कलाकाष्ठादिविभागयुक्तं "एवमेव चरन् पार्थ ! कालचक्रमतन्द्रितः । पर्य्येत्य युगपातेन हविषा परिवर्त्तते" मध्यन्तु विष्णुपुराणे यथा

"पराशर उवाच । व्याख्यातमेतद्ब्रह्माण्डसंस्थानं तव सुव्रत ।। ततः प्रमाणसंस्थाने सूर्य्यादीनां शृणुष्व मे । योजनानां सहस्राणि द्वितीयोऽक्षो विवस्वतः । ईषादण्डस्तथैवास्य द्विगुणो मुनिसत्तम । सार्द्धकोटिस्तथा सप्तनियुतान्यधिकानि वै । योजनानां तु तस्याक्षस्तत्र चक्रं प्रतिष्ठितम् । त्रिनाभिमति पञ्चारे षण्णेमिन्यक्षयात्मके । संवत्सरमये कृत्स्नं कालचक्रं प्रतिष्ठितम् । चत्वारिंशत् सहस्राणि द्वितीयोऽक्षो विवस्वतः । पञ्चान्यानि तु सार्द्धानि स्यन्दनस्य महामते ।। अक्षप्रमाणमुभयोः प्रमाणं तद्युगार्द्धयोः । ह्रस्वोऽक्षस्तद्युगार्द्धेन ध्रुवाधारो रथस्य वै । द्वितीयेऽक्षे तु तच्चक्रं संस्थितं मानसाचले । हयाश्च सप्त छन्दांसि तेषां नामानि मे शृणु । गायत्री च बृहत्युष्णिग्जगती त्रिष्टुबेव च । अनुष्टुप् पङ्क्तिरित्युक्ताश्छन्दांसि हरयो रवेः । मानसोत्तरशैले तु पूर्वतो वासवी पुरी । दक्षिणेन यमस्यान्या प्रतीच्यां वरुणस्य वै । उत्तरेण तु सोमस्य तासां नामानि मे शृणु । वस्वौकसारा शक्रस्य, याम्या संयमनी स्मृता । पुरी सुखा जलेशस्य, सोमस्य तु विभावरी । काष्ठाङ्गतो दक्षिणतः क्षिप्तेषुरिव गच्छति । मैत्रेय ! भगवान् भानुर्ज्योतिषां चक्रसंयुतः । अहोरात्रव्यवस्थानकारणं भगवान् रविः । देवयानः परः पन्था योगिनां क्लेशसंक्षये । दिवसस्य रविर्मध्ये सर्वकालं व्यवस्थितः । सर्वद्वीपेषु मैत्रेय ! निशार्द्धस्य च सम्मुखः । उदयास्तमने चैव सर्वकालं तु सम्मुखे । दिशास्वशेषासु तथा मैत्रेय ! विदिशासु च । यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः ।

[illegible] ॥ [illegible] ॥

"[illegible]" इति [illegible] ।

काम[illegible] [illegible] ।

काम[illegible] [illegible] ।

कामकूट [illegible] ।

कामकुट [illegible] ।

[illegible] इति [illegible] ।

कामखोट [illegible] ।

कामकेलि [illegible] ।

कामगाम [illegible] ।

कामगुण [illegible] ।

कामदृष्टि [illegible] ।

कामदान [illegible] ।

कालक्षत पु॰ काल इव क्षतोयेन । १ सूर्य्ये शब्दरत्ना॰ कालो-ऽवधिरूप क्षतो यस्य । क्षतावधिके २व्याधिभेदे । "काले कालक्षतोनश्येत् फलभोग्योन नश्यति' याज्ञ०। ३त०। ३कालेन क्षते 'सर्व्वं कालक्षतं मन्ये कालो हि बलवत्तर "पुरा० ।

कालकेय पु॰ कालकायाः अपत्यम् ढक् । दानवभेदे तत्कथा यथा 'पुरा कृतयुगे घोरा दानवा युद्धदुर्मदा । कालकेया इति ख्याता गणा परमदारुणा "इति भा०व०१०१अ० इत्युपक्रम्य प्रधानभूतस्य वृत्रस्य वधे तेषां समुद्रदुर्गाश्रयण रात्रौ च नानाप्रत्याश्रमर्षिहिंसा दिवा पुनः समुद्रप्रवेशो वर्णित पश्चात् विष्णोरादेशेनागस्त्यमुनिना तेषां समुद्ररूपस्य दुर्गस्य शोषणे कृते देवैस्ते नाशितास्तदवशिष्टाश्च 'कालेकेयाये केचित् हिरण्यपुरवासिनस्ते चार्ज्जुनेन निहता इत्युक्तम् हरिवं०१०२अ० यथा "चतुर्द्दश शतान्यन्यान् हिरण्यपुर-वासिन" इत्युपक्रम्य १०५अ० तत्रैव "मरीचिर्जनयामास महता तपसान्वित । पौलोमान् कालकेयाश्च दानवास्ते महाबला । अवध्याद्देवतानाञ्च हिरण्यपुरवासिन । कता पितामहेनाशौ निहता सव्यसाचिना"। कालाया अपत्यम् ढक् । कालेयोऽप्यत्र शब्दा०तत्रैव ।

कालकेशी स्त्री काल केश इव पत्रादिर्यस्याः गौरा०ङीष् । नीलाख्योषधौ शब्दचि० २कृष्णकेशयुक्तस्त्रियाञ्च ।

कालक्षेप पु॰ कालस्य क्षेप क्षेपणम् । १कर्त्तव्यकर्म्मकाललङ्घने २कालयापने च ।

कालखञ्ज पु॰ दानवभेदे "सह्लादो विप्रचित्तिश्च कालखञ्जाश्च दानवा " भा०स०९अ०वरुणसभ्यकीर्त्तने ।

कालखञ्जन न॰कालेन खञ्जति खजि-ल्यु । यकृति हृदयस्थे रक्ताधारस्थाने हेमच० ।

कालखण्ड न॰काल कृष्ण खण्डम् । दक्षिणकुक्षिस्थे मांस-खण्डे अमर । हेमाद्रिकृते कालप्रतिपादके ग्रन्थभेदे च।

कालगङ्गा स्त्री काली गङ्गा नदी । यमुनायां शब्दचि० तस्या नदीषु श्यामलाम्बुत्वम् ।

कालगन्ध पु० काल कृष्णोगन्धो अस्य द्रव्यम् । १काला-गुरुणि शब्दचि० । कालस्य गन्धोलेश । २कालभेशे कालकलायां च । ३कालचन्दने शब्दचि० ।

कालग्रन्थि पु॰ कालस्य ग्रन्थिरिव । संवत्सरे हारा० ।

कालघट पु० जनमेजयसर्पसत्रे आर्त्त्विज्यकारके ब्राह्मण-विशेषे "आत्रेय कुण्डजठरोद्विज कालघटस्तथा" भा० आ० ५३अ० । [भिदे रत्नमा० ।

कालङ्कृत पु॰ ईषदसङ्कृतः को वा । (कालकासें दा) क्षुप-

कालचक्र न॰कालस्य कालगतेश्चक्रमिव । हेमच०उक्ते द्वादशारे १कालचक्रभेदे । (उत्सर्पिन्) शब्दे ११२पृ० विवृति । कालस्य चक्रमिवानिश परिवर्त्तमानत्वात् । विष्णुपुराणाद्युक्ते ज्योतिश्चक्राधिष्ठिते चक्रवत्परिवर्त्तमाने २ काले । "यथा कुलालचक्रेण भ्रमता सह भ्रमता तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशान्तरेऽप्युपलभ्यमानत्वात् एवं नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुव मेरुञ्च दक्षिणत परिधावता सह परिधावमानानां तदाश्रयाणां सूर्य्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रान्तरे राश्यन्तरे चोपलभ्यमानत्वात् ' । भाग० ५ २२ ९श्लो०। भा०व० १९३अ०कलाकाष्ठादिविभागमुक्त्वा "एवमेव चरन् पार्थ । कालचक्रमतन्द्रित । वर्द्धयन् क्षमयंस्तेजा सविता परि-वर्त्तते " प्रपञ्चस्तु विष्णुपुराणे यथा

"पराशर उवाच । व्याख्यातमेतद्ब्रह्माण्डसंस्थानं तव सुव्रत ।। तत प्रमाणसंस्थाने सूर्य्यादीनां शृणुष्व मे । योजनानां सहस्राणि द्वितीयोऽस्यो विस्तृत' । ईषादण्डस्तथैवास्य द्विगुणो मुनिसत्तम ' । सार्द्धकोटि-स्तथा सप्तनियुतान्यधिकानि वै । योजनानान्तु तस्याक्ष-स्तत्र चक्र प्रतिष्ठितम् । त्रिनाभिमति पञ्चारे षण्णेमि-न्यक्षयात्मके । संवत्सरमये कृत्स्न कालचक्र प्रतिष्ठितम् । चत्वारिंशत् सहस्राणि द्वितीयोऽक्षो विवस्वत । पञ्चा-न्यानि सार्द्धानि स्यन्दनस्य महामते ।। अक्षप्रमाण मुभयो प्रमाण तद्युगार्द्धयोः । ह्रस्वोऽक्षस्तद्युग र्द्धञ्च ध्रुवाधाररथस्य वै । द्वितीयेऽक्षे तु तच्चक्र स्थित वै मान सानगे । हयाश्च सप्त छन्दांसि तेषां नामानि मे शृणु । गायत्री च वृहत्युष्णिग्जगती त्रिष्टुवेव च । अनुष्टुप् पङ्क्तिरित्युक्ताश्छन्दांसि हरयो रवे । मानसोत्तरशैले तु पूर्व्वतो वासवी पुरी । दक्षिणेन यमस्यान्या प्रतीच्यां वरुणस्य वै । उत्तरेण तु सोमस्य तासां नामानि मे शृणु । वस्वौकसारा शक्रस्य, याम्या संयमनी स्मृता । पुरी सुखा जलेशस्य, सोमस्य तु विभावरी । काष्ठाङ्गतो दक्षिणत क्षिप्रेषुरिव सर्पति । मैत्रेय ' भगवान् भानुर्ज्योतिषां चक्रसंयुत । अहोरात्रव्यवस्थानकारणं भगवान् रवि । देवयानपर पन्थायोगिनां क्लेशसंक्षये । दिवसस्य रविर्मध्ये सर्व्वकाल व्यवस्थित । सर्व्वद्वीपेषु मैत्रेय । निशार्द्धस्य च सम्मुख । उदयास्तमनञ्चैव सर्व्व-कालञ्च सम्मुखे । दिशास्वशेषासु तथा मैत्रेय ' विदि-शासु च । यैर्यत्र दृश्यते भास्वान् स तेषामुदय स्मृत ।

पुटे यस्य वायुर्वाति दिवानिशम्। एकपक्षमेव तस्यायुश्चायुर्वन्त्यक्षयेण हि। यद्धोरात्रं त्वहोरात्रं रविर्वहति सन्ततम्। सार्द्धैश्चापि वर्षैस्त्रयोऽपि जीवितावधिरुच्यते। वहेन्नासापुटयुगे दशाहानि निरन्तरम्। वातश्चेत् संवत्सरं जीवेद्धिमक्षयम्। नासाग्रात्तीव्रयं हित्वा मातरिश्वा मुखाद्वहेत्। सशोहिमक्षयादर्वाक् मृत्युस्तस्य चाब्दं च। सूर्ये सप्तमराशिस्थे जन्मर्क्षस्थे निशाचरे। पौष्णे स कालो द्रष्टव्यो यदा याम्ये रविर्व्रजेत्। एकपादेन तत्काले मृत्युः सन्निहितो भवेत्। यस्त्वतोऽयं प्रयत्नेन स कालो मृत्युभीरुणा। एकपाद्दीयते यस्तु पुरुषः कृष्णपिङ्गलम्। तस्मिन्नेव क्षणे शुभं सञ्जीवेद्वत्सरद्वयम्। यस्य बीजं मलं मूत्रं, क्षुतं मूत्रं मलं तथा। एकैकदा पतेद्यस्य वत्सरस्यायुरिष्यते। इन्द्रनीलनिभं व्योम्नि नागवृन्दं यदेक्षते। इतस्ततः प्रसृमरं षण्मासं न स जीवति। व्योम्नेऽङ्ग्रि वारिपूर्णस्य दृश्यते यदि वाकरम्। फल्कुत्याप्सु खिन्द्रचापस्य पश्येत् षण्मासजीवनम्। अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च। आसन्नमृत्युर्नो पश्येच्चतुर्थं मातृमण्डलम्। अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते। विष्णोः पदानि भ्रूमध्ये नेत्राग्नौ मातृमण्डलम्। वेत्ति नीलादिवर्णस्य कटुम्लादिरसस्य हि। अकस्माद्व्यथाभावं षण्मासेन स मृत्युभाक्। षण्मासे कण्ठोदरसमारदा। शुष्यन्ति सततं तद्वद्धि च्छायास्तासुपस्थिता। दन्तकरनेत्राभ्यां नीलिमानं भजन्ति चेत्। स हि नीरागनगरीं पञ्चमासे प्रजेश्वर। समरस्ते त्रिभुवने मध्यान्ते चौति चेश्वर। निश्चितं पञ्चमे मासि धर्मराजातिथिर्भवेत्। द्रुतमारुह्य सरटस्त्रिवर्णो यस्य मस्तकम्। प्रयाति, याति तस्यायुः षण्मासे सम्मितं चयम्। स्नातस्यापि यस्याशु हृदयं परिशुष्यति। चरणौ च करौ वापि त्रिमासान्तस्य जीवितम्। प्रतिबिम्बे भवेद्यस्य पदस्थाप्रपदाकृति। पांशौ वा कर्दमे वापि पञ्च मासान् स जीवति। छाया प्रकम्पते यस्य देहमन्योऽपि निश्चले। कृतान्तदूता भ्रमन्ति चतुर्थे मासि तद्गृहम्। निजस्य प्रतिबिम्बस्य शीराजसकूटादिषु। उत्तमाङ्गस्य यः पश्येत् स मासेन विनश्यति। प्रतिभास्येऽस्य लेहाणो धनुरैन्द्रं निरीक्षते। रात्रौ, चन्द्रद्वयं वापि दिवा द्वौ वा दिवाकरौ। दिवा च तारकाचक्रं रात्रौ व्योम वितारकम्। युगपच्च चतुर्दिक्षु मास कोदण्डमण्डलम्। भूरुहे भूधराग्रे वा गन्धर्वनगरोदयम्। दिवा पिशाचनृत्यञ्च एते मृत्युहेतवः।

सर्वेष्वेतेषु चिह्नेषु यद्येकमपि वीक्षते। तदा मासावधिर्ज्ञेयः प्रमाणेन नवाधिकम्। करावरुद्धश्रवणः श्टणोति न यदा ध्वनिम्। स्थूलः कृश कृशः स्थूलस्तदा मासाद्विपद्यते। यः पश्येदात्मनश्छायां दक्षिणाशासमाश्रिताम्। दिनानि पञ्च जीवित्वा पञ्चत्वमुपयाति सः। प्रोह्यते भक्ष्यते वापि पिशाचासुरवायसैः। भूतैः प्रेतैः श्वभिर्गृध्रैर्गोमायुखरशूकरैः। खरैः करभैः कीशैः श्येनैरन्यतरैरपि। स्वप्ने च जीवित त्यक्त्वा वर्षान्ते यमवीक्षते। गन्धपुष्पांशुकैर्योऽपि स्वान्ततु भूषितास्वर। यः पश्येत् स्वप्नसमये सोऽष्टौ मासाननिर्व्यहो। पांशुराशिस्थवल्मीकं यूपं दण्डमथापि वा। योऽधिरोहति वै स्वप्ने षष्ठे मासि स नश्यति। रासभारूढमात्मानं तैलाभ्यक्तञ्च मुण्डितम्। नीयमानं यमाशां यः स्वप्ने पश्येत् स पूर्वजान्। स्वनीनौ स्वतनौ वापि यः पश्येत् स्वप्नतोमरः। तृणानि शुष्ककाष्ठानि षष्ठे मासि न तिष्ठति। लोहदण्डधरं कृष्णं पुरुषं कृष्णवाससम्। स्वप्ने योऽग्रे स्थितं पश्येत् स त्रीन्मासान् स वर्द्धयेत्। काली कुमारी यं स्वप्ने मक्षीयाद्वाहुपाशकैः। स मासेन समीक्षेत नगरीं यमनोपिताम्। नरो यो वानरारूढः प्रयान् प्राचीं दिशं स्वपन्। दिनैः स पञ्चभिरेव पश्येत् संयमनीं पुरीम्। कृपणोऽपि वदान्यः स्यात् वदान्यः कृपणोऽथ। प्रकृतिर्विकृतिश्चेत्थं तदा पञ्चत्वमृच्छति। एतानि कालचिह्नानि सन्त्यन्यानि बहून्यपि। ज्ञात्वास्य खेचरीयोगमभ्यया कालिकां श्रयेत्। न कालवञ्चनोपाय मनेऽन्यमवयास्यहम्"।

कालजोषक त्रि० काले यथायोग्यकाले जुषते भोजनादि जुष–ण्वुल्। यथायोग्यकालेऽल्पाहारादिना हृष्टे गोपभेदे "वाहीका वाटधानाश्च आभीराः कालजोषकाः" भा०भी०६अ०।

कालज्ञ त्रि० कालं योग्यकालं ज्योतिषोक्तकालञ्च वा जानाति–ज्ञा–क। उचितसमयाभिज्ञे "अयाकृती हि नारीणामकालज्ञो मनोभवः" रघुः। "तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः" माघः। इत्युक्तलक्षणयुक्ते ज्योतिषिके च।

कालज्ञान न०। कालो ज्ञायतेऽनेन ज्ञा–करणे ल्युट् ६त०। १शैवागमादि ज्योतिःशास्त्रे "विदितश्चेन्मया भावन्तोवितरूपया त्वहम्। दद्यां कालाश्रयं ज्ञानं पश्यन्तां चरितं तथा" इत्युपक्रम्य ब्र०सि०नयनाभाहराय सांयग्रहनक्षत्रादिकालज्ञानमुक्तम्। भावे ल्युट्। २योग्यसमयज्ञाने च।

कालनर पु० चतुर्थस्य नृपभेदे । १ “अनोः सभानरश्चक्षुः परेक्षुश्च त्रयः सुताः” सभानरात् कालनरः सृञ्जयस्तत्सुतः” भाग० ९,२३,२श्लो० । काल कालचक्रं राशिचक्रं नरइव । मेषादिद्वादशराशिरूपमस्तकाद्यङ्गयुक्ते २ कालपुरुषे तच्छब्दे विवृतिः । “इति कालनरस्याङ्गे सदसद्ग्रहयोगतः” बृहज्जातकम् ।

कालनाथ पु० कालस्य कालभैरवस्य नाथः । महादेवे “कालनाथाय कल्पाय क्षयायोपक्षयाय च” भा०शा० २८६अ० दक्षप्रोक्तशिवसहस्रनामकीर्त्तने ।

स्वपक्षश्चाक्षिप्यते तदा जल्पवितण्डाभ्यां तेषां
मतं खण्डनीयम् । एते अर्था ४अ० २आ० उक्ताः ।
साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्रा-
प्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशे-
षोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्य्यसमाश्चतुर्विंशतिः जाती-
र्विभज्य तल्लक्षणान्युक्तानि । कथाभासप्रकरणम् । ५अ०
१आ० गतार्थाः । प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञा-
विरोधः प्रतिज्ञासंन्यासः हेत्वन्तरमर्थान्तरम् निरर्थक-
मविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभा-
षणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्य्यनुयोज्योपेक्षणं
निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रह-

[illegible]म् । [illegible]त्वेन [illegible] [illegible]म् । [illegible] [illegible]नि । [illegible] [illegible]म् । [illegible] [illegible]म् । [illegible] [illegible] [illegible]म् । [illegible] [illegible]म् । [illegible] [illegible] नाम [illegible] । [illegible]म् । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible]म् । [illegible] [illegible] [illegible] [illegible] न [illegible] [illegible]म् । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible]म् । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]म् । [illegible] [illegible] [illegible]म् । [illegible] [illegible] [illegible]म् । [illegible] [illegible] [illegible] न [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] न [illegible] [illegible] [illegible]म् । [illegible] [illegible] इति [illegible]म् । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]म् । [illegible] [illegible] [illegible] [illegible]म् । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible] । [illegible]म् । [illegible]म् । [illegible] । [illegible] [illegible] [illegible] [illegible]म् । [illegible] [illegible] [illegible] [illegible] । "[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

प्रमाता प्रमाणम् [illegible] [illegible] इति, [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] न [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] न [illegible] [illegible] [illegible] [illegible]म् । यथा [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible]म् । [illegible] [illegible] [illegible]म् । [illegible] [illegible] [illegible] [illegible] [illegible] न [illegible] [illegible] [illegible] न विरोध [illegible] [illegible] [illegible] प्राप् [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]म् । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]म् । [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible]म् । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] इति [illegible]म् । [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible]म् । [illegible] [illegible] [illegible] न [illegible] इति [illegible]म् । [illegible] [illegible] [illegible] इति [illegible]म् । [illegible] [illegible] [illegible] न [illegible] [illegible] इति

क्रमकथनम् ४अ० १आ० गतार्थाः। देहात्मबुद्धेर्दोषजन्यतया दोषस्य च मिथ्याज्ञानाधीनत्वेन तत्त्वज्ञानात् आत्मनोदेहादिभ्यो भेदज्ञाननिवृत्तौ तदभेदज्ञाननिरासेन मिथ्याज्ञाननिवृत्तिः तस्यां च सत्यां क्रमेण प्रवृत्तिनिवृत्त्या दुःखनिवृत्तिरूपापवर्गसिद्धिः अतोऽपवर्गसाधनं तत्त्वज्ञानमित्येव प्रतिपादनम्। साधुतया भावितानां रूपादिविषयाणां दोषहेतुत्वकथनम्। सौन्दर्यं पश्यतो रागादिर्दुष्परिहार इत्याशङ्क्य तत्र सौन्दर्यबुद्धे रागाधीनतया तरुण्यादिदेहे सौन्दर्याभिमानस्य त्याज्यताकथनम्। भाष्ये तु "परिष्कारबुद्धिरनुरञ्जनसंज्ञा सा हेया दोषदर्शनमशुभसंज्ञा सा भावनीया" इत्युक्तम्। तथा च "खेलत्खञ्जननयना परिणतबिम्बाधरा पृथुश्रोणी। कमलस्तु कुचस्तनीयम् पूर्णेन्दुमुखी सुखाय मे भवितेति" अनुरञ्जनसंज्ञा। "चर्मनिर्मितपात्रीयं मांसासृक्पूयपूरिता। अस्यां रज्यति यो मूढः पिशाचः कस्ततोऽधिकः" अशुभसंज्ञा एव स्वदेहादावपि चिन्तनम्। परमाणुपुञ्जस्यैव घटादिरूपत्वात् नास्ति अतिरिक्तोऽवयवीति सौत्रान्तिकवैभाषिकयोर्मतस्य पूर्वंदूषितस्यापि स्वमतदार्ढ्याय पुनर्दूषणम्। परमाणोस्त्रुटिपरत्वव्यवस्थापनम्। आकाशस्य सर्वगतत्त्व सर्वमूर्त्तसंयोगित्व तत्र संयोगस्याव्याप्यवृत्तितया तदवच्छेदकभेदं विनाऽनुपपत्त्या सावयवत्वापत्तिमाशङ्क्य मूर्त्तपदार्थस्य सावयवानां तदवच्छेदकत्वम् इत्युक्त्वा तस्य निरवयवत्वसमर्थनम्। सर्वत्र शब्दोत्पत्त्या तज्जनकसंयोगानुमानात् आकाशस्य सर्वमूर्त्तसंयोगित्वसमर्थनम् आकाशे च प्रतिहतस्य परावर्त्तनरूपव्यूहस्य उत्तरदेशगतिप्रतिबन्धरूपविष्टम्भस्याभावात् विभुत्वव्यवस्थापनम्। परमाणोः संयोगवत्त्वान्यथानुपपत्त्या सावयवत्वापत्तिः संयोगस्य अव्याप्यवृत्तितया अव्याप्यवृत्तेश्चावच्छेदकभेदं विना सम्भवासम्भवादित्याशङ्क्य तदवयवानामपि संयोगसिद्धये सावयवत्वकल्पनायामनवस्थापत्तिरतो दिग्विभागानामेव संयोगावच्छेदकत्वकल्पनेन परमाणोर्निरवयवत्वसमर्थनम्। ज्ञानातिरिक्तो बाह्यपदार्थो नास्तीत्यत्र यदि प्रमाणमस्ति तदा ज्ञानातिरिक्तप्रमाणरूपपदार्थस्य सत्त्वात् बाह्याभावः अथ तत्र प्रमाणं नास्ति तदा निष्प्रमाणकत्वात् तत्सिद्धिरित्येवरूपेण बाह्यार्थाभावाङ्गीकर्त्तृमतनिराकरणम्। स्वप्नस्मृतिविशेषरूपत्वं व्यवस्थाप्य शुक्तिरजतविज्ञाने रजतांशस्य ज्ञानलक्षणया उपनीतस्य संसर्गमात्रबोध इति व्यवस्थापनेन स्वप्नदृष्टान्तेन ज्ञानमात्रस्यासद्विषयकत्ववादिमतनिराकरणम्। प्रत्येवंवाद्याशङ्कानिराकरणम्। ज्ञानसामान्यात् तत्त्वज्ञानस्यापि क्षणिकत्वात् तन्नाशे प्रतिबन्धकापाये पूर्ववासनावशात् मिथ्याज्ञानं पुनरुत्पद्येतेति तत्त्वज्ञानस्य न मिथ्याज्ञानोच्छेदकतेत्याशङ्कायां तन्निरासः। समाधिविशेषाभ्यासात् तत्त्वज्ञानस्य वृद्धिः। तद्वृद्ध्या च मिथ्याज्ञानवासनातिरोभावान्न तत् फलायालमिति समर्थनम्। ततश्च तत्त्वज्ञानसंस्कारः अन्यसंस्कारप्रतिबन्धी भवतीति व्यवस्थापनम्। तत्र प्रतिबन्धस्य कार्याक्षमत्वसम्पादनं विनाशो वेति। स्वाभाविकविषयरागादिना प्रतिबन्धात् समाध्यसम्भवमाशङ्क्य पूर्वकृतेश्वराधनादिना अभ्यासपाटवे जनिते तत्संस्कारात् समाधिसिद्धिरिति समर्थनम्। तया च पूर्वकृतेश्वरानुसन्धानादिसहकारेणैव तत्त्वज्ञाने जननीये न रागादेः प्रतिबन्धकत्वम्। अरण्यगुहापुलिनादिषु योगाभ्यासस्थानत्वकथनम्। अपवर्गे प्रारब्धकर्मानुसारेण देहादेः सत्त्वेन तदनुरूपाभासज्ञापकथनम्। प्रारब्धकर्मावसाने देहाभावे विदेहकैवल्यप्राप्तिकथनम्। समाधिसिद्धये यमनियमाद्यष्टाङ्गयोगाभ्यासस्यावश्यकतोक्तिः। श्रवणमनननिदिध्यासनैरात्मसाक्षात्कारोत्पत्तिकथनम्। एतच्छास्त्राभिज्ञैः सह स्वनिश्चितार्थदार्ढ्याय एतच्छास्त्रोदितार्थनिश्चयस्य संवादः कर्त्तव्य इति प्रतिपादनम्। संवादश्च शिष्यगुरुसब्रह्मचारिश्रेयोऽर्थिभिः जिगीषाहीनैः सह कार्य्य इति निरूपणम्। तत्त्वनिर्णयार्थं प्रतिकूलपक्षहीनतया संवादः करणीयः न जिगीषयेति निरूपणम्। तत्त्वनिश्चयसंरक्षणार्थं बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् जयोत्साहैः सह जल्पवितण्डे आश्रयणीये न वाद इत्येतत्कथनम् तथा च यदि जयोत्साहैः स्वपक्ष आक्षिप्यते तदा जल्पवितण्डाभ्यां तेषां मतं खण्डनीयम्। एते अर्था ४अ० २आ० उक्ताः।

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्य्यसमाश्चतुर्विंशति जातीर्विभज्य तल्लक्षणान्युक्तानि। कथाभासप्रकरणम्। ५अ० १आ० गतार्थाः। प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वन्तरमर्थान्तरम् निरर्थकमविज्ञातार्थमपार्थकम् अप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्य्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रह-

क्रमकथनम् ४अ० १आ० गतार्थः। देहात्मबुद्धेर्दोषजन्यतया दोषस्य च मिथ्याज्ञानाधीनत्वेन तत्त्वज्ञानात् आत्मनो देहादिभ्यो भेदज्ञाननिवृत्तौ तदभेदज्ञाननिरासेन मिथ्याज्ञाननिवृत्तिः तस्याश्च सत्या क्रमेण प्रवृत्तिनिवृत्त्या तु स्वनिवृत्तिरूपापवर्गसिद्धिः अतोऽपवर्गसाधनं तत्त्वज्ञानमित्येष प्रतिपादनम्। साधुतया भाविताना रूपादिविषयाणां दोषहेतुत्वकथनम्। सौन्दर्यं पश्यतो रागादिर्न क्षणोऽप्यस्तु कः परिहार इत्याशङ्क्य तत्र सौन्दर्यबुद्धे रागाधीनतया तरुण्यादिदेहे सौन्दर्याभिमानस्य त्याज्यताकथनम्। भाष्ये तु "परिष्कारबुद्धिरनुरञ्जनसंज्ञा सा हेया दोषदर्शनमशुभसंज्ञा सा भावनीया" इत्युक्तम्। तथा च "खेलत्खञ्जननयना परिणतबिम्बाधरा पृथुश्रोणी। कमलस्तु कुचस्तनीयम् पूर्णेन्दुमुखी सुखाय मे भवितेति" अनुरञ्जन संज्ञा। "चर्म्मनिर्म्मितपाञ्चालीय मांसासृक्पूयपूरिता। अस्यां रज्यति यो मूढ़ पिशाचः कस्ततोऽधिकः" अशुभसंज्ञा एव स्वदेहादावपि चिन्तनम्। परमाणुपुञ्जस्यैव घटादिरूपत्वात्तोनास्ति अतिरिक्तोऽवयवीति सौत्रान्तिकवैभाषिकयोर्मतस्य पूर्व्वं दूषितस्यापि स्वमतदार्ढ्याय पुनर्दूषणम्। परमाणोस्त्रुटिपरत्वव्यवस्थापनम्। आकाशस्य सर्व्वगतत्वं सर्व्वमूर्त्तसंयोगित्वं तत्र संयोगस्याव्याप्यवृत्तितया तदवच्छेदकभेदं विनाऽनुपपत्त्या सावयवत्वापत्तिमाशङ्क्य मूर्त्तपदार्थस्यैव सावयवानां तदवच्छेदकत्वम् इत्युक्त्वा तस्य निरवयवत्वसमर्थनम्। सर्व्वत्र शब्दोत्पत्त्या तज्जनकसंयोगानुमानात् आकाशस्य सर्व्वमूर्त्तसंयोगित्वसमर्थनम् आकाशे च प्रतिहतस्य परावर्त्तनरूपव्यूहस्य उत्तरदेशगतिप्रतिबन्धरूपविष्टम्भस्याभावात् विभुत्वव्यवस्थापनम्। परमाणो संयोगवत्त्वान्यथानुपपत्त्या सावयवत्वापत्तिः संयोगस्य अव्याप्यवृत्तितया अव्याप्यवृत्ते सावच्छेदकभेदं विना असम्भवादित्याशङ्क्य तदवयवानामपि संयोगसिद्धये सावयवत्वकल्पनायामनवस्थापत्तिरतो दिग्विभागानामेव संयोगावच्छेदकत्वकल्पनेन परमाणोर्निरवयवत्वसमर्थनम्। ज्ञानातिरिक्तो बाह्यपदार्थो नास्तीत्यत्र यदि प्रमाणमस्ति तदा ज्ञानातिरिक्तप्रमाणरूपपदार्थस्य सत्त्वात् बाह्याभावः अथ तत्र प्रमाणं नास्ति तदा निष्प्रमाणकत्वात् तदसिद्धिरित्येवं रूपेण बाह्यार्थाभाववादिमतनिराकरणम्। स्वप्नस्य स्मृतिविशेषरूपत्वं व्यवस्थाप्य शुक्तिरजतविज्ञाने रजतांशस्य ज्ञानलक्षणया उपनीतस्य संसर्गमात्रे बोध इति व्यवस्थापनेन स्वदृष्टान्तेन ज्ञानमात्ररूपासद्विषयकत्वसाधनमतनिराकरणम्। इत्येवं बाह्यार्थभङ्गनिराकरणम्। ज्ञानसामान्यात् तत्त्वज्ञानस्यापि क्षणिकत्वात् तन्नाशे प्रतिबन्धकापाये पूर्व्ववासनावशात् मिथ्याज्ञानं पुनरुत्पद्येतेति तत्त्वज्ञानस्य न मिथ्याज्ञानोच्छेदकतेत्याशङ्कायां तन्निरासः। समाधिविशेषाभ्यासात् तत्त्वज्ञानस्य सिद्धिः। तदुत्त्था च मिथ्याज्ञानवासनातिरोभावान्न तत् फलायालमिति समर्थनम्। ततश्च तत्त्वज्ञानसंस्कारः अन्यसंस्कारप्रतिबन्धी भवतीति व्यवस्थापनम्। तत्र प्रतिबन्धश्च कार्य्याक्षमत्वसम्पादनं विनाशो वेति। स्वाभाविकविषयरागादिना प्रतिबन्धात् समाध्यसम्भवमाशङ्क्य पूर्व्वकृतेश्वराधनादिना अभ्यासपाटवे जनिते तत्संस्कारात् समाधिसिद्धिरिति समर्थनम्। तथा च पूर्व्वकृतेश्वरानुसन्धानादिसंस्कारेणैव तत्त्वज्ञाने जननीये न रागादेः प्रतिबन्धकत्वम्। अरण्यगुहापुलिनादिषु योगाभ्यासस्थानत्वकथनम्। अपवर्गे प्रारब्धकर्म्मानुसारेण देहादेः सत्त्वेन तदनुरूपार्थावभाससङ्कापकथनम्। प्रारब्धकर्म्मावसाने देहाभावे विदेहकैवल्यप्राप्तिकथनम्। समाधिसिद्धये यमनियमाद्यष्टाङ्गयोगाभ्यासस्यावश्यकतोक्तिः। श्रवणमनननिदिध्यासनैरात्मसाक्षात्कारोत्पत्तिकथनम्। एतच्छास्त्राभिज्ञैः सह स्वनिश्चितार्थदार्ढ्याय एतच्छास्त्रोदितार्थनिश्चयस्य संवादः कर्त्तव्य इति प्रतिपादनम्। संवादश्च शिष्यगुरुसब्रह्मचारिश्रेयोर्थिभिः जिगीषाहीनैः सह कार्य्य इति निरूपणम्। तत्त्वनिर्णयार्थं प्रतिकूलपक्षहीनतया संवादः करणीयः न जिगीषयेति निरूपणम्। तत्त्वनिश्चयसंरक्षणार्थं बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत् जयेच्छुभिः सह जल्पवितण्डे आश्रयणीये न संवाद इत्येतत्कथनम् तथा च यदि जयेच्छुभिः स्वपक्षश्चाक्षिप्यते तदा जल्पवितण्डाभ्यां तेषां मतं खण्डनीयम्। एते अर्था ४अ० २आ० उक्ताः। साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्य्यसमाश्चतुर्विंशति जातीर्विभज्य तल्लक्षणान्युक्तानि। कथाभासप्रकरणम्। ५अ० १आ० गतार्थाः। प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासन्न्यासः हेत्वन्तरमर्थान्तरम् निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालम् न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्य्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रह-

चेन्न योग्यानुपलब्धिबाधिते तदनवकाशादवकाशे वा याबद्भावेऽपि तथाभावप्रसङ्गात्। ननु सुखाभिव्यक्तिर्मुक्तिरिति पक्षं परित्यज्य दुःखनिवृत्तिरेव मुक्तिरिति स्वीकारः घोरं विशायारोचकमस्य सौवीररुचिमनुहरतीति चेत्तदेतच्छाटकपक्षपतितत्वद्दच इत्युपेक्ष्यते। सुखस्य सातिशयत्वेन प्रत्यक्षतया बहुप्रत्यनीकाक्रान्ततया साधनप्रार्थनापरिक्लिष्टतया च दुःखाविनाभूतत्वेन विषानुषक्तमधुवत् दुःखपक्षनिक्षेपात्। नन्वेकमनुसन्धित्सतोऽपरं प्रच्यवते इति न्यायेन दुःखवत् सुखमप्युच्छिद्यत इति अकाम्योऽयं पक्ष इति चेन्मैवं मंस्थाः सुखसम्पादने दुःखसाधनबाहुल्यानुषङ्गनियमेन तप्तायःपिण्डे तपनीयबुद्ध्या प्रवर्त्तमानेन साम्यापातात् तथा हि न्यायोपार्ज्जितेषु विषयेषु कियन्तः सुखखद्योताः कियन्ति दुःखदुर्दिनानि, अन्यायोपार्ज्जितेषु तु यद्भविष्यति तन्मनसापि चिन्तयितुं न शक्यमित्येतत् स्वानुभवमप्रच्छादयन्तः सन्तो विदाकुर्वन्तु विद्वांसो भवन्तः। तस्मात् परिशेषात् परमेश्वरानुग्रहवशाच्छ्रवणादिक्रमेणात्मतत्त्वसाक्षात्कारवतः पुरुषधौरेयस्य दुःखनिवृत्तिरात्यन्तिकी निःश्रेयसमिति निरवद्यम्। नन्वीश्वरसद्भावे किं प्रमाणं प्रत्यक्षमनुमानमागमो वा न तावदत्र प्रत्यक्षं क्रमते रूपादिरहितत्वेनातीन्द्रियत्वात् नाप्यनुमानं तद्व्याप्तिलिङ्गाभावात् नागमः विकल्पासहत्वात् किं नित्योऽवगमयत्यनित्यो वा। आद्ये अपसिद्धान्तापातः द्वितीये परस्पराश्रयापातः। उपमानादिकमशक्यशङ्कमनियतविषयत्वात्। तस्मादीश्वरः शशविषाणायते इति चेत्तदेतन्न चतुरचेतसां चेतसि चमत्कारमाविष्करोति। विवादास्पदं नगसागरादिकं सकर्तृकं कार्य्यत्वात् कुम्भवत्। न चायमसिद्धो हेतुः सावयवत्वेन तस्य सुसाधत्वात्। ननु किमिदं सावयवत्वम् अवयवसंयोगित्वम् अवयवसमवायित्वं वा नाद्यं गगनादौ व्यभिचारात् न द्वितीयं तन्त्वादावनैकान्त्यात्। तस्मादनुपपन्नमिति चेन्मैवं वादीः समवेतद्रव्यत्वं सावयवत्वमिति निरुक्तेर्वक्तुं शक्यत्वात्। अवान्तरमहत्त्ववत्त्वेन वा कार्य्यत्वानुमानस्य सुकरत्वात्। नापि विरुद्धो हेतुः साध्यविपर्य्ययव्याप्तेरभावात्, नाप्यनैकान्तिकः, पक्षादन्यत्र वृत्तेरदर्शनात्। नापि कालात्ययापदिष्टः, बाधकानुपलम्भात्। नापि सत्प्रतिपक्षः, प्रतिभटादर्शनात्। ननु नगादिकमकर्तृकं शरीराजन्यत्वात् गगनवदिति चेन्नैतत् परीक्षाक्षमं ईक्ष्यते नहि कठोरकण्ठीरवस्य कुरङ्गशावः प्रतिभटो भवति अजन्यत्वस्यैव समर्थतया शरीरविशेषणवैय-

र्थ्यात्। तर्ह्यजन्यत्वमेव साधनमिति चेन्नासिद्धेः नापि सोपाधिकत्वशङ्काकलङ्काङ्कुरः सम्भवी अनुकूलतर्कसम्भवात् यद्ययमकर्तृकः स्यात् कार्य्योऽपि न स्यादिह जगति नास्त्येव तत्कार्य्यं नाम यत्कारकचक्रमवधीर्य्यात्मानमासादयेदित्येतदविवादम्। तच्च सर्वं कर्तृविशेषोपहितमर्य्यादं कर्तृत्वं चेतरकारकाप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वलक्षणं ज्ञानचिकीर्षाप्रयत्नाधारत्वम्। एवञ्च कर्तृव्यावृत्तेस्तदुपहितसमस्तकारकव्यावृत्तावकारणककार्य्योत्पादप्रसङ्ग इति स्थूलः प्रमादः। तथा निरटङ्कि शङ्करकिङ्करेण। "अनुकूलेन तर्केण सनाथे सति साधने। साध्यव्यापकताभङ्गात् पक्षे नोपाधिसम्भव" इति। यदीश्वरः कर्त्ता स्यात्तर्हि शरीरी स्यादित्यादिप्रतिकूलतर्कजातं जागर्त्तीति चेदीश्वरसिद्ध्यसिद्धिभ्यां व्याघातात् तदुदितमुदयनेन। "आगमादेः प्रमाणत्वे बाधनादनिषेधनम्। आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धता" इति। न च विशेषविरोधः शक्यशङ्कः ज्ञातत्वाज्ञातत्वविकल्पपराहतत्वात्। तदेतत् परमेश्वरस्य जगन्निर्म्माणे प्रवृत्तिः किमर्था स्वार्था परार्था वा आद्येऽपीष्टप्राप्त्यर्था अनिष्टपरिहारार्था वा नाद्यः अवाप्तसकलकामस्य तदनुपपत्तेः अतएव न द्वितीयः। द्वितीये प्रवृत्त्यनुपपत्तिः कः खलु परार्थं प्रवर्त्तमानं प्रेक्षावानित्याचक्षीत। अथ करुणया प्रवृत्त्युपपत्तिरित्याचक्षीत कश्चित् तं प्रत्याचक्षीत तर्हि सर्वान् प्राणिनः सुखिन एव सृजेदीश्वरः न दुःखशबलान् करुणाविरोधात्। स्वार्थमनपेक्ष्य परदुःखप्रहरणेच्छा हि कारुण्यं तस्मादीश्वरस्य जगत्सर्जनं न युज्यते। तदुक्तं भट्टाचार्य्यैः। "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते। जगच्च सृजतस्तस्य किं नाम न कृतं भवेदिति"। नास्तिकशिरोमणे। तावदीर्ष्याकषायिते चक्षुषी निमील्य परिभावयतु भवान् करुणया प्रवृत्तिरस्त्येव न च निसर्गतः सुखमयसर्गप्रसङ्गः, सृज्यमानिकृतसुकृतदुष्कृतपरिपाकविशेषाद्वैचित्र्योपपत्तेः न च स्वातन्त्र्यभङ्गः शङ्कनीयः स्वाङ्गं स्वव्यवधायकं न भवतीति न्यायेन प्रत्युत तन्निर्वाहात् एक एव रुद्रो न द्वितीयोऽवतस्थे" इत्यादिरागमस्तत्र प्रमाणम्। यद्येवं तर्हि परस्पराश्रयबाधव्याधिः समाधत्स्वेति चेत् तदसमाधानात् किमयमसौ परस्पराश्रयः शङ्क्यते ज्ञप्तौ वा। नाद्यः आगमस्येश्वराधीनोत्पत्तिकत्वेऽपि परमेश्वरस्य नित्यत्वेनोत्पत्तेरनुपपत्तेः नापि ज्ञप्तौ परमेश्वरस्य आगमाधीनज्ञप्तिकत्वेऽपि तस्यान्यतोऽवगमात् नापि तदनित्यत्व

चेन्न योग्यानुपलब्धिबाधिते तदनवकाशादवकाशे वा पाषाणेऽपि तथाभावप्रसङ्गात्। ननु सुखाभिव्यक्तिर्मुक्तिरिति पक्षं परित्यज्य दुःखनिवृत्तिरेव मुक्तिरिति स्वीकारे घोरविद्यारोपकमस्तस्य सौवीरर्षिमनुहरतीति चेत्तदेतन्नाटकपक्षपतितत्वञ्च इत्युपेक्ष्यते। सुखस्य सातिशयत्वेन प्रत्यक्षतया बहुप्रत्यवायाक्रान्ततया साधनप्रार्थनापरिक्लिष्टतया च दुःखाविनाभूतत्वेन विषानुषक्तमधुवत् दुःखपक्षनिक्षेपात्। नन्वेकमनुसन्धित्सतोऽपरं प्रच्यवते इति न्यायेन दुःखवत् सुखमप्युच्छिद्यत इति अकाम्योऽयं पक्ष इति चेन्मैवं मंस्थाः सुखसम्पादने दुःखसाधनबाहुल्यानुषङ्गनियमेन तप्तायःपिण्डे तपनीयबुद्ध्या प्रवर्त्तमानेन साम्यापातात् तथा हि न्यायोपार्जितेषु विषयेषु कियन्तः सुखखद्योताः कियन्ति दुःखदुर्दिनानि, अन्यायोपार्जितेषु तु यद्भविष्यति तन्मनसापि चिन्तयितुं न शक्यमित्येतत् स्वानुभवमप्रच्छादयन्तः सन्तो विदांकुर्वन्तु विद्वांसो भवन्तः। तस्मात् परिशेषात् परमेश्वरानुग्रहवशाच्छ्रवणादिक्रमेणात्मतत्त्वसाक्षात्कारवतः पुरुषधौरेयस्य दुःखनिवृत्तिरात्यन्तिकी निःश्रेयसमिति निरवद्यम्। नन्वीश्वरसद्भावे किं प्रमाणं प्रत्यक्षमनुमानमागमो वा न तावदत्र प्रत्यक्षं क्रमते रूपादिरहितत्वेनातीन्द्रियत्वात् नाप्यनुमानं तद्व्याप्तिलिङ्गाभावात् नागमः विकल्पासहत्वात् किं नित्योऽवगमयत्यनित्यो वा। आद्ये अपसिद्धान्तापातः द्वितीये परस्पराश्रयापातः। उपमानादिकमशक्यशङ्कमनियतविषयत्वात्। तस्मादीश्वरः शशविषाणायते इति चेत्तदेतन्न चतुरचेतसां चेतसि चमत्कारमाविष्करोति। विवादास्पदं नगसागरादिकं सकर्तृकं कार्यत्वात् कुम्भवत्। न चायमसिद्धो हेतुः सावयवत्वेन तस्य सुसाधत्वात्। ननु किमिदं सावयवत्वम् अवयवसंयोगित्वम् अवयवसमवायित्वं वा नाद्यं गगनादौ व्यभिचारात् न द्वितीयं तन्त्वादावनैकान्त्यात्। तस्मादनुपपन्नमिति चेन्मैवं वादीः समवेतद्रव्यत्वं सावयवत्वमिति निरुक्तेर्वक्तुं शक्यत्वात्। अवान्तरमहत्त्ववत्त्वेन वा कार्यत्वानुमानस्य सुकरत्वात्। नापि विरुद्धो हेतुः साध्यविपर्ययव्याप्तेरभावात्, नाप्यनैकान्तिकः, पक्षादन्यत्र वृत्तेरदर्शनात्। नापि कालात्ययापदिष्टः, बाधकानुपलम्भात्। नापि सत्प्रतिपक्षः, प्रतिभटादर्शनात्। ननु नगादिकमकर्तृकं शरीराजन्यत्वात् गगनवदिति चेन्नैतत् परीक्षाक्षममीक्ष्यते नहि कठोरकण्ठीरवस्य कुरङ्गशावः प्रतिभटो भवति अजन्यत्वस्यैव समर्थतया शरीरविशेषणवैयर्थ्यात्। तर्ह्यजन्यत्वमेव साधनमिति चेन्नासिद्धेः। नापि सोपाधिकत्वशङ्काकलङ्काङ्कुरसम्भवः अनुकूलतर्कसम्भवात् यद्ययमकर्तृकः स्यात् कार्योऽपि न स्यादिह जगति नास्त्येव तत्कार्यं नाम यत्कारकचक्रमवधीर्य्यात्मानमासादयेदित्येतदविवादम्। तच्च सर्वं कर्तृविशेषोपहितमर्यादं कर्तृत्वं चेतरकारकाप्रयोज्यत्वे सति सकलकारकप्रयोक्तृत्वलक्षणं ज्ञानचिकीर्षाप्रयत्नाधारत्वम्। एवञ्च कर्तृव्यावृत्तेस्तदुपहितसमस्तकारकव्यावृत्तावकारणककार्योत्पादप्रसङ्ग इति स्थूलं प्रमाणं। तथा निरटङ्कि शङ्करकिङ्करेण। "अनुकूलेन तर्केण सनाथे सति साधने। साध्यव्यापकताभङ्गात् पक्षे नोपाधिसम्भवः" इति। यदीश्वरः कर्त्ता स्यात्तर्हि शरीरी स्यादित्यादिप्रतिकूलतर्कजातं जागर्त्तीति चेदीश्वरसिद्ध्यसिद्धिभ्यां व्याघातात् तदुदितमुदयनेन। "आगमादेः प्रमाणत्वे बाधनादनिषेधनम्। आभासत्वे तु सैव स्यादाश्रयासिद्धिरुद्धता" इति। न च विशेषविरोधः शक्यशङ्कः ज्ञातत्वाज्ञातत्वविकल्पपराहतत्वात्। तदेतत् परमेश्वरस्य जगन्निर्माणे प्रवृत्तिं किमर्थां स्वार्थां परार्थां वा आद्येऽपीष्टप्राप्त्यर्थां अनिष्टपरिहारार्थां वा नाद्यः अवाप्तसकलकामस्य तदनुपपत्तेः अत एव न द्वितीयः। द्वितीये प्रवृत्त्यनुपपत्तिः कः खलु परार्थं प्रवर्त्तमानं प्रेक्षावानित्याचक्षीत। अथ करुणया प्रवृत्त्युपपत्तिरित्याचक्षीत कश्चित् तं प्रत्याचक्षीत तर्हि सर्व्वान् प्राणिनः सुखिन एव सृजेदीश्वरः न दुःखशबलान् करुणाविरोधात्। स्वार्थमनपेक्ष्य परदुःखप्रहरणेच्छा हि कारुण्यं तस्मादीश्वरस्य जगत्सर्जनं न युज्यते। तदुक्तं भट्टाचार्य्यैः। "प्रयोजनमनुद्दिश्य न मन्दो हि प्रवर्त्तते। जगच्च सृजतस्तस्य किं नाम न कृतं भवेदिति"। नास्तिकशिरोमणे। तावदीर्ष्याकषायिते चक्षुषी निमील्य परिभावयतु भवान् करुणया प्रवृत्तिरस्त्येव न च निसर्गतः सुखमयसर्गप्रसङ्गः, सृज्यप्राणिकृतसुकृतदुष्कृतपरिपाकविशेषाद्वैचित्र्योपपत्तेः। न च स्वातन्त्र्यभङ्गः शङ्कनीयः स्वाङ्गं स्वव्यवधायकं न भवतीति न्यायेन प्रत्युत तन्निर्वाहात्। "एक एव रुद्रो न द्वितीयोऽवतस्थे" इत्यादिरागमस्तत्र प्रमाणम्। यद्येवं तर्हि परस्पराश्रयबाधव्याधिः समाधत्स्वेति चेत् तस्यानुत्थानात् किमुत्पत्तौ परस्पराश्रयः शङ्क्यते ज्ञप्तौ वा। नाद्यः आगमस्येश्वराधीनोत्पत्तिकत्वेऽपि परमेश्वरस्य नित्यत्वेनोत्पत्तेरनुपपत्तेः नापि ज्ञप्तौ परमेश्वरस्यागमाधीनज्ञप्तिकत्वेऽपि तस्यान्यतोऽवगमात् नापि तदनित्यत्व

सत उत्पत्तिकथा भा०आ०९८अ० शान्तनुप्रार्थने गङ्गावाक्यं यथा। "एतच्छ्रुत्वा वचो राज्ञः सस्मितं मृदु वल्गु च। वसूनां समयं स्मृत्वा अथाभ्यगच्छदनिन्दिता। उवाच चैव राजानं ह्लादयन्ती मनो गिरा। भविष्यामि महीपाल! महिषी ते वशानुगा। यत्तु कुर्य्यामहं राजन्! शुभं वा यदि वाऽशुभम्। न तद्वारयितव्याऽस्मि न वक्तव्या तथाऽप्रियम्। एवं हि वर्त्तमानेऽहं त्वयि वत्स्यामि पार्थिव!। वारिता विप्रियं चोक्ता त्यक्ष्येयं त्वामसंशयम्"। वैश० उक्तिः "तथेति राज्ञा सा तूक्ता तदा भरतसत्तम। प्रहर्षमतुलं लेभे प्राप्य तं पार्थिवोत्तमम्। आसाद्य शान्तनुस्तां च बुभुजे कामतो वशी। न प्रष्टव्येति मन्वानो न स तां किञ्चिदूचिवान्। स तस्याः शीलवृत्तेन रूपौदार्य्यगुणेन च। उपचारेण च रहस्तुतोष जगतीपतिः। दिव्यरूपा हि सा देवी गङ्गा त्रिपथगामिनी। मानुषं विग्रहं कृत्वा श्रीमन्तं वरवर्णिनी। भाग्योपनतकामस्य भार्य्या चोपनताऽभवत्। शान्तनोर्नृपसिंहस्य देवराजसमद्युतेः। सम्भोगस्नेहचातुर्य्यैर्हावलास्यैर्मनोहरैः। राजानं रमयामास यथा रेमे तथैव सः। स राजा रतिसक्तत्वादुत्तमस्त्रीगुणैर्हृतः। संवत्सरानृतून्मासान्न बुबुधे न बहून् गतान्। रममाणस्तया सार्द्धं यथाकामं नरेश्वर!। अष्टावजनयत् पुत्त्रांस्तस्याममरसन्निभान्। जातं जातञ्च सा पुत्त्रं क्षिपत्यम्भसि भारत!। प्रीणाम्यहं त्वामित्युक्त्वा गङ्गास्रोतस्यमज्जयत्। तस्य तन्न प्रियं राज्ञः शान्तनोरभवत्तदा। न च तां किञ्चनोवाच त्यागाद्भीतो महीपतिः। अथैनामष्टमे पुत्त्रे जाते प्रहसतीमिव। उवाच राजा दुःखार्त्तः परीप्सन् पुत्त्रमात्मनः। मा बधीः कस्य काऽसीति किं हिनस्सि सुतानिति। पुत्त्रघ्नि! सुमहत् पापं सम्प्राप्तं ते सुगर्हितम्"। स्त्र्युवाच। "पुत्त्रकाम! न ते हन्मि पुत्त्रं पुत्त्रवतां वर!। जीर्णोऽस्तु मम वासोऽयं यथा स समयः कृतः। अहं गङ्गा जह्नुसुता महर्षिगणसेविता। देवकार्य्यार्थसिद्ध्यर्थमुषिताऽहं त्वया सह। इमेऽष्टौ वसवो देवा महाभागा महौजसः। वशिष्ठशापदोषेण मानुषत्वमुपागताः। तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते। मद्विधा मानुषी धात्री लोके नास्तीह काचन। तस्मात्तज्जननीहेतोर्मानुषत्वमुपागता। जनयित्वा वसूनष्टौ जिता लोकास्त्वयाऽक्षयाः। देवानां समयस्त्वेष वसूनां संश्रुतो मया। जातं जातं मोक्षयिष्ये जन्मतो मानुषादिति। तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्मनः। स्वस्ति तेऽस्तु गमिष्यामि पुत्त्रं पाहि महाव्रतम्। एष पर्य्यायवासो मे वसूनां सन्निधौ कृतः। मत्प्रसूतं विजानीहि गङ्गादत्तमिमं सुतम्"। हृतनिजधेनुकान् वसून् प्रति गङ्गया वशिष्ठशापवृत्तान्तोक्तिः ९९अ०। "अथाश्रमपदं प्राप्तः फलान्यादाय वारुणिः। न चापश्यत्स गां तत्र सवत्सां काननोत्तमे। ततः स मृगयामास वने तस्मिंस्तपोधनः। नाध्यगमच्च मृगयंस्तां गां मुनिरुदारधीः। ज्ञात्वा तथाऽपनीतां तां वसुभिर्दिव्यदर्शनः। ययौ क्रोधवशं सद्यः शशाप च वसूंस्तदा। यस्मान्मे वसवो जह्रुर्गां वै दोग्ध्रीं सुवालधिम्। तस्मात् सर्व्वे जनिष्यन्ति मानुषेषु न संशयः। एवं शशाप भगवान् वसूंस्तान् भरतर्षभ!। वशं क्रोधस्य सम्प्राप्त आपवो मुनिसत्तमः। गत्वा च तान्महाभागस्तपस्येव मनो दधे। एवं स शप्तवान् राजन्! वसूनष्टौ तपोधनः। महाप्रभावो ब्रह्मर्षिर्देवान् क्रोधसमन्वितः। अथाश्रमपदं प्राप्तास्ते वै भूयो महात्मनः। शप्ताः स्म इति जानन्त ऋषिं तमुपचक्रमुः। प्रसादयन्तस्तमृषिं वसवः पार्थिवर्षभ!। लेभिरे न च तस्मात्ते प्रसादमृषिसत्तमात्। आपवात् पुरुषव्याघ्र! सर्व्वधर्म्मविशारदात्। उवाच च स धर्म्मात्मा शप्ता यूयं धरादयः। अनुसंवत्सरात् सर्व्वे शापमोक्षमवाप्स्यथ। अयन्तु यत्कृते यूयं मया शप्ताः स वत्स्यति। द्यौस्तदा मानुषे लोके दीर्घकालं स्वकर्म्मणा। नानृतं तच्चिकीर्षामि क्रुद्धो युष्मान् यदब्रुवम्। न प्रजास्यति चाप्येष मानुषेषु महामनाः। भविष्यति च धर्म्मात्मा सर्व्वशास्त्रविशारदः। पितुः प्रियहिते युक्तः स्त्रीभोगान् वर्ज्जयिष्यति। एवमुक्त्वा वसून् सर्व्वान् स जगाम महानृषिः। ततो मामुपजग्मुस्ते समेता वसवस्तदा। अयाचन्त च मां राजन्! वरं तच्च मया कृतम्। जातान् जातान् प्रक्षिपास्मान् स्वयं गङ्गे! त्वमम्भसि। एवं तेषामहं सम्यक् शप्तानां राजसत्तम!। मोक्षार्थं मानुषाल्लोकाद्यथावत् कृतवत्यहम्। अयं शापादृषेस्तस्य एक एव नृपोत्तम!। द्यौ राजन्! मानुषे लोके चिरं वत्स्यति भारत!। वैशम्पायन उवाच। एतदाख्याय सा देवी तत्रैवान्तरधीयत। आदाय च कुमारं तं जगामाथ यथेप्सितम्। स तु देवव्रतो नाम गाङ्गेय इति चाभवत्। द्युनामा शान्तनोः पुत्त्रः शान्तनोरधिको गुणैः"।

"अथापगेयं भीष्मं तं रामेणेच्छामि धीमता। रणे विनिर्ज्जितं द्रष्टुं कुर्य्यांस्तदपि भार्गव।" "यदि त्वामापगेयो वै

[illegible] ।

आपणिक त्रि [illegible] ।

आपणन न० [illegible] ।

आपण पु० [illegible] ।

आपणिक त्रि [illegible] ।

आपतन न० [illegible] ।

आपति पु० [illegible] ।

आपतिक पु० [illegible] ।

आपतित त्रि [illegible] ।

आपत्कल्प पु० [illegible] ।

आपत्काल पु० [illegible] ।

आपत्कालिक त्रि [illegible] ।

आपत्ति स्त्री [illegible] ।

आपद् पु० [illegible]

तस्यापत्यमित्यधिकारे विहिते प्रत्यये । "आपत्यस्य च तद्धितेऽनाति" पा० ।

आपथि पु० अभिमुखः पन्थाः यस्य वेदे नि० इत् समा० । अभिमुखमार्गवत्यग्निनि "आपथयोविपथयोऽन्तस्पथा अनुपथा" ऋ० ५.५२.१० । आपथय अभिमुखा मार्गा येषां ताउया" भा० स्त्रियां वा ङीप् "हिरण्ययेभिः पविभिः पयोवृध उज्जिघ्नन्त आपथ्यो न पर्वतान्" ऋ० १, ६४ ११ ।

आपद् स्त्री आ+पद–सम्पदा० क्विप् । विपत्तौ आपत्तिशब्दे विवृति "दैवीनां मानुषीणाञ्च प्रतिकर्त्ता त्वमापदाम्" रघु । 'सम्पदो मे निरापदः रघु "अविवेकः परमापदां पदम्' किरा० "मन्त्रप्रतिविभिराहितापदः" माघ । "आपत्कल्प आपत्प्राप्त । आपत्प्राप्त । आपद्गत । आपद्ग्रस्त । आपद्धर्म" इत्यत्रलक्षणा टाप् । आपदाप्यत । आपत्काले न्यूनादपि विद्याधिगन्तव्या यथा छा०उ० "वाचा स्म वै पूर्व्व उपयन्ति सहीपायनकीर्त्त्योराय" अस्य भाष्यम् "वाचा स्म किल पूर्व्वे माह्मणा विद्यार्थिनः सन्तः क्षत्रियान् वैश्यान् वा क्षत्रिया वैश्यानुपयन्ति शिष्यत्वेन उपगच्छन्ति नोपायनम् शूषाभि अत च गौतम उपायनकीर्त्त्या उपगमनकीर्त्तनमात्रेणैव उवास कथितवान् नोपायन चकार'। "आपदि समादधिकाद्वा विद्यामाप्नुसम्भवावस्थायाम् उपायनमुपगमनं पादोपसर्पणम्" आन० ।

आपत्काल पु० आपदा युतोऽकालः । आपदा युते दुष्टे काले "योद्धा चापत्कालस्य पञ्चिधानस्य पाण्डव ।" भा० शा० प० ५८ अ० ।

आपद्देश पु० आपदः जलसमूहस्य देशः । वरुणे ।

आपद्धर्म पु० आपदि कर्त्तव्यो धर्मः । १आपद्यनुष्ठेये धर्मे आपद्धर्ममधिकृत्य कृतोपन्यासः यत्र । भारतान्तर्गतशान्तिपर्व्वमध्यगते व्यासकृते २अवान्तरपर्व्वभेदे न० तच्च भा०शा०प० १२१ अध्यायावधि १७२ अध्यायपर्य्यन्तम् ।

आपन न० आप+भावे ल्युट् । १प्राप्तौ । कर्म्मणि ल्युट् । २मरीचे शब्दच० । [प्रभौ २किराते च उज्ज्वलदत्तः ।

आपनिक त्रि० आ+पन–स्तुतौ कर्म्मणि इकन् । १इन्द्रनीले

आपनेय त्रि० आ+अप+नी–कर्म्मणि यत् । समन्तादपनेये दूरीकार्य्ये "नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ । 'कठोप० । "श्रेयमागमप्रतिपाद्यात्मनि मतिर्नैषा तर्केण स्वबुद्ध्यभ्यूहमात्रेण नापनेया नापनेतव्या न हन्तव्या । तार्किकोह्यनागमज्ञः स्वबुद्धिपरिकल्पितं यत्किञ्चिदेव कथयति अत एव चेयमागमप्रसूता मतिः तार्किकादन्येनैवागमाभिज्ञेनाचार्य्येणैव प्रोक्ता सती सुज्ञानाय भवति" भा० ।

आपन्न आ+पद–क्त । १आपद्युक्ते "आपन्नं संसृतिं घोरां यन्नाम विवशोऽगृणन् । ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयम्" भाग० "आपन्नाभयसत्रेषु दीक्षिता खलु पौरवाः" शकु० "आत्मापराधादापन्नस्तत् किं भीम जिघांससि" भा० स्त्री०प० १२अ० । प्राप्ते मेदि० आपन्नमत्ता

आपन्नसत्त्वा स्त्री आपन्नः प्राप्तः गर्भरूपेण सत्त्वः प्राणी यया । गर्भिण्यां स्त्रियाम् 'सममापन्नसत्त्वास्ता रेजुरापाण्डुरत्विषः" रघु । [निमय इत्या क्रोते ।

आपमित्यक त्रि० अपमित्य परिवर्त्त्य निर्वृत्तम् कक् । वि-

आपया स्त्री आपेन जलपूरेण याति या+क । १जलपूरयुक्ते नदीभेदे "दृषद्वत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि" ऋ० ३,२३,४, । "आपया नाम काचित् नदी" भा० २आपगारूपनदीमात्रे च ।

आपयितृ त्रि० आप+णिच्–तृच् । प्रापयितरि "आपयिता ह वै कामानां भवति यएतं विद्वानक्षरमुद्गीथमुपास्ते" छा०उ० । "आपयिता ह वै कामानां यजमानस्य भवति" भा० । स्त्रियां ङीप् ।

आपराधय्य न० अप+राध–णिच् भा० य तस्य भाव ब्राह्म० ष्यञ् । अपराधकर्त्तृत्वे ।

आपराह्णिक त्रि० अपराह्णे भव ठञ् । १अपराह्णभवे २तद्व्यापके च स्त्रियां ङीप् । "पित्र्यर्थे चापराह्णिकी' स्मृति ।

आपर्त्तुक पु० ऋतुमधिकृत्य अध्याय तत्र विहितः कल्पः । ऋतवाध्यायबोधके छान्दसे कल्पग्रन्थभेदे । "ऋतवाध्यायश्छान्दसः कल्प आपर्त्तुक "कौषीतकिसूत्रम् ।

आपव पु० आपुनाति सर्वमात्मेन आपु जल तदधिष्ठाता वरुणोऽपि आपूः तस्यापत्यम् । कल्पभेदे वरुणस्यापत्ये १वसिष्ठे मुनौ तस्य वत उत्पत्तिकथा यथा भा०आ०प० ९९ अ० "य वेभे वरुण पुत्रं पुरा भरतसत्तम । वसिष्ठनामा स मुनिः ख्यात आपव इत्युत" "तत्ते यापादिविर्मुक्ता आपवस्य महात्मन " इति च आपगेयशब्दे विवृति । आप जलपूर याति प्राप्नोति आश्रयत्वेन वा–क २नारायणे परमपुरुषे । "आपोनारा इति प्रोक्ता आपोवै नरसूनवः । अयनं तस्य ता पूर्व्वं तेन नारा-

[illegible]

आपथ [illegible]

आपस्तम्ब [illegible]

आपस्तम्बिनी [illegible]

आपाक [illegible]

आपात [illegible]

आपातलिका [illegible]

आपातलस् [illegible]

आपाद [illegible]

आपादन [illegible]

आपान [illegible]

आपालि [illegible]

आपि [illegible]

आपिञ्जर न० ईषत्पिञ्जर प्रा०स०। १स्वर्णे राजनि०। २ईषत्पिञ्जरवर्णे पु० ३तद्वति त्रि० "आपिञ्जरावद्धरजःकणत्वात्" रघु।

आपिशलि पु० अपिशलस्य मुनेरपत्यम् इञ्। आदिशाब्दिके मुनिभेदे। "इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायन। पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः" कवि क०। "वा सुप्यापिशलेः" पाणिनिनोक्ते स्ततोऽस्यस्यादित्वम् स्त्रियां क्रोड्या०ष्यञ्। आपिशल्या तस्यस्त्र्यपत्ये स्त्री। आपिशलिना प्रोक्तम् अण्। आपिशलम्। तदीये शास्त्रे न०।

आपी त्रि० आ+प्याय–क्विप् पीभाव। १आपीने वृद्धिमति।

आपीड पु० आ+पीड–अच्। १शिखामाल्ये, २शिरोभूषणे, "तस्मिन् कुलापीडनिभे विपीडितम्" रघु। "विचित्रमुकुटापीडा विचित्रकवचध्वजाः" भा०व०प० १७२ अ०। "बर्हापीडाभिरुचिरशाय यूनो व्यूढोरस्कांस्तथाभावान् ददर्श" भा० आ०प०१८७अ०। २स्तवकृमिनि. स्तनकाष्ठे च। ३आपीडकमात्रे त्रि०।

आपीडा स्त्री आ+पीड–अ। सम्यक्पीडने "तत्र तूर्णं गलापीडं कुर्याच्चाप्यधूननम्" सुश्रु० गलस्यापीडा मर्द्दन यत्रेति तदर्थे।

आपीडित त्रि० आ+पीड–क्त। १निष्पीडिते २निर्मर्द्दिते।

आपीत न० ईषत् पीतम् प्रा०त०। माक्षिके धातौ। २ईषत्पीतवर्णे पु० ३तद्वति त्रि०। ईषत् पान कृत यस्य तादृशे ४जलादौ त्रि०।

आपीन न० आ+प्याय–क्त पीभाव' तस्य नत्वम्। (मेङ्) १गवादे ऊधसि "आपीनभारोद्वहनप्रयत्नात्" रघु २कूपे पु०। "आपीनमूध आपीनोऽन्धु" सुग्ध०। अन्योपसर्गपूर्व्वकत्वे तु संप्यानइत्येव आङ्पूर्व्वकस्यापि अन्धूधसो रेवार्थयो पीभावो नान्यत्र।

आपूपिक त्रि० अपूपः शिल्पमस्य ठक्। १अपूपपाचके अपूपे अपूपभक्षणे साधु गुडा०ठक्। २अपूपभक्षणसाधने गुडादौ। अपूपो भक्तिरस्य अचित्तत्वात् ठक्। ३अपूपभक्षणासेवके। अपूप पण्यमस्य ठक्। ४अपूपविक्रेतरि। अपूपस्तद्भक्षणं शीलमस्य ठक्। ५अपूपभक्षशीले। अपूपस्तद्भक्षणं व्रतमस्य ठञ्। ६व्रतत्वेन अपूपभक्षणकर्त्तरि। अपूपानां समूहः अचित्तत्वात् ठक्। ७अपूपसमूहे न०।

आपूप्य पु० अपूपाय साधु' वा ञ्य। अपूपसाधने चूर्णे त्रि०

आपूर पु० आपूर्य्यतेऽनेन आ+पूर–घञ्। जलादिप्रवाहे "स्वेदापूरोयुवतिसरितां व्याप गण्डस्थलानि" माघ भावे घञ्। २सम्यक्पूरणे ३ईषत्पूरणे ४अभिव्याप्तौ च।

आपूरण न० आ+पूर–भावे ल्युट्। १समन्तात्पूरणे आपूरयति ल्यु। २सम्यक्पूरणकर्त्तरि त्रि० ३नागभेदे पु० "कालिको मणिनागश्च नागश्चापूरणस्तथा" भा० आ०प० ३५अ०। [२अभिव्याप्तौ च।

आपूरित त्रि० आ+पूर–क्त। यस्यापूरणं कृत १तस्मिन्

आपूर्य्यमाण त्रि० आ+पूर–कर्मणि शानच्। सम्यक्पूर्य्यमाणे २समन्तात्प्रसृते "आपूर्य्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्" गीता। आधारे शानच्। सूर्य्यकिरणैः पूर्य्यमाणचन्द्रस्याधारे पक्षे। 'उदगयने आपूर्य्यमाणे पक्षे कल्याणे नक्षत्रे चूडोपनयनगोदानविवाहाः" आश्व०गृह्य०। "अग्निर्ज्योतिरहः शुक्ल आपूर्य्यमाण पक्षम्" छा०उप०।

आपूष आ+पूष–वृद्धौ करणे घञ्। रङ्गे (राङ्) धातुभेदे, तस्य पुष्टिसाधनत्वादिकमुक्तं भा० प्र० "रङ्गं वङ्गं त्रपु प्रोक्तं तथा पिच्चटमित्यपि। खुरकं मिश्रकं चापि द्विविधं रङ्गमुच्यते। उत्तमं खुरकं प्रोक्तं मिश्रकं गर्हितं भवेत्। रङ्गं लघु सरं रूक्षमुष्णमेहकृमीनपि। निहन्ति पाण्डु सश्वासं चक्षुष्यं पित्तलं मनाक्। सिंहो यथा हस्तिगणं निहन्ति तथैव वङ्गोऽखिलमेहवर्गम्। देहस्य सौख्यम् प्रबलेन्द्रियत्वं नरस्य पुष्टिं विदधाति नूनम्"।

आपृच् त्रि० आ+पृच–क्विप्। संसर्गयुक्ते। "मित्रस्तुवोयच्छसान न गाव पृथिव्या आपृगसुया स यज्ञे" ऋ०१०, ८९,१४।

आपृच्छा स्त्री आ+प्रच्छ–अङ्। १आलापे, २जिज्ञासायाम् ३आभाषणे गतागतकाले ४शुभप्रश्ने ५आमन्त्रणे च।

आपृच्छ्य त्रि०आ+प्रच्छ–वेदे नि०क्यप्। जिज्ञास्ये। "आपृच्छ्य वरुण भाज्यर्पति" सि०कौ०धृता श्रुति। आ+प्रच्छ–ल्यप्। २जिज्ञासित्वेत्यर्थे अव्य०।

आपेक्षिक त्रि० अपेक्षात आगत ठक्। अपेक्षया प्राप्ते "किन्तु मध्यत्वमापेक्षिकम्" सि०कौ० "अस्तमनन्तेत्यापेक्षिकमस्तमनम्" छा०उ०भा०। स्त्रियां ङीप्।

आपोक्लिम न० ज्योतिषोक्ते जन्मलग्नावधिकृतीयषष्ठनवमद्वादशस्थानेषु। "तृतीय पञ्चनवममन्त्यमापोक्लिम विदुः" ज्यो०त०। "आपोक्लिमे यदि खगा, न किले-

[illegible] ।

आपोमय त्रि० आप्+विकारे मयट् [illegible] ।

आपोमूर्त्ति [illegible] ।

आपोऽशान न० [illegible] ।

आप्त त्रि० आप+क्त [illegible] ।

[illegible] ।

आप्तकाम त्रि० [illegible] ।

ऽस्तेनो भवति भ्रूणहाऽभ्रूणहा चाण्डालोऽचाण्डालः पौल्कसोऽपौल्कसः श्रमणोऽश्रमणस्तापसोऽतापसोऽनन्वागतं पापेन तीर्णो हि तदा सर्व्वाञ्छोकान् हृदयस्य भवति" इ० उ०

"इदानीं योऽसौ सर्व्वात्मभावो मोक्षो विद्याफलं क्रियाकारकफलशून्यं स प्रत्यक्षतो निर्द्दिश्यते । यत्राविद्याकामकर्म्माणि न सन्ति तदेतत्प्रस्तुतं "यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यतीति" । तद्वा अस्य रूपम् । यः सर्व्वात्मभावः सोऽस्य परमो लोक इत्युक्तस्तदतिच्छन्दा अतिच्छन्दमित्यर्थं रूपपरत्वात् । छन्दः कामोऽतिगतः छन्दोऽस्मिन् रूपे तदतिच्छन्दं रूपम् । अन्योऽसौ सान्तश्छन्दःशब्दो गायत्र्यादिच्छन्दोवाची । अयन्तु कामवचनोऽत स्वरान्त एव । तथाप्यतिच्छन्दा इति पाठः स्वाध्यायधर्म्मो द्रष्टव्यः । अस्ति च लोके कामवचनप्रयुक्तश्छन्दशब्दः स्वच्छन्दः परच्छन्द इत्यादौ । अतोऽतिच्छन्दमित्येवमुचितः कामवर्ज्जितमेतद्रूपमित्यस्यार्थः । तथाऽपहतपाप्मा पाप्मशब्देन धर्म्माधर्म्मावुच्येते । "पाप्मभिः संसृज्यते" "पाप्मनो विजहाति" इत्युक्तत्वात् । अपहतपाप्म धर्म्माधर्म्मवर्जितमित्येतत् । किञ्चाभयम् भयं हि नामाविद्याकार्य्यम् "अविद्यया भयं मन्यते" इति ह्युक्तम् । तत्कार्य्यद्वारेण कारणप्रतिषेधोऽयम् अभयं रूपमित्यविद्यावर्जितमित्येतत् । यदेतद्विद्याफलं सर्व्वात्मभावस्तदेतदतिच्छन्दापहतपाप्माभयं रूपं सर्व्वसंसारधर्म्मवर्ज्जितमतोऽभयं रूपमेतत् । इदञ्च पूर्व्वमेवोपन्यस्तमतीतानन्तरब्राह्मणसमाप्तौ । "अभयं वै जनक प्राप्तोऽसि" इत्यागमतः । इह तु तर्कतः प्रपञ्चितम् दर्शितागमार्थप्रत्ययदार्ढ्याय । अयमात्मा स्वयञ्चैतन्यज्योतिःस्वभावः सर्व्वं स्वेन चैतन्यज्योतिषावभासयति । "स यत्तत्र किञ्चित्पश्यति रमते चरति जानाति च" इत्युक्तम् । अतः स्थितञ्चैतन्न्यायतो नित्यस्वरूपचैतन्यज्योतिष्ट्वमात्मनः । स सुषुप्तकालेऽविनष्टः स्वेनैव रूपेण वर्त्तते कस्मादयमहमस्मीत्यात्मानं वा बहिर्व्वेमानि भूतानीति जाग्रत्स्वप्नयोरिव न जानातीत्यत्रोच्यते । इदमत्राज्ञानहेतुम् एकत्वमेवाज्ञानहेतुस्तत्कथम्? इत्युच्यते । दृष्टान्तेन हि प्रत्यक्षो भवति विवक्षितोऽर्थ इत्याह । तत् तत्र यथा लोके प्रिययेष्टया स्त्रिया सम्परिष्वक्तः सम्यक् परिष्वक्तः कामयन्त्या कामुकः सन् बाह्यमात्मनः किञ्चन किञ्चिदपि न वेद मत्तोऽन्यद्वस्त्विति । न चान्तरमयमहमस्मि सुखी दुःखी चेति अपरिष्वक्तस्तु तया प्रविभक्तो जानाति । सर्व्वमेव बाह्यमाभ्यन्तरञ्च । परिष्वक्तोत्तरकालन्त्वेकत्वापत्तेर्न जानाति । एवमेव यथादृष्टान्तोऽयं पुरुषः क्षेत्रज्ञो भूतमात्रासंसर्गतः सैन्धवखिल्यवत् प्रविभक्तो जलादौ चन्द्रादिप्रतिबिम्बवत्कार्य्यकरण इह प्रविष्टः सोऽयं पुरुषः प्राज्ञेन परमार्थेन स्वाभाविकेन स्वेनात्मना परेण ज्योतिषा सम्परिष्वक्तः सम्यक् परिष्वक्त एकीभूतो निरन्तरः सर्व्वात्मा न बाह्यं किञ्चन वस्त्वन्तरं नाप्यान्तरमात्मन्ययमहमस्मि सुखी दुःखी चेति वेद । तत्र चैतन्यज्योतिःस्वभावत्वे कस्मादिह न जानातीति यदप्राक्षीस्तत्राय हेतुरेकत्वमुक्तः । एकत्वं यथा स्त्रीपुंसयोः सम्परिष्वक्तयोः । तत्रार्थाज्ज्ञानात्वं विशेषविज्ञानहेतुरित्युक्तं भवति । नानात्वे च कारणमात्मनो वस्त्वन्तरस्य प्रत्युपस्थापिकाविद्येत्युक्तं तत्र चाविद्याया यदा प्रविविक्तो भवति तदा सर्व्वेणैकत्वमेवास्य भवति । ततश्च ज्ञानज्ञेयादिकारकविभागेऽसति कुतो विशेषविज्ञानप्रादुर्भावः कामो वा सम्भवति स्वाभाविके स्वरूपस्य आत्मज्योतिषि । यस्मादेव सर्व्वैकत्वमेवास्य रूपमतस्तद्वा अस्यात्मनः स्वयं ज्योतिःस्वभावस्यैतद्रूपमाप्तकामं यस्मात्समस्तमेतत्तस्मादाप्ताः कामा अस्मिन् रूपे तदिदमाप्तकामं यस्य अन्यत्वेन प्रविभक्तः कामस्तदनाप्तकामं भवति । यथा जागरितावस्थायां देवदत्तादिरूपम् । न त्विदं तथा कुतश्चित्प्रविभज्यतेऽतस्तदाप्तकामं भवति । किमन्यस्माद्वस्त्वन्तराच्च प्रविभज्यते आहोस्विदात्मैव तद्वस्त्वन्तरमत आह । नान्यदस्त्यात्मनः । कथम्? यत आत्मकाममात्मैव कामा यस्मिन् रूपे येऽत्र प्रविभक्ता इवान्यत्वेन काम्यमाना यथा जाग्रत्स्वप्नयोस्तेऽस्यात्मैवान्यत्वप्रत्युपस्थापकहेतोरविद्याया अभावादात्मकाममत एवाकाममेतद्रूपं काम्यविषयाभावाच्छोकान्तरं शोकच्छिद्रं शोकशून्यमित्यर्थस्तच्छोकमध्यमिति वा सर्व्वथाप्यशोकमेतद्रूपं शोकवर्ज्जितमित्यर्थः । प्रकृतः स्वयञ्ज्योतिरात्मा अविद्याकामकर्म्मविनिर्मुक्त इत्युक्तम् । असङ्गत्वादात्मन आगन्तुकत्वाच्च तेषां, तत्रैषा शङ्का जायते चैतन्यस्वभावत्वे सत्यप्येकीभावाच्च जानाति स्त्रीपुंसयोरिव सम्परिष्वक्तयोरित्युक्तम् । तत्र प्रासङ्गिकमेतदुक्तं कामकर्म्मादिवत् स्वयञ्ज्योतिष्ट्वमप्यस्यात्मनो न स्वभावः । यस्मात् सम्प्रसादे नोपलभ्यत इत्याशङ्कायां प्राप्तायां तन्निराकरणाय स्त्रीपुंसयोर्दृष्टान्तोपादानेन विद्यमानस्यैव स्वयञ्ज्योतिष्ट्वस्य सुषुप्तेऽप्यग्रहणमेकीभावाद्धेतोर्न तु कामकर्म्मादिवदागन्तुकम् । इत्येतत्प्रासङ्गिकमभिधाय यत्प्रकृतं तदेवानुप्रवर्त्तयति । अत्र चैतत्प्रकृत-

[illegible]

[illegible]

प्राप्तप्रतिषेधादात्माश्रयत्वं कामानां श्रुतमेवेति चेत् न "सुधी स्वप्नोभूत्वेति" परनिमित्तत्वात् कामाश्रयत्वप्राप्तेरसकृद्वचनाच्च । न हि कामाश्रयत्वेऽसद्भावचनमुपपद्यते । सङ्कल्प काम इत्यत्रोचाम । आत्मकाम इति श्रुतेरात्मविषयेऽस्य कामो भवतीति चेत् न व्यतिरिक्तकामनाभावार्थत्वात्तस्याः, वैशेषिकादितन्त्रन्यायोपपन्नमात्मन कामाद्याश्रयत्वमिति चेत् न हृदि श्रिता इत्यादिविशेषश्रुतिविरोधादनपेक्ष्यास्तावैशेषिकादितन्त्रोपपत्तय श्रुतिविरोधे न्यायाभासत्वोपगमात् स्वयं ज्योतिष्ट्वाधनाच्च । कामादीनाञ्च स्वप्ने केवलदृशिमात्रविषयत्वात् स्वयंज्योतिष्ट्व सिद्धम् स्थितञ्च साध्येतात्मसमवायित्वे । दृश्यत्वानुपपत्तेश्चक्षुर्गतविशेषवत् । द्रष्टुर्हि दृश्यमर्थान्तरभूतमिति द्रष्टु स्वयंज्योतिष्ट्व सिद्धम् तद्बाधित स्याद्यदि कामाद्याश्रयत्व परिकल्प्येत । सर्वशास्त्रप्रतिषेधाच्च । परस्यैकदेशकल्पनाया कामाद्याश्रयत्वे च सर्वं शास्त्रार्थजातं कुप्येत । एतच्च विस्तरेण चतुर्थेऽवोचाम । महता हि प्रयत्नेन कामाद्याश्रयत्वकल्पना प्रतिषेद्धव्या । आत्मन परेणैकत्वशास्त्रार्थसिद्धे । तत्कल्पनाया पुन क्रियमाणायां शास्त्रार्थ एव बाधितः स्यात् । यथेच्छादीनामात्मधर्मत्वं कल्पयन्तो वैशेषिका नैयायिकाश्चोपनिषच्छास्त्रार्थेन न सङ्गच्छन्ते तथेयमपि कल्पनोपनिषच्छास्त्रार्थबाधनान्नादरणीया" ।

"काममय एवाय पुरुष इति यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत् कर्म कुरुते यत् कर्म कुरुते तदभिसम्पद्यते" इत्युपक्रम्य "तदेव सक्त सह कर्मणैति लिङ्ग मनोयत्र निषक्तमस्य । प्राप्यान्त कर्मणस्तस्य यत् किञ्चेह करोत्ययम् । तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे" इति श्लोकमुदाहृत्य "इति नु कामयमान" इत्युक्त्वा कामयमानस्यैव जन्मादिहेतुत्वमुक्त्वा

"अथाकामयमानोयोऽकामोनिष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति" वृ० उप०। "इति नु एव नु कामयमान संसरति यस्मात् कामयमान एवैव संसरत्यथ तस्मादकामयमानो न कचित् संसरति फलासक्तस्य हि गतिरुक्ता । अकामस्य हि क्रियानुपपत्तेरकामयमानो मुच्यते । एव कथ पुनरकामयमानो भवति ? । योऽकामो भवत्यसावकामयमान । कथमकामता ? इत्युच्यते । यो नि कामो यस्मान्निर्गताः कामा सोऽय निष्काम । कथं कामा निर्गच्छन्ति ? । य आप्तकामो भवति । आप्ता कामा येन स आप्तकाम । कथमाप्यन्ते कामा ? आत्मकामत्वेन यस्यात्मैव नान्य कामयितव्यो वस्त्वन्तरभूत पदार्थो भवति । आत्मैवानन्तरो बाह्य कृत्स्न प्रज्ञानघन एकरसो नोर्द्ध न तिर्य्यङ्नाध । आत्मनोऽन्यत्कामयितुम् "यस्य सर्वमात्मैवाभूत् तत् केन क पश्येत् शृणुयान्मन्वीत विजानीयाद्वा" एवं विजानन् किं कामयेत् ? । ज्ञायमानो ह्यन्यत्वेन पदार्थ कामयितव्यो भवति । न चासावन्यो ब्रह्मविद आप्तकामस्यास्ति । य एवात्मकामतयाऽऽप्तकाम स निष्कामोऽकामोऽकामयमानश्चेति मुच्यते । न हि यस्यात्मैव सर्वं भवति तस्यानात्मा कामयितव्योऽस्ति । अनात्मा चान्य कामयितव्य. । सर्वञ्चात्मैवाभूदिति प्रतिषिद्धम् सर्वात्मदर्शिन कामयितव्याभावात् कामानुपपत्ति । ये तु प्रत्यवायपरिहारार्थं कर्म कल्पयन्ति ब्रह्मविदोऽपि तेषां नात्मैव सर्वं भवति । प्रत्यवायस्य जिहासितव्यस्यात्मनोऽन्यस्याभिप्रेतत्वात् । येन चाशनायाद्यतीतो नित्य प्रत्यवायासम्बद्धो विदित आत्मा त वय ब्रह्मविद ब्रूम । यश्च नित्यमेवाशनायाद्यतीतमात्मानं पश्यति । यस्माच्च जिहासितव्यमन्यमुपादेयं वा यो न पश्यति तस्य कर्म न शक्यत एव सम्बन्धुम् । यस्त्वब्रह्मवित्तस्य भवत्येव प्रत्यवायपरिहारार्थं कर्मेति न विरोध । अतः कामाभावादकामयमानो न जायते मुच्यत एव । तस्यैवमकामयमानस्य कर्माभावे गमनकारणाभावात् प्राणा वागादयो नोत्क्रामन्ति नोर्द्धं क्रामन्ति देहात् । स च विद्वानाप्तकाम आत्मकामतया इहैव ब्रह्मभूत । सर्वात्मनो हि ब्रह्मणो दृष्टान्तत्वेन प्रदर्शितमेवद्रूपम् । "तद्वा अस्यैतदाप्तकाममात्मकाममकाम रूपमिति" । तस्य हि दार्ष्टान्तिकभूतोऽयमर्थ उपसंह्रियते । अथाकामयमान इत्यादिना । स कथमेवम्भूतो मुच्यते ? इत्युच्यते । यो हि सुषुप्तावस्थमिव निर्विशेषमद्वैतमलुप्तचिद्रूपज्योति स्वभावमात्मानं पश्यति तस्यैवाकामयमानस्य कर्माभावे गमनकारणाभावात् प्राणवागादयो नोत्क्रामन्ति । किन्तु विद्वान् स इहैव ब्रह्म भवति यद्यपि देहवानिव लक्ष्यते । स ब्रह्मैव सन् ब्रह्माप्येति । यस्माद्धि तस्याब्रह्मत्वपरिच्छेदहेतव कामा सन्ति । तस्मादिहैव ब्रह्मैव सन् ब्रह्माप्येति न शरीरपातोत्तरकालम् । न हि विदुषो मृतस्य भावान्तरापत्तिर्जीवतोऽन्यो भाव देहान्तरप्रतिसन्धानाभावमात्रेणैव तु ब्रह्माप्येतीत्युच्यते । भावान्तरापत्तौ हि मोक्षस्य सर्वोपनिषद्विवक्षितोऽयं आत्मैकताख्य स बाधितो

[illegible]

मेददी० तास याज्या सूक्तविशेषात्मका गोत्रभेदेन भिन्नरूपा "एकादश प्रयाजा' तेषां प्रैषा प्रथम प्रैषसूक्तसंज्ञ द्वितीये । अध्वर्युप्रेषितोमैत्रावरुण प्रेष्यति प्रैषैर्होतारम् । होता यजत्याप्रीभि प्रैषलिङ्गाभि" इत्युपक्रम्य "समिद्धो अग्निरिति" शुनकाना "जुषस्व न समिधमिति वशिष्ठाना, "समिद्धो अद्येति"सर्व्वेषाम् यथाऋषि वा"इति आश्व०श्रौ० गोत्रभेदेन सूक्तभेदस्योक्ते । अत्र नारायणवृत्ति । "यो यस्य ऋषिस्तदानुगुणय यथर्षिशब्देनोच्यते तथा वाऽऽप्रीसूक्त ग्रहीतव्यम् । स्वय वा ऋषिनामधेयस्यानुगुणा आप्रय कर्त्तव्या इत्यर्थ । तत्र भगवता शौनकेन यथाऋषिपक्षे आप्रीविवेकार्थमेव श्लोक उक्त ।"कण्वाङ्गिरोऽगस्त्यशुनका विश्वामित्रोऽत्रिरेव च । वशिष्ठ कश्यपो वाध्र्यश्वो जमदग्निरथोत्तम" । तत्र दशाना सूक्ताना प्रथम कण्वानाम् "समिद्धो न आवह" इति । द्वितीय तद्वर्जितानामङ्गिरसाम्, "समिद्धो अग्न आवह" इति । तृतीयमगस्त्यानाम्, "समिद्धो अद्य राजसि" इति। चतुर्थ शुनकानाम्, 'समिद्धो अग्निर्निहित" इति । पञ्चम विश्वामित्राणाम्, "समित्समित्सुमना" इति । षष्ठमत्रीणाम्, "ये समिद्धाय शोचिषे" इति । सप्तम वशिष्ठानाम्, "जुषस्व न समिध" इति । अष्टम कश्यपानाम् "समिद्धो विश्वतस्पति "इति । नवम वाध्र्यश्वानाम्, "इमा मे अग्ने समिध जुषस्वेड" इति । शुनकवाध्र्यश्वानाम् भृगूणा दशम, "समिद्धो अद्य मनुषो दुरोणे इति यथर्षिपक्षे विवेकोऽयम्" ।

आप्रीत त्रि० आ+प्री—क्त । १सम्यक्प्रीते २ईषत्प्रीते च । भावे क्त । सम्यक्प्रीतौ न० ।

आप्रीतप पु० आप्रीत पाति पा—क । विष्णौ "अथ यद्याप्याय्यमान किञ्चिदापद्येत विष्णवआप्रीतपाय स्वाहेति जुहुयात् विष्णुर्हि वै तस्याप्रीतपा नयत्यपपाप्मान हुत उपैव यज्ञोनमति" शत० ब्रा० । क्विप् । आप्रीतपा अप्यत्र ।

आप्लव पु० आ+प्लु—घञभावपक्षे अप् । १स्नाने, जलाना सर्व्वत बहुच्छलने । ल्युट् आप्लवनम् तत्रैव न० ।

आप्लवव्रतिन् पु० आप्लवः समावर्त्तनस्नानमेव व्रतमस्यास्ति इनि । स्नातके गृहस्थभेदे यस्तु वेदानधीत्य दारपरिग्रहार्थं कृतसमावर्त्तनस्नान दारलाभात् प्राक् आर्त्तव्रतविशेषमाचरति तादृशे द्विजे 'अलाभे चैव कन्याया स्नातकव्रतमाचरेत्" स्मृत्युक्त व्रत च दर्शित विधानपा० यथा 'स्नात्वैव विधिना काले मासमात्रमपि द्विज । अनाश्रमी न तिष्ठेत्तु सुखस्थस्तु प्रयत्नवान् । नित्योरोगादितोभीत आपन्नोऽन्यैश्च कारणै । स्नातक प्रयतो यज्ञि न त्यजेदिति वै श्रुति । नित्यदा ब्रह्मचारी स्यात् पञ्चयज्ञपरायण । जपतीर्थरतोवा स्यात् स्नातकोलौल्यवर्ज्जित । श्राद्धे निमन्त्रितो गच्छेत् कुर्य्यात् षट्कर्म च द्विज । येन केनाप्युपायेन व्रतचर्य्या न लोपयेत् । शकलान् जुहुयात् प्रात" इति अत्र प्रातरितिविशेषणात् न सायम् । तेन प्रात सन्ध्यामुपास्याग्निकार्य्यं कृत्वा, शकलहोम कार्य्यं तन्मन्त्राश्च तैत्तिरीयारण्ये पठिता॰ "देवकृतस्यैनसोऽवयजनमसि स्वाहेत्यादिका । तदीय होमद्रव्यविशेषोबौधायनेनोक्त "सएष उपनयनप्रभृति व्याहृतिभि षड्भिरेव समिद्भि आ समावर्त्तनात् । समावर्त्तनप्रभृति आज्येनैव आ पाणिग्रहणात् । पाणिग्रहणप्रभृति व्रीहिभिर्यवैर्वा व्यस्तेनैकेन पञ्चाहुती र्जुहुयात्" "वैश्वदेव गृहस्थस्य प्रत्यहारम्भण भवेत् । स्नातकेनापि तत्कार्य्यं पृथक्पाको गृहे यदि" शौनक । "यज्ञोपवीतद्वितय सोदक च कमण्डलुम् । छत्रञ्चोष्णीषमाले च पादुके चाप्युपानहौ । रौक्मे च कुण्डले वेणु कृत्तकेशनखः शुचि । स्वाध्याये नित्ययुक्तः स्यात् बहिर्माल्यञ्च धारयेत् । शुक्लाम्बरधरोनित्य सुगन्ध प्रियदर्शन । न जीर्णमलवद्वासा भवेच्च विभवे सति । न रक्तमुल्वणं चान्यधृत वासो न कन्यिकाम्" कूर्म्मपु० । "उपानहौ च वासश्च धृतमन्यैर्न धारयेत् । उपवीतमलङ्कार स्रज कनकमेव च" मनु । "स्नात समुद्वहेत् कन्यां प्रव्रजेत्तद्-निष्कृत । वनस्थो वा भवेद्विप्र सुखस्थो विधिना शुचि । अनाश्रमी न तिष्ठेत दिनमेकमपि द्विज । आश्रमेण विना तिष्ठन् प्रायश्चीयते हि स "इति विधा पा० धृता स्मृति । तस्य कन्यालाभार्थ काम्यजप उक्त ऋग्विधाने "सुपुर्ण प्रजपेत् सूक्तमेत सम्यक् शिवालये । अयुत त्व जपेत् कन्या षण्मासात् लभते नर' इति ।

अत्रानाश्रमदोषविषये किञ्चिदुच्यते स्नातको हि गृहस्थभेदोद्विजातिमात्र' समावर्त्तनस्नानस्य तेषामेव सम्भवात् । अतस्तद्विषयकमेवानाश्रमादिदोषोत्कीर्त्तनम् । तथा हि विधानपारिजातधृतयो स्मृत्यो "स्नात्वैव विधिवत् काले" इत्यादौ स्नात, समुद्वहेत् कन्यामित्यादौ चोपक्रमे द्विजातिविषयकत्वावगमेन उपसंहारे अनाश्रमदोषकीर्त्तनं तद्विषयकमेव उपक्रमोपसंहारयोरेकविषयकत्वौचित्यात् । एतेन"स्रोकरोति यदा वेद चरेद्वेद-

[illegible] । [illegible] न [illegible] । न [illegible] । न हि [illegible] [illegible] । [illegible] । "[illegible]" [illegible] । [illegible] । [illegible] इति [illegible] । [illegible] ।

[illegible] त्रि [illegible] । [illegible] । "[illegible]" [illegible] । "[illegible]" "[illegible]" [illegible] ।

[illegible] स्त्री [illegible] । [illegible] ।

[illegible] स्त्री [illegible] । [illegible] "[illegible]" [illegible] । [illegible] त्रि [illegible] ।

[illegible] स्त्री [illegible] । [illegible] ।

[illegible] स्त्री [illegible] । [illegible] "[illegible]" [illegible] । [illegible] "[illegible]" [illegible] । [illegible] "[illegible]" [illegible] "[illegible]" [illegible] । [illegible] ।

[illegible] त्रि [illegible] । [illegible] "[illegible]" [illegible] । [illegible] त्रि [illegible] ।

[illegible] पु० [illegible] । [illegible] ।

[illegible] त्रि [illegible] । [illegible] "[illegible]" [illegible] ।

[illegible] । "[illegible]" [illegible] । [illegible] । [illegible] । [illegible] "[illegible]" [illegible] । [illegible] ।

[illegible] न [illegible] । [illegible] । [illegible] ।

[illegible] पु० [illegible] । [illegible] । [illegible] "[illegible]" [illegible] । [illegible] "[illegible]" [illegible] । [illegible] । [illegible] "[illegible]" [illegible] । "[illegible]" [illegible] ।

[illegible] त्रि [illegible] । [illegible] "[illegible]" [illegible] ।

[illegible] त्रि [illegible] । [illegible] "[illegible]" [illegible] ।

[illegible] न० [illegible] । [illegible] ।

[illegible] त्रि [illegible] । [illegible] ।

[illegible] [illegible] । [illegible] ।

[illegible] त्रि [illegible] । [illegible] ।

[illegible] त्रि [illegible] । [illegible] ।

[illegible] स्त्री [illegible] । [illegible] १६,१८ । [illegible]"

नेददी० ताय याज्याः सूक्तविशेषात्मका गोत्रभेदेन भिन्नरूपा "एकादश प्रयाजा" तेषां मध्ये प्रथमः प्रैषसूक्त उक्तं द्वितीये। अध्वर्युप्रेषितो मैत्रावरुण प्रेष्यति प्रैषैर्होतारम्। होता यजत्याप्रीभिः प्रैषलिङ्गाभिः" इत्युपक्रम्य "समिद्धो अग्निरिति" शुनकानां "जुषस्व नः समिधमिति वशिष्ठानां, "समिद्धो अद्येति"सर्व्वेषाम् यथाऋषि वा"इति आश्व०श्रौ० गोत्रभेदेन सूक्तभेदश्चोक्तः। अत्र नारायणवृत्तिः। "यो यस्य ऋषिस्तदानुगुणय' यथर्षिशब्देनोच्यते तया वाऽऽप्रीसूक्तं ग्रहीतव्यम्। स्वयं वा ऋषिनामधेयस्यानुगुण्या आप्रः कर्त्तव्या इत्यर्थः। तत्र भगवता शौनकेन यथाऋषिपक्षे आप्रीविशेषार्थमेव श्लोक उक्तः।"कस्याद्गिरोऽगस्त्यशुनका विश्वामित्रोऽत्रिरेव च। वशिष्ठ कश्यपो वाध्रय्श्वो जमदग्निरथोत्तम"। तत्र दशानां सूक्तानां प्रथमं कण्वानाम् "समिद्धो न आवह" इति। द्वितीयं तद्वर्जितामाङ्गिरसाम्, "समिद्धो अग्न आवह"इति। तृतीयमगस्त्यानाम्, "समिद्धो अद्य राजसि" इति। चतुर्थं शुनकानाम्, "समिद्धो अग्निर्निहितः" इति। पञ्चमं विश्वामित्राणाम्, "समित्समित्सुमनाः" इति। षष्ठमत्रीणाम्, "ये समिद्धाय शोचिषे" इति। सप्तमं वशिष्ठानाम्, "जुषस्व नः समिधं" इति। अष्टमं कश्यपानाम् "समिद्धो विश्वतस्पति"इति। नवमं वाध्रय्श्वानाम्, "इमा मे अग्ने समिधं जुषस्वेड" इति। शुनकवाध्रय्श्वानाम् भृगूणां दशमं, "समिद्धो अद्य मनुषो दुरोणे" इति यथर्षिपक्षे विवेकोऽयम्"।

आप्रीत त्रि० आ+प्री—क्त। १सम्यक्प्रीते २ईषत्प्रीते च। भावे क्त। सम्यक्प्रीतौ न०।

आप्रीतप पु० आप्रीत पाति पा—क। विष्णौ "अथ यद्याप्यायमानः किञ्चिदाप्रद्येत विष्णवआप्रीतपाय स्वाहेति जुहुयात् विष्णुर्हि ४ तद्वाप्रीतपा सर्वस्यपापमान एव तपेन यज्ञोनर्मति"शत०ब्रा०। क्विप्। आप्रीतपा अप्यत्र।

आप्लव पु० आ+प्लु—घञभावपक्षे अप्। १स्नाने, जलाना सर्वतः बहुप्लवने। ल्युट्। आप्लवनम् तत्रैव न०।

आप्लवव्रतिन् पु० आप्लवः समावर्त्तनस्नानमेव व्रतमस्यास्ति इनि। स्नातके गृहस्थभेदे यस्तु वेदानधीत्य दारपरिग्रहार्थं कृतसमावर्त्तनस्नान दारलाभात् प्राक् यावत् व्रतविशेषमाचरति तादृशे द्विजे "अलाभे चैव कन्याया स्नातकव्रतमाचरेत्" इत्युक्तं व्रत च दर्शितं विधानपा० यथा 'स्नात्वैव विधिना काले मासमात्रमपि द्विज। अनाश्रमी न तिष्ठेत्तु गृहस्थस्तु प्रयत्नवान्। निःस्वोरोगादितोभीत आपद्योऽन्येष कारणे। स्नातक प्रयतो यज्ञिः न त्यजेदिति वै श्रुति। नित्यदा ब्रह्मचारी स्यात् पञ्चयज्ञपरायणः। जपतीर्थरतोषा स्यात् स्नातकोऽल्प वर्ज्जितः। आज्ये निमन्त्रितो गच्छेत् कुर्यात् षट्कर्म च द्विज। येन केनाप्युपायेन व्रतचर्य्या न लोपयेत्। शकलान् जुहुयात् प्रातः" इति अत्र प्रातरितिविशेषणात् न सायम्। तेन प्रातः सन्ध्यामुपास्याग्निकार्य्यं कृत्वा शकलहोम कार्य्यः तन्मन्त्राश्च तैत्तिरीयारण्ये पठिताः "देवकृतस्यैनसोऽवयजनमसि स्वाहेत्यादिकाः। तदीय होमद्रव्यविशेषोबौधायनेनोक्तः "सएष उपनयनप्रभृति व्याहृतिभि पाड्भिरेव समिद्भि आ समावर्त्तनात्। समावर्त्तनप्रभृति आज्येनैव आ पाणिग्रहणात्। पाणिग्रहणप्रभृति व्रीहिभिर्यवैर्वा व्यस्तेनैकेन पञ्चाहुतो जुहुयात्" "गृह्यदेव गृहस्थस्य प्रत्याहारम्भाय भवेत्। स्नातकेनापि तत्कार्य्यं पृथक्पाको गृहे यदि" शौनकः। "यज्ञोपवीतद्वितयं सोदकं च कमण्डलुम्। अत्रञ्चोष्णीषमात्रे च पादुके चाप्युपानहौ। रौक्मे च कुण्डले वेणुं कृत्तकेशनखः शुचिः। स्वाध्याये नित्ययुक्तः स्यात् बहिर्माल्यञ्च धारयेत्। शुक्लाम्बरधरोनित्यं सुगन्धः प्रियदर्शन। न जीर्णमलवद्वासा भवेच्च विभवे सति। न रक्तमुल्वणं चान्यघृत वासो न कन्यिकाम्" कूर्म्मपु०। "उपानहौ च वासश्च घृतमन्यैर्न धारयेत्। उपवीतमलङ्कार स्रज करकमेव च" मनुः। "स्नातः संवत्सरेत् कन्या प्रव्रजेत्तदनिच्छया। वनस्थो वा भवेद्विप्र गृहस्थो विधिना शुचि। अनाश्रमी न तिष्ठेत दिनमेकमपि द्विज। आश्रमेण विना तिष्ठन् प्रायश्चीयते हि स"इति विधा पा० धृता स्मृतिः। तस्य कन्यालाभाय काम्यजप उक्तः ऋग्विधाने "सुपर्णं प्रजपेत् सूक्तमयं सम्यक् शिवालये। अयुत तु जपेत् कन्या प्रत्यक्षात् लभते नर" इति।

अत्रानाश्रमदोषविषये किञ्चिदुच्यते स्नातको हि गृहस्थभेदोद्विजातिमात्रं समावर्त्तनस्नानस्य तेषामेव सम्भवात्। अतस्तद्विषयकमेवानाश्रमादिदोषोत्कीर्त्तनम्। तथा हि विधानपारिजातधृतयो स्मृत्योः "स्नात्वैव विधिना काले" इत्यादौ स्नात, संवत्सरेत् कन्यामित्यादौ चोपक्रमे द्विजातिविषयकत्वावगमेन उपसंहारे अनाश्रमदोषकीर्त्तनं तद्विषयकमेव उपक्रमोपसंहारयोरेकविषयकत्वौचित्यात्। एतेन 'स्नोकरोति यदा वेद चरेद्वेद-

अथाश्वायुर्वेदः तत्रैव "अश्ववाहनसारञ्च वच्म्यहं ऽश्वस्य चिकित्सितम्" इत्युपक्रम्य "हयो निम्बबृहत्यौ च गुडूची च समाक्षिका । सिंहानककरी पिण्डी स्वेदश्च शिरसस्तथा । हिङ्गुपुष्करमूलञ्च नागरं साम्लवेतसम् । पिप्पलीसैन्धवयुतं शूलघ्नमुष्णवारिणा । नागराऽतिविषा,मुस्ता सानन्ता बिल्वमालिका । क्वाथमेषां पिबेद्वाजी सर्व्वातीसारनाशनम् । प्रियङ्गुलोध्रमधुभिः पिबेद्दधिपयस्तु हय । क्षीरं वा पञ्चकोलाद्यं कासनाशि प्रशस्यते । विष्कन्नेषु च सर्व्वेषु श्रेयश्चादौ विशोषणम् । अभ्यङ्गावर्त्तनिस्नेहनस्यवर्त्तिक्रमस्ततः । त्वरितानां तुरङ्गाणां पयसैव क्रियाक्रमः । लोध्रकरञ्जयोर्मूलं मातुलुङ्गाग्निनागरा । कुष्ठं हिङ्गु वचा रास्ना लेपोऽयं शोथनाशनः । मञ्जिष्ठा मधुकं द्राक्षा बृहत्यौ रक्तचन्दनम् । त्रपुषीबीजमूलानि शृङ्गाटककशेरुकम् । अजापयःशृतमिदं सशीतं शर्करान्वितम् । पीत्वा निरं शनैर्वाजी रक्तमेहात् प्रमुच्यते । मन्याहनुनिगालस्थशिरःशोफो गलग्रहः । अभ्यङ्गः कटुतैलेन तत्र तेष्वेव शस्यते । प्रत्यक्पुष्पी तथा वह्निः सैन्धवं सौरसो रसः । कृष्णाहिङ्गुयुतैरेभिः कृत्वा नस्यं न सीदति । शिग्रुर्ज्योतिष्मती पाठा कृष्णाकुष्ठं वचा मधु । जिह्वास्तम्भे च लेपोऽयं गुडमूत्रयुतो हितः । तिलैर्यष्ट्या रजन्या च निम्बपत्रैश्च योजिता । क्षौद्रेण शोधनी पिण्डी सर्पिषा व्रणरोपणी । अभिघातेन खञ्जन्ति येऽप्यश्वास्तीव्रवेदनाः । परिषेकक्रिया तेषां तैलेनाशु रुजापहा । दोषकायाभिघाताभ्यां तनुजे लिङ्गिते तथा । शान्तिमेतु स्नावुवस्ताभ्यां पक्वमन्नमथ क्रमात् । अश्वत्थोडुम्बरप्लक्षमधूकवटवल्कलैः । प्रभूतसलिलक्वाथः सुखोष्णो व्रणशोधनः । शताह्वा नागरं रास्नामञ्जिष्ठाकृष्णसैन्धवैः देवदारुवचायुग्मरजनीरक्तचन्दनैः । तैलं सिद्धं कषायेण गुडूच्याः पयसा सह । अनेन वस्तिनस्ये च योज्ये सर्व्वत्र लिङ्गिते । रक्तस्रावो जलौकाभिर्नेत्रान्ते पित्तरोगिणः । खादिरोडुम्बराश्वत्थकषायेण च साधितम् । शालीदुरालभातिक्ताप्रियङ्गुकुसुमैः समम् । गुडूच्या च कृतं क्वाथं कल्कोयुक्तो विलम्बिते । ऋतुपाते शिशिरे श्लाघ्ये सुपक्वशोषे तथैव च । क्षिप्रकारिणि दोषे च सद्योवेधनमिष्यते । गोशकृत्तुवर्च्चिकाकुष्ठरजनीतिलसर्षपैः । गवां मूत्रेण पिष्टैश्च मर्द्दनं कण्डुनाशनम् । शीतोमधुयुतः क्वाथो नासिकायां सशर्करः । रक्तपित्तहरः पानादश्वकर्णोस्तथैव च । सप्तमे सप्तमे देयमश्वानां लवणं दिने । तथा भुक्तावतां देया अतिपाते तु वारुणी । जीवनीयैः समधुरैर्मृद्वीकाशर्करायुतैः । सपिप्पलीकैः शरदि प्रतिपानं सपद्मकैः । विडङ्गपिप्पलीधान्यशताह्वालोध्रसैन्धवैः । सचित्रकैस्तुरङ्गाणां प्रतिपानं हिमागमे । लोध्रप्रियङ्गुकायुक्ता पिप्पली विश्वभेषजैः । सक्षौद्रं प्रतिपानं स्याद्वसन्ते कफनाशनम् । प्रियङ्गुपिप्पलीलोध्रयष्ट्याह्वैः समहौषधैः । निदाघे सगुडा देया मदिरा प्रतिपानके । लोध्रक्वाथं सलवणं पिप्पल्यो विश्वभेषजम् । भवेत्तैलयुतैरेभिः प्रतिपानं घनागमे । निदाघेऽर्द्धकृताहारा शरत्सु पुष्टशोषिता । प्राहृभिन्नपुरीषाश्च पिबेयुर्वाजिनो घृतम् । पिबेयुर्वाजिनस्तैलं कफवाय्वधिकास्तु ये । स्नेहव्यापद्भवो येषां तेषां कार्यं विरूक्षणम् । त्र्यहं यवागूरुक्षा स्याद्भोजनं तक्रसंयुतम् । शरन्निदाघयोः सर्पिस्तैलं शीतवसन्तयोः । वर्षासु शिशिरे चैव वस्तौ यमकमिष्यते । गुर्व्वभिष्यन्दिभक्तानि व्यायामं स्नानमातपम् । वायुवेगञ्च वाहस्य स्नेहनीयस्य वर्ज्जयेत् । स्नानपानं सदातृड्वृष्टमश्वानां सलिलागमे । अत्यर्थं दुर्द्दिने काले पानमेकं प्रशस्यते । युक्तं शीतातपे काले हि पानं श्रवणं सकृत् । ग्रीष्मे त्रिः स्नानपानं स्याच्चिरं तस्यावगाहनम् । निस्तुषाणाम्प्रदातव्या यवानाञ्चतुराढकी । चणकव्रीहिमौद्गाणां, कलायान् वापि दापयेत् । अहोरात्रेण वाहस्य यवसस्य तुला दश । अष्टौ शुष्कस्य दातव्या चतस्रोऽथ बुषस्य वा । दूर्व्वा पित्तं, यव कासं, बुषश्च श्लेष्मसंक्षयम् । नाशयत्यर्ज्जुनः श्वासं, तथा शालिर्बलक्षयम् । वातिका पैत्तिकाश्चैव श्लेष्मजा सान्निपातिका । न रोगाः पीड़यिष्यन्ति दूर्व्वाहार तुरङ्गमम् । द्वौ रज्जुबन्धौ दुष्टानां पश्चयोरुभयोरपि । पश्चाद्बन्धश्च कर्त्तव्यो दूरकीलव्यपाश्रयः । वसेयुस्तास्कृते स्थाने कृतधूपनभूमयः । दनोपन्यस्तयवसाः सप्रदीपा सुरक्षिताः । कृकवाकुकपयोधार्य्याश्चाश्ववेश्मसु ते खगाः" इत्यश्वायुर्वेदः अधिकं जयदत्तकृतेऽश्वशास्त्रे द्रष्टव्यम् ।

अथ गजायुर्वेदः अग्निपु० "गवाश्वाद्यायुर्वेदाङ्गं हि चिकित्साञ्च तथा शृणु" इत्युपक्रम्य । "शृङ्गामयेषु धेनूनां तैलं दद्यात् ससैन्धवम् । शृङ्गवेरबलामांसीकल्कसिद्धं समाक्षिकम् । कर्णमूलेषु शूलेषु मञ्जिष्ठाहिङ्गुसैन्धवैः । सिद्धं तैलं प्रदातव्यं रसोनेनाथ वा पुनः । बिल्वमूलमपामार्गो धातकी च सपाटला । कुटजं दन्तमूलेषु लेपोच्छूलनाशनः । दन्तशूलहरैर्द्रव्यैर्घृतं

[illegible] । [illegible] । [illegible] ।

[illegible] । इति भावप्रकाशः

[illegible] ।

आयुर्वेदमय त्रि [illegible] ।

आयुर्वेदिन् त्रि [illegible] ।

आयुर्वेदादिवे [illegible] ।

आयुष्वत् त्रि आयुषा [illegible] । [illegible] ऋ० ८ । ११ । १ । [illegible] ऋ० ८ । ६१ । ११ ।

आयुष्कृत् पु० [illegible] । आयुषः [illegible] ।

आयुष्काम त्रि आयुः कामयते [illegible] ।

आयुष्कर त्रि आयुः करोति [illegible] ।

आयुष्टोम पु० आयुः [illegible] ।

आयुष्मत् त्रि आयुरस्त्यस्य मतुप् [illegible] ।

आयुष्य त्रि आयुषे हितम् [illegible] ।

आयुष्यसूक्त न० [illegible] ।

देवमहृष्टतम् अत्राप्युक्तं यत्र पठ्यन्ते सस्वार्थेनामोम्नि स्वम् । सामवेदिनाञ्चैतत् पाठ्यं वेदभेदेऽन्यदाकरे ज्ञेयम् ।

आयुस् न० इण–उसि णिच्च । जीवितकाले "आयुरारोग्य मतुलं देहि देवि । नमोऽस्तु ते" देवीस्तुतिः । "आयुर्देहातिगैः पीतं रुधिरं च पतत्रिभिः" रघु । "चतुर्थमायुषो भाग-मुषित्वाद्यं गुरौ द्विजः । द्वितीयमायुषो भागं कृतदारो गृहे वसेत्" मनु "समारुरुक्षुर्दिवमायुषः क्षये" रघु । "आयूंषि त्वचु निर्भिद्य प्राणस्थानिरमोचयत्" भट्टि । "अष्टमं चायुषः स्थानमष्टमादष्टमञ्च यत्" इति पराशरोक्ते जन्मलग्नादष्टमस्थाने तृतीयस्थाने च तद्विवेच्यम् । स्थानविशेषे च ग्रहविशेषयोगदृष्ट्यादिवशात् आयुर्विशेषः अष्टमस्थाने चिन्तनीयपदार्थं सहितं "सर्वा॰ चिन्ता॰ दर्शितः ।" यथा "मरणाज्जीवितमरणं गुप्तस्थानञ्च मरणहेतुश्च । अन्त्यसुखमरणदेशं परिभवमपि चिन्तयेत् प्राज्ञः । रन्ध्रेश्वरे पापयुतेऽन्यराश्यावल्पायुरस्येति वदन्ति पञ्च । तत्रापि लग्नेश्वरयोगजाते त्वल्पायुरस्येति वदन्ति सन्तः । खखेटवर्गस्थे सति रन्ध्रनाथे दीर्घायुराहुर्मुनयो महान्तः । मन्देन वा चिन्त्यमशेषमायुः खखेटमित्रोच्चगृहस्थितेन । रन्ध्रेश्वरे पापयुते विलग्ननाथे रिपौ वा व्ययराशियुक्ते । यशान्त्यमे वा यदि लग्नयुक्ते दीर्घायुरस्येति शुभैश्चिन्तयेत् । कर्मेश्वरेणापि विचिन्त्यमायुर्दीर्घं सुखस्थोच्चयुतेन तेन । केन्द्रस्थितैः कर्मविलग्नरन्ध्रनाथैस्तथैवायुरुदाहरन्ति । मोक्षपदैर्व्योमचरैस्त्रिभिर्वा सभातुजैः केन्द्रगतैस्तथैव । खखेटकोणादिगतैर्विशेषाद्वदन्ति दीर्घायुरुदारचित्ताः । चतुरस्रे शुभैर्युक्ते लग्नेशे शुभसंयुते । गुरुणा दृष्टिसंयोगे पूर्णमायुर्विनिर्दिशेत् । केन्द्रान्विते विलग्नेशे गुरुशुक्रसमन्विते । ताभ्यां निरीक्षिते वापि दीर्घमायुर्विनिर्दिशेत् । त्रिषडायगता पापाः शुभाः केन्द्रत्रिकोणगाः । लग्नेशे बलसंयुक्ते पूर्णमायुर्विनिर्दिशेत् । षट्सप्तरन्ध्रभावेषु शुभेयसहितेषु च । त्रिषडायेषु पापेषु पूर्णमायुर्विनिर्दिशेत् । रन्ध्राधिपे विलग्नस्थे गुरुशुक्रेक्षिते युते । लग्नेशे केन्द्रराशौ वा दीर्घमायुर्विनिर्दिशेत् । रन्ध्राधिपे तु केन्द्रस्थे गुरुशुक्रेक्षिते युते । लग्नेशे बलसंयुक्ते दीर्घमायुर्विनिर्दिशेत् । लग्नाधिपो यदा केन्द्रे लग्नादेकादशालये । सर्वग्रहकृतं रिष्टमेकोऽपि विलयं नयेत् । उच्चान्वितैस्त्रिभिः खेटैर्लग्नरन्ध्रेशसंयुतैः । रन्ध्रे पापविहीनैस्तु दीर्घमायुर्विनिर्दिशेत् । रन्ध्रस्थैस्त्रिभिः खेटैः स्वोच्चमित्रस्वगेहगैः । लग्नेशे बलसंयुक्ते दीर्घमा॰ । मारावतादिभागस्था पापाः सर्वे शुभाश्रयाः । केन्द्रत्रिकोणनिलयाः पूर्णमायुर्विनिर्दिशेत् । षष्ठाष्टमव्यये पापा लग्नेशे दुर्बले यदि । अल्पायुरनपत्यो वा शुभदृग्योगवर्जिते । क्रूरषष्ठांशके वापि रन्ध्रेशे भानुजेऽपि वा । पापान्विते पापदृष्टे स्वल्पमायुर्विनिर्दिशेत् । चतुष्टयगते पापे शुभदृष्टिविवर्जिते । बलहीने विलग्नेशे स्वल्पमायुर्विनिर्दिशेत् । व्ययार्थौ पापसंयुक्तौ शुभदृष्टिविवर्जितौ । क्रूरषष्ठांशगौ वापि स्वल्पमायुर्विनिर्दिशेत् । आयुर्योगस्त्रिधा प्रोक्तः स्वल्पमध्यचिरायुषः । द्वात्रिंशत्पूर्वमल्पायुर्मध्यमायुस्ततो भवेत् । सप्तत्याः प्राक्, ततः पूर्णमायुरत्र वदन्ति हि । अल्पायुर्दिननाथस्य शत्रौ लग्नाधिपे यदा । समत्वे मध्यमायुः स्यान्मित्रे दीर्घायुरादिशेत् । बलहीने विलग्नेशे क्षीणे केन्द्रत्रिकोणगे । षष्ठाष्टमव्यये पापे मध्यमायुरुदाहृतम् । शुभे केन्द्रत्रिकोणस्थे शनौ बलसमन्विते । षष्ठे वाप्यष्टमे पापे मध्यमायुरुदाहृतम् । लग्ने त्रिकोणे केन्द्रे वा मध्यमायुश्च मिश्रिते । अल्पायुर्योगजातानां विपत्तारके मृतिप्रदः । मध्यमे प्रत्यरिभेयान्मृतिं दद्याद्विशेषतः । अष्टमे वदया कष्टा पूर्णायुर्योगसंभवे । योगायुरिति निश्चित्य जातस्यैव वदेद्बुधः । आयुर्विलग्नाधिपतौ बलेन हीनौ परास्तव्यहितेशयुक्तौ । युद्धे मृतिं तस्य वदन्ति तज्ज्ञाः शस्त्रेण वा तन्मरणं विशेषात् । रन्ध्राङ्गनाथौ यदि वा रिपुस्थौ राह्वन्वितौ केतुयुतौ समन्दौ । व्रणेन युद्धे हतिमाहुरार्याः शस्त्रेण वा तन्मरणं विशेषात् । रन्ध्राङ्गनाथौ यदि वा रिपुस्थौ राह्वन्वितौ केतुयुतौ समन्दौ । तद्भुक्तिकालेऽप्यथ वा विपाके शस्त्रेण चौरैर्मरणं प्रयाति । रन्ध्राङ्गपौ वाहननाथयुक्तौ तथानु मृतिं तस्य वदन्ति तज्ज्ञाः । मृतिं त्वजीर्णाद्गुरुसंयुतौ तौ देहेशजीवौ रिपुगावजीर्णात् । लग्नेश्वरे वाहननाथयुक्ते यागेश्वरेणापि युते त्वजीर्णात् । देहेश्वरे वाहनवित्तभावनाथान्विते वा मरणं त्वजीर्णात् । रन्ध्रेशयोगान्मरणं दशायामन्तर्दशायामथ वा वदन्ति । पित्रादिभावाधिपयोगदृष्ट्या पित्रादिकानां मरणं तथैव । मृत्यङ्गपौ भानुसुतेन युक्तौ दुःस्थानगौ वा विषमक्षयेन । राहुध्वजाभ्यां सहितौ च दुःस्थावद्भुस्थानात्तस्य मृतिं वदन्ति । षष्ठेश्वरे भानुसुते सराहुकेतौ खगान्नीतिमुदाहरन्ति । जीवेन युक्ते गजभीतिमस्य जातस्य चन्द्रेण युतेऽश्वभीतिम् । सूर्यान्विते वारणभानुपुत्रे मृगाच्च शस्त्रात् शुनकात् सभौमे । षष्ठस्थिते भानुसुतेऽपि चैवं विना स्वतुङ्गस्वगृहं सखेटे । सुखेशभाग्येशविलग्ननाथास्त्रिकोणगाः केन्द्रगताश्च सर्वे । भुक्तौ यदा तत्परिपाककाले

[illegible]

[illegible]

[illegible]

भवतीह चाष्टौ। बृहस्पतिर्भौमगृहेऽष्टमस्थः सूर्येन्दुभौमार्किजदृष्टमूर्त्तिः। अन्यैस्त्रिभिर्भार्गवदृष्टिहीनो लोकान्तरं प्रापयति प्रसूतम्। वक्रो शनिर्भौमगृहे प्रयातश्छिद्रे च षष्ठे च चतुष्टये वा। कुजेन सम्प्राप्तबलेन दृष्टो वर्षद्वयं जीवयति प्रजातम्। सौरिस्मरस्थे यदि वा विलग्ने जन्मस्थलग्ने शशिदृश्चिके वा। सौम्येषु केन्द्रोपगतेषु सद्यो जातस्य मृत्युर्यवनोपदिष्टः। नीचस्थे देवपूज्ये तु भौमक्षेत्रगतेऽथ वा। सन्धिलग्नेऽपि जातस्तु मासान्मृत्युं स गच्छति। नक्षत्रसन्धौ तिथिराशिसन्धावेकत्र तावत्प्रसवस्तिपश्चात्। जातस्य मृत्युं समुपैति सद्यः शुक्रेऽह्नि जीवेदिति नन्दिकोक्तम्। षष्ठ्यां जातस्यार्कलग्ने कुजे वा गण्डान्ते वा मृत्युयोगेऽथ वापि। भौमे हन्ति प्राणिना तत्क्षणेन जीवेक्षिते चेन्न भवेत् प्रजातः। भौमोदये तद्दिवसे क्षयेन्दौ होरेश्वरे वारभूने शशाङ्के। जातः सुखी ब्रह्मपदं प्रयाति प्रसाधनाद्यैरिह मन्त्रसिद्ध्या। वर्गोत्तमे लग्नगते कुलीरे केन्द्रे गुरौ भूमिसुते कलत्रे। सिंहासनांशे भृगुजे विशेषाद्दृशासनाद्यैरमितायुरेति। कर्मान्त्यलग्ने स बुधे कलत्रे जीवे यदा गोपुरभागयुक्ते। मृत्युंशके वा दिननाथपुत्रे जातस्तु सङ्ख्यायुरुपैति सूनुः। देवलोकांशके शुक्रे केन्द्रस्थे धरणीसुते। सिंहासनांशके जीवे केन्द्रे जातस्तु सङ्ख्यकः। उत्तमांशे भृगौ केन्द्रे शनौ पारावतांशके। स्वर्गलोके गुरौ केन्द्रे त्वौषधाधारसङ्ख्यकः। गोपुरांशे गुरौ केन्द्रे शुक्रे पारावतांशके। त्रिकोणे कर्किलग्ने तु युगान्तं स तु जीवति। चापांशे कर्किलग्ने च तस्मिन् देवेन्द्रपूजिते। त्रिचतुर्भिर्ग्रहैः केन्द्रे जातो ब्रह्मपदं लभेत्। तृतीयैकादशे शुक्रे गोपुराख्यांशकान्विते। वृषे वर्गोत्तमे लग्ने ब्रह्मणः परमं पदम्। लग्ने शुक्रे गुरौ कामे कर्मायेऽमरनायके। चापमेषांशके लग्ने जातो याति परं पदम्। पञ्चमे बुधसंयुक्ते गोपुराख्यांशकान्विते। गुरौ घटे विलग्नेऽस्मिन् जातो ब्रह्मपदं लभेत्। केन्द्रे गुरौ लाभगतेऽर्कपुत्रे धने रवौ मन्दयुते कलत्रे। भाग्ये धरासूनुयुतेऽत्र जातो युगान्तकालं समुपैति मर्त्यः। त्रिकोणगौ जीवबुधौ विशेषाल्लग्ने वृषे तत्र सिते धरांशे। निशाकरे गोपुरभागयुक्ते जातः सहस्रद्वयवर्षमेति। पक्षे सिते जन्म यदाह्नि काले केन्द्रे गुरौ वा शशिभे विलग्ने। दारे कुजे भानुसुते सुखस्थे जातस्तु जीवेदयुतान्दसङ्ख्यम्। जीवमन्दारशुक्राणामन्योन्यं केन्द्रसम्भवे। त्रिकोणे वा यदा याते जातस्त्वयुतवत्सरे। शुभैर्युक्ते चतुष्केन्द्रे पापैः षट्त्रिभवान्वितैः। सिंहलग्ने यदा जातो जीवेत् षडयुतानि सः। कर्कादिस्थैर्ग्रहैः सर्वैर्गुरुचन्द्रार्कदर्भिर्यदा। शन्यन्तैः परमोच्चस्थैस्तु निःतुल्यो भवेन्नरः। शन्यादिभौमपर्यन्ता लग्नादौ खचराः स्थिताः। वैशेषिकांशसंयुक्ता जातस्त्वमरसन्निभः। आकल्पं जीवति नरो मृगे लग्ने कुजादिकाः। रव्यन्ताः खचराः सर्वे स्वोच्चे जीवेऽह्नि जन्मनि। मेषान्त्यलग्ने सगुरौ भृगौ वा निशाकरे गोधनमध्यभागे। सिंहासनांशे यदि वा धराजे जातस्त्वसङ्ख्यायुरुपैति मर्त्यः। स्थिरे रवौ सोमसुतेन युक्ते चन्द्रे वृषस्थे मिथुने च शुक्रे। गुरौ कुलीरे यदि वा विलग्ने शनौ तुलायां मुनिसाम्यमेति। देवलोकांशके मन्दे भौमे पारावतांशके। सिंहासनांशके गुरौ लग्ने जातो मुनिसमो भवेत्। मेषलग्ने रवौ माने जीवे स्वोच्चसमन्विते। त्रिषडायगते पापे जातो मुनिसमो भवेत्। इति चिन्तामणौ प्रोक्ता आयुःसंख्या मनीषिणाम् यदुक्तं पूर्वकैः सर्वैस्तद्देव मयाऽधुना"। पारिजातांशाद्यास्तु सर्वा॰ चिन्ते दर्शिता। "मूलत्रिकोणकोणोच्चस्वर्क्षकेन्द्रोत्तमांशकाः। सप्तवर्गोद्भवाः स्वांशस्वाधिमित्रांशमित्रकाः। वर्गा इमे दश प्रोक्ताः पूर्वाचार्यैर्महर्षिभिः। वर्गद्वयादिसंयोगैः पारिजातादिसंज्ञकाः। उत्तमं तु त्रिवर्गैक्ये चतुर्वर्गे तु गोपुरम्। वर्गपञ्चकसंयोगे सिंहासनमिहोच्यते। वर्गद्वयं पारिजातं षट्कं पारावतांशकम्। सप्तकं देवलोकाख्यं स्वर्गलोकस्तथाऽष्टकम्। ऐरावतन्तु नवकं फलं तेषां पृथक् पृथक्। जातकपद्धतौ तु रिष्टभङ्गसहितायुर्योगविशेषं गजाद्यायुःप्रमाणसहितमुक्तं यथा

'लग्नसप्तमगौ पापौ चन्द्रः पापयुतो यदा। शुभपक्षैर्न दृष्टः स्यादचिरान्मृत्युकारकः। क्षीणेन्दौ व्ययगे पापैर्लग्नाष्टमनिवासिभिः। केन्द्राणि शुभहीनानि यदि स्युश्च तदा मृतिः। पापयुक्तः शशी लग्नसप्ताष्टद्वादशस्थितः। केन्द्रान्यस्थानगैः सौम्यैर्न दृष्टो मृत्युदायकः। पापे राश्यन्तगे सन्ध्याकाले होरा विधोर्यदा। मृत्युर्वा स्याच्चन्द्रपापैर्युते सर्वचतुष्टये। कर्कान्त्यगे चक्रपूर्वे पश्चार्द्धे पापसंयुते। मृत्युर्यौष्टमकेन्द्रस्थैः पापैः क्षीणे विधौ तनौ। षष्ठद्वादशगैः पापैरथवा व्ययस्थैः स्थितैः। लग्ने वा पापमध्यस्थे सप्तमे वा मृतिं व्रजेत्। चन्द्रे षष्ठेऽष्टमे वापि लग्ने पापनिरीक्षिते। शुभैरवेक्षिते वर्षाष्टकान्मिश्रैस्तदर्द्धतः। शुभैः पञ्चास्तगे पापैर्मन्दैर्भिः प्रविलोकिते। मासान् मृत्यु

गेंशा । समाः स्युर्यात् पूर्ववत् स्यादेभ्योऽप्यायुरयांशजे । इष्टफलशक्तिग्ना दशभक्तास्य यत् फलम् । वर्षमासादिक ज्ञेय भवेद् द्वादशभि' स्फुटम् । जैवे परायु सम्प्राप्तो यस्यायु परमोच्चगे । लग्नमशसमन्वायुर्दद्याद्वीर्ययुत च भैः । सर्वमर्द्धं व्ययोऽंश माद पश्चाद्भभागकौ । व्ययाद्याम विनीयेत पापे त्वर्द्ध शुभग्रहे । एकभावगताना यो बली भागहरस्तु स । षष्ठमस्त गतोऽहन्ति व्यस्ता शुक्रशनैश्चरौ । कुजन्त्यद्धा यत् भस्यैस्त्रि-भागो नाश्यते निज । लग्ने सपापे लग्नस्थनवाश-माद्ध्रायुष । अष्टोत्तर शताश स्यात्तीन सौम्येक्षिते दलम् । उच्चचक्रगतास्त्रिग्न द्विघ्न स्वांशोत्तमादिगा. । दद्युरायुर्मृदास्ते चेद्वृद्धौ नित्य स्वभादिगा । अपि त्रिद्वे त्र कगुणदा केन्द्रादाविति केचन । लग्ने सपापे हानि-र्या नासावग्रसायुषि । हानिद्वयेऽधिकैव स्याद् योऽप्येव वराङ्गगो । स्वार्का परायुर्नरदन्तिनो १२० स्याद्दन्ता ३२ हयाना च जिना २४ खपादे । खरोष्ट्रयोस्तत्समा २५ शुनोऽर्का १२ व्याघ्राद्यजादेर्द्वि-कपा १६ पराय । आयुर्नरत् समानीय स्वस्वपूर्णायुषा हृतम् । न्यपरायुर्हृत स्यत् गजाद्यायुर्भवेदिति । दीपस्तैलादियुक्तोऽपि यथा वाते विनश्यति । अजितेन्द्रियतापथ्यैरेवमायुर्विनश्यति" ।

अत्र हयाना दन्तैर्यथायुर्ज्ञान तथोक्तमश्वशब्दे ५०१ पृष्ठे जयदत्तकृतादश्वशास्त्रात्तद्विशेषोऽव गन्तव्य । दन्ताद्यालि यद्वर्षा इती वृक्षम्

दलमायुष सदाचारादेव, अपथ्याजितेन्द्रियादिभ्यस्तु आ-युःसत्त्वेऽपि नाश उक्तजातकपद्धतिवचनात् अतएव भा० आनु०प०१०४ अध्याये सदाचारादितएव आयुर्वृद्धिरुक्ता "शतायुरुक्त पुरुषः शतवीर्यश्च जायते । कस्मान्त्रियन्ते पुरुषा बाला अपि पितामह । । आयुष्मान् केन भवति अल्पायुर्वाऽपि मानव । केन वा लभते कीर्त्ति केन वा लभते श्रियम् । तपसा ब्रह्मचर्य्येण जपहोमैस्तथौषधै । कर्म्मणा मनसा वाचा तन्मे ब्रूहि पितामह । । भीष्म उवाच । अत्र तेऽह प्रवक्ष्यामि यन्मा त्वमनुपृच्छसि । अल्पायुर्येन भवति दीर्घायुर्वाऽपि मानव । येन वा लभते कीर्त्ति येन वा लभते श्रियम् । यथा वर्त्तयन् पुरुष श्रेयसा सम्प्रयुज्यते । आचाराल्लभते ह्यायुराचाराल्लभते श्रियम् । आचाराल्लभते कीर्त्ति पुरुष प्रेत्य चेह च । दुराचारो हि पुरुषो नेहायुर्विन्दते महत् । यस्मात्त्रसन्ति भूतानि तथा परिभवन्ति च । तस्मात् कुर्या-

दिहाचार' यदीच्छेद्भूतिमात्मन. । अपि पापशरीरस्य आचारो हन्त्यलक्षणम् । आचारलक्षणो धर्म्म सन्तश्चारित्रलक्षणा । साधूनाञ्च यथा वृत्तमेतदाचारलक्षणम् । अप्यदृष्ट श्रवादेव पुरुष धर्म्मचारिणम् । भूतिकर्म्माणि कुर्व्वाण त जना कुर्व्वते प्रियम् । ये नास्तिका निष्क्रियाश्च गुरुशास्त्राभिलङ्घिन । अधर्म्मज्ञा दुराचारास्ते भवन्ति गतायुष । विशीला भिन्नमर्य्यादा नित्य सङ्कीर्णमैथुना । अल्पायुषो भवन्तीह नरा निरयगामिन । सर्व्वलक्षणहीनोऽपि समुदाचारवान्नर । श्रद्दधानोऽनसूयश्च शत वर्षाणि जीवति । अक्रोधन सत्यवादी भूतानामविहिंसक । अनसूयुरजिह्मश्च शत वर्षाणि जीवति । लोष्टमर्द्दी तृणच्छेदी नखखादी च यो नर. । नित्योच्छिष्ट सङ्कुसुको नेहायुर्व्विन्दते महत् । ब्राह्मे मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयेत् । उत्थायाचम्य तिष्ठेत पूर्व्वा सन्ध्या कृताञ्जलि । एवमेवापरा सन्ध्या समुपासीत वाग्यत । नेक्षेतादित्यमुद्यन्त नास्त यान्त कदाचन । नोपसृष्ट न वारिस्थ न मध्य' नभसोगतम् । ऋषयो नित्यसन्ध्यत्वाद्दीर्घमायुरवाप्नुवन् । तस्मात्तिष्ठेत्सदा पूर्व्वा पश्चिमाञ्चैव वाग्यत । ये न पूर्व्वामुपासीरन् द्विजा' सन्ध्यां न पश्चिमाम् । सर्व्वांस्तान् धार्म्मिको राजा शूद्रकर्म्माणि कारयेत् । परदारा न गन्तव्या सर्व्ववर्णेषु कर्हिचित् । नहीदृशमनायुष्य' लोके किञ्चन विद्यते । यादृश पुरुषस्येह परदारोपसेवनम् । यावन्तो रोमकूपा स्यु स्त्रीणां गात्रेषु निर्म्मिता । तावद्वर्षसहस्राणि नरक पर्य्युपासते । प्रसाधनञ्च केशानामञ्जन दन्तधावनम् । पूर्व्वाह्ण एव कार्य्याणि देवतानाञ्च पूजनम् । पुरीषमूत्रे नोदीक्षेन्नाधितिष्ठेत् कदाचन । नातिकल्प नातिसाय न च मध्यन्दिने स्थिते । नाज्ञातै सह गच्छेत नैकोन वृषलै सह । पन्थादेयो ब्राह्मणाय गोभ्यो राजभ्य एव च । वृद्धाय भारतप्ताय गर्भिण्यै दुर्ब्बलाय च । प्रदक्षिण प्रकुर्व्वीत परिज्ञातान् वनस्पतीन् । चतुष्पथान् प्रकुर्व्वीत सर्व्वानेव प्रदक्षिणान् । मध्यन्दिने निशाकाले अर्द्धरात्रे च सर्व्वदा । चतुष्पथ न सेवेत उभे सन्ध्ये तथैव च । उपानहौ च वस्त्रञ्च धृतमन्यैर्न धारयेत् । ब्रह्मचारी च नित्य स्यात् पाद पादेन नाक्रमेत् । अमावास्यां पौर्णमास्यां चतुर्द्दश्याञ्च सर्व्वश । अष्टम्यां सर्व्वपक्षाणा ब्रह्मचारी सदा भवेत् । । वृथा मास न खादेत पृष्ठमास तथैव च । आक्रोश परिवादञ्च पैशुन्यञ्च विवर्ज्जयेत् । नारुन्तुद स्याम्न

र्मसंस्कारे च होमः प्रत्यक्षादयोऽपि । यथाऽत्र यावा यद् वर्जितेन न तां योनुकामीं यात्वोमाम् । याद् यावता यदपाविमर्शनमि दैवतानां योषिदि एतत्प्राप्य । यत्र नो वर्णेत निमर्शनि धाम् यद्विवो यायकेव यदेव । दोषते यावर्जीवेत् सर्व यत्पुना यवम् । याया पुष्प्या सिद्ध च यदोपवि यावयवम् । यदिर्यावियो यारायाविरत्यमि यदीरव । यावयवाद न विर्तते यको दूर्दयतो हि च । होमायानविकितायाम् विद्या-योनाम् निमर्दितात् । याद्वविवहोमाय यज्ञदीनाय यामिवेत् । यामिनम वैदिमिदाय देयागाय प्रयमम् । देवतास्थाभिधानाद् दैवताद् वरिवर्जयेत् । यत्र एक योयक्षेत् युवो नैव विवक्षयेत् । यक्ष्यन् एतामिमाम् विवाहे यात्रम् यवम् । न प्रावृषायाम् वर्णयेत् यय यावि न विदिवेत् । विवि यवस्य न भूयायस्यया युम दिनशो । यथा पुनरुवीवे तु एवामायस्य या युम । यायमावायम् कुर्वात् यायामुले योवमवे यथा । योषि देवा यत्रिवावि याज्ञवल्क्यायमादम् । यायमार्जिवि विस यद् यावा यवहते । यजायते यवर्ज यवि यत्पुवो यायवयवा । यायार्थ न प्रदर्त्त देवाकरत् प्रयवतेत् । *निवसन्ति यविवर्तितुर्वो प्रयोग निमन्त्रा ।* यायादो प्रत्यायस्य विवसेत् यवावदेत् । न यायादिव्यायी यार् यायविवो यथा यवेत् । यायाविरयमाय भूम विवाविरामेत् । यायाविवय यायम यथाविनदृते यवत् । यर्वदेवयायादाति यर्वमेवायावि निवला । ययमेवयायादाति यर्वमावि विवर्जयेत् । यदयुयम यत्र वीर्य कुर्वात् ययाविय । याकल्य यायदोयद यायदेवयायायम् । यायच्या देवपुरावे यावियवेत् यदायय । यायाव तु पुर इह यार्विव या विवययम् । यवसोयो न यादरो यविवो यविवयदरी । न यायायी विर्व यमेवर्विनी यायवदायय । यदवविदा न यवेन यथा प्रययविदा च च । यायविदाद यर्वदेवायदया इविवायिदा । न यय यायर्वि च यवते प्रयवीच च । यायदोवे न वैवूय न च विवयदायय । न यार्वि यर्ते तु यायेव ययायदायदि यावियये । यायव्य यदायव न प्रवर्तेयया यद । न यय यविदिव यायाय विवायो यदायय । याया न यायययमत या यार्वि इविवयाम । न यादविव्य एवाया याया यायो न विर्दवेत् । न यराविविदावि विवा वैवेन यायया ।

यवव यावदवेव न यविव्वारादीव च । यदव्या च यंयायो न कुर्वीत यदायव । योदुवयेव हरीतह वेदे यायव यार्वियवे । यये पुनरादौरे तु याद् कुर्वात् यदायव । यय युकुवायद निर्वेव युवेदः । युवा याय यथा निर्विवे इवा यवियावर्जित । न प्रयो विवायवोयादायवोऽयवपयम् । यवयवेद यथा युवा यार्विवयायेत् । । यायुव प्रयुवो वहे यवव इविवायया । यय यवयद्यो युवे याव वहु यद पुत्र । यार्विवायव योवेन यर्यायाम् याययायव येद । यायावि चैव यवीवि यावि यायिये यथा । याविदि पुत्रं याद वियवयवायविया । यवव यावा याये पूरवा यदिवयवेत् । यार्विहोवाय कुर्वीत या-विवयवि च यादवत् । विवदवादि यावेद न तु यवयद् यदायव । पुम योविवया यायं न यवि न योवये । याद यायद यद्वीत याईयायद यविवेत् । याद यायद युवायी प्रयांया वीवदे यवम् । योवि देवोवि योविद यायवेन यदायव । यावि यां याद्धवायेव यथा या पूर्व जीवये । योवि देवोवि योविद यदायव यथा दव । यर्वायवदूयवो यव ययावि च यर्वव । यद्वीं *याया यायवाय पुना यावि यावयि ।* यार्व प्रायाविवाद्धर्यो इयवाम् प्रविवयावे । यविवादेव इयाय दद्यायं यावये यवम् । यवाइविवायीय यवायं प्रयोऽविवाय । न यायीयायवे विवे विवयेयद यव-वेद । वैवयायेच योव्यम न यय यायवयवि । य-वर्ज वैव यवन न योविवोऽपि यविवेत् । यविवो नय वेवोऽपि यर्ये यायायदायवया । वैवये यहा-योव विवयवेदाय विवर्जयेत् । न यंयवाय्ये यायविवा यवद वैवायव विद । न यावीवय विद यावा ययायद्यावयुविद्यवे । विद यावय वैव याद् विविद यवि यायेद् विवयद न यायीयायवायवीवदि याते । यायावयेययोविदो यायीयेव यदायव । याते च पूविवलेय च ययायविव च विवयेत् । यव यावा ययोहोदा योयवावि इवादिव । यायुवव ययावि ययायायारे यथा च यविवा यदवि यायायवावि यवावि । यवायवयायायवेऽपि योयायर्जवि हिंवा । यवायेदा यदयाव यायुव यविवीवते । यवायुयो इयावाये यायायीय यदायव । प्रवादिव यवावर्वम् यविवायु यवि हिंवा । ये वेद्यवि च यव्यार्थे ते यवर्थेव

गतायुष । उभे मूत्रपुरीषे तु दिवा कुर्य्यादुदङ्मुख । दक्षिणाभिमुखो रात्रौ तथा ह्यायुर्न रिष्यते । त्रीन् कृशान्नावजानीयाद्दीर्घमायुर्जिजीविषु । ब्राह्मण क्षत्रिय सर्प सर्वे ह्याशीविषास्त्रय । दहत्याशीविष क्रुद्धो यावत् पश्यति चक्षुषा । क्षत्रियोऽपि दहेत् क्रुद्धो यावत् पश्यति तेजसा । ब्राह्मणस्तु कुलं हन्याद्ध्यानेनावेक्षितेन च । तस्मादेतत्त्रय यत्नादुपसेवेत पण्डित । गुरुणा चैव निर्ब्बन्धो न कर्त्तव्य कदाचन । अनुमान्य प्रसाद्यश्च गुरु क्रुद्धो युधिष्ठिर ! । सम्यङ्मिथ्याप्रवृत्तेऽपि वर्त्तितव्य गुराविह । गुरुनिन्दा दहत्यायुर्मनुष्याणा न सशय । दूरादावसथान्मूत्र दूरात् पादावसेचनम् । उच्छिष्टोत्सर्ज्जन चैव दूरे कार्य्य हितैषिणा । रक्तमाल्य न धार्य्य स्यात् शुक्ल धार्य्यन्तु पण्डितै । वर्ज्जयित्वा तु कमल तथा कुवलय प्रभो ! । रक्त शिरसि धार्य्यन्तु तथा वानेयमित्यपि । काञ्चनीयाऽपि माला या न सा दुष्यति कर्हिचित् । स्नातस्य वर्णक नित्यमार्द्रं दद्याद्विशाम्पते ! । विपर्य्यय न कुर्व्वीत वाससो बुद्धिमान्नर । तथा नान्यधृत धार्य्य न चापदशमेव च । अन्यदेव भवेद्वास शयनीये नरोत्तम ! । अन्यद्रथ्यासु देवानामर्च्चायामन्यदेव हि । प्रियङ्गुचन्दनाभ्याञ्च विल्वेन तगरेण च । पृथगेवानुलिम्पेत केशरेण च बुद्धिमान् । उपवासञ्च कुर्व्वीत स्नात शुचिरलङ्कृत । पर्व्वकालेषु सर्व्वेषु ब्रह्मचारी सदा भवेत् । समानमेकपात्रे तु भुञ्जेन्नान्न जनेश्वर ! । आलीढया परिज्ञात न शयीत कदाचन । तथा नोद्धृतसाराणि प्रोक्षित नाप्रदाय च । न सन्निकृष्टो मेधावी नाशुचेर्न च सत्सु च । प्रतिषिद्धान्न धर्म्मेषु भक्ष्यान् भुञ्जीत पृष्ठत । पिप्पलञ्च वटञ्चैव शणशाक तथैव च । उडुम्बर न खादेच्च भवार्थी पुरुषोत्तम ! । आज्य गव्य तथा मास मायूरञ्चैव वर्ज्जयेत् । वर्ज्जयेच्छुष्कमासञ्च तथा पर्य्युषितञ्च यत् । न पाणौ लवण विद्वान् प्राश्नीयान्न च रात्रिषु । दधिसक्तून् भुञ्जीत वृथामासञ्च वर्ज्जयेत् । साय प्रातश्च भुञ्जीत नान्तराले समाहित । बालेन तु न भुञ्जीत परश्राद्ध तथैव च । वाग्यतो नैकवस्त्रश्च नासविष्ट कदाचन । भूमौ सदैव नाश्नीयान्नानासीनो न शब्दवत् । तोयपूर्व्व प्रदायान्नमतिथिभ्यो विशेषत । पश्चाद्भुञ्जीत मेधावी न चाप्यन्यमना नर । समानमेकपङ्क्त्यान्तु भोज्यमन्न नरेश्वर ! । विष हालाहल भुङ्क्ते योऽप्रदाय सुहृज्जने । पानीय पायस सक्तून् दधि सर्पिर्म्मधून्यपि ।

निरस्य शेषमेतेषा न प्रदेयन्तु कस्यचित् । भुञ्जानो मनुजव्याघ्र ! नैव शङ्का समाचरेत् । दधि चाप्यनुपान वै कर्त्तव्यञ्च भवार्थिना । आचम्य चैकहस्तेन परिस्राव्य तथोदकम् । अङ्गुष्ठ चरणस्याथ दक्षिणस्यावसेचयेत् । पाणि मूर्द्ध्नि समाधाय स्पृष्ट्वा चाग्नि समाहित । ज्ञातिश्रैष्ठ्यमवाप्नोति प्रयोगकुशलो नर । अद्भि प्राणान् समालभ्य नाभि पाणितले तथा । स्पृशंश्चैव प्रतिष्ठेत न चाप्यार्द्रेण पाणिना । अङ्गुष्ठस्यान्तराले च ब्राह्म तीर्थमुदाहृतम् । कनिष्ठिकायाः पश्चात्तु देवतीर्थमिहोच्यते । अङ्गुष्ठस्य च यन्मध्य प्रदेशिन्याश्च भारत ! । तेन पित्र्याणि कुर्व्वीत स्पृष्ट्वापो न्यायतस्तथा । परापवाद न ब्रूयान्नाप्रियञ्च कदाचन । न मन्यु कश्चिदुत्पाद्य पुरुषेण भवार्थिना । पतितैस्तु कथा नेच्छेद्दर्शनञ्च विवर्ज्जयेत् । ससर्ग न च गच्छेत तथायुर्विन्दते महत् । न दिवा मैथुन गच्छेन्न कन्या न च बन्धकीम् । न चास्नाता स्त्रिय गच्छेत्तथायुर्व्विन्दते महत् । स्वे स्वे तीर्थे समाचम्य कार्य्ये समुपकल्पिते । त्रि पीत्वापो द्वि प्रमृज्य कृतशौचो भवेन्नर । इन्द्रियाणि सकृत् स्पृश्य त्रिरभ्युक्ष्य च मानव । कुर्व्वीत पित्र्य दैवञ्च वेददृष्टेन कर्म्मणा । ब्राह्मणार्थे च यच्छौच तच्च मे शृणु कौरव ! । पवित्रञ्च हितञ्चैव भोजनाद्यन्तयोस्तथा । सर्व्वशौचेषु ब्राह्मेण तीर्थेन समुपस्पृशेत् । निष्ठीव्य तु तथा क्षुत्वा स्पृश्यापो हि शुचिर्भवेत् । वृद्धो ज्ञातिस्तथा मित्र दरिद्रो यो भवेदपि । गृहे वासयितव्यास्ते धन्यमायुष्यमेव च । गृहे पारावता धन्या शुकाश्च सहसारिका । गृहेष्वेते तु पापाय तथा वै तैलपायिका । उद्दीपकाश्च गृध्राश्च कपोता भ्रमरास्तथा । निविशेयुर्यदा तत्र शान्तिमेव तदाचरेत् । अमङ्गल्यानि चैतानि तथोत्क्रोशा महात्मनाम् । महात्मनोऽतिगुह्यानि न वक्तव्यानि कर्हिचित् । अगम्याश्च न गच्छेत राज्ञ पत्नी सखी तथा । वैद्याना बालवृद्धाना भृत्यानाञ्च युधिष्ठिर ! । बन्धूना ब्राह्मणानाञ्च तथा शारणिकस्य च । सम्बन्धिनाञ्च राजेन्द्र ! तथायुर्विन्दते महत् । ब्राह्मणस्थपतिभ्याञ्च निर्म्मित यन्निवेशनम् । तदावसेत् सदा प्राज्ञो भवार्थी मनुजेश्वर ! । सन्ध्याया न स्वपेद्राजन् ! विद्या न च समाचरेत् । न भुञ्जीत च मेधावी तथायुर्व्विन्दते महत् । नक्त न कुर्य्यात् पित्र्याणि भुक्त्वा चैव प्रसाधनम् । पानीयस्य क्रिया नक्त न कार्य्या भूतिमिच्छता । वर्ज्जनीयाश्च वै नित्य सक्तवो निशि भारत ! । शेषाणि चान्

विपरिवर्त्तमानेन मयेति” सा०कौ० “तद्वाक्यात् तेन ब्राह्मायु काला द्वयगुणिता ”३१०४४००००००००००० तस्यायुः। अथ मनूनामायु प्रमाणम् । “युगानां सप्ततिः सैका मन्वन्तरमुदाहृतम्” सू० सि० । चतुर्युगमानञ्च ४३२००००तच्च७१गुणितम् ३०६७२००००सौरवर्षा ए-कैकमनूनामायु काल । मार्कण्डेयस्य सप्तकल्पान्तजीवितेत्युक्तेः ४३२०००००० सप्तभिर्गुणितम् ३०२४००००००० तस्यायु काल । देवानामायुस्तु ब्राह्मदिनमानम् “यदा स देवो जागर्त्ति तदेदं चेष्टते जगत् । यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति” मनूक्तेः ब्राह्मदिनपर्य्यन्त तेषां स्थायित्वम् “कर्म्मात्मनाञ्च देवानां सोऽसृजत् प्राणिनां प्रभुः” इति मनुना कल्पादौ तेनैव तेषां सृष्टत्वोक्तेः प्रति-कल्पेऽपि तथैव सृष्टत्वमिति । एवं युगभेदेन नराणामायुर्भेद मनुनोक्त । “अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः । कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः” तेन सत्ययुगे ४०० वर्षा । त्रेतायां ३००वर्षा । द्वापरे २००वर्षा । कलौ शतं वर्षा । पुराणान्तरे सत्यादिषु लक्षायुरयुतशतशत-पर्य्यायुरुक्ति मनुविरोधादपार्थैव । सत्कर्म्म भिक्षु माघा-मासतपसादिभि रसायनादिभिश्चायुर्वर्द्धते तच्चायुर्द्वष्टिशब्दे ७७५पृष्ठे उक्तम् । तेन दशरथादीनां दशवर्षसहस्राज्य-करणं रामायणोक्तं सङ्गच्छते । सत्कर्म्माभिप्रायेणैव पुराणवचनं लक्षाद्यायुर्द्वबोधक मन्तव्यमिति तु युक्तम् । तत्र जातकप० उक्तं नरगजयो ,१२० वर्षा । अश्वस्य दन्तसंख्यया । ३२वर्षा वा । गोमहिषादे २४ वर्षा खरो-ष्ट्रयो २५ वर्षा । शुन १२ वर्षा व्याघ्रादे १६वर्षा परमायु । तत्र नरस्य शतायुष्ट्वस्मृत्युक्तावपि विंशोत्त-रीयविभागार्थमिष्ट १२० वर्षाणिरिति बोध्यम् ।

आयोग पु० आ+युज–घञ् । गन्धमाल्योपहारे, २व्यापारे ३रोधे ४सम्यक्सम्बन्धे च “शरत्वे कर्स्मिकार्य्ये कियुक्तेन उपुष्पितं” । स देशोऽभ्रमरायोग प्रदीप्त इव लक्ष्यते” रामा०

आयोगव पुस्त्री० अयोगव एव स्वार्थे अण् । वैश्यकन्यायां शूद्रेणोत्पादिते जातिभेदे । “शूद्रादायोगव क्षत्ता चाण्डालश्चाधमो नृणाम् । वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः” “आयोगवोऽय क्षत्ता च चाण्डालश्चाधमो-नृणाम् । प्रातिलोम्येन जायन्ते शूद्रादपसदास्त्रयः” इति च मनु “मत्स्यघातो निषादानां तष्टिस्त्वायोगवस्य च” मनूक्तम् काष्ठतक्षण तस्य वृत्तिः। स्त्रियां जातित्वात् ङीप्

आयोजन न० आ+युज–ल्युट् । १उद्योगे, २आहरणे च ।

आयोजित त्रि० आ+युज–णिच्–क्त । १कृताहरणे २सम्यक् सम्पादिते च “कुसुमायोजितकार्म्मुक मधु” कुमा० ।

आयोद पु० अयोदस्यापत्यम् वा० अण् । धौम्ये मुनौ । “एतस्मिन्नन्तरे कश्चिदृषिर्धौम्यनामायोदस्तस्य शिष्यास्त्रयो बभूवुरुपमन्युरारुणिर्वेदश्चेति” भा०आ०३अ० ।

आयोधन न० आ+युध+आधारे ल्युट् । १युद्धस्थाने । “आयोधने स्यायुकमस्त्रजातम्” भट्टि “आयोधने कृष्णगतिं सहायम्” रघु । “आयोधनाग्रसरतां त्वयि वीर ! याते” रघु । भावे ल्युट । २योधने, युद्ध-क्रियायाम् ।

आर पु० आ+ऋ–कर्त्तरि संज्ञायां घञ् । १मङ्गलग्रहे, २शनिग्रहे, “आरे खस्थे चतुष्पाद्भ्रोभयम्” नील०ता०तत्र मङ्गलस्य वक्रगत्वात् शनेश्च स्वभावेन मन्दगतित्वात् तथात्वम् कुजस्य त्रिकोणाकारत्वादपि तथात्वम् ३मधुराम्लफले वृक्ष-भेदे च । ४प्रान्तभागे ५कुरुजलोहे ७पित्तले च न० । अरा एव स्वार्थे वा अण् । ८कोणे । कोणस्य चक्राकार-मध्यशाकारवत्त्वात् तथात्वम् । द्वादशारचक्र षोडशार-चक्रम् । “विन्दुत्रिकोणवसुकोणदशारयुग्मम्–चोक्रमेत-दुदितं परदेवतायाः” तन्त्रम् । “आरान्तरेणापपतत् शक्ति-र्याङ्क क्षणेन च” इति भा०आ०२२अ० । भावे घञ् । ९गमने पु० । आ+ऋ–कर्म्मणि घञ् । १०दूरे च दूरस्थस्य यत्नेन प्राप्यत्वात् तथात्वम् । “इषुधिस्त्व-ऽऽरे अस्मन्निधेहि” यजु०१६,१२, “आरे दूरे” वेददी० । “आरे बाधस्व दुच्छुनाम्” य०१९,३८,

आरकूट पु०न० । आर पित्तलं कूटयति स्तूपीकरोति अच् १पित्तलाभरणे । “किमारकूटाभरणेन न स्त्रिय” इति नैषधम् । आरमतिभ्रंश कूट्यते दह्यते कूट–दाहे कर्म्मणि घञ् । २पित्तलमात्रे च तस्यातिशयदाहस-हत्वात् तथात्वम् ।

आरक्त पु० ईषत् रक्तः प्रा०स० । १ईषद्रक्तवर्णे २तद्वति ३सम्यगनुरक्ते च त्रि० । भावे क्त । ४अनुरागे न०

आरम्भ पु० आ+रभ–अच् । १हस्तिकुम्भाध स्थले, “आर-भमन्दमनमत्य स्फुपि शितायाम्” माघ २हस्तिमस्तक चर्म्मणि, ३सैन्ये च । ४रचके त्रि० । “शतसाहस्रमारब्ध अध्वर्गं रचयां कपि” भट्टि० । “तेषामारम्भभूतन्तु पूर्व्वं देव नियोजयत्” मनु । भावे घञ् । ४रचायाम् पु० “रक्षासि हि विदुर्म्मनि आङ्गमारब्धवर्जितम् । भावे च । आरब्धा तत्वार्थे स्त्री रमा च वैदिकक्रमादौ यतरपादिक्षेपेण

[illegible] ।

आरम्भ पु० आ+रभ [illegible] । (गो शब्द) [illegible] ।
"आरभतो [illegible] [illegible]" इति [illegible] ।

आरम्भमात्रे [illegible] । [illegible] ।

आरम्भ [illegible] । "[illegible]" [illegible] ।

आरम्भ [illegible] ।

आरट त्रि० आरटति आ+रट-अच् । [illegible] ।

आरट्ट पु० आरटति [illegible] आ+रट [illegible] । [illegible] ।

आरकूट पु० आर [illegible] । (आरक) [illegible] ।

आरवि पु० आ+रु-णिच् [illegible] ।

आरग्वध पु० आरग्वो [illegible] । [illegible] ।

आरण्य त्रि० आरण्ये [illegible] "[illegible]" [illegible] ।

[illegible] "[illegible]" [illegible] ।

आरण्यक त्रि० आरण्ये [illegible] । [illegible] "[illegible]" [illegible] ।

शाखाशाखारण्यकानि च। विपाद्य कदलीस्तम्भं सारं दृगिरे न ते' इति भा०या० १८अ०। ४अरण्यगेये सामभेदे च। स्वार्थे कन्। उक्तार्थे भारतान्तर्गते ५पर्वनि "एतदारण्यकं पर्व्व भा०व्या०प०१अ०। आरण्यककाण्डम्। रामायणान्तर्गते ईकाण्डभेदे

आरण्यकुक्कुट पु स्त्री० अरण्ये भव आरण्यः कुक्कुटः कर्म्म०। वनकुक्कुटे "आरण्यकुक्कुट स्निग्धो वृंहणः श्लेष्मणो गुरुः। वातपित्तक्षयवमीविषमज्वरनाशनः' इति भा० प्र०तन्मांसगुणा उक्ताः। स्त्रियां जातित्वात् ङीष्।

आरण्यगान न० आरण्ये वनगेयं गानम्। सामवेदान्तर्गते गानग्रन्थभेदे तस्यारण्ये गेयत्वात् तथात्वम्।

आरण्यपशु पु० कर्म्म०। स्मृत्युक्ते महिषादौ सप्तविधे १पशौ आरण्यपशब्दे विवृतिः।

आरण्यमुद्ग पु०नि०कर्म०। वनमुद्गे। आरण्यमुद्गस्येवाकारः पर्णोऽस्यास्याः अच् टाप्। (मुगानी) मुद्गपर्ण्यां स्त्री राजनि०

आरण्यराशि पु०नि०कर्म्म०। आरण्यशब्दोक्ते १सिंहे २मकरादिमावें द्विसे ३मेषे ४वृषे च राशौ।

आरति स्त्री आ+रम–क्तिन्। १उपरमे, २निवृत्तौ च।

आरत त्रि० आ+रम–क्त। १उपरते२विरते च "अनारत तेन पदेषु लम्भिता' किरा०। [(एका)(वर्गौ) प्रभृतौ।

आरथ पु० ईषद्रथः प्रा०स०। एकाश्वेन गमनसाधने रथे

आरद्ध त्रि० आ+रध–क्त। संसिद्धे तिका० फिञ्। आरद्धायनि तदपत्ये पु स्त्री०।

आरनाल न० आर्च्छति आ+ऋ–अच्, आर नल–गन्धे घञ् आरो नालोगन्धो यस्य। काञ्जिके। "आरनालन्तु गोधूमैरामैः स्यान्निस्तुषीकृतैः। पक्वैर्वा सन्धितैस्तत्तु सौवीरसदृशं गुणे" भा०प्र०। "आरनालं दधि क्षीरं कन्दुपक्वं च सक्तवः। स्नेहपक्वं तक्रञ्च भुञ्जानस्यापि न दुष्यति" अत्रिस०। स्वार्थे कन्। आरनालकमप्यत्र।

आरब्ध त्रि० आ+रभ–क्त। कृतारम्भणे "प्रारब्धादन्यकार्य्याणां करणं परिवर्त्तकम्" सा०द०। "अनारब्धकार्य्ये एव तु" इत्यादि शा०सू०। यस्य कियदंश कर्त्तुमारेभे तादृशः पदार्थः आरब्धः। भावे क्त। २आरम्भे न०'व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्च्चने जपे। आरब्धे सूतकं न स्यादनारब्धे तु सूतकम्' तिथि०त० विष्णुः।

आरब्धफलयो सुकृतदुष्कृतयो तत्त्वज्ञानोत्पत्तावपि यावत्फलसमाप्ति न नाश इत्येतत् शा०सू०भा० स्थिरीकृतम् यथा "अन्यत्वेलोर्विद्यासामर्थ्यादशेषविनाशसिद्धेरवश्यभाविनो विदुषः शरीरपाते मुक्तिरित्यवधारयति। "अनारब्धकार्य्ये एव तु पूर्व्वे तदवधेः' शा० सू० "पूर्व्वयोरधिकरणयोर्ज्ञाननिमित्तः सुकृतदुष्कृतयोर्विनाशोऽवधारितः स किमविशेषेणारब्धकार्य्ययोर्भवत्युत विशेषेणानारब्धकार्य्ययोरेवेति विचार्य्यते तत्र "उभे हैवैष एतेन तरतीत्येवमादि' श्रुतावविशेषश्रवणादविशेषेणैव क्षय इत्येवं प्राप्ते प्रत्याह अनारब्धकार्य्ये एव त्विति। अप्रवृत्तफले एव पूर्व्वे जन्मान्तरसञ्चिते, अस्मिन्नपि च जन्मनि प्राक्ज्ञानोत्पत्तेः सञ्चिते च सुकृतदुष्कृते ज्ञानाधिगमात् क्षीयेते नत्वारब्धकार्य्ये सामिभुक्तफले, याभ्यामेतद्ब्रह्मज्ञानायतनजन्म निर्मितम्। कुतएतत्? "तस्य तावदेव चिरं यावन्न विमोक्ष्ये इति' शरीरपातावधिकरणात् क्षेमप्राप्तेः। इतरथा हि ज्ञानादशेषकर्मक्षये सति स्थितिहेत्वभावात् ज्ञानप्राप्त्यनन्तरमेव क्षेममश्नुवीत तत्र शरीरपातप्रतीक्षां नाचक्षीत। ननु वस्तुवलेनैवायमकर्त्रात्मवोधः कर्म्माणि क्षपयन् कथं कानिचित् क्षपयेत् कानि चिच्चोपेक्षेत नहि समानेऽग्निवीजसम्पर्के केषाञ्चिद्वीजशक्तिः क्षीयते केषाञ्चिन्न क्षीयते इति शक्यमङ्गीकर्त्तुमिति, उच्यते न तावदनाश्रित्यारब्धकार्यं कर्म्माशयं ज्ञानोत्पत्तिरुपपद्यते। आश्रिते च तस्मिन् कुलालचक्रवत् प्रवृत्तवेगस्यान्तराले प्रतिबन्धासम्भवाद्भवति वेगक्षयप्रतिपालनम्। अकर्त्रात्मबोधोऽपि हि मिथ्याज्ञानबाधनेन कर्म्माण्युच्छिनत्ति। बाधितमपि मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात् कञ्चित् कालमनुवर्त्ततएव। अपि च नैवात्र विवदितव्यं ब्रह्मविदा कञ्चित् कालं शरीरं ध्रियते न ध्रियत इति। कथं ह्येकस्य स्वहृदयप्रत्ययं ब्रह्मवेदनं देहधारणञ्चापरेण प्रतिक्षेप्तुं शक्येत। श्रुतिस्मृतिषु च स्थितप्रज्ञलक्षणनिर्द्देशेनैतदेव निरुच्यते। तस्मादनारब्धकार्य्ययोरेव सुकृतदुष्कृतयोर्विद्यासामर्थ्यात् क्षय इति निर्णयः भा०। "चक्रभ्रमवद्धृतशरीरः" सांख्यसूत्रे च फलजनकस्य कर्म्मणोनाशेऽपि चक्रजन्यवेगस्य चक्रनाशेऽपि स्थितिवत् देहरूपस्य कर्मफलस्य संस्कारात्मना स्थितिरित्यवधारितम्। यथा च आरब्धफलस्य कर्म्मणो यावदधिकारस्थितिस्तथा निर्णीतं शा०सू०भा० ३अ०३पादे यथा "यावदधिकारमवस्थितिराधिकारिकाणाम्" शा०सू०"विदुषो वर्त्तमानदेहपातानन्तरं देहान्तरमुत्पद्यते न वेति चिन्त्यते। ननु विद्यायाः साधनभूतायाः सम्पत्तौ कैवल्यनिर्वृत्तिः स्यान्नवेति नेयं चिन्तोपपद्यते। न हि पाकसाधनसम्पत्तौ

प्रेयसा वत्स । माह्मणात्मत्वेन प्रमित क्षेमाय दर्पोमम" । मनोगमत्रासनिष्क्रान्तिदुर्गविप्लवसम्भवम् । अश्वपातनमित्युक्तम् । यथा कल्परावणे षष्ठेऽङ्के । प्रविश्य सम्भ्रमेण पुरुष इत्यत प्रभृति निष्क्रमणपर्य्यन्तम् । सर० क० उक्ते शब्दालङ्कारभेदे २वृत्तिभेदे च सा च २८८पृष्ठे दृश्या । आर सामर्थ्येन गामी भट । ३शूरे वीरे पु० हेमचन्द्र ।

आरभ्य अव्य० आ+रभ–ल्यप् । १उपक्रम्येत्यर्थे "आरभ्य तस्मा दशमीञ्च यावत् सपूजयेत् पर्व्वतराजपुत्रीम्" दुर्गो०त०पु० "अनारभ्याधीतत्वात्"मीमांसा । कर्म्मणि क्यप् । २आरम्भणार्हे आरम्भणीये त्रि० ।

आरमण न० आ+रम–भावे ल्युट् । १आरामे, विश्रामे आरम्यतेऽनेन करणे ल्युट् । आरतिसाधने "स आत्मनारमणं नाविन्दत्" तैत्ति० "चतुर्ष्वेतेष्वारमणे कुरुत" शत० ब्रा० ।

आरम्बण न० आ+लबि–ल्युट् वेदे लस्य र० । आलम्बने "तथात्मान्यन्तरिक्षेऽनारम्बणान्यादायात्मानं परियन्ति" छा०उ० "अनारम्बणानि अनालम्बनानि" भा० "यदिदमन्तरिक्षमनारम्बणमिव केनाक्रमेण यजमानः स्वर्गलोकमाक्रमेत्" वृ०उ० ।

आरम्भ पु० आ+रभ घञ् मुम् । १उद्यमे २त्वरायां स्वार्थं परार्थं वा ३स्पृहार्थादिसम्पादनव्यापारे ४उपक्रमे प्रथमकृतौ ५प्रस्तावने ६वधे ७दर्पे च । "अनारम्भोऽपि परगृहसुखी सर्पवत्" सा०द० "आरम्भे कर्म्मणां विभ । पुण्डरीक नमोऽस्तु ते" स्मृति "न कर्म्मणामनारम्भात् नैष्कर्म्यं पुरुषोऽश्नुते" गीता "सेनादिषूत्सोरर्य्येषामारम्भ प्रथमक्षणे" । इति म०त० व्यास "अयथाबलमारम्भ" माघ । "आगमे सदृशारम्भा आरम्भसदृशोदयः" इति रघु क्रियाकूटात्मकपाकादिक्रियाणां प्राथमिकव्यापारोपक्रमश्चारम्भ । श्रौतस्मार्त्तकर्म्मविशेषे अङ्गविशेषारम्भोऽपि प्रकृतकर्म्मारम्भस्तेन आरब्धत्वात् सूतकादे प्रतिबन्धकत्वम् । यथा "आरम्भोवरणं यज्ञे सङ्कल्पोव्रतसत्रयोः । नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिष्क्रिया । तथा निमन्त्रणं श्राद्धे आरम्भः स्यादिति स्मृतिः आरब्धे सूतकं न स्यादिति"ति०त०विष्णु । द्रव्याणां द्रव्यान्तरेषु गुणानां गुणान्तरेषूत्पादने वैशेषिकोक्ते व्यापारे "द्रव्यारम्भश्चतुर्षु स्यात्" भाषा० कर्म्मणि घञ् । ८आरभ्यमाणे "फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव" रघु । "विलापिता रम्भ इवासतस्ते" कुमा० ।

आरम्भक त्रि० आरभते आ+रभ–ण्वुल् मुम् । १आरम्भकारके वैशेषिकादिमतसिद्धे महत्त्वाद्युपचयाय अवयवानां २विजातीयसंयोगे च । "तत आरम्भकसंयोगनाश" तक्का० आरम्भवादशब्दे शा०भा०उदा० ।

आरम्भण न० आ+रभ–ल्युट् मुम् । २आरम्भशब्दार्थे कर्म्मणि ल्युट् । २आरभ्यमाणे च । यथा "सौम्यैकेन मृत्पिण्डेन विज्ञातेन सर्वमिदं मृण्मयं विज्ञातं भवति वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येव सत्यम्"छा०उ० "तदनन्यत्वमारम्भणशब्दादिभ्य" शा०सू० आरम्भणं प्रयोजनमस्य अनुप्रवचना० अण् । ३आरम्भणप्रयोजनपदार्थे त्रि० । आरभ्यतेऽनेन करणे ल्युट् । ४उपादानकारणे "किंस्विदासीदधिष्ठानमारम्भणं कतमत् स्वित्कथासीत्" यजु० १७,१८ । "लोके हि घटादि चिकीर्षु कुलालो गृहादिकं स्थानमधिष्ठाय मृद्रूपेणारम्भकद्रव्येण चक्राद्युपायैर्निष्पादयति ईश्वरस्य तदाक्षिप्यते । स्विदिति वितर्के द्यावाभूमी सृजतोविश्वकर्म्मणोऽधिष्ठानं किमासीत् निवासस्थानम्, अचेतना निरधिष्ठाना किमपि न कुर्वन्ति । स्विदिति वितर्के आरम्भणं कतमत् किमासीत् आरभ्यतेऽनेनेति आरम्भणमुपादानकारणम् मृदिव घटानाम्" वेददी० ।

आरम्भणीय त्रि० आ+रभ–शक्यार्थे अनीयर् मुम् । यस्य आरम्भं कर्त्तुं शक्यते तस्मिन् प्रयोजनादियुक्ते पदार्थे "तत्पुनः शास्त्रमारम्भणीयमिति" विवरणोपन्यास ।

आरम्भवाद पु० आरम्भस्य वाद परीक्षापूर्व्वक कथाभेद । वैशेषिकाद्यभिमते परमाणुभ्य एव जगदुत्पत्तिनिर्णायके वादे । स च "द्रव्याणि द्रव्यान्तरमारभन्ते गुणाश्च गुणान्तरमिति" वै०सू०दर्शित "आत्माकाशाणुसम्भूत कारणं पूर्व्वमिष्यते । कुलालादिवदज्ञस्तु घटवज्जन्मनाशभाक् । पृथिव्यम्भोऽग्निवायूनां कर्म्मसंयोजिताणव । द्व्यणुकादिक्रमेणाण्डमारभन्ते इद महदिति" हि तेषां वाद । शा०भाष्ये तु तदेतन्मतमुत्थाप्य निराकृतं यथा "परमाणुकारणवाद इदानीं निराकर्त्तव्य । तत्रादौ तावद्योऽणुकारणवादिना ब्रह्मवादिनि दोष उत्प्रेक्ष्यते स प्रतिसमाधीयते । तत्रायं वैशेषिकाणामभ्युपगम कारणद्रव्यसमवायिनोगुणा कार्य्यद्रव्यसमानजातीयं गुणान्तरमारभन्ते शुक्लेभ्यस्तन्तुभ्य शुक्लस्य पटस्य प्रसवदर्शनात्तद्विपर्य्ययाऽदर्शनाच्च । तस्माच्चेतनस्य ब्रह्मणो जगत्कारणत्वेऽभ्युपगम्यमाने कार्य्येऽपि जगति चैतन्यं समवेयात् तददर्शनात् । न चेतनं ब्रह्म जगत्कारणंभवितुमर्ह-

[illegible]

द्व्यणुकादिक्रमेण वायुरुत्पद्यते एवमग्निः एवमापः एवं पृथिवी एवं शरीरं सेन्द्रियमित्येवं सर्वमिदं जगदणुभ्यः सम्भवति। अणुगतेभ्यश्च रूपादिभ्यो द्व्यणुकादिगतानि रूपादीनि सम्भवन्ति तन्तुपटन्यायेनेति काणादा मन्यन्ते। तत्रेदमभिधीयते विभागावस्थानां तावदणूनां संयोगः कर्मापेक्षोऽभ्युपगन्तव्यः कर्मवतां तन्त्वादीनां संयोगदर्शनात्। कर्मणश्च कार्यत्वान्निमित्तं किमप्यभ्युपगन्तव्यम् अनभ्युपगमे निमित्ताभावान्नाणुष्वाद्यं कर्म स्यात्। अभ्युपगमेऽपि यदि प्रयत्नोऽभिघातादिर्वा यथादृष्टं किमपि कर्मणो निमित्तमभ्युपगम्येत तस्यासम्भवान्नैवाणुष्वाद्यं कर्म स्यात् न हि तस्यामवस्थायामात्मगुणः प्रयत्नः सम्भवति शरीराभावात्। शरीरप्रतिष्ठे हि मनस्यात्मनः संयोगे सत्यात्मगुणः प्रयत्नो जायते। एतेनाभिघाताद्यपि दृष्टनिमित्तं प्रत्याख्यातव्यम्। सर्गोत्तरकालं हि तत्सर्वं नाद्यस्य कर्मणो निमित्तं सम्भवति। अथादृष्टमाद्यस्य कर्मणो निमित्तमित्युच्येत तत्पुनरात्मसमवायि वा स्यादणुसमवायि वा उभयथापि नादृष्टनिमित्तमणुषु कर्मावकल्पेत अदृष्टस्याचेतनत्वात्। नह्यचेतनं चेतनेनानधिष्ठितं स्वतन्त्रं प्रवर्त्तते प्रवर्त्तयति चेति साङ्ख्यपरीक्षायामभिहितम्। आत्मनश्चानुत्पन्नचैतन्यस्य तस्यामवस्थायामचेतनत्वात्। आत्मसमवायित्वाभ्युपगमाच्च नादृष्टमणुषु कर्मणो निमित्तं स्यात् असम्बन्धात्। अदृष्टवता पुरुषेणास्त्यणूनां सम्बन्ध इति चेत् सम्बन्धसातत्यात् प्रवृत्तिसातत्यप्रसङ्गः नियामकान्तराभावात्। तदेवं नियतस्य कस्यचित् कर्मनिमित्तस्याभावान्नाणुष्वाद्यं कर्म स्यात् कर्माभावात् तन्निबन्धनः संयोगो न स्यात् संयोगाभावाच्च तन्निबन्धनं द्व्यणुकादि कार्यजातं न स्यात्। संयोगश्चाणोरण्वन्तरेण सर्वात्मना वा स्यादेकदेशेन वा, सर्वात्मना चेदुपचयानुपपत्तेरणुमात्रत्वप्रसङ्गो दृष्टविपर्ययप्रसङ्गश्च प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यान्तरेण संयोगस्य दृष्टत्वात्। एकदेशेन चेत् सावयवत्वप्रसङ्गः। परमाणूनां कल्पिताः प्रदेशाः स्युरिति चेत् कल्पितानामवस्तुत्वादवस्त्वेव संयोग इति वस्तुनः कार्यस्यासमवायिकारणं न स्यात् असति चासमवायिकारणे द्व्यणुकादि कार्यद्रव्यं नोत्पद्येत। यथा चादिसर्गे निमित्ताभावात् संयोगोत्पत्त्यर्थं कर्म नाणूनां सम्भवति एवं महाप्रलयेऽपि विभागोत्पत्त्यर्थं कर्म नैवाणूनां सम्भवेत्। न हि तत्रापि किञ्चिन्नियतं तन्निमित्तं दृष्टमस्ति। अदृष्टमपि भोगप्रसिद्ध्यर्थं न प्रलयप्रसिद्ध्यर्थमिति अतो निमित्ताभावान्न स्यादणूनां संयोगोत्पत्त्यर्थं विभागोत्पत्त्यर्थं वा कर्म। अतश्च संयोगविभागायत्तयोः सर्गप्रलययोरभावः प्रसज्येत। तस्मादनुपपन्नोऽयं परमाणुकारणवादः। "समवायाभ्युपगमाच्च साम्यादनवस्थितेः" सू०। समवायाभ्युपगमाच्च तदभाव इति प्रकृतेनाणुवादनिराकरणेन सम्बध्यते। द्वाभ्याञ्चाणुभ्यां द्व्यणुकमुत्पद्यमानमत्यन्तभिन्नमणुभ्यामण्वोः समवैतीत्यभ्युपगम्यते भवता न चैवमभ्युपगच्छता शक्यतेऽणुकारणवादः समर्थयितुम्, कुतः? साम्यादनवस्थितेः। यथैव ह्यणुभ्यामत्यन्तभिन्नं सत् द्व्यणुकं समवायलक्षणेन सम्बन्धेन ताभ्यां सम्बध्यते एवं समवायोऽपि समवायिभ्योऽत्यन्तभिन्नः सन् समवायलक्षणेनान्येनैव सम्बन्धेन समवायिभिः सम्बध्येत अत्यन्तभेदसाम्यात् ततश्च तस्य तस्यान्योऽन्यः सम्बन्धः कल्पयितव्य इत्यनवस्था प्रसज्येत। नन्विह प्रत्ययग्राह्यः समवायो नित्यसम्बन्ध एव समवायिभिर्गृह्यते नासम्बद्धः सम्बन्धान्तरापेक्षो वा ततश्च न तस्यान्यः सम्बन्धः कल्पयितव्यो येनानवस्था प्रसज्येत। नेत्युच्यते। संयोगोऽप्येवं सति संयोगिभिर्नित्यसम्बन्ध एवेति समवायवन्नान्यं सम्बन्धमपेक्षेत। अथार्थान्तरत्वात् संयोगः सम्बन्धान्तरमपेक्षते, समवायोऽपि तर्ह्यर्थान्तरत्वात् सम्बन्धान्तरमपेक्षेत। न च गुणत्वात् संयोगः सम्बन्धान्तरमपेक्षते न समवायोऽगुणत्वादिति युज्यते वक्तुम् अपेक्षाकारणस्य तुल्यत्वात् गुणपरिभाषायाश्चातन्त्रत्वात्। तस्मादर्थान्तरं समवायमभ्युपगच्छतः प्रसज्येतैवानवस्था। प्रसज्यमानायां चानवस्थायामेकासिद्धौ सर्वासिद्धेर्द्वाभ्यामणुभ्यां द्व्यणुकं नैवोत्पद्येत तस्मादप्यनुपपन्नः परमाणुकारणवादः। "नित्यमेव च भावात्" सू०। अपि चाणवः प्रवृत्तिस्वभावा वा निवृत्तिस्वभावा वा उभयस्वभावा वा अनुभयस्वभावा वाऽभ्युपगम्येरन् गत्यन्तराभावात् चतुर्द्धापि नोपपद्यते। प्रवृत्तिस्वभावत्वे नित्यमेव प्रवृत्तेर्भावात् प्रलयाभावप्रसङ्गः। निवृत्तिस्वभावत्वेऽपि नित्यमेव निवृत्तेर्भावात् सर्गाभावप्रसङ्गः। उभयस्वभावत्वञ्च विरोधादसमञ्जसम्। अनुभयस्वभावत्वे तु निमित्तवशात् प्रवृत्तिनिवृत्त्योरभ्युपगम्यमानयोरदृष्टादेर्निमित्तस्य नित्यसन्निधानान्नित्यप्रवृत्तिप्रसङ्गः। अतन्त्रत्वेऽप्यदृष्टादेर्नित्याप्रवृत्तिप्रसङ्गः तस्मादप्यनुपपन्नः परमाणुकारणवादः। "रूपादिमत्त्वाच्च विपर्ययो दर्शनात्" सू०। सावयवानां द्रव्याणामवयवशो विभज्यमानानां यतः परो विभागो न सम्भवति ते चतुर्विधा रूपादिमन्तः परमाणवश्चतुर्विधस्य रूपा-

ख्याते २लौहशङ्खे । "आराग्रमात्रो ह्यवरोऽपि दृष्ट" इति श्रुति ३प्रतोदे च "या पूषन् ब्रह्मचोदनीमारां बिभर्ष्याघृणे" ऋ० ६,५,८,। "उद्यम्यारामप्रकायोत्थितस्य" माघ । "आरा प्रतोदम्" मल्लिनाथः ।

आराग्र न० आराया अग्रम्। १आराया अग्रे "आराग्रमात्रो ह्यवरोऽपि दृष्ट" इति श्रुतिः। "अग्रं चन्द्रक्षुरप्रादिधाराग्रमुपलक्ष्यते । आराग्रन्तु खस्य तेषां पुष्पफलादिभेदतः" इति हलायुधोक्ते २अर्द्धचन्द्राकारक्षुरप्राद्यस्त्रभेदे च ।

आराज्ञी स्त्री सम्यक् राजते आ+राज–कनिन् ङीप्। देशभेदे धूमा० देशवाचित्वात् वुञ्। आराज्ञक । तद्देशभवे त्रि० ।

आरात् अव्य० आ+रा बा० आति। १दूरे, २समीपे च। "आरात् दयितमिशावगादभारात्" माघ । "तमन्वमारादभिवर्त्तमानम्" रघु "विचिलसन्तं प्लवमानमारात्" भट्टिः

आराति पु० आ+रा–क्तिच्। शत्रौ । द्विरूपकोष ।

आरातीय त्रि० आरादुभव जात आगतो वा वृद्धत्वात् छ आराच्छब्दस्य वर्जनात् नाव्ययस्य टिलोप । १निकटदूरयोर्भवे २तत्र जाते ३ताभ्यामागते च ।

आरात्रिक न०अरात्रावपि निर्वृत्तं ठञ्। (आरति) नीराजनकर्म्मणि । दीपो हि रात्रावेव प्रदर्श्यते इह दिनेऽपि दर्श्यते इति तस्य तथात्वम् "ततश्च मूलमन्त्रेण दत्त्वा पुष्पाञ्जलित्रयम् । महानीराजनं कुर्य्यात् महावाद्यजयस्वनैः । प्रज्वालयेत्तदर्थञ्च कर्पूरेण घृतेन वा । आरात्रिकं शुभे पात्रे विषमानेकवर्त्तिकम्" हरि० विलासे तल्लक्षणादि । तस्य देहांशभेदे भ्रामणप्रमाणमपि तत्रोक्तं यथा "आदौ चतुः पादतले च विष्णोर्द्वौ नाभिदेशे मुखमण्डलैकम् । सर्वेषु चाङ्गेषु च सप्त वारान् आरात्रिकं भक्तजनस्तु कुर्यात्" । "शिरसि निहितभारं पात्रमारात्रिकस्य भ्रमयति मयि भूयस्ते कृपार्द्रः कटाक्षः" चतुःषष्ट्युपचारे शङ्करा०

आराधन न० आ+राध–ल्युट्। १पाके, २संसिद्धौ णिच्–ल्युट्। ३साधने ४प्राप्तौ ५तोषणे ६सेवने तोषणसेवनयो संसिद्धिहेतुत्वात् तथात्वम् "साध्वसमाराधनमपि रमणीयमस्याः" शकु०। "आराधनायास्य सखी समेताम्" कुमा०। आराध्यतेऽनेन णिच्–करणे ल्युट्। ७सेवासाधने "इदं तु ते भक्तिनम्रं सतामाराधनं वपुः" कुमा०। "सर्व्वस्य दैत्या, समतामपेत समत्वमाराधनमच्युतस्य" भाग० प्रह्लादोक्ति । [सेवायाम् ।

आराधना स्त्री आ+राध–णिच्–युच् स्त्रीत्वात् टाप्।

आराधनीय त्रि० आराधयितुम् शक्यः आ+राध–णिच्–शक्यार्थे अनीयर्। आराधनयोग्ये "सोऽहं कथं नाम तवाचरेयमाराधनीयस्य धृतेर्विघातम्" रघु ।

आराधय पु० आ+राध–णिच्–बा० श । आराधनकारके माध्य०भाषादौ प्रसिद्ध। आराधय्यम् आराधनकर्तृत्वे न०।

आराधयितृ त्रि० आ+राध–णिच्–तृच् । १परिचारके । २सेवके "नन्वयमेवाराधयिता जनस्तव समीपे वर्त्तते" शकु०।

आराधित त्रि०आ+राध–णिच्–क्त। सेविते। "नाराधितोयैः पुरुषः प्रधानः तेषां वृथा जन्म नराधमानाम्" भाग०।

आराम पु० आरम्यतेऽत्र आ+रम–आधारे घञ्। कृत्रिमवने १उद्याने "आत्मारामाविहितरतयोनिर्विकल्पे समाधौ" वेणी० आत्मा आरामश्च। धनञ्जयस्य पुंस्त्वात् शासनात् क्लीबत्वोक्तिः प्रामादिकी। "वाप्यारामतडागकूपभवनारम्भप्रतिष्ठाव्रतेत्यादि" मुहू० चि०। "क्षेत्रकूपतडागानामारामस्य गृहस्य च" "गृहं तडागमारामं क्षेत्रं वा भीषया हरन्" "तडागारामदाराणामपत्यस्य च विक्रयः" इति च मनुः "जलाशयारामसुरप्रतिष्ठा सौम्यायने जीवशशाङ्कशुक्रे। दृश्ये मृदुक्षिप्रचरध्रुवे स्यात् पक्षे सिते स्वर्क्षतिथिक्षणे वा रिक्तारवर्ज्ये दिवसेऽतिशस्ता" इत्युत्तर०टी०उक्ते षोड़शभिश्च रगणैः राराम इत्युक्ते २छन्दोभेदे च। आ+रम–भावे घञ्। ३आरतौ "योऽन्तःसुखोऽन्तरारामः" गीता। अन्तरात्मनि आरामोयस्येति विग्रहः "अघायुरिन्द्रियारामो मोघं पार्थ ! स जीवति" गीता। आरामकरणप्रकार "मत्स्य सू०" उक्तः यथा "प्रान्तच्छायाविनिर्मुक्ता न मनोज्ञा जलाशयाः। यस्मादतो जलप्रान्ते आरामान् विनिवेशयेत्। मृद्वी भूः सर्ववृक्षाणां हिता तस्यां तिलान् वपेत्। पुष्पितांस्तांश्च गृह्णीयात् कर्म्मैतत्प्रथमं भुवि। अरिष्टाशोकपुन्नागशिरीषाः सप्रियङ्गवः। मङ्गल्याः पूर्वमारामे रोपणीया गृहेषु वा। पनसाशोककदलीजम्बूलकुचदाड़िमाः। द्राक्षापालीवताश्चैव बीजपूरातिमुक्तकाः। एते द्रुमाः काण्डरोप्या गोमयेन प्रलेपिताः। मूलच्छेदेऽथवा स्कन्धे रोपणीया प्रयत्नतः। अजातशाखाञ्छिशिरे जातशाखान् हिमागमे। वर्षागमे च सुस्कन्धान् यथादिक् प्रतिरोपयेत्। घृतोशीरतिलक्षौद्रविड़ङ्गक्षीरगोमयैः। आमूलस्कन्धलिप्तानां सङ्क्रमेण विरोपणम्। शुचिर्भूत्वा तरौ पूजां कृत्वा स्नानानुलेपनैः। रोपयेद्रोपितश्चैव पत्रैस्तैरेव जायते। सायं प्रातश्च

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]